# LESSON 1 – OVERVIEW

*In the first lesson you will learn hot to introduce yourself and ask another person to introduce himself or herself to you. Such introduction or presentation is called* **paricayaḥ.**

*When you ask for someone's name, you use* **ṣaṣṭhī-vibhakti** *(genitive case):*

| | | | |
|---|---|---|---|
| *masc.* | भवतः | bhavataḥ | *your, of you (lit.: his)* |
| *fem.* | भवत्याः | bhavatyāḥ | *your, of you (lit.: her)* |

*The word* **bhavat** *(respected person) is used in* **prathamā-puruṣa** *(third person) for both third person (**he, she**) as for second person (**you** in majestic address). In the later sense it expresses general respect, it is not used only to address seniors.*

***Personal pronouns*** *are different for* **puṁliṅga***(masculine),* **strīliṅga** *(feminine) and* **napuṁsakaliṅga** *(neuter), as well as for* ***near by (this)*** *and* ***far away (that)****:*

***When a person or object is further away:***

| | | | |
|---|---|---|---|
| *m.* | सः | saḥ | *he (that)* |
| *f.* | सा | sā | *she (that)* |
| *n.* | तत् | tat | *it (that)* |

***When a person or object is nearby:***

| | | | |
|---|---|---|---|
| *m.* | एषः | eṣaḥ | *he (this)* |
| *f.* | एषा | eṣā | *she (this)* |
| *n.* | एतत् | etat | *it (this)* |

***Interrogatives:***

| | | |
|---|---|---|
| कः ? | kaḥ? | *Who (masc.)?* |
| का ? | kā? | *Who (fem.)?* |
| किम् ? | kim? | *What (neut.)?* |

**THERE IS, THERE ISN'T (3rd person sing. of verb to be)**

| | | |
|---|---|---|
| अस्ति | asti | *(there) is / (he, she, it) is* |
| नास्ति | nāsti | *(there) isn't / (he, she, it) isn't* |

**AVYAYAS (INDECLINABLE WORDS)**

There are many words in Sanskrit, that never change form, such as:

कुत्र ? kutra? *(where?),* अत्र atra *(here),* तत्र tatra *(there),* सर्वत्र sarvatra *(everywhere),*

अनयत्र anyatra *(elsewhere),* एकत्र ekatra *(at one place),* खलु khalu *(isn't it so?)*

# Lesson 1

नमो नमः ।

namo namaḥ.
*Respects, salutations.*

सर्वेषां स्वागतम् ।

sarveṣāṁ svāgatam.
*Welcome to all.*

संस्कृतम् अत्यन्तं सरला भाषा ।

saṁskṛtam atyantaṁ saralā bhāṣā.
*Sanskrit is a very easy language.*

संस्कृतेन सम्भाषणम् इतोऽपि सरलम् ।

saṁskṛtena sambhāṣaṇam ito 'pi saralam.
*Conversation in Sanskrit is even easier.*

वयं सर्वे अपि स्वल्पेन प्रयत्नेन नित्यजीवने संस्कृतस्य उपयोगं कर्तुं शक्नूमः ।

vayaṁ sarve api svalpena prayatnena nitya-jīvane saṁskṛtasya upayogaṁ kartuṁ śaknūmaḥ.
*With very little practice all of us will be able to use Sanskrit in everyday life.*

आगच्छन्तु ।

āgacchantu.
*Come [you all]!*

वयम् इदानीं संस्कृतसम्भाषणस्य अभ्यासं कुर्मः ।

vayam idānīṁ saṁskṛta-sambhāṣaṇasya abhyāsaṁ kurmaḥ.
*Now we [will] do exercise of spoken Sanskrit.*

---

मम नाम विश्वासः ।

mama nāma viśvāsaḥ.
*my name is Vishvasa.*

भवतः नाम किम्?

bhavataḥ nāma kim?
*What is your name?*

मम नाम उदयनः ।

mama nāma udayanaḥ.
*My name is Udayana.*

भवतः नाम किम्?

bhavataḥ nāma kim?
*What is your name?*

मम नाम शशिधरः ।

mama nāma śaśidharaḥ.
*My name is Shashidhara.*

भवत्याः नाम किम्?

bhavatyāḥ nāma kim?
*What is your (fem.) name?*

मम नाम प्रिया ।

mama nāma priyā.
*My name is Priya.*

भवत्याः नाम किम्?

bhavatyāḥ nāma kim?
*What is your (fem.) name?*

मम नाम श्रीलक्ष्मीः ।

mama nāma śrī-lakṣmīḥ.
*My name is Shri Lakshmi.*

उत्तिष्ठतु । पृच्छतु ।

uttiṣṭhatu. pṛcchatu.
*Stand up! Ask!*

भवतः नाम किम्?

bhavataḥ nāma kim?
*What is your name?*

मम नाम शशिधरः।

mama nāma śaśidharaḥ.
*My name is Shashidhara.*

उत्तमम्। उपविशतु।

uttamam. upaviśatu.
*Good! Sit down!*

पृच्छतु।

pṛcchatu.
*Ask!*

भवत्याः नाम किम्?

bhavatyāḥ nāma kim?
*What is your (fem.) name?*

मम नाम प्रिया।

mama nāma priyā.
*My name is Priya.*

उत्तमम्। बहुसमीचीनम्।

uttamam. bahu-samīcīnam.
*Good! Very good.*

भवतः। भवत्याः।

bhava**taḥ**. bhava**tyāḥ**.
*Your (masc.). Your (fem.).*

मम नाम किम्?

mama nāma kim?
*What is my name?*

भवतः नाम विश्वासः।

bhavataḥ nāma viśvāsaḥ.
*Your name is Vishvasa.*

संस्कृतेन कथं परिचयः करणीयः इति भवन्तः ज्ञातवन्तः।

saṁskṛtena kathaṁ paricayaḥ karaṇīyaḥ iti bhavantaḥ jñātavantaḥ.
*You have learned how the introduction to each other should be done in Sanskrit.*

---

*HINDI: So, we have learned when you ask a man you say "*bhava**taḥ**.*" And when you ask a woman you say "*bhava**tyāḥ**.*" Repeat after her, when she leaves the gap.*

---

उत्तिष्ठतु। आगच्छतु।

uttiṣṭhatu. āgacchatu.
*Stand up! Come!*

सः उदयनः। सः शशिधरः।

saḥ udayanaḥ. saḥ śaśidharaḥ.
*He [that] is Udayana. He [that] is Shashidhara.*

सः कः? सः उदयनः।

saḥ kaḥ? saḥ udayanaḥ.
*Who is he [that]? He [that] is Udayana.*

सः कः? सः शशिधरः।

saḥ kaḥ? saḥ śaśidharaḥ.
*Who is he [that]? He [that] is Shashidhara.*

उत्तमम्।

uttamam.
*Good!*

अभिनयं कुर्वन्तु, वदन्तु।

abhinayaṁ kurvantu, vadantu.
*Show and say!*

सः रामकृष्णः। सः कः?

saḥ rāmakṛṣṇaḥ. saḥ kaḥ?
*He [that] is Ramakrishna. Who is he [that]?*

सः रामकृष्णः।

saḥ rāmakṛṣṇaḥ.
*He [that] is Ramakrishna.*

सः राजेन्द्रप्रसादः। सः कः?

saḥ rājendra-prasādaḥ. saḥ kaḥ?
*He [that] is Rajendra-prasad. Who is he [that]?*

सः राजेन्द्रप्रसादः।

saḥ rājendraprasādaḥ.
*He [that] is Rajendraprasad.*

सः अम्बेडकरः। सः कः?

saḥ ambeḍakaraḥ. saḥ kaḥ?
*He [that] is Ambedakara. Who is he [that]?*

सः अम्बेडकरः।

saḥ ambeḍakaraḥ.
*He [that] is Ambedakara.*

उत्तमम्।

uttamam.
*Good!*

उत्तिष्ठतु। आगच्छतु।

uttiṣṭhatu. āgaccatu.
*Stand up! Come!*

भवत्याः नाम किम्?

bhavatyāḥ nāma kim?
*What is your (fem.) name?*

मम नाम प्रिया।

mama nāma priyā.
*My name is Priya.*

सा प्रिया। सा शारदा देवी।

sā priyā. sā śāradā devī.
*She [that] is priya. She [that] is Sharada devi.*

सा का?

sā kā?
*Who is she [that]?*

सा प्रिया।

sā priyā.
*She [that] is Priya.*

सा का?

sā kā?
*Who is she [that]?*

सा शारदा देवी।

sā śāradā devī.
*She [that] is Sharada devi.*

का प्रिया? सा प्रिया। का शारदा देवी? सा शारदा देवी।

kā priyā? sā priyā. kā śāradā devī? sā śāradā devī.
*Who [which] is Priya? She [that] is Priya. Who [which] is Sharada devi? She [that] is Sharada devi.*

सा चन्द्रिका। सा का?

sā candrikā. sā kā?
*She [that] is Chandrika. Who is she [that]?*

सा चन्द्रिका।

sā candrikā.
*She [that] is Chandrika.*

का चन्द्रिका? सा चन्द्रिका।

kā candrikā? sā candrikā.
*Who is Chandrika? She [that] is Chandrika.*

---

तत् फलम्। तत् पुस्तकम्। तत् कृष्णफलकम्।

tat phalam. tat pustakam. tat kṛṣṇaphalakam.
*It [that] is the fruit. It [that] is the book. It [that] is the blackboard.*

तत् किम्?

tat kim?
*What is it [that]?*

तत् कृष्णफलकम्।

tat kṛṣṇaphalakam.
*It [that] is the blackboard.*

तत् किम्?

tat kim?
*What is it [that]?*

तत् फलम्।

tat phalam.
*It [that] is the fruit.*

तत् किम्?

tat kim?
*What is it [that]?*

तत् पुस्तकम्।

tat pustakam.
*It [that] is the book.*

किं पुस्तकम्?

kiṁ pustakam?
*What [which] is the book?*

तत् पुस्तकम्।

tat pustakam.
*It [that] is the book.*

किं फलम्?

kiṁ phalam?
*What [which] is the fruit?*

तत् फलम्।

tat phalam.
*It [that] is the book.*

किं कृष्णफलकम्?

kiṁ kṛṣṇaphalakam?
*What [which] is the blackboard?*

तत् कृष्णफलकम्।

tat kṛṣṇaphalakam.
*It [that] is the blackboard.*

---

सः मञ्जुनाथः। एषः उदयनः।

saḥ mañjunāthaḥ. eṣaḥ udayanaḥ.
*He [that] is Manjunatha. He [this] is Udayana.*

एषः मञ्जुनाथः। सः उदयनः।

eṣaḥ mañjunāthaḥ. saḥ udayanaḥ.
*He [that] is Manjunatha. He [this] is Udayana.*

सः यतीशः। एषः श्रेयसः।

saḥ yatīśaḥ. eṣaḥ śreyasaḥ.
*He [that] is Yatisha. He [this] is Shreyasa.*

सः कः?

saḥ kaḥ?
*Who is he [that]?*

सः यतीशः।

saḥ yatīśaḥ.
*He [that] is Yatisha.*

एषः कः?

eṣaḥ kaḥ?
*Who is he [this]?*

एषः श्रेयसः।

eṣaḥ śreyasaḥ.
*He [this] is Shreyasa.*

उत्तमम्।

uttamam.
*Good!*

सः अम्बेडकरः। एषः शशिधरः।

saḥ ambeḍkaraḥ. eṣaḥ śaśidharaḥ.
*He [that] is Amberkara. He [this] is Shashidhara.*

एषः गणेशः।

eṣaḥ gaṇeśaḥ.
*He [this] is Ganesha.*

एषः कः?

eṣaḥ kaḥ?
*Who is he [this]?*

सः गणेशः।

saḥ gaṇeśaḥ.
*He [that] is Ganesha.*

एषः कः?

eṣaḥ kaḥ?
*Who is he [this].*

सः लाल्बहादुरशास्त्री।

saḥ lāl-bahādura-śāstrī.
*He [that] is Lal-bahadur-shastri.*

सः कः?

saḥ kaḥ?
*Who is he [that]?*

एषः यतीशः।

eṣaḥ yatīśaḥ.
*He [this] is Yatisha.*

सः कः?

saḥ kaḥ?
*Who is he [that]?*

एषः प्रशान्तः।

eṣaḥ praśāntaḥ.
*He [this] is Prashanta.*

---

*HINDI: When a male person is nearby we say:* ***eṣaḥ.***
*When a male person is further away we say:* ***saḥ.***

---

सा राजलक्ष्मीः। एषा प्रिया।

sā rāja-lakṣmīḥ. eṣā priyā.
*She [that] is Raja-lakshmi. She [this] is Priya.*

सा प्रिया। एषा राजलक्ष्मीः।

sā priyā. eṣā rāja-lakṣmīḥ.
*She [that] is Priya. She [this] is Raja-lakshmi.*

सा शारदा देवी। सा का?

sā śāradā devī. sā kā?
*She [that] is Sharada devi. Who is she [that]?*

सा शारदा देवी।

sā śāradā devī.
*She [that] is Sharada devi.*

एषा शान्तला। एषा का?

eṣā śāntalā. eṣā kā?
*She [this] is Shantala. Who is she [this]?*

एषा शान्तला।

eṣā śāntalā.
*She [this] is Shantala.*

उत्तमम्।

uttamam.
*Good!*

सा का?

sā kā?
*Who is she [that]?*

एषा पङ्कजा।

eṣā pankajā.
*She [this] is Pankaja.*

सा का ?

sā kā?
*Who is she [that]?*

एषा महादेवी ।

eṣā mahādevī.
*She [this] is Mahadevi.*

बहुसमीचीनम् ।

bahu-samīcīnam.
*Very good!*

---

*HINDI: When a female person is nearby we say:* **eṣā.**
*When a female person is further away we say:* **sā.**

---

तत् कृष्णफलकम् । तत् किम् ?

tat kṛṣṇaphalakam. tat kim?
*It [that] is a blackboard. What is it [that]?*

तत् कृष्णफलकम् ।

tat kṛṣṇaphalakam.
*It [that] is a blackboard.*

तत् कृष्णफलकम् । एतत् पुस्तकम् ।

tat kṛṣṇaphalakam. etat pustakam.
*It [that] is a blackboard. It [this] is a book.*

एतत् कृष्णफलकम् । तत् पुस्तकम् ।

etat kṛṣṇaphalakam. tat pustakam.
*It [this] is a blackboard. It [that] is a book.*

एतत् पुष्पम् । एतत् किम् ?

etat puṣpam. etat kim?
*It [this] is a flower. What is it [this]?*

एतत् पुष्पम् ।

etat puṣpam.
*It [this] is a flower.*

उत्तमम् ।

uttamam.
*Good!*

---

इदानीम् अहम् एकम् एकं वस्तु दर्शयामि । "एतत् किम् ?" पृच्छामि । उत्तरं वदन्तु ।

idānīm aham ekam ekaṁ vastu darśayāmi. "etat kim?" pṛcchāmi. uttaraṁ vadantu.
*I [will] now show you things one by one and ask you what they are. You say the answer!*

उपनेत्रम् । एतत् किम् ?

upanetram. etat kim?
*Eyeglases. What is it [this]?*

तत् उपनेत्रम् ।

tat upanetram.
*It [that] are eyeglases.*

कङ्कतम् । एतत् किम् ?

kaṅkatam. etat kim?
*Comb. What is it [this]?*

तत् कङ्कतम् ।

tat kaṅkatam.
*It [that] is the comb.*

फेनकम् । एतत् किम् ?

phenakam. etat kim?
*Soap. What is it [this]?*

तत् फेनकम् ।

tat phenakam.
*It [that] is the soap.*

पर्णम् । एतत् किम् ?

parṇam. etat kim?
*Leaf. What is it [this]?*

तत् पर्णम्।

tat parṇam.
*It [that] is the leaf.*

---

*HINDI: When a neuter object is nearby we say:* **etat.**
*When a neuter object is further away we say:* **tat.**

---

एषः करदीपः। एषः कः?

eṣaḥ karadīpaḥ. eṣaḥ kaḥ?
*This [he] is the hand torch. What is this [he]?*

एषः करदीपः।

saḥ karadīpaḥ.
*That [he] is the hand torch.*

एषः चषकः। एषः कः?

eṣaḥ caṣakaḥ. eṣaḥ kaḥ?
*This [he] is the glass. What is this [he]?*

एषः चषकः।

saḥ caṣakaḥ.
*That [he] is the glass.*

एषा घटी। एषा का?

eṣā ghaṭī. eṣā kā?
*This [she] is the clock. What is this [she]?*

एषा घटी।

eṣā ghaṭī.
*This [she] is the clock.*

एषा सरस्वती। एषा का?

eṣā sarasvatī. eṣā kā?
*This [she] is Sarasvati. What is this [she]?*

एषा सरस्वती।

eṣā sarasvatī.
*This [she] is Sarasvati.*

---

इदानीं भवन्तः एकम् एकं वस्तु दर्शयन्तु ”एतत् किम्?” पृच्छन्तु।

idānīṁ bhavantaḥ ekam ekaṁ vastu darśayantu “etat kim?” pṛcchantu.
*Now you show things one by one and ask: “What is this?”*

एतत् किम्? तत् युतकम्।

etat kim? tat yutakam.
*What is this [it]? (pointing at shirt) That [it] is shirt.*

एतत् किम्? तत् मुखम्।

etat kim? tat mukham.
*What is this [it]? (pointing at face) That [it] is face.*

एतत् किम्? तत् धनम्।

etat kim? tat dhanam.
*What is this [it]? (pointing at money) That is money.*

एतत् किम्? तत् कङ्कणम्।

etat kim? tat kaṅkaṇam.
*What is this [it]? (pointing at bracelet.) That is a bracelet.*

एतत् किम्? तत् तिलकम्।

etat kim? tat tilakam.
*What is this [it]? (pointing at the forehead mark) That is a face mark.*

एतत् किम्? तत् करवस्त्रम्।

etat kim? tat karavastram.
*What is this [it]? (pointing at handkerchief) That is a handkerchief.*

एतावत् पर्यन्तं वयम्।

etāvat paryantaṁ vayam ...
*So far we [learned] ...*

---

सः – एषः saḥ – eṣaḥ ; *that (masc.) – this (masc.)*

सा – एष sā – eṣa ; *that (fem.) – this (fem.)*

तत् – एतत् tat – etat ; *that (neu.) – this (neu.)*

---

एतेषां शब्दानाम् अभ्यासं कृतवन्तः। एतेषाम् उपयोगः कथं करणीयः इत्यपि भवन्तः ज्ञातवन्तः।

eteṣāṁ śabdānām abhyāsaṁ kṛtavantaḥ. eteṣām upayogaḥ kathaṁ karaṇiyaḥ ityapi bhavantaḥ jñātavantaḥ.
*You have done exercises with these words. You have also learned the usage of these [words].*

फलम्। फलम् अस्ति। फलं नास्ति।

phalam. phalam asti. phalaṁ nāsti.
*A fruit. There is the fruit. (lit: The fruit is.) There is no fruit, the fruit isn't there. (lit: The fruit isn't.)*

चषकः अस्ति। जलं नास्ति।

caṣakaḥ asti. jalaṁ nāsti.
*The glass is. The glass isn't.*

लेखनी अस्ति। लेखनी नास्ति।

lekhanī asti. lekhanī nāsti.
*The pen is. The pen isn't.*

धनस्यूतः अस्ति। धनं नास्ति।

dhanasyūtaḥ asti. dhanaṁ nāsti.
*[There] is the wallet. Money isn't [there], there is no money.*

बुद्धिः नास्ति?

buddhiḥ nāsti?
*Is [there] no intelligence?*

बुद्धिः अस्ति।

buddhiḥ asti.
*[There] is imntelligence.*

---

**अस्ति – नास्ति** **asti – nāsti**

**(there) is – (there) is not**

---

कृष्णफलकम् अस्ति। पुस्तकम् अस्ति।

kṛṣṇaphalakam asti. pustakam asti.
*The blackboard is [there]. The book is [there].*

कृष्णफलकम् अत्र अस्ति। पुस्तकं तत्र अस्ति।

kṛṣṇaphalakam atra asti. pustakaṁ tatra asti.
*The blackboard is here. The book is there.*

कृष्णफलकं तत्र अस्ति। पुस्तकम् अत्र अस्ति।

kṛṣṇaphalakaṁ tatra asti. pustakam atra asti.
*The blackboard is there. The book is here.*

रामकृष्णः तत्र अस्ति। रामकृष्णः कुत्र अस्ति?

rāmakṛṣṇaḥ tatra asti. rāmakṛṣṇaḥ kutra asti?
*Ramakrishna is there. Where is Ramakrishna?*

रामकृष्णः तत्र अस्ति।

rāmakṛṣṇaḥ tatra asti.
*Ramakrishna is there.*

बालगङ्गाधरतिलकः कुत्र अस्ति?

bālagaṅgā-dhara-tilakaḥ kutra asti?
*Where is Balaganga-dhara-tilaka?*

बालगङ्गाधरतिलकः तत्र अस्ति।

bālagaṅgā-dhara-tilakaḥ tatra asti.
*Balaganga-dhara-tilaka is there.*

राजेन्द्रप्रसादः कुत्र अस्ति?

rājendra-prasādaḥ kutra asti?
*Where is Rajendra-prasada?*

राजेन्द्रप्रसादः तत्र अस्ति।

rājendra-prasādaḥ tatra asti.
*Rajendra-prasada is there.*

आसन्दः कुत्र अस्ति ?

āsandaḥ kutra asti?
*Where is the chair?*

आसन्दः तत्र अस्ति ।

āsandaḥ tatra asti.
*The chair is there.*

सरस्वती कुत्र अस्ति ?

sarasvatī kutra asti?
*Where is Sarasvati?*

सरस्वती तत्र अस्ति ।

sarasvatī tatra asti.
*Sarasvati is there.*

उत्तमम् ।

uttamam.
*Good!*

दिनकरः कुत्र अस्ति ?

dinakaraḥ kutra asti?
*Where is Dinakara?*

दिनकरः तत्र अस्ति ।

dinakaraḥ tatra asti.
*Dinakara is there.*

दिनकरः अत्र अस्ति ।

dinakaraḥ atra asti.
*Dinakara is here.* **(Teacher corrects!)**

उदयनः अत्र अस्ति ।

udayanaḥ atra asti.
*Udayana is here.*

दिनकरः कुत्र अस्ति ?

dinakaraḥ kutra asti?
*Where is Dinakara?*

दिनकरः अत्र अस्ति ।

dinakaraḥ atra asti.
*Dinakara is here.*

राजेश्वरी कुत्र अस्ति ?

rājeśvarī kutra asti?
*Where is Rajeshvari?*

राजेश्वरी अत्र अस्ति ।

rājeśvarī atra asti.
*Rajeshvari is here.*

उपनेत्रं कुत्र अस्ति ?

upanetraṁ kutra asti?
*where are the eyeglases?*

उपनेत्रम् अत्र अस्ति ।

upanetram atra asti.
*They are [it is] here.*

कुत्र अस्ति ?

kutra asti?
*Where is [it]?*

अत्र अस्ति ।

atra asti.
*Here [it] is.*

बहुसमीचीनम् ।

bahu-samīcīnam.
*Very good!*

लेखनी कुत्र अस्ति ?

lekhanī kutra asti?
*Where is the pen?*

लेखनी अत्र अस्ति ।

lekhanī atra asti.
*The pen is here.*

युतकं कुत्र अस्ति ?

yutakaṁ kutra asti?
*Where is the shirt?*

युतकम् अत्र अस्ति।

yutakam atra asti.
*The shirt is here.*

धनं कुत्र अस्ति ?

dhanaṁ kutra asti?
*Where is the money?*

धनम् अत्र अस्ति।

dhanam atra asti.
*The money is here.*

समीचीनम्।

samīcīnam.
*Good!*

कङ्कणं कुत्र अस्ति ?

kaṅkaṇaṁ kutra asti?
*Where is the bracelet?*

कङ्कणम् अत्र अस्ति।

kaṅkaṇam atra asti.
*The bracelet is here.*

कण्ठहारः कुत्र अस्ति ?

kaṇṭhahāraḥ kutra asti?
*Where is the necklace?*

कण्ठहारः अत्र अस्ति।

kaṇṭhahāraḥ atra asti.
*The necklace is here.*

तिलकं कुत्र अस्ति ?

tilakaṁ kutra asti?
*Where is the mark?*

तिलकम् अत्र अस्ति।

tilakam atra asti.
*The mark is here.*

करवस्त्रं कुत्र अस्ति ?

karavastraṁ kutra asti?
*Where is the handkerchief?*

करवस्त्रम् अत्र अस्ति।

karavastram atra asti.
*The handkerchief is here.*

धनस्यूतः कुत्र अस्ति ?

dhanasyūtaḥ kutra asti?
*Where is the wallet?*

धनस्यूतः अत्र अस्ति।

dhanasyūtaḥ atra asti.
*The wallet is here.*

घटी कुत्र अस्ति ?

ghaṭī kutra asti?
*Where is the clock?*

घटी अत्र अस्ति।

ghaṭī atra asti.
*The clock is here.*

बहु समीचीनम्।

bahu samīcīnam.
*Very good.*

सरस्वती तत्र अस्ति।

sarasvatī tatra asti.
*Sarasvati is there.*

जवनिका तत्र अस्ति।

javanikā tatra asti.
*Curtain is there.*

उदयनः अत्र अस्ति। वायुः सर्वत्र अस्ति। वायुः कुत्र अस्ति ?

udayanaḥ atra asti. vāyuḥ sarvatra asti. vāyuḥ kutra asti?

*Udayana is here. Air is everywhere. Where is air?*

वायुः सर्वत्र अस्ति ।

vāyuḥ sarvatra asti.
*Air is everywhere.*

भगवान् सर्वत्र अस्ति । भगवान् कुत्र अस्ति ?

bhagavān sarvatra asti. bhagavān kutra asti?
*God is everywhere. Where is God?*

भगवान् सर्वत्र अस्ति ।

bhagavān sarvatra asti.
*God is everywhere.*

प्रकाशः कुत्र अस्ति ?

prakāśaḥ kutra asti?
*Where is the light?*

प्रकाशः सर्वत्र अस्ति ।

prakāśaḥ sarvatra asti.
*The light is everywhere.*

आकाशः कुत्र अस्ति ?

ākāśaḥ kutra asti?
*Where is space?*

आकाशः सर्वत्र अस्ति ।

ākāśaḥ sarvatra asti.
*Space is everywhere.*

चषकः अस्ति ।

caṣakaḥ asti.
*The glass is [there].*

चषकः अत्र अस्ति । जलं नास्ति ।

caṣakaḥ atra asti. jalaṁ nāsti.
*The glass is here. The water is not.*

जलम् अन्यत्र अस्ति । अत्र नास्ति । अन्यत्र अस्ति ।

जलम् अन्यत्र अस्ति ।

jalam anyatra asti. atra nāsti. anyatra asti. jalam anyatra asti.
*Water is elsewhere. [It] is not here. [It] is elsewhere. Water is elsewhere.*

भवतः मित्रं कुत्र अस्ति ?

bhavataḥ mitraṁ kutra asti?
*Where is your friend?*

मम मित्रम् अन्यत्र अस्ति ।

mama mitram anyatra asti.
*My friend is elsewhere.*

उत्तमम् ।

uttamam.
*Good!*

भवतः वाहनं कुत्र अस्ति ।

bhavataḥ vāhanaṁ kutra asti.
*Where is your vehicle.*

मम वाहनम् अन्यत्र अस्ति ।

mama vāhanam anyatra asti.
*My vehicle is elsewhere.*

भवत्याः पुत्री कुत्र अस्ति ?

bhavatyāḥ putrī kutra asti?
*Where is your daughter?*

मम पुत्री अन्यत्र अस्ति ।

mama putrī anyatra asti.
*My daughter is elsewhere.*

भवत्याः पतिः कुत्र अस्ति ?

bhavatyāḥ patiḥ kutra asti?
*Where is your husband?*

मम पतिः अन्यत्र अस्ति ।

mama patiḥ anyatra asti.
*My husband is elsewhere.*

भवत्याः सखी कुत्र अस्ति ?

bhavatyāḥ sakhī kutra asti?
*Where is your friend (fem.)?*

मम सखी अन्यत्र अस्ति ।

mama sakhī anyatra asti.
*My friend is elsewhere.*

जलं कुत्र अस्ति ?

jalaṁ kutra asti?
*Where is water?*

जलम् अन्यत्र अस्ति ।

jalam anyatra asti.
*Water is elsewhere.*

पुरुषाः एकत्र उपविशन्ति ।

puruṣāḥ ekatra upaviśanti.
*The men sit in one place.*

महिलाः एकत्र उपविशन्ति ।

mahilāḥ ekatra upaviśanti.
*The women sit in one place.*

इदानीम् अहं वदामि, अभिनयं करोमि, भवन्तः अपि वदन्तु, अभिनयं कुर्वन्तु ।

idānīm ahaṁ vadāmi, abhinayaṁ karomi, bhavantaḥ api vadantu, abhinayaṁ kurvantu.
*Now [as] I say and show, you also say and show.*

अत्र अत्र अत्र अत्र ।

atra atra atra atra.
*Here, here, here, here.*

तत्र तत्र तत्र तत्र ।

tatra tatra tatra tatra.
*There, there, there, there.*

कुत्र कुत्र कुत्र कुत्र ?

kutra kutra kutra kutra?
*Where, where, where, where?*

सर्वत्र सर्वत्र सर्वत्र सर्वत्र ।

sarvatra sarvatra sarvatra sarvatra.
*Everywhere, everywhere, everywhere, everywhere.*

अन्यत्र अन्यत्र अन्यत्र अन्यत्र ।

anyatra anyatra anyatra anyatra.
*Elsewhere, elsewhere, elsewhere, elsewhere.*

एकत्र एकत्र एकत्र एकत्र ।

ekatra ekatra ekatra ekatra.
*At one place, at one place, at one place, at one place.*

---

**Screen:**

**अत्र । atra. *Here.* तत्र । tatra. *There.***

**कुत्र ? kutra? *Where?* सर्वत्र । sarvatra. *Everywhere.***

**अन्यत्र । anyatra. *Elsewhere.* एकत्र । ekatra. In one place.**

---

*HINDI: Now comes the verse, the saying.*

---

## सुभाषितम्

**subhāṣitam**
**Verse**

### संस्कृतसाहित्ये सुभाषितानां नितरां वैषिष्ट्यम् अस्ति। सुष्ठु भाषितं सुभाषितम्। उत्तमं वचनम् एव सुभाषितम्। अपारः जीवनानुभवः सुभाषितेषु निहितः भवति।

saṁskṛta-sahitye subhāṣitānāṁ nitarāṁ vaiṣiṣṭyam asti. suṣṭhu bhāṣitaṁ subhāṣitam. uttamaṁ vacanam eva subhāṣitam. apāraḥ jīvanānubhavaḥ subhāṣiteṣu nihitaḥ bhavati.
*In Sanskrit poetry the sayings in verse form are very special [a great specialty]. Well spoken is subhashitam. Only the best speech is subhashitam. The vast experiences in life are embedded in these sayings.*

### वयम् इदानीम् एकं संस्कृतसुभाषितं शृण्मः।

vayam idānīm ekaṁ saṁskṛta-subhāṣitaṁ śṛṇmaḥ.
*Now we listen to one verse in Sanskrit.*

### उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः ।
### न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥

udyamenaiva sidhyanti kāryāṇi na mano-rathaiḥ
na hi suptasya siṁhasya praviśanti mukhe mṛgāḥ

udyamena – *by endeavor;* eva – *only;* karyāṇi – *actions;* sidhyanti – *are acomplished;* na – *not;* mano-rathaiḥ – *by mere desire;* suptasya – *sleeping;* siṁhasya – *lion;* mukhe – *in the mouth;* mṛgāḥ – *animals;* na – *not;* hi – *certainly;* praviśanti – *enter.*

*Just as animals don't enter into the mouth of a sleeping lion, the actions yeild to perfection by endeavor only, not by mere desire.*

### वयम् इदानीं यत् सुभाषितं श्रुतवन्तः, तस्य अर्थः एवम् अस्ति।

vayam idānīṁ yat subhāṣitaṁ śrutavantaḥ, tasya arthaḥ evam asti.
*Now that we have heared this verse, here is its' meaning.*

### मनुष्यः प्रयत्नं न करोति चेत्, किम् अपि फलं न सिध्यति।

manuṣyaḥ prayatnaṁ na karoti cet, kim api phalaṁ na sidhyati.
*If a man doesn't endeavor, there is no result.*

### केवलम् इच्छाः सन्ति चेत्, कार्यं न सिध्यति।

kevalam icchāḥ santi cet, kāryaṁ na sidhyati.
*If there are only wishes, action has no result.*

### सिंहः अत्यन्तं बलवान् अस्ति। सः मृगराजः अस्ति।

siṁhaḥ atyantaṁ balavān asti. saḥ mṛgarājaḥ asti.
*Lion is very strong. He is the king of animals.*

### तथापि सिंहः प्रयत्नं करोति चेत् एव, आहारं प्राप्नोति।

tathāpi siṁhaḥ prayatnaṁ karoti cet eva, āhāraṁ prāpnoti.
*Still, only if the lion endeavors, he gets the food.*

### मृगः आगत्य स्वयम् एव सिंहस्य मुखे न पतति।

mṛgaḥ āgatya svayam eva siṁhasya mukhe na patati.
*Animal doesn't come by itselves and fall into the lions mouth.*

### वयम् एव प्रयत्नं न कुर्मः चेत्, किञ्चिद् अपि फलम् न सिध्यति।

vayam eva prayatnaṁ na kurmaḥ cet, kiñcid api phalam na sidhyati.
*Same holds true for us; if we don't endeavor, there will be hardly any fruit.*

### वयम् अपि अवश्यं प्रयत्नं कुर्मः।

vayam api avaśyaṁ prayatnaṁ kurmaḥ.
*We also need to endeavor.*

## कथा ।

**kathā.**
**Story**

अहम् इदानीम् एकां कथां वदामि । लघु कथा, सरला कथा अस्ति ।

aham idānīm ekaṁ kathāṁ vadāmi. laghu kathā, saralā kathā asti.
*Now I tell a story. It is a short story, a simple story.*

संस्कृतेन कथा श्रवणेन भाषाभ्यासः शीघ्रं भवति । भवन्तः सावधानेन कथां शृण्वन्तु ।

saṁskṛtena kathā śravaṇena bhāṣābhyāsaḥ śīghraṁ bhavati. bhavantaḥ sāvadhānena kathāṁ śṛṇvantu.
*By listening to story in Sanskrit practice of speaking is very quick. Listen to the story with attention!*

एकः काकः अस्ति । सः काकः तृषितः अस्ति । तस्य बहु पिपासा भवति । जलं पातव्यम् इति इच्छा भवति ।

ekaḥ kākaḥ asti. saḥ kākaḥ tṛṣitaḥ asti. tasya bahu-pipāsā bhavati. jalaṁ pātavyam iti icchā bhavati.
*There is a crow. That crow is thirsty. He is very thirsty [of him there is great thirst]. He desires to drink water.*

काकः जलस्य अन्वेषणं करोति । अत्र पश्यति । तत्र पश्यति । सर्वत्र पश्यति । कुत्र अपि जलं नास्ति ।

kākaḥ jalasya anveṣaṇaṁ karoti. atra paśyati. tatra paśyati. sarvatra paśyati. kutra api jalaṁ nāsti.
*The crow searches for water. He looks here. He looks there. He looks everywhere. There is no water anywhere.*

काकः अग्रे अग्रे गच्छति । दूरे एकं घटं पश्यति । काकस्य बहुसन्तोषः भवति ।

kākaḥ agre agre gacchati. dūre ekaṁ ghaṭaṁ paśyati. kākasya bahu-santoṣaḥ bhavati.
*The crow goes forward. Far away he sees a pot. He is very happy.*

सः घटस्य समीपं गच्छति । घटस्य उपरि उपविशति । पश्यति । घटे जलम् अस्ति । किन्तु स्वल्पं जलम् अस्ति । काकः जलं पातुं न शक्नोति ।

saḥ ghaṭasya samīpaṁ gacchati. ghaṭasya upari upaviśati. paśyati. ghaṭe jalam asti. kintu svalpaṁ jalam asti. kākaḥ jalaṁ pātuṁ na śaknoti.
*He goes close to the pot. He sits on the pot. He looks. There is watter in the pot. But there is very little water. The crow can't drink the water.*

"किं करोमि ?" इति चिन्तयति । सः काकः बुद्धिमान् अस्ति ।

"kiṁ karomi?" iti cintayati. saḥ kākaḥ buddhimān asti.
*"What do I do?" he thinks. This crow is intelligent.*

सः अन्यत्र गच्छति, शिलाखण्डम् आनयति, घटे पूरयति । पुनः गच्छति, शिलाखण्डम् आनयति, पूरयति ।

saḥ anyatra gacchati, śilākhaṇḍam ānayati, ghaṭe pūrayati. punaḥ gacchati, śilākhaṇḍam ānayati, pūrayati.
*He goes elsewhere, brings a stone and throws it into the pot. He goes again and brings a stone.*

एवमेव बहुवारं करोति । जलम् उपरि उपरि आगच्छति । जलं बहिः आगच्छति ।

evam eva bahu-vāraṁ karoti. jalam upari upari āgacchati. jalaṁ bahiḥ āgacchati.
*This way it does many times. The water comes up, up. The water comes out.*

काकस्य बहु सन्तोषः भवति । सः जलं पिबति । आनन्देन जलं पिबति ।

kākasya bahu-santoṣaḥ bhavati. saḥ jalaṁ pibati. ānandena jalaṁ pibati.
*The crow is very satisfied. He drinks the water. He drinks the water with joy.*

अनन्तरं ततः दूरं गच्छति।

anantaram tataḥ dūraṁ gacchati.
*Thereafter it goes from there far away.*

काकः चतुरः अस्ति खलु ? चतुरः काकः।

kākaḥ caturaḥ asti khalu? caturaḥ kākaḥ.
*Isn't the crow smart? The smart crow.*

# LESSON 2 – OVERVIEW

*In the second lesson you will learn further ways of introducing yourself and asking another person to introduce himself or herself to you. You will learn nominative singular personal pronoun* **asmad** *(I), and nominative singular of* **bhavat** *(he, she; you).*

| | | |
|---|---|---|
| अहम् | aham | *I* |
| भवान् | bhavān | *he; you (masc.)* |
| भवती | bhavatī | *she; you (fem.)* |

**Ṣaṣṭhī-vibhakti** *(genitive) of the* ***personal pronoun*** **TAT** *(that) is as follows:*

***- when a person or object is further away:***

| | | | |
|---|---|---|---|
| *m* | तस्य | tasya | *his (of that, masc., neut.)* |
| *f* | तस्याः | tasyāḥ | *her (of that, fem.)* |

***- when a person or object is nearby:***

| | | | | | | |
|---|---|---|---|---|---|---|
| *m* | एतस्य | etasya | *his (of this)* | कस्य ? | kasya? | *Whose (masc., neut.)?* |
| *f* | एतस्याः | etasyāḥ | *her (of this)* | कस्याः ? | kasyāḥ? | *Whose (fem.)?* |

***- the noun endings change***

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ***from prathamā (nominative):*** | | | | | ***to ṣaṣṭhī (genitive):*** | | |
| *m.* | कृष्णः | kṛṣṇaḥ | *Krishna* | => | कृष्णस्य | kṛṣṇasya | *Krishna's* |
| *f.* | गीता | gītā | *Gita* | => | गीतायाः | gītāyāḥ | *Gita's* |
| | देवी | devī | *goddess* | => | देव्याः | devyāḥ | *Goddess's* |
| *n.* | पुस्तकम् | pustakam | *book* | => | पुस्तकस्य | pustakasya | *book's* |

## AVYAYAS IN INTERROGATIVES

| | | | |
|---|---|---|---|
| वा ? | vā? | *or* | ***(denotes interrogative sentence:)*** |
| | | | एतत् पुस्तकं वा ? etat pustakaṁ vā? *Is this a book?* |
| आम् | ām | *yes* | आम् । एतत् पुस्तकं न । ām. etat pustakaṁ. *Yes, this is a book.* |
| न | na | *no* | न । एतत् पुस्तकं न । na. etat pustakaṁ na. *No, this is not a book.* |

# Lesson 2

नमो नमः ।

namo namaḥ.
*Respects.*

नमो नमः ।

namo namaḥ.
*Respects.*

संस्कृतभाषाशिक्षणे भवतां स्वागतम् ।

saṁskṛta-bhāṣā-śikṣaṇe bhavatāṁ svāgatam.
*Welcome [to you all] to the study of Sanskrit language.*

संस्कृतेन कथं परिचयः प्राप्तव्यः इति भवन्तः सर्वे पूर्वतन पाठे ज्ञातवन्तः । अद्य अन्येन क्रमेण अपि परिचयस्य अन्येषाम् अपि अभ्यासं कुर्मः ।

saṁskṛtena kathaṁ paricayaḥ prāptavyaḥ iti bhavantaḥ sarve pūrvatana pāṭhe jñātavantaḥ. adya anyena krameṇa api paricayasya anyeṣām api abhyāsaṁ kurmaḥ.
*You have all learned how to make acquaitances in the previous lesson. Today we [will] practice other ways of making acquaitances.*

अहं विश्वासः । भवान् कः ।

ahaṁ viśvāsaḥ. bhavān kaḥ?
*I [am] Vishvasa. Who [are] you?*
*(If no verb is used, "to be" is understood to be implied.)*

अहं सुधीरः ।

ahaṁ sudhīraḥ.
*I [am] Sudhira.*

अहं विश्वासः । भवान् कः ?

ahaṁ viśvāsaḥ. bhavān kaḥ?
*I [am] Vishvasa. Who [are] you?*

अहं मञ्जुनाथः ।

ahaṁ mañjunāthaḥ.
*I [am] Manjunatha.*

अहं विश्वासः । भवान् कः ?

ahaṁ viśvāsaḥ. bhavān kaḥ?
*I [am] Vishvasa. Who [are] you?*

अहम् उदयनः ।

aham udayanaḥ.
*I [am] Udayana.*

अहं विश्वासः । भवती का ?

ahaṁ viśvāsaḥ. bhavatī kā?
*I [am] Vishvasa. Who [are] you (fem.)?*

अहं नर्तकी ।

ahaṁ nartakī.
*I [am] a dancer.*

भवती नर्तकी ?

bhavatī nartakī?
*You [are] a dancer?*

आम् ।

ām.
*Yes.*

उत्तमम् ।

uttamam.
*Good!*

भवती का ?

bhavatī kā?
*Who [are] you?*

अहम् अभिनेत्री ।

aham abhinetrī.

*I am an actress.*

---

**SCREEN:**

**अहम्** **aham** ***I***

**भवान्** **bhavān** ***you (masc.)***

**भवती** **bhavatī** ***you (fem.)***

---

अहं विश्वासः। अहं शिक्षकः। भवान् कः ?

ahaṁ viśvāsaḥ. ahaṁ śikṣakaḥ. bhavān kaḥ?
*I (am) Vishvasa. I (am) a teacher. What (are) you?*
*("kaḥ" conveys the meaning of "which", "what", "who", it is declined and takes forms in all three genders.)*

अहं छात्रः।

ahaṁ chātraḥ.
*I am a student.*

भवान् कः ?

bhavān kaḥ?
*What [are] you?*

अहं छात्रः।

ahaṁ chātraḥ.
*I am a student.*

भवान् कः ?

bhavān kaḥ?
*What [are] you?*

अहम् अधिवक्ता।

aham adhivaktā.
*I am a lawyer (masc.).*

अहं शिक्षकः।

ahaṁ śikṣakaḥ.
*I am a teacher.*

भवती का ?

bhavatī kā?
*What [are] you?*

अहं छात्रा।

ahaṁ chātrā.
*I am a student.*

भवती का ?

bhavatī kā?
*What [are] you?*

अहं तन्त्रज्ञा।

ahaṁ tantrajñā.
*I am an ingeneer.*

भवती का ?

bhavatī kā?
*What [are] you?*

अहं गृहिणी।

ahaṁ gṛhiṇī.
*I am a housewife.*

भवती का ?

bhavatī kā?
*What [are] you?*

अहं शिक्षकी।

ahaṁ ś**ikṣakī**.
*I am a teachear.* ***(Mistake!)***

शिक्षिका।

ś**ikṣikā**.
*Teacher (fem.).* ***(Teacher corrects!)***

अहं शिक्षिका।

ahaṁ śikṣikā.
*I am a teacher.*

वदतु। भवती का ?

vadatu. bhavatī kā?

*Say! What [are] you?*

अहं शिक्षिका।

ahaṁ śikṣikā.
*I am a teacher.*

उत्तमम्।

uttamam.
*Good!*

भवान् कः ?

bhavān kaḥ?
*What [are] you?*

अहं तन्त्रज्ञः।

ahaṁ tantrajñaḥ.
*I am an engineer.*

भवान् कः ?

bhavān kaḥ?
*What [are] you?*

अहं सैनिकः।

ahaṁ sainikaḥ.
*I am a soldier.*

भवान् कः ?

bhavān kaḥ?
*What [are] you?*

अहं युवकः।

ahaṁ yuvakaḥ.
*I am a young man.*

---

मम नाम। अहम्। एतद् वाक्यद्वयं योजयित्वा वयं परिचयं वदामः। अतीव सुखेन परिचयं वदामः यथा "मम नाम विश्वासः, अहं शिक्षकः।" एतेन क्रमेण भवन्तः वदन्तु। भवान् वदतु।

mama nāma. aham. etad vākya-dvayaṁ yojayitvā vayaṁ paricayaṁ vadāmaḥ. atīva sukhena paricayaṁ vadāmaḥ yathā: "mama nāma viśvāsaḥ, ahaṁ śikṣakaḥ." etena krameṇa bhavantaḥ vadantu. bhavān vadatu.
*My name. I [am]. We introduce ourselves joyning these two phrases. We introduce ourselves with great happiness like this: "My name [is] Vishvasa, I am a teacher." You [all] say in this way! You say!*

मम नाम सुधीरः। अहं छात्रः।

mama nāma sudhīraḥ. ahaṁ chātraḥ.
*My name is Sudhira. I am a student.*

भवान् वदतु।

bhavān vadatu.
*You say!*

मम नाम दिनकरः। अहम् अधिवक्ता।

mama nāma dinakaraḥ. aham adhivaktā.
*My name is Dinakara. I am a lawyer (masc.).*

उत्तमम्।

uttamam.
*Good!*

मम नाम इन्दुशेखरः। अहं तन्त्रज्ञः।

mama nāma induśekharaḥ. ahaṁ tantrajñaḥ.
*My name is Indushekhara. I am an engineer.*

मम नाम महदेवी। अहं शिक्षिका।

mama nāma mahadevī. ahaṁ śikṣikā.
*My name is Mahadevi. I am a teacher (fem.).*

उत्तमम्।

uttamam.
*Good!*

मम नाम अमृतजा। अहं गृहिणी।

mama nāma amṛtajā. ahaṁ gṛhiṇī.
*My name is Amritaja. I am housewife.*

मम नाम राजलक्ष्मी। अहं नर्तकी।

mama nāma rājalakṣmī. ahaṁ nartakī.
*My name is Rajalakshmi. I am a dancer.*

मम नाम गीता। अहम् अभिनेत्री।

mama nāma gītā. aham abhinetrī.
*My name is Gita. I am an actress.*

उत्तमम्।

uttamam.
*Good!*

---

*HINDI: When addressing people respectfully* ***bhavān*** *is used in masculine,* ***bhavatī*** *for feminine. Repeat when she leaves the gap.*

---

मम नाम हेमापञ्चमुखी। अहम् अभिनेत्री।

mama nāma hemā-pañca-mukhī. aham abhinetrī.
*My name is Hema-pancha-mukhi. I am an actress.*

मम नाम कुसुमा। अहं गायिका।

mama nāma kusumā. ahaṁ gāyikā.
*My name is Kusuma. I am a singer.*

मम नाम शिल्पा। अहं वैद्या।

mama nāma śilpā. ahaṁ vaidyā.
*My name is Shilpa. I am a doctor.*

मम नाम विदिषा। अहं छात्रा।

mama nāma vidiṣā. ahaṁ chātrā.
*My name is Vidhisha. I am a student.*

मम नाम विदिता। अहं बालिका।

mama nāma viditā. ahaṁ bālikā.
*My name is Vidita. I am a girl.*

मम नाम गोपालः। अहं कृषिकः।

mama nāma gopālaḥ. ahaṁ kṛṣikaḥ.
*My name is Gopala. I am farmer.*

मम नाम गङ्गारामः। अहं कर्मकरः।

mama nāma gaṅgārāmaḥ. ahaṁ karmakaraḥ.
*My name is Gangarama. I am a worker.*

मम नाम वासुदेवः। अहं पाचकः।

mama nāma vāsudevaḥ. ahaṁ pācakaḥ.
*My name is Vasudeva. I am a cook.*

---

*HINDI: Now we'll join these two sentences and use them. You also, please, practice.*

---

सः उदयनः। सः छात्रः। सः छात्रः वा ? आम्, सः छात्रः।

saḥ udayanaḥ. saḥ chātraḥ. saḥ chātraḥ vā? ām, saḥ chātraḥ.
*He is Udayana. He is a student. Is he a student. Yes, he is a student.*

आम्, सः छात्रः।

ām, saḥ chātraḥ.
*Yes, he is a student.*

तत् कृष्णफलकं वा ?

tat kṛṣṇaphalakaṁ vā?
*Is that a blackboard?*

आम्, तत् कृष्णफलकम्।

ām, tat kṛṣṇaphalakam.
*Yes, that is a blackboard.*

सा सरस्वती वा ?

sā sarasvatī vā?
*Is that Sarasvati?*

आम्, सा सरस्वती।

ām, sā sarasvatī.
*Yes, that is Sarasvati.*

---

*HINDI: Sentences like* ***saḥ śikṣakaḥ*** *change to interro-gative by adding* ***vā*** *at the end:* ***"saḥ śikṣakaḥ vā?"***

सा गृहिणी वा ?

sā gṛhiṇī vā?
*Is she a housewife?*

आम्, सा गृहिणी।

ām, sā gṛhiṇī.
*Yes, she is a housewife.*

सा तन्त्रज्ञा वा ?

sā tantrajñā vā?
*Is she an engineer?*

आम्, सा तन्त्रज्ञा।

ām, sā tantrajñā.
*Yes, she is an engineer.*

सा अभिनेत्री वा ?

sā abhinetrī vā?
*Is she an actress?*

आम्, सा अभिनेत्री।

ām, sā abhinetrī.
*Yes, she is an actress.*

---

*HINDI: To say yes to a statement, say:* **ām.** *Per example:*

---

सा गृहिणी वा ?

sā gṛhiṇī vā?
*Is she a housewife?*

आम्, सा गृहिणी।

ām, sā gṛhiṇī.
*Yes, she is a housewife.*

सा तन्त्रज्ञा वा ?

sā tantrajñā vā?
*Is she an engineer*

आम्, सा तन्त्रज्ञा।

ām, sā tantrajñā.
*Yes, she is an engineer.*

सा अभिनेत्री वा ?

sā abhinetrī vā?
*Is she an actress.*

आम्, सा अभिनेत्री।

ām, sā abhinetrī.
*Yes, she is an actress.*

---

**SCREEN:**

**आम्, सा गृहिणी। ām, sā gṛhiṇī.**

**आम्, सा तन्त्रज्ञा। ām, sā tantra-jñā.**

**आम्, सा अभिनेत्री। ām, sā abhinetrī.**

---

सः दिनकरः। सः वैद्यः वा ? न सः वैद्यः न।

saḥ dinakaraḥ. saḥ vaidyaḥ vā? na, saḥ vaidyaḥ na.
*He is Dinakara. Is he a doctor? No, he is not a doctor.*

न, सः वैद्यः न।

na, saḥ vaidyaḥ na.
*No, he is not a doctor.*

सः छात्रः वा ?

saḥ chātraḥ vā?
*Is he a student?*

न, सः छात्रः न।

na, saḥ chātraḥ na.
*No, he is not a student.*

---

*HINDI: To negate a statement say:* **na.** *Per example:*

---

न, सः वैद्यः न ।

na, saḥ vaidyaḥ na.
*No, he is not a doctor.*

सः छात्रः वा ?

saḥ chātraḥ vā?
*Is he a student?*

न, सः छात्रः न ।

na, saḥ chātraḥ na.
*No, he is not a student.*

---

**SCREEN:**

**न, सः वैद्यः न । na, saḥ vaidyaḥ na.**

**न, सः छात्रः न । na, saḥ chātraḥ na.**

**न, एतत् पुस्तकं न । na, etat pustakaṁ na.**

---

एतत् फलं वा ?

etat phalaṁ vā?
*Is this a fruit?*

आम्, तत् फलम् ।

ām, tat phalam.
*Yes, that is a fruit.*

एतत् फेनकं वा ?

etat phenakaṁ vā?
*Is this a soap?*

आम्, तत् फेनकम् ।

ām, tat phenakam.
*Yes, that is a soap.*

एतत् उपनेत्रं वा ?

etat upanetraṁ vā?
*Are these eyeglasses?*

आम्, तत् उपनेत्रम् ।

ām, tat upanetram.
*Yes, those are eyeglasses.*

एतत् पुस्तकं वा ?

etat pustakaṁ vā?
*Is this a book?*

न, तत् पुस्तकं न ।

na, tat pustakaṁ na.
*No, that is not a book.*

तत् कङ्कतम् ।

tat kaṅkatam.
*That is a comb.*

उत्तमम् ।

uttamam.
*Good!*

श्रेयसः छात्रः वा ?

śreyasaḥ chātraḥ vā?
*Is Shreyasa a student?*

आम्, श्रेयसः छात्रः ।

ām, śreyasaḥ chātraḥ.
*Yes, Shreyasa is a student.*

दिनकरः अधिवक्ता वा ?

dinakaraḥ adhivaktā vā?
*Is Dinakara a lawyer.*

आम्, दिनकरः अधिवक्ता वा ।

ām, dinakaraḥ adhivaktā vā?
*Yes, Dinakara is lawyer.*

चन्द्रिका अभिनेत्री वा ?

candrikā abhinetrī vā?
*Is Candrika an actress?*

न, चन्द्रिका अभिनेत्री न।

na, candrikā abhinetrī na.
*No, candrika is not an actress.*

इन्दुशेखरः दुष्टः वा ?

induśekharaḥ duṣṭaḥ vā?
*Is Indushekhara a bad man?*

न, इन्दुशेखरः दुष्टः न।

na, induśekharaḥ duṣṭhaḥ na.
*No, Indushekhara is not a bad man.*

प्रशान्तः सज्जनः वा ?

praśāntaḥ sajjanaḥ vā?
*Is Prashanta a holy man?*

न, प्रशान्तः सज्जनः न।

na, praśāntaḥ sajjanaḥ na.
*No, Prashanta is not a holy man.*

आम्, आम्, प्रशान्तः सज्जनः।

ām, ām, praśāntaḥ sajjanaḥ.
*Yes, yes, Prashanta is a holy (good) man.*

संस्कृतं सरलं वा ?

saṁskṛtaṁ saralaṁ vā?
*Is Sanskrit easy?*

आम्, संस्कृतं सरलम्।

ām, saṁskṛtaṁ saralaṁ.
*Yes, Sanskrit is easy.*

संस्कृतं मधुरं वा ?

saṁskṛtaṁ madhuraṁ vā?
*Is Sanskrit sweet?*

आम्, संस्कृतं मधुरम्।

ām, saṁskṛtaṁ madhuram.
*Yes, Sanskrit is sweet.*

सत्यम्, संस्कृतं मधुरम्।

satyam, saṁskṛtaṁ madhuram.
*It is true, Sanskrit is sweet.*

---

इदानीम् अहं वदामि, भवन्तः अपि अभिनयं कुर्वन्तु।

idānīm ahaṁ vadāmi, bhavantaḥ api abhinayaṁ kurvantu.
*Now I [will] speak you also speak and show.*

आम्। आम्। आम्।

ām. ām. ām.
*Yes. Yes. Yes.*

न। न। न।

na. na. na.
*No. No. No.*

---

उत्तिष्ठतु। तस्य नाम उदयनः। तस्य नाम किम् ?

uttiṣṭhatu. tasya nāma udayanaḥ. tasya nāma kim?
*Stand up! His name is Udayana. What is his name?*

तस्य नाम उदयनः।

tasya nāma udayanaḥ.
*His name is Udayana.*

तस्य नाम श्रेयसः। तस्य नाम किम् ?

tasya nāma śreyasaḥ. tasya nāma kim?
*His name is Shreyasa. What is his name?*

तस्य नाम श्रेयसः।

tasya nāma śreyasaḥ.
*His name is Shreyasa.*

तस्य नाम इन्दुशेखरः। कस्य नाम इन्दुशेखरः ?

tasya nāma induśekharaḥ. kasya nāma induśekharaḥ?
*His name is Indushekhara. Whose name is Indushekhara?*

तस्य नाम इन्दुशेखरः।

tasya nāma induśekharaḥ.
*His name is Indushekhara.*

कस्य नाम इन्दुशेखरः ?

kasya nāma induśekharaḥ?
*Whose name is Indushekhara?*

तस्य नाम इन्दुशेखरः ।

tasya nāma induśekharaḥ.
*His name is Indushekhara.*

कस्य नाम प्रशान्तः ?

kasya nāma praśāntaḥ?
*Whose name is Prashanta?*

कस्य नाम प्रशान्तः ?

kasya nāma praśāntaḥ?
*Whose name is Prashanta?*

उत्तिष्ठतु ।

uttiṣṭhatu.
*Stand up!*

तस्याः नाम राजेश्वरी । तस्याः नाम किम् ?

tasyāḥ nāma rājeśvarī. tasyāḥ nāma kim?
*Her name is Rajeshvari. What is her name?*

तस्याः नाम राजेश्वरी ।

tasyāḥ nāma rājeśvarī.
*Her name is Rajeshvari.*

उत्तिष्ठतु ।

uttiṣṭhatu.
*Stand up!*

तस्याः नाम चन्द्रिका । तस्याः नाम किम् ?

tasyāḥ nāma candrikā. tasyāḥ nāma kim?
*Her name is Chandrika. What is her name?*

तस्याः नाम चन्द्रिका ।

tasyāḥ nāma candrikā.
*Her name is Chandrika.*

कस्याः नाम चन्द्रिका ?

kasyāḥ nāma candrikā?
*Whose name is Chandrika?*

तस्याः नाम चन्द्रिका ।

tasyāḥ nāma candrikā.
*Her name is Chandrika.*

तस्याः नाम श्री लक्ष्मी । तस्याः नाम किम् ?

tasyāḥ nāma śrī lakṣmī. tasyāḥ nāma kim?
*Her name is Shri Lakshmi. What is her name?*

तस्याः नाम श्री लक्ष्मी ।

tasyāḥ nāma śrī lakṣmī.
*Her name is Shri Lakshmi.*

कस्याः नाम श्री लक्ष्मी ?

kasyāḥ nāma śrī lakṣmī?
*Whose name is Shri Lakshmi?*

तस्याः नाम श्री लक्ष्मी ।

tasyāḥ nāma śrī lakṣmī.
*Her name is Shri Lakshmi.*

उत्तमम् ।

uttamam.
*Good!*

तस्य नाम इन्दुशेखरः । एतस्य नाम सुधीरः ।

tasya nāma induśekharaḥ. etasya nāma sudhīraḥ.
*His [that man's] name is Indushekhara. His [this man's] name is Sudhira.*

एतस्य नाम इन्दुशेखरः । तस्य नाम सुधीरः ।

etasya nāma induśekharaḥ. tasya nāma sudhīraḥ.
*His [this man's] name is Indushekhara. His [that man's] name is Sudhira.*

एतस्य नाम किम् ?

etasya nāma kim?
*What is this man's name?*

एतस्य नाम सुधीरः ।

etasya nāma sudhīraḥ.
*This man's name is Sudhira.*

एतस्य नाम किम् ?

etasya nāma kim?
*What is this man's name?*

एतस्य नाम मञ्जुनाथः ।

etasya nāma mañjunāthaḥ.
*This man's name is Manjunatha.*

एतस्य नाम किम् ?

etasya nāma kim?
*What is this man's name?*

एतस्य नाम शशिधरः ।

etasya nāma śaśi-dharaḥ.
*This man's name is Shashidhara.*

एतस्य नाम मञ्जुनाथः ।

etasya nāma mañjunāthaḥ.
*This man's name is Manjunatha.*

तस्याः नाम शान्तला । तस्याः नाम राजलक्ष्मी ।

tasyāḥ nāma śāntalā. tasyāḥ nāma rājalakṣmī.
*That woman's name is Shantala. That woman's name is Raja-lakshmi.*

एतस्याः नाम शान्तला । एतस्याः नाम राजलक्ष्मी ।

etasyāḥ nāma śāntalā. etasyāḥ nāma rāja-lakṣmī.
*This woman's name is Shantala. This woman's name is Raja-lakshmi.*

तस्याः नाम राजलक्ष्मी । एतस्याः नाम किम् ?

tasyāḥ nāma rājalakṣmī. etasyāḥ nāma kim?
*That woman's name is Raja-lakshmi. What is this woman's name?*

एतस्याः नाम राजलक्ष्मी ।

etasyāḥ nāma rāja-lakṣmī.
*This woman's name is Raja-lakshmi.*

एतस्याः नाम किम् ?

etasyāḥ nāma kim?
*What is this woman's name?*

एतस्याः नाम गीता ।

etasyāḥ nāma gītā.
*This woman's name is Gita.*

तस्याः नाम किम् ?

tasyāḥ nāma kim?
*What is that woman's name?*

एतस्याः नाम पङ्कजा ।

etasyāḥ nāma pankajā.
*This woman's name is Pankaja.*

तस्याः नाम किम् ?

tasyāḥ nāma kim?
*What is this woman's name?*

एतस्याः नाम महदेवी ।

etasyāḥ nāma mahadevī.
*This woman's name is Mahadevi.*

---

*HINDI: When a thing belongs to a male person that is nearby we say:* ***etasya.*** *When the person is further away we say:* ***tasya.*** *When it belongs to a female person nearby we say:* ***etasyāḥ.*** *When the female person is further away we say:* ***tasyāḥ.*** *Per example:*

---

SCREEN:

एतस्य नाम सुधीरः । तस्य नाम इन्दुशेखरः ।

**etasya nāma sudhīraḥ.tasya nāma induśekharaḥ.**

***This man's name is Sudhira.That man's name is Indushekhara.***

एतस्याः नाम गीता । तस्याः नाम शान्तला ।

**etasyāḥ nāma gītā.** **tasyāḥ nāma śāntalā.**
***This woman's name is Gita.That woman's name is Shantala.***

---

घटी। सुधीरस्य घटी। कस्य घटी ?

ghaṭī. sudhīrasya ghaṭī. kasya ghaṭī?
*A watch. [This is] Sudhira's watch. Whose watch [is this]?*

सुधीरस्य घटी।

sudhīrasya ghaṭī.
*[That is] Sudhira's watch.*

मुखम्। कस्य मुखम् ?

mukham. kasya mukham?
*Face. Whose face [is this]?*

सुधीरस्य मुखम्।

sudhīrasya mukham.
*Sudhira's face.*

उपनेत्रम्। कस्य उपनेत्रम् ?

upanetram. kasya upanetram?
*Eyeglasses. Whose eyeglasses [are these]?*

सुधीरस्य उपनेत्रम्।

sudhīrasya upanetram.
*Sudhira's eyeglasses.*

कस्य नासिका ?

kasya nāsikā?
*Whose nose?*

सुधीरस्य नासिका।

sudhīrasya nāsikā.
*Sudhira's nose.*

कस्य कर्णः ?

kasya karṇaḥ?
*Whose ear?*

सुधीरस्य कर्णः ?

sudhīrasya karṇaḥ?
*Sudhira's ear?*

---

*HINDI: Words like* **rāma, kṛṣṇa, bālaka, gṛha,** *etc. are called a-kara, words ending in (short) -a. With* **ṣaṣṭhī-vibhakti** *(genitive ending) they change thus:* **rāmaḥ – rāmasya; kṛṣṇaḥ – kṛṣṇasya** *taking the ending* **-sya.**

---

घटी। गीतायाः घटी। कस्याः घटी ?

ghaṭī. gītāyāḥ ghaṭī. kasyāḥ ghaṭī?
*A watch. [This is] Gita's watch. Whose (fem.) watch [is this]?*

गीतायाः घटी।

gītāyāḥ ghaṭī.
*[That is] Gita's watch.*

कस्याः कङ्कणम् ?

kasyāḥ kaṅkaṇam?
*Whose (fem.) bracelet [is this]?*

गीतायाः कङ्कणम्।

gītāyāḥ kaṅkaṇam.
*[That is] Gita's bracelet.*

स्यूतः। पङ्कजायाः स्यूतः। कस्याः स्यूतः ?

syūtaḥ. paṅkajāyāḥ syūtaḥ. kasyāḥ syūtaḥ?
*Bag. Pankaja's bag. Whose (fem.) bag [is this]?*

पङ्कजायाः स्यूतः।

paṅkajāyāḥ syūtaḥ.
*Pankaja's bag.*

करवस्त्रम्। कस्याः करवस्त्रम् ?

karavastram. kasyāḥ karavastram?
*Handkerchief. Whose (fem.) handkerchief [is this]?*

प्रियायाः करवस्त्रम् ।

priyāyāḥ karavastram.
*Priya's handkerchief.*

उत्तिष्ठतु । ददातु । कुञ्चिका । शान्तलायाः कुञ्चिका ।
कस्याः कुञ्चिका ?

uttiṣṭhatu. dadātu. kuñcikā. śāntalāyāḥ kuñcikā. kasyāḥ kuñcikā?
*Stand up! Give [me that]! Key. Shantala's key. Whose key [is this]?*

शान्तलायाः कुञ्चिका ।

śāntalāyāḥ kuñcikā.
*Shantala's key.*

---

*HINDI: Words like* **sītā, latā, anītā,** *etc. are called* ***ākarānta strī-liṅga***, *feminine words ending in (long)* **-ā.** *With* **ṣaṣṭhī-vibhakti** *(genitive ending) they change thus:* **sītā – sītāyāḥ; latā – latāyāḥ** *taking the ending* **yāḥ.**

---

सा देवी । देव्याः नाम सरस्वती । देव्याः नम किम् ?

sā devī. devyāḥ nāma sarasvatī. devyāḥ nama kim?
*That (she) is a goddess. Goddess's name is Sarasvati. What is Goddess's name?*

देव्याः नाम सरस्वती ।

devyāḥ nāma sarasvatī.
*Goddess's name is Sarasvati.*

एषा नर्तकी । आभूषणम् । कस्याः अभूषणम् ?

eṣā nartakī. ābhūṣaṇam. kasyāḥ ābhūṣaṇam?
*This [she] is a dancer. [A pice of] jewellery or an ornament. Whose jewellery [is this]?*

नर्तक्याः आभूषणम् ।

nartakyāḥ ābhūṣaṇam.
*Dancer's jewellery.*

सा गृहिणी । कण्ठहारः । कस्याः कण्ठहारः ?

sā gṛhiṇī. kaṇṭhahāraḥ. kasyāḥ kaṇṭhahāraḥ?
*That [she] is a housewife. Necklace. Whose necklace [is this]?*

गृहिण्याः कण्ठहारः ।

gṛhiṇyāḥ kaṇṭhahāraḥ.
*Housewife's necklace.*

उत्तमम् ।

uttamam.
*Good!*

---

*HINDI: In the same way* **pārvatī, nalinī, nadī** *etc.,* ***īkarānta***, *feminine words ending in (long)* **-ī.** *With* **ṣaṣṭhī-vibhakti** *(genitive ending) they change thus:* **pārvatī – pārvatyāḥ; nalinī – nalinyāḥ.**

---

पुस्तकम् । पुस्तकस्य नाम श्रीमद् भगवद्गीता ।
पुस्तकस्य नाम किम् ?

pustakam. pustakasya nāma śrīmad bhagavadgītā. pustakasya nāma kim?
*A book. The book's name [is] Shrimad Bhagavad-gita. What is the book's name?*

पुस्तकस्य नाम श्रीमद् भगवद्गीता ।

pustakasya nāma śrīmad bhagavadgītā.
*The book's name [is] Shrimad Bhagavad-gita.*

काव्यम् । काव्यस्य नाम श्रीभार्गवराघवीयम् ।
काव्यस्य नाम किम् ?

kāvyam. kāvyasya nāma śrī-bhārgava-rāghavīyam. kāvyasya nāma kim?
*A [book of] poetry. The [book of] poetry's name [is] Shri-bhargava-raghaviyam. What is the [book of] poetry's name name?*

काव्यस्य नाम श्रीभार्गवराघवीयम् ।

kāvyasya nāma śrī-bhārgava-rāghavīyam.

*The [book of] poetry's name [is] Shri-bhargava-raghaviyam.*

अस्माकां देशस्य नाम किम् ?

asmākāṁ deśasya nāma kim?
*What is the name of our country?*

अस्माकां देशस्य नाम भारतम् ।

asmākāṁ deśasya nāma bhāratam.
*The name of our country is Bharata [India].*

शिक्षकस्य नाम किम् ?

śikṣakasya nāma kim?
*What is the teacher's name?*

शिक्षकस्य नाम विश्वासः ।

śikṣakasya nāma viśvāsaḥ.
*The teacher's name is Vishvasa.*

साधु साधु ।

sādhu sādhu.
*Very good!*

उदयनः उदयनस्य । सुधीरः सुधीरस्य ।

udayanaḥ udayanasya. sudhīraḥ sudhīrasya.
*Nominative and genitive of masc. names ...*

गीता - गीतायाः । प्रिया - प्रियायाः । राजेश्वरी - राजेश्वर्याः । श्रीलक्ष्मीः - श्रीलक्ष्म्याः ।

gītā – gītāyāḥ. priyā – priyāyāḥ. rājeśvarī – rājeśvaryāḥ. śrīlakṣmīḥ – śrīlakṣmyāḥ.
*Nominative and genitive of fem. names ...*

एवं रूपाणि भवन्ति ।

evaṁ rūpāṇi bhavanti.
*These are the forms (lit.: thus the forms become).*

---

वयम् इदानीम् एकम् अभ्यासं कुर्मः ।

vayam idānīm ekam abhyāsaṁ kurmaḥ.
*Now, we [will] do one exercise.*

रामः अस्ति । सर्वे "रामस्य" वदन्ति ।

rāmaḥ asti. sarve "rāmasya" vadanti.
*There is Rama. You all say of Rama.*

| | |
|---|---|
| कृष्णः | कृष्णस्य । |
| kṛṣṇaḥ | kṛṣṇasya. |
| प्रमोदः | प्रमोदस्य । |
| pramodaḥ | pramodasya. |
| बाबुलालः | बाबुलालस्य । |
| bābulālaḥ | bābulālasya. |
| रमानन्दः | रमानन्दस्य । |
| ramānandaḥ | ramānandasya. |
| रामशरणः | रामशरणस्य । |
| rāmaśaraṇaḥ | rāmaśaraṇasya. |
| राधेश्यामः | राधेश्यामस्य । |
| rādheśyāmaḥ | rādheśyāmasya. |
| शिक्षकः | शिक्षकस्य । |
| śikṣakaḥ | śikṣakasya. |
| लेखकः | लेखकस्य । |
| lekhakaḥ | lekhakasya. |
| छात्रः | छात्रस्य । |
| chātraḥ | chātrasya. |
| पुस्तकम् | पुस्तकस्य । |
| pustakam | pustakasya. |
| फलम् | फलस्य । |
| phalam | phalasya. |
| पुष्पम् | पुष्पस्य । |
| puṣpam | puṣpasya. |
| मन्दिरम् | मन्दिरस्य । |
| mandiram | mandirasya. |
| नगरम् | नगरस्य । |

| | |
|---|---|
| nagaram | nagarasya. |
| सीता | सीतायाः। |
| sītā | sītāyāḥ. |
| राधा | राधायाः। |
| rādhā | rādhāyāḥ. |
| अनिता | अनितायाः। |
| anitā | anitāyāḥ. |
| मालविका | मालविकायाः। |
| mālavikā | mālavikāyāḥ. |
| कविता | कवितायाः। |
| kavitā | kavitāyāḥ. |
| सुशीला | सुशीलायाः। |
| suśīlā | suśīlāyāḥ. |
| शबाना | शबानायाः। |
| śabānā | śabānāyāḥ. |
| पत्रिका | पत्रिकायाः। |
| patrikā | patrikāyāḥ. |
| गङ्गा | गङ्गायाः। |
| gaṅgā | gaṅgāyāḥ. |
| शारदा | शारदायाः। |
| śāradā | śāradāyāḥ. |
| भारती | भारत्याः। |
| bhāratī | bhāratyāḥ. |
| नदी | नद्याः। |
| nadī | nadyāḥ. |
| लेखनी | लेखन्याः। |
| lekhanī | lekhanyāḥ. |
| राखी | राख्याः। |
| rākhī | rākhyāḥ. |
| अङ्कनी | अङ्कन्याः। |
| aṅkanī | aṅkanyāḥ. |
| रामः | रामस्य। |
| rāmaḥ | rāmasya. |

बहुसमीचीनम्।

bahusamīcīnam.
*Very good!*

---

रामः दशरथस्य पुत्रः। रामः कस्य पुत्रः ?

rāmaḥ daśarathasya putraḥ. rāmaḥ kasya putraḥ?
*Rama is the son of Dasharatha. Whose son is Rama?*

रामः दशरथस्य पुत्रः।

rāmaḥ daśarathasya putraḥ.
*Rama is the son of Dasharatha.*

कृष्णः वसुदेवस्य पुत्रः। कृष्णः कस्य पुत्रः ?

kṛṣṇaḥ vasudevasya putraḥ. kṛṣṇaḥ kasya putraḥ?
*Krishna is the son of Vasudeva. Whose son is Krishna?*

कृष्णः वसुदेवस्य पुत्रः।

kṛṣṇaḥ vasudevasya putraḥ.
*Krishna is the son of Vasudeva.*

रामः सीतायाः पतिः। रामः कस्याः पतिः ?

rāmaḥ sītāyāḥ patiḥ. rāmaḥ kasyāḥ patiḥ?
*Rama is the husband of Sita. Whose husband is Rama?*

रामः सीतायाः पतिः।

rāmaḥ sītāyāḥ patiḥ.
*Rama is the husband of Sita.*

लक्ष्मणः उर्मिलायाः पतिः। लक्ष्मणः कस्याः पतिः ?

lakṣmaṇaḥ urmilāyāḥ patiḥ. lakṣmaṇaḥ kasyāḥ patiḥ?
*Lakshmana is the husband of Urmila. Whose husband is Lakshmana?*

लक्ष्मणः उर्मिलायाः पतिः।

lakṣmaṇaḥ urmilāyāḥ patiḥ.
*Lakshmana is the husband of Urmila.*

कृष्णः रुक्मिण्याः पतिः। कृष्णः कस्याः पतिः ?

kṛṣṇaḥ rukmiṇyāḥ patiḥ. kṛṣṇaḥ kasyāḥ patiḥ?

*Krishna is the husband of Rukmini. Whose husband is Krishna?*

कृष्णः रुक्मिण्याः पतिः ।

kṛṣṇaḥ rukmiṇyāḥ patiḥ.
*Krishna is the husband of Rukmini.*

वसुदेवः । देवकी । वसुदेवः कस्याः पतिः ?

vasudevaḥ. devakī. vasudevaḥ kasyāḥ patiḥ?
*Vasudeva. Devaki. Whose husband is Vasudeva?*

वसुदेवः देवक्याः पतिः ।

vasudevaḥ devakyāḥ patiḥ.
*Vasudeva is the husband of Devaki.*

दिल्ली भारतस्य राजधनी । दिल्ली कस्य राजधनी ?

dillī bhāratasya rājadhanī. dillī kasya rājadhanī?
*Delhi is the capital of India. Delhi is the capital of which [country]?*

दिल्ली भारतस्य राजधनी ।

dillī bhāratasya rājadhanī.
*Delhi is the capital of India.*

लखनऊ कस्य राजधनी ?

lakhanaū kasya rājadhanī?
*Lucknow is the capital of which [state]?*

लखनऊ उत्तरप्रदेशस्य राजधनी ।

lakhanaū uttara-pradeśasya rājadhanī.
*Lucknow is the capital of Uttar-pradesh.*

बेङ्गलूरु कस्य राजधनी ?

beṅgalūru kasya rājadhanī?
*Bangalore is the capital of which [state]?*

बेङ्गलूरु कर्णाटकस्य राजधनी ?

beṅgalūru karṇātakasya rājadhanī?
*Bangalore is the capital of Karnataka state?*

बहुसमीचीनम् ।

bahusamīcīnam.
*Very good!*

---

वाल्मीकिः रामायणस्य लेखकः । वाल्मीकिः कस्य लेखकः ?

vālmīkiḥ rāmāyaṇasya lekhakaḥ. vālmīkiḥ kasya lekhakaḥ?
*Valmiki is the writer of Ramayana. Valmiki is the writer of what [book]?*

वाल्मीकिः रामायणस्य लेखकः ।

vālmīkiḥ rāmāyaṇasya lekhakaḥ.
*Valmiki is the writer of Ramayana.*

व्यासः महाभारतस्य लेखकः । व्यासः कस्य लेखकः ?

vyāsaḥ mahābhāratasya lekhakaḥ. vyāsaḥ kasya lekhakaḥ?
*Vyasa is the writer of Mahabharata. Vyasa is the writer of which [book]?*

व्यासः महाभारतस्य लेखकः ।

vyāsaḥ mahābhāratasya lekhakaḥ.
*Vyasa is the writer of Mahabharata.*

---

वयम् इदानीम् एकम् अभ्यासं कुर्मः । अहम् एकं पुस्तकं दर्शयामि । सर्वे अभ्यासं कुर्मः ।

vayam idānīm ekam abhyāsaṁ kurmaḥ. aham ekaṁ pustakaṁ darśayāmi. sarve abhyāsaṁ kurmaḥ.
*Now we [will] make one exercise. I [will] show a book and we all practice.*

दशरथस्य पुत्रः रामः ।

daśarathasya putraḥ rāmaḥ.
*Dasharatha's son is Rama. (In English it is more common to say: "Rama is Dasharatha's son.")*

शिवस्य पुत्रः गणेशः।

śivasya putraḥ gaṇeśaḥ.
*Shiva's son is Ganesha.*

वसुदेवस्य पुत्रः कृष्णः।

vasudevasya putraḥ kṛṣṇaḥ.
*Vasudeva's son is Krishna.*

रावणस्य पुत्रः मेघनादः।

rāvaṇasya putraḥ meghanādaḥ.
*Ravana's son is Meghanada.*

रामस्य पुत्रः लवः।

rāmasya putraḥ lavaḥ.
*Rama's son is Lava.*

धृतराष्ट्रस्य पुत्रः दुर्योधनः।

dhṛtarāṣṭrasya putraḥ duryodhanaḥ.
*Dhrtarashtra's son is Duryodhana.*

अर्जुनस्य पुत्रः अभिमन्युः।

arjunasya putraḥ abhimanyuḥ.
*Arjuna's son is Abhimanyu.*

रघुवंशस्य लेखकः कालिदासः

raghuvaṁśasya lekhakaḥ kālidāsaḥ.
*The writer of Raghuvamsha is Kalidasa.*

रामायणस्य लेखकः वाल्मीकिः।

rāmāyaṇasya lekhakaḥ vālmīkiḥ.
*The writer of Ramayana is Valmiki.*

महाभारतस्य लेखकः व्यासः।

mahābhāratasya lekhakaḥ vyāsaḥ.
*The writer of Mahabharata is Vyasa.*

हर्षचरितस्य लेखकः बाणः।

harṣacaritasya lekhakaḥ bāṇaḥ.
*The writer of Harsha-charita is Bana.*

कर्णभारस्य लेखकः भासः।

karṇabhārasya lekhakaḥ bhāsaḥ.
*The writer of Karna-bhara is Bhasa.*

सीतायाः पतिः रामः।

sītāyāḥ patiḥ rāmaḥ.
*Sita's husband is Rama.*

उर्मिलायाः पतिः लक्ष्मणः।

urmilāyāḥ patiḥ lakṣmaṇaḥ.
*Urmila's husband is Lakshmana.*

सत्यभामायाः पतिः कृष्णः।

satyabhāmāyāḥ patiḥ kṛṣṇaḥ.
*Satyabhama's husband is Krishna.*

पार्वत्याः पतिः शिवः।

pārvatyāḥ patiḥ śivaḥ.
*Parvati's husband is Shiva.*

देवक्याः पतिः वसुदेवः।

devakyāḥ patiḥ vasudevaḥ.
*Devaki's husband is Vasudeva.*

मन्दोदर्याः पतिः रावणः।

mandodaryāḥ patiḥ rāvaṇaḥ.
*Mandodari's husband is Ravana.*

दमयन्त्याः पतिः नलः।

damayantyāḥ patiḥ nalaḥ.
*Damayanti's husband is Nala.*

---

*HINDI: If masculine name doesn't end in* **-a, -mahodayaḥ** *can be added, thus:*

---

SCREEN:

गान्धी – गान्धीमहोदयस्य

**gāndhī – gāndhī-mahodayasya**

हिलरी – हिलरीमहोदयस्य

**hilarī – hilarī-mahodayasya**

अब्दुल्ला - अब्दुल्लामहोदयस्य

**abdullā – abdullā-mahodayasya**

---

*HINDI: In the same way* ***-mahodayā*** *can be added to feminine names, thus:*

---

SCREEN:

रेणु - रेणुमहोदयायाः

**reṇu – reṇu-mahodayāyāḥ**

अमीनबी - अमीनबीमहोदयायाः

**amīnabī – amīnabī-mahodayāyāḥ**

मेरी - मेरीमहोदयायाः

**merī – merī-mahodayāyāḥ**

---

*HINDI (aproximatelly): The word* ***- mahodayaḥ*** *can be exchanged with* ***mahābhāgaḥ*** *or* ***mahāśāyaḥ****.*

---

SCREEN:

गान्धी – गान्धीमहाभागस्य

**gāndhī – gāndhī-mahābhāgasya**

हिलरी – हिलरीमहाभागस्य

**hilarī – hilarī-mahābhāgasya**

रेणु - रेणुमहाभागायाः

**reṇu – reṇu-mahābhāgāyāḥ**

अमीनबी - अमीनबीमहाभागायाः

**amīnabī – amīnabī-mahābhāgāyāḥ**

सुभाषितम्

**subhāṣitam**
**Verse**

वयम् अद्यापि एकस्य सुभाषितस्य अभ्यासं कुर्मः।

vayam adyāpi ekasya subhāṣitasya abhyāsaṁ kurmaḥ.
*Today we also do an exercise with a verse.*

भवन्तः इदानीं सुभाषितं शृण्वन्तु।

bhavantaḥ idānīṁ subhāṣitaṁ śṛṇvantu.

*Now you hear the verse!*

अयं निजः परो वेति गणना लघुचेतसाम्।

उदारचरितानां तु वसुधैव कुटुम्बकम्॥

ayaṁ nijaḥ paro veti gaṇanā laghu-cetasām
udāra-caritānāṁ tu vasudhaiva kuṭumbakam

ayam – *this;* nijaḥ – *own;* paraḥ – *of others;* vā – *or;* iti –*this;* gaṇanā – *calculation;* laghu-cetasām – *mean minded;* udāra-caritānāṁ – *broad minded;* tu – *but;* vasudha – *whole universe;* eva – *certainly;* kuṭumbakam – *family.*

*Narrow-minded people know some people as their own and some as others, but to those who are broad-minded the whole world is their family.*

इदानीं यत् सुभाषितं श्रुतवन्तः तस्य अर्थः एवम् अस्ति।

idānīṁ yat subhāṣitaṁ śrutavāntaḥ tasya arthaḥ evam asti.
*Now that we have heard this verse, here is it's meaning.*

लोके द्विविधाः जनाः भवन्ति।

loke dvividhāḥ janāḥ bhavanti.
*There are two kinds of people in the world.*

केचनाः लघुमनस्काः। ते चिन्तयन्ति "एषः मम जनः, एषः मम जनः न" इति चिन्तयन्ति।

kecanāḥ laghu-manaskāḥ. te cintayanti "eṣaḥ mama janaḥ, eṣaḥ mama janaḥ na" iti cintayanti.
*Some are narrow-minded. They think: "this is my man, this is not my man," so they think.*

अन्ये केचनाः सन्ति महात्मनाः, उदारचरिताः। ते चिन्तयन्ति "जगत् एव मम कुटुम्बः"।

anye kecanāḥ santi mahātmanāḥ, udāracaritāḥ. te cintayanti "jagat eva mama kuṭumbaḥ."
*There are some other people, great souls, broad-minded men. They think: "The whole world is my family."*

लघु कुटुम्बः तेषां दृष्ट्या समग्रः प्रपञ्चः एव मम कुटुम्बः। सज्जनाः एवं चिन्तनं कुर्वन्ति।

laghu kuṭumbaḥ. teṣāṁ dṛṣṭhyā samagraḥ prapañcaḥ eva mama kuṭumbaḥ. sajjanāḥ evaṁ cintanaṁ kurvanti.
*Small family. By their perception the whole world is one's own family. So the good (or holy) people think.*

धन्यवादः।

dhanyavādaḥ.
*Thank you!*

# LESSON 3 – OVERVIEW

*In the third lesson you will learn how to use the* **laṭ-lakāra** *(present tense) forms of the verbs in first and third person singular; how to request/demand things using* **loṭ-lakāra** *(imperative tense or mood). You will learn to count from one to twelve and from ten to hundred and say what is the time.*

**VERB ENDINGS IN PRESENT TENSE:**

**prathama-puruṣa-ekavācanam** *(3rd pers. sing.)* **-ti**
**uttama-puruṣa-ekavācanam** *(1st pers. sing.)* **-mi**

**VERB ENDINGS IN IMPERATIVE:**

**prathama-puruṣa-ekavācanam** *(3rd pers. sing.)* **-tu** *(in case of* **bhavat** *used for 2nd pers. sing.)*

## सङ्ख्याः saṅkhyāḥ *numbers*

**एकम्, द्वे, त्रीणि, चत्वारि, पञ्च, षट्, सप्त, अष्ट, नव, दश, एकादश, द्वादश ।**

ekam, dve, trīṇi, catvāri, pañca, ṣaṭ, sapta, aṣṭa, nava, daśa (ekādaśa, dvādaśa).
*One, two, three, four, five, six, seven, eight, nine, ten (eleven, twelve).*

**दश, विंशतिः, त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः, सप्ततिः, अशीतिः, नवतिः, शतम् ।**

daśa, viṁśatiḥ, triṁśat, catvāriṁśat, pañcāśat, ṣaṣṭiḥ, saptatiḥ, aśītiḥ, navatiḥ, śatam.
*Ten, twenty, thirty, fourty, fifty, sixty, seventy, eighty, ninety, hundred.*

## कः समयः ? kaḥ samayaḥ? *What is the time?*

| | | |
|---|---|---|
| अष्टवादनम् । | aṣṭa-**vādanam**. | *Eight o'clock.* |
| सपादपञ्चवादनम् । | **sapāda**-pañca-**vādanam**. | *Quarter past five o'clock.* |
| सार्धसप्तवादनम् । | **sārdha**-sapta-**vādanam**. | *Half past seven o'clock.* |
| पादोननववादनम् । | **pādona**-nava-**vādanam**. | *Quarter to nine.* |

***When saying the time from one o'clock to four o'clock numbers 1-4 are used differently.***

| | | |
|---|---|---|
| एकवादनम् । | **eka**-vādanam. | *One o'clock.* |
| द्विवादनम् । | **dvi**-vādanam. | *Two o'clock.* |
| त्रिवादनम् । | **tri**-vādanam. | *Three o'clock.* |
| चतुर्वादनम् । | **catur**-vādanam. | *Four o'clock.* |

**AVYAYA**

| | | |
|---|---|---|
| किल | kila | *Is it? Isn't it so? Is it not?* |

# Lesson 3

***First comes paricayaḥ, which we've learned in Lecture 1. Names of teacher and students are:***

**Teacher:**

शान्तला

Śāntalā

**Students:**

अक्षता अश्विनी मधुरा प्रिजाङ्क जैन

Akṣatā Aśvinī Madhurā Prijāṅka Jaina,

प्रियाङ्का स्नेहा श्रुतिः सुनीता सुष्मा

Priyāṅkā Snehā Śrutiḥ Sunītā Suṣmā

अभिरामः अभिशेकः अदितः अनन्तरामः

Abhirāmaḥ Abhiśekaḥ Aditaḥ Anantarāmaḥ

रोहितः श्रीकृष्णः वेङ्कटेशः

Rohitaḥ Śrīkṛṣṇaḥ Veṅkaṭeśaḥ

---

उत्तिष्ठतु । आगच्छतु ।

uttiṣṭhatu. āgacchatu.
*Stand up! Come!*

गच्छतु । आगच्छतु । रोहितः आगच्छति ।

gacchatu. āgacchatu. rohitaḥ āgacchati.
*Go! Come! Rohita comes.*

रोहितः किं करोति ?

rohitaḥ kiṁ karoti?
*What does Rohita do?*

रोहितः गच्छति ।

rohitaḥ gacchati.
*Rohita goes.*

आगच्छतु ।

āgacchatu.
*Come!*

रोहितः किं करोति ?

rohitaḥ kiṁ karoti?
*What does Rohita do?*

रोहितः आगच्छति ।

rohitaḥ āgacchati.
*Rohita comes.*

अभिरामः उत्तिष्ठतु । आगच्छतु । उपविशतु ।

abhirāmaḥ uttiṣṭhatu. āgacchatu. upaviśatu.
*Abhurama stand up! Come! Sit down.*

अभिरामः उपविशति ।

abhirāmaḥ upaviśati.
*Abhirama sits down.*

उत्तिष्ठतु ।

uttiṣṭhatu.
*Stand up!*

अभिरामः उत्तिष्ठति ।

abhirāmaḥ uttiṣṭhati.
*Abhirama stands up.*

उपविशतु ।

upaviśatu.
*Sit down!*

अभिरामः किं करोति ?

abhirāmaḥ kiṁ karoti?
*What does Abhirama do?*

अभिरामः उपविशति ।

abhirāmaḥ upaviśati.
*Abhirama sits down.*

अभिरामः किं करोति ?

abhirāmaḥ kiṁ karoti?
*What does Abhirama do?*

अभिरामः उत्तिष्ठति ।

abhirāmaḥ uttiṣṭhati.
*Abhirama stands up.*

उत्तमम् ।

uttamam.
*Very good.*

उत्तिष्ठतु । आगच्छतु । पिबतु ।

uttiṣṭhatu. āgacchatu. pibatu.
*Stand up! Come! Drink!*

सुनीता पिबति ।

sunītā pibati.
*Sunita drinks.*

सुनीता किं करोति ?

sunītā kiṁ karoti?
*What does Sunita do?*

सुनीता पिबति ।

sunītā pibati.
*Sunita drinks.*

भवत्याः नाम किम् ?

bhavatyāḥ nāma kim?
*What is your name?*

मम नाम श्रुतिः ।

mama nāma śrutiḥ.
*My name is Shruti.*

खादतु । सा खादति ।

khādatu. sā khādati.
*Eat! She eats.*

श्रुतिः किं करोति ?

śrutiḥ kiṁ karoti?
*What does Shruti do?*

श्रुतिः खादति ।

śrutiḥ khādati.
*Shruti eats.*

स्नेहा आगच्छतु । पठतु ।

snehā āgacchatu. paṭhatu.
*Sneha come! Read!*

स्नेहा पठति ।

snehā paṭhati.
*Sneha reads.*

स्नेहा किं करोति ?

snehā kiṁ karoti?
*What does Sneha do?*

स्नेहा पठति ।

snehā paṭhati.
*Sneha reads.*

अक्षता आगच्छतु । लिखतु ।

akṣatā āgacchatu. likhatu.
*Akshata come! Write!*

अक्षता लिखति ।

akṣatā likhati.
*Akshata writes.*

अक्षता किं करोति ?

akṣatā kiṁ karoti?
*What does Akshata do?*

अक्षता लिखति ।

akṣatā likhati.
*Akshata writes.*

अश्विनी हसतु । उत्तिष्ठतु । हसतु ।

aśvinī hasatu. uttiṣṭhatu. hasatu.
*Ashvini laugh! Stand up! Laugh!*

अश्विनी हसति ।

aśvinī hasati.
*Ashvini laughs.*

अश्विनी किं करोति ?

aśvinī kiṁ karoti?
*What does Ashvini do?*

अश्विनी हसति ।

aśvinī hasati.
*Ashvini laughs.*

अभिशेकः हसतु ।

abhiśekaḥ hasatu.
*Abhisheka laugh!*

अभिशेकः हसति ।

abhiśekaḥ hasati.
*Abhisheka laughs.*

अभिशेकः किं करोति ?

abhiśekaḥ kiṁ karoti?
*What does Abhisheka do?*

अभिशेकः हसति ।

abhiśekaḥ hasati.
*Abhisheka laughs.*

अश्विनी हसति ।

aśvinī hasati.
*Ashvini laughs.*

उपविशतु ।

upaviśatu.
*Sit down!*

पश्यतु । वेङ्कटेशः पश्यति ।

paśyatu. veṅkaṭeśaḥ paśyati.
*Look! Venkatesha looks.*

वेङ्कटेशः किं करोति ?

veṅkaṭeśaḥ kiṁ karoti?
*What does Venkatesha do?*

वेङ्कटेशः पश्यति ।

veṅkaṭeśaḥ paśyati.
*Venkatesha looks.*

प्रियाङ्का वदतु "कृष्णफलकं तत्र अस्ति" ।

priyāṅkā vadatu "kṛṣṇaphalakaṁ tatra asti".
*Priyanka, say: "Blackboard is there."*

कृष्णफलकं तत्र अस्ति ।

kṛṣṇaphalakaṁ tatra asti.
*Blackboard is there.*

प्रियाङ्का वदति ।

priyāṅkā vadati.
*Priyanka talks.*

प्रियाङ्का किं करोति ?

priyāṅkā kiṁ karoti?
*What does Priyanka do?*

प्रियाङ्का वदति ।

priyāṅkā vadati.
*Priyanka talks.*

अनन्तरामः उत्तिष्ठतु । आगच्छतु ।

anantarāmaḥ uttiṣṭhatu. āgacchatu.
*Anantarama, stand up! Come!*

अनन्तरामः किं करोति ?

anantarāmaḥ kiṁ karoti?
*What does Anantarama do?*

अनन्तरामः आगच्छति ।

anantarāmaḥ āgacchati.
*Anantarama comes.*

क्रीडतु । अनन्तरामः क्रीडति ।

krīḍatu. anantarāmaḥ krīḍati.
*Play! Anantarama plays.*

अनन्तरामः किं करोति ?

anantarāmaḥ kiṁ karoti?
*What does Anantarama do?*

अनन्तरामः क्रीडति ।

anantarāmaḥ krīḍati.
*Anantarama plays.*

---

*HINDI: Verb forms* ***gacchati, paṭhati, likhati*** *etc. are third person singular. They are used with* ***saḥ, eṣaḥ, sā, eṣā, bhavān, bhavatī*** *etc. Per example:*

---

**SCREEN:**

सः पठति ।

**saḥ paṭhati.**
***He [that man] reads.***

एषः खादति ।

**eṣaḥ khādati.**
***He [this man] eats.***

सा लिखति ।

**sā likhati.**
***She [that woman] writes.***

एषा वदति ।

**eṣā vadati.**
***She [this w.] speaks.***

---

भवान् उत्तिष्ठति ।

bhavān uttiṣṭhati.
*He stands up.*

भवान् उपविशति ।

bhavān upaviśati.
*He sits down.*

भवती पठति ।

bhavatī paṭhati.
*She reads.*

लिखतु । भवती लिखति ।

likhatu. bhavatī likhati.
*Write! She writes.*

भवान् पिबति ।

bhavān pibati.
*He drinks.*

भवती हसति ।

bhavatī hasati.
*She laughs.*

अहं गच्छामि । अहम् आगच्छामि ।

ahaṁ gacchāmi. aham āgacchāmi.
*I go. I come.*

अहम् उपविशामि । अहम् उत्तिष्ठामि ।

aham upaviśāmi. aham uttiṣṭhāmi.
*I sit down. I stand up.*

अहं पिबामि । अहं खादामि ।

ahaṁ pibāmi. ahaṁ khādāmi.
*I drink. I eat.*

अहं क्रीडामि । अहं हसामि ।

ahaṁ krīḍāmi. ahaṁ hasāmi.
*I play. I laugh.*

अहं पठामि । अहं लिखामि ।

ahaṁ paṭhāmi. ahaṁ likhāmi.
*I read. I write.*

*HINDI: Verb forms* **gacchāmi, paṭhāmi, likhāmi** *are in first person singular. Per example:*

अहं गच्छामि । अहं लिखामि । अहं पठामि । अहं वदामि ।

ahaṁ gacchāmi. ahaṁ likhāmi. ahaṁ paṭhāmi. ahaṁ vadāmi.
*I go. I write. I read. I speak.*

भवान् किं करोति ?

bhavān kiṁ karoti?
*What do you do?*

अहं पश्यामि ।

ahaṁ paśyāmi.
*I look.*

अहं पठामि ।

ahaṁ paṭhāmi.
*I read.*

*HINDI: These were the forms of first person singular.*

उत्तिष्ठतु । भवान् उत्तिष्ठति । भवान् उपविशति ।

uttiṣṭhatu. bhavān uttiṣṭhati. bhavān upaviśati.
*Stand up! He stands up. He sits down.*

पठतु । भवती पठति ।

paṭhatu. bhavatī paṭhati.
*Read. She reads.*

लिखतु । भवती लिखति ।

likhatu. bhavatī likhati.
*Write! She writes.*

पश्यतु । भवती पश्यति ।

paśyatu. bhavatī paśyati.
*Look! She looks.*

इदानीं भवन्तः वदन्तु । अहं किं करोमि ?

idānīṁ bhavantaḥ vadantu. ahaṁ kiṁ karomi?
*Now you say. What do I do?*

भवती गच्छति । भवती आगच्छति । भवती उपविशति । भवती उत्तिष्ठति । भवती वदति । भवती लिखति ।

bhavatī gacchati. bhavatī āgacchati. bhavatī upaviśati. bhavatī uttiṣṭhati. bhavatī vadati. bhavatī likhati.
*You go. You come. You sit down. You stand up. You speak. You write.*

भवान् किं करोति ?

bhavān kiṁ karoti?
*What do you do?*

अहं लिखामि ।

ahaṁ likhāmi.
*I write.*

भवान् किं करोति ?

bhavān kiṁ karoti?
*What do you do?*

अहं पठामि ।

ahaṁ paṭhāmi.
*I read.*

भवती किं करोति ?

bhavatī kiṁ karoti?
*What do you do?*

अहम् उत्तिष्ठामि ।

aham uttiṣṭhāmi.
*I stand up.*

भवती किं करोति ?

bhavatī kiṁ karoti?
*What do you do?*

अहं वदामि।

ahaṁ vadāmi.
*I speak.*

भवान् किं करोति ?

bhavān kiṁ karoti?
*What do you do?*

अहं पश्यामि।

ahaṁ paśyāmi.
*I look.*

ददातु। स्वीकरोतु।

dadātu. svīkarotu.
*Give! Here you are!*

आगच्छतु। नयतु। मास्तु। मास्तु। ददातु।

āgacchatu. nayatu. māstu. māstu. dadātu.
*Come! Take! No! No! Give!*

---

*HINDI: Exchanging the last -i in* **gacchati, paṭhati, likhati** *etc. with* **–u**, *the imperative forms are derived:* **gacchatu, paṭhatu, likhatu.** *Per example:*

---

अनन्तराम, उत्तिष्ठतु।

anantarāma, uttiṣṭhatu.
*Anantarama, stand up!*

आगच्छतु।

āgacchatu.
*Come!*

उत्तिष्ठतु। हसतु।

uttiṣṭhatu. hasatu.
*Stand up! Laugh!*

---

**SCREEN:**

**कृपया उत्तिष्ठतु।**

**kṛpayā uttiṣṭhatu.**
***Please, stand up!***

**अत्र आगच्छतु।**

**atra āgacchatu.**
***Come here!***

**उपविशतु।**

**upaviśatu.**
***Sit down!***

---

संस्कृतेन कथं सङ्ख्याः वक्तव्याः इति इदानीं वयं जानीमः।

saṁskṛtena kathaṁ saṅkhyāḥ vaktavyāḥ iti idānīṁ vayaṁ jānīmaḥ.
*Now we will learn how to say the numbers in Sanskrit.*

एकम्, द्वे, त्रीणि, चत्वारि, पञ्च, षट्, सप्त, अष्ट, नव, दश, एकादश, द्वादश।

ekam, dve, trīṇi, catvāri, pañca, ṣaṭ, sapta, aṣṭa, nava, daśa (ekādaśa, dvādaśa).
*One, two, three, four, five, six, seven, eight, nine, ten (eleven, twelve).*

षट्, सप्त, द्वे, द्वे, पञ्च, सप्त, षट्।

ṣaṭ, sapta, dve, dve, pañca, sapta, ṣaṭ.
*(Dialing:) Six, seven, two, two, five, seven, six.*

दश, विंशतिः, त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः, सप्ततिः, अशीतिः, नवतिः, शतम्।

daśa, viṁśatiḥ, triṁśat, catvāriṁśat, pañcāśat, ṣaṣṭiḥ, saptatiḥ, aśītiḥ, navatiḥ, śatam.
*Ten, twenty, thirty, fourty, fifty, sixty, seventy, eighty, ninety, hundred.*

उत्तमम्।

uttamam.
*Good!*

दश, विंशतिः, त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः, सप्ततिः, अशीतिः, नवतिः, शतम्।

daśa, viṁśatiḥ, triṁśat, catvāriṁśat, pañcāśat, ṣaṣṭiḥ, saptatiḥ, aśītiḥ, navatiḥ, śatam.
*Ten, twenty, thirty, fourty, fifty, sixty, seventy, eighty, ninety, hundred.*

धन्यवादः।

dhanyavādaḥ.
Thank you.

स्वागतम्।

svāgatam.
You're welcome!

---

*HINDI: Let's learn how to say the numbers in Sanskrit.*

---

संस्कृतेन कथं समयः वक्तव्याः इति इदानीं वयं जनीमः।

saṁskṛtena kathaṁ samayaḥ vaktavyāḥ iti idānīṁ vayaṁ jānīmaḥ.
*Now we learn how to say what is the time.*

पञ्चवादनम्। कः समयः ?

pañca-vādanam. kaḥ samayaḥ?
*Five o'clock. What is the time?*

पञ्चवादनम्।

pañca-vādanam.
*Five o'clock.*

षड्वादनम्।

ṣaḍ-vādanam.
*Six o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

अष्टवादनम्।

aṣṭa-vādanam.
*Eight o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

दशवादनम्।

daśa-vādanam.
*Ten o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

एकादशवादनम्।

ekādaśa-vādanam.
*Eleven o'clock.*

सपाद-एकादशवादनम्।

sapāda-ekādaśa-vādanam.
*Quarter past eleven o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

सपाद-एकादशवादनम्।

sapāda-ekādaśa-vādanam.
*Quarter past eleven o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

सपादपञ्चवादनम्।

sapāda-pañca-vādanam.
*Quarter past five o'clock.*

सपाद्-अष्टवादनम्।

sapāda-aṣṭa-vādanam.
*Quarter past eight o'clock.*

सार्धसप्तवादनम्।

sārdha-sapta-vādanam.
*Half past seven o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

सार्धसप्तवादनम्।

sārdha-sapta-vādanam.
*Half past seven o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

सार्धनववादनम्।

sārdha-nava-vādanam.
*Half past nine o'clock.*

सार्ध दशवादनम्।

sārdha daśa-vādanam.
*Half past ten o'clock.*

पादोन-एकादशवादनम्।

pādona-ekādaśa-vādanam.
*Quarter to eleven o'clock.*

पाद - उन। पादोन।

pāda – una. pādona.
*Quarter – to [less]. Quarter to.*

वदन्तु।

vadantu.
*Say!*

पादोन।

pādona.
*Quarter to.*

पादोन-एकादशवादनम्।

pādona-ekādaśa-vādanam.
*Quarter to eleven o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

नववादनम्।

nava-vādanam.
*Nine o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

सार्धनववादनम्।

sārdha-nava-vādanam.
*Half past nine.*

उत्तमम्।

uttamam.
*Good!*

पादोननववादनम्।

pādona-nava-vādanam.
*Quarter to nine.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

पादोननववादनम्।

pādona-nava-vādanam.
*Half past nine o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

सार्ध-एकादशवादनम् ।

sārdha-ekādaśa-vādanam.
*Half past elven o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

सपाददशवादनम् ।

sapāda-daśa-vādanam.
*Quarter past ten o'clock.*

उत्तमम् ।

uttamam.
*Good!*

महोदय, कः समयः ?

mahodaya, kaḥ samayaḥ?
*Mister, what is the time?*

सार्ध-अष्टवादनम् ।

sārdha-aṣṭa-vādanam.
*Half past eight o'clock.*

सार्ध-अष्टवादनम् । धन्यवादः ।

sārdha-aṣṭa-vādanam. dhanyavādaḥ.
*Half past eight. Thank you.*

---

वत्स ! वत्स ! उत्तिष्ठतु !

vatsa! vatsa! uttiṣṭhatu.
*Boy! Boy! Get up!*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

पश्यतु । सार्धषड्वादनम् ।

paśyatu. sārdha-ṣaḍ-vādanam.
*Look! It's half past six.*

सार्धषड्वादनम् ?

sārdha-ṣaḍ-vādanam?
*Half past six?*

सार्धषड्वादनम् ।

sārdha-ṣaḍ-vādanam.
*Half past six.*

---

*HINDI: In Sanskrit expressing time is very easy with numbers and then the word* ***vādanam.*** *Per example:*

---

पञ्चवादनम् ।

pañca-vādanam.
Five o'clock.

षड्वादनम् ।

ṣaḍ-vādanam.
Six o'clock.

---

*HINDI: The word* ***sārdha*** *conveys the meaning of "half past":*

---

सार्धनववादनम् ।

sārdha-nava-vādanam.

सार्धदशवादनम् ।

sārdha-daśa-vādanam.

सार्ध-एकादशवादनम् ।

sārdha-ekādaśa-vādanam.

सार्धद्वादशवादनम् ।

sārdha-dvādaśa-vādanam.

---

*HINDI: The word* ***pādona*** *conveys the meaning of "quarter to".*

---

पादोननववादनम् ।

pādona-nava-vādanam.

पादोनदशवादनम् ।

pādona-daśa-vādanam.

पादोन-एकादशवादनम् ।

pādona-ekādaśa-vādanam.

---

*HINDI: When saying the time from one o'clock to four o'clock numbers* **1-4** *are used differently. Per example:*

---

| | | |
|---|---|---|
| ~~एकं वादनम् ।~~ | एकवादनम् । | *One o'clock.* |
| ~~ekaṁ vādanam.~~ | eka-vādanam. | |
| ~~द्वे वादनम् ।~~ | द्विवादनम् । | *Two o'clock.* |
| ~~dve vādanam.~~ | dvi-vādanam. | |
| ~~त्रीणि वादनम् ।~~ | त्रिवादनम् । | *Three o'clock.* |
| ~~trīṇi vādanam.~~ | tri-vādanam. | |
| ~~चत्वारि वादनम् ।~~ | चतुर्वादनम् । | *Four o'clock.* |
| ~~catvāri vādanam.~~ | catur-vādanam. | |

---

## सुभाषितम्

**subhāṣitam**

***Verse***

इदानीं वयम् एकं सुभाषितं शृणमः ।

idānīṁ vayam ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now, we [will] listen to one verse.*

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।

तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ॥

priya-vākya-pradānena sarve tuṣyanti jantavaḥ.
tasmāt tadeva vaktavyaṁ vacane kā daridratā.

priya-vākya-pradānena – *by pleasant speech;* sarve – *all;* tuṣyanti – *enjoy;* jantavaḥ – *born beings;* tasmāt – *therefore;* tat – *that;* eva – *only;* vaktavyam – *should be spoken;* kā – *what (fem.);* vacane – *for such speech;* daridratā – *poverty.*

*By pleasant speech all beings are satisfied. Therefore one should speak only in that way. So what is the necessity to be poor in speech?*

वयम् इदानीं यत् सुभाषितं श्रुतवन्तः तस्य अर्थः एवम् अस्ति ।

vayam idānīṁ yat subhāṣitaṁ śrutavantaḥ tasya arthaḥ evam asti.
*Now that we've heard this verse, here is it's meaning:*

यदि वयं प्रियवाक्यं वदामः सर्वे जनाः अपि सन्तुष्टाः भवन्ति । न केवलं जनाः अपि तु सर्वे प्राणिनः अपि सन्तुष्टाः भवन्ति ।

yadi vayaṁ priya-vākyaṁ vadāmaḥ sarve janāḥ api santuṣṭāḥ bhavanti. na kevalaṁ janāḥ api tu sarve prāṇinaḥ api santuṣṭāḥ bhavanti.
*If we speak pleasantly all people will also be satisfied. Not only people, all living beings will be satisfied.*

अतः प्रियवाक्यम् एव वदामः । प्रियावक्यं वक्तुं धनं दात्तव्यं किम् अपि नास्ति । प्रियवाक्यकथने दरिद्रं कुतः ?

ataḥ priya-vākyam eva vadāmaḥ. priya-vākyaṁ vaktuṁ dhanaṁ dāttavyaṁ kim api nāsti. priya-vākya-kathane daridraṁ kutaḥ?
*Thus we always speak pleasantly. To speak pleasently there is no need to give money. Nobody is [too] poor for pleasant speech.*

## कथा

**kathā**

*Story*

अहम् इदानीम् एकं लघुकथां वदामि ।

aham idānīm ekaṁ laghu-kathāṁ vadāmi.
*Now I tell a short story.*

काशिनगरे एकः महान् पण्डितः आसीत्। सः बहुषु शास्त्रेषु पारङ्गतः। तस्य समीपे बहुछात्राः अध्ययनं कुर्वन्ति स्म। तस्य ख्यातिः सर्वत्र प्रसृतः आसित्। अतः दूरदूरतः छात्राः आगच्छन्ति स्म।

kāśi-nagare ekaḥ mahān paṇḍitaḥ āsīt. saḥ bahuṣu śastreṣu pāraṅgataḥ. tasya samīpe bahu-chātrāḥ adhyayanaṁ kurvanti sma. tasya khyātiḥ sarvatra prasṛtaḥ āsīt. ataḥ dūra-dūrataḥ chātrāḥ āgacchanti sma.
*In the city of Kashi there is one great scholar. He has studied many scriptures. Many students were studying with [near] him. His fame spread everywhere. Thus students were coming from far far away.*

एकदा कश्चन शिष्यः तस्य समीपम् आगतवान्। सः गुरोः नमस्कारं कृत्वा सः पृष्टवान् "भोः, अहं भवतः समीपे अधेनं कर्तुम् इच्छामि। अतः कृपया मां शिष्यत्वेन स्वीकरोतु" इति सः उक्तवान्।

ekadā kaścana śiṣyaḥ tasya samīpam āgatavān. saḥ guroḥ namaskāraṁ kṛtvā saḥ pṛṣṭavān: "bhoḥ, ahaṁ bhavataḥ samīpe adhenaṁ kartum icchāmi. ataḥ kṛpayā māṁ śiṣyatvena svīkarotu" iti saḥ uktavān.
*Once some student came near him. After paying obeisances to the guru he said: "Sir, I desire to study close to you. Therefore please accept me as your disciple," so he spoke.*

किन्तु गुरुः सर्वेषां छात्राणां बुद्धिपरीक्षां कृत्वा एव तान् स्वीकरोति स्म। अतः एतस्य अपि बुद्धिपरीक्षां कर्तुं सः एकं प्रश्नं पृष्टवान् "भोः वत्स ! देवः कुत्र अस्ति ?" पृष्टवान्।

kintu guruḥ sarveṣāṁ chātrāṇāṁ buddhi-parīkṣāṁ kṛtvā eva tān svīkaroti sma. ataḥ etasya api buddhi-parīkṣaṁ kartuṁ saḥ ekaṁ praśnaṁ pṛṣṭavān: "bhoḥ, vatsa! devaḥ kutra asti?" pṛṣṭavān.
*But guru accepted the students only after testing their intelligence. Therefore to test his intelligence he asked him one question: "Hey, boy! Where is God?" he asked.*

तदा शिष्यः उक्तवान् "भगवान्, देवः कुत्र नास्ति ? सः सर्वव्यापी अस्ति" इति प्रश्नरूपेण एव गुरुं पृष्टवान्।

tadā śiṣyaḥ uktavān: "bhagavān devaḥ kutra nāsti? saḥ sarvavyāpi asti" iti praśna-rūpeṇa eva guruṁ pṛṣṭavān.
*The student then said: "Respected sir, where isn't God. He is allpervading." Thus he answered to guru only in form of question.*

एतस्य उत्तरं श्रुत्वा गुरुः अत्यन्तं सन्तुष्टः जातः। सः हर्षेण तम् आलिङ्गितवान्। तम् उक्तवान् अपि "भोः वत्स ! भवान् बुद्धिमान् बालकः अस्ति। भवन्तं अहं शिष्यत्वेन निश्चयेन स्वीकरोमि। सत्यम्, देवः सर्वव्यापी अस्ति, सर्वत्र अपि अस्ति।"

etasya uttaraṁ śrutvā guruḥ atyantaṁ santuṣṭaḥ jātaḥ. saḥ harṣeṇa tam aliṅgitavān. tam uktavan api: "bhoḥ vatsa ! bhavān buddhimān bālakaḥ asti. bhavantam ahaṁ śiṣyatvena niścayena svīkaromi. satyam, devaḥ sarvavyāpi asti, sarvatra api asti."
*Hearing his reply the guru became very satisfied. He embraced him with joy. He also said: "Hey, boy! You are a very smart boy. I will accept you by your determination to be my disciple. It is true, God is allpervading and He is also everywhere."*

इति तम् उक्तवान् शिष्यत्वेन अङ्गीकृतवान्। एवं सः शिष्यः तत्र एव उषित्वा विद्याभ्यासं कृतवान्। गुरोः आशिर्वादं प्राप्तवान्।

iti tam uktavān śiṣyatvena aṅgīkṛtavān. evaṁ saḥ śiṣyaḥ tatra eva uṣitvā vidyābhyāsaṁ kṛtavān. guroḥ aśirvādaṁ prāptavān.
*Saying that to him he embraced (accepted) the boy as his disciple. In this way that disciple always staying there practiced the study. He received the guru's blessing.*

भवन्तः कथां ज्ञातवन्तः किल।

bhavantaḥ kathāṁ jñātavantaḥ kila?
*Was the story known to you, understood by you?*

ज्ञातः।

jñātaḥ.
*[It was] understood.*

# LESSON 4 – OVERVIEW

*In the fourth lesson you will learn to express the need, desire. You will get to know plural forms of pronouns and nouns and plural form of the verb* **bhū** *(to be) be in the present tense* (sa**nti**)*. You will learn to express ownership with genitive of personal pronoun* **asmad** (**mama** – *my).*

**ADJECTIVE आवश्यक-** āvaśyaka(-ḥ, -m, -ā) *(necessary, needed) –* ***expresses the want, desire:***

चायम् आवश्यकम् ? cāyam āvaśyakam? *Would you like some tea?*

चाकलेहः आवश्यकः cākalehaḥ āvaśyakaḥ? *Would you like chocolate?*

**Ṣaṣṭhī-vibhakti** *(genitive) of the* ***personal pronoun*** **asmad***(I) in singular is:*

| | | |
|---|---|---|
| मम | mama | *my, of me* |

*the* ***personal pronouns*** **tat** *(that) and* **tat** *(this) change in plural to:*

| *- for further away:* | | | | *- for nearby:* | | | *Interrogatives:* | | |
|---|---|---|---|---|---|---|---|---|---|
| *m.* | ते | te | *those* | एते | ete | *these* | के ? | ke? | *which (who)?* |
| *f.* | ताः | tāḥ | *those* | एताः | etāḥ | *these* | काः ? | kāḥ? | *which (who)?* |
| *n.* | तानि | tāni | *those* | एतानि | etāni | *these* | कानि ? | kāni? | *which (what)?* |

## एकवचनम् ekavacanam (singular) / बहुवचनम् bahuvacanam *(plural)*

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| *m.* | छात्रः | chātraḥ asti | *student is* | => | छात्राः | chātrāḥ santi | *students are* |
| *f.* | छात्रा | chātrā asti | *student is* | => | छात्राः | chātrāḥ santi | *students are* |
| | कूपी | kūpī asti | *bottle is* | => | कूप्यः | kūpyaḥ santi | *bottle are* |
| *n.* | पुस्तकम् | pustakam asti | *book is* | => | पुस्तकानि | pustakāni santi | *books are* |

***Verb forms are the same in all genders.***

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| *m.* | भवान् | bhavān | *he (you)* | => | भवन्तः | bhavantaḥ | *they* |
| *f.* | भवती | bhavatī | *she (you)* | => | भवत्यः | bhavatyaḥ | *they* |
| *n.* | अहम् | aham | *I* | => | वयम् | vayam | *we* |

# Lesson 4

नमो नमः।

namo namaḥ.
*Respects.*

नमो नमः।

namo namaḥ.
*Respects.*

संस्कृतभाषाशिक्षणे भवतां सर्वेषां अपि स्वागतम्।

saṁskṛta-bhāṣā-śikṣaṇe bhavatāṁ sarveṣāṁ api svāgatam.
*Welcome [to you all] to the study of Sanskrit language.*

आगच्छन्तु ।

āgacchantu.
*Come!*

संस्कृतसंभाषणस्य अभ्यासं कुर्मः।

saṁskṛta-saṁbhāṣanasya abhyāsaṁ kurmaḥ.
*We [will] do exercises in spoken Sanskrit.*

मान्ये ! जलम् आवश्यकम् ?

mānye! jalam āvaśyakam?
*Madam! Would you like water? (lit: Is water needed?)*

आगच्छतु।

āgacchatu.
*Come!*

कफी आवश्यकम् ?

kaphī āvaśyakam?
*Would you like koffee?*

मास्तु, मास्तु।

māstu, māstu.
*No, I wouldn't (lit: [It] shouldn't be!)*

चायम् आवश्यकम् ?

cāyam āvaśyakam?
*Would [you] like tea?*

मास्तु।

māstu.
*No, [I] wouldn't.*

किम् आवश्यकम् ?

kim āvaśyakam?
*What would [you] like?*

जलम् आवश्यकम्।

jalam āvaśyakam.
*I would like water. (lit.: [There is] need for water.)*

स्वीकरोतु।

svīkarotu.
*Here you are. (lit: Take!).*

किञ्चित् आवश्यकम् ?

kiñcit āvaśyakam?
*Would you like a little more (lit: Need for some?)*

आम्।

ām.
*Yes.*

स्वीकरोतु।

svīkarotu.
*Here you are!*

पुनः किञ्चित् ?

punaḥ kiñcit?
*Some more?*

मास्तु मास्तु, पर्याप्तम्। धन्यवादः।

māstu māstu, paryāptam. dhanyavādaḥ.
*No, no. [It's] enough. Thank you.*

स्वागतम्।

svāgatam.
*[You're] wellcome.*

---

धनम् आवश्यकम्?

dhanam āvaśyakam?
*Would you like some money?*

न आवश्यकम्।

na āvaśyakam.
*No, we wouldn't like [the money].*

मास्तु धनम्?

māstu dhanam?
*No need for money?*

धनम् आवश्यकम्?

dhanam āvaśyakam?
*Do you need money?*

मास्तु।

māstu.
*No, we don't.*

चाकलेहः आवश्यकः।

cākalehaḥ āvaśyakaḥ?
*Would you like chocolate?*

आम् चाकलेहः आवश्यकः।

ām, cākalehaḥ āvaśyakaḥ.
*Yes, we'd like chocolate.*

मिष्ठान्नम् आवश्यकम्?

miṣṭhānnam āvaśyakam?
*Would you like sweet dish?*

मिष्ठान्नम् मधुरम् आवश्यकम्?

miṣṭhānnam, madhuram āvaśyakam?
*Would you like sweet dish?*

मधुरम् आवश्यकम्।

madhuram āvaśyakam.
*Yes, we'd like sweet dish.*

किम् आवश्यकम्?

kim āvaśyakam?
*What do you want, need?*

मधुरम् आवश्यकम्।

madhuram āvaśyakam.
*We want sweet dish.*

शिक्षणम् आवश्यकम्?

śikṣaṇam āvaśyakam?
*Do you want the class?*

मास्तु।

māstu.
*No.*

शिक्षणम् मास्तु?

śikṣaṇam māstu?
*You don't want the class?*

संस्कृतम् आवश्यकं वा?

saṁskṛtam āvaśyakaṁ vā?
*Do you want Sanskrit?*

आवश्यकम्।

āvaśyakam.
*We want, need.*

सस्कृतम् आवश्यकम्।

saṁskṛtam āvaśyakam.
*There is need for Sanskrit.*

धनम् आवश्यकम् ।

dhanam āvaśyakam.
*There is need for money.*

वस्त्रम्

vastram...
*Dress...*

आवश्यकम् ।

...āvaśyakam.
*...is needed (necessary).*

जलम् आवश्यकम् ?

jalam āvaśyakam?
*Would you like water?*

जलं मास्तु ।

jalaṁ māstu.
*No, I wouldn't like water.*

ताडनम् आवश्यकं वा ?

tāḍanam āvaśyakaṁ vā?
*Would you like beating?*

मास्तु मास्तु ।

māstu māstu.
*No, we wouldn't.*

ताडनं मास्तु ?

tādanaṁ māstu?
*No beating?*

वस्त्रम् आवश्यकम् । धनम् आवश्यकम् ।

vastram āvaśyakam. dhanam āvaśyakam.
*There is need for clothes. There is need for money.*

कोलाहलः मास्तु । द्वेषः मास्तु ।

kolāhalaḥ māstu. dveṣaḥ māstu.
*There shouldn't be noise. There shouldn't be jealousy.*

---

*HINDI: To express the need or want for something the word* ***āvaśyakam*** *is used. To express there is no need, the word* ***māstu*** *is used. The word* ***paryāptam*** *means "enough".*

---

इदानीम् एकम् अभ्यासं कुर्मः ।

idānīm ekam abhyāsaṁ kurmaḥ.
*Now we do one exercise.*

रोहितः । भवान् आगच्छतु ।

rohitaḥ. bhavān āgacchatu.
*Rohita, please come!*

अहं "भवतः युतकं" वदामि । भवान् "मम युतकं" वदतु । सर्वे वदन्तु "रोहितस्य युतकम् " । असतु ?

ahaṁ "bhavataḥ yutakaṁ" vadāmi. bhavān "mama yutakaṁ" vadatu. sarve vadantu "rohitasya yutakam." astu?
*I say "your shirt", you say "my shirt". All of you say "Rohita's shirt". All right?*

भवतः युतकम् ।

bhavataḥ yutakam.
*Your shirt.*

मम युतकम् ।

mama yutakam.
*My shirt.*

रोहितस्य युतकम् ।

rohitasya yutakam.
*Rohita's shirt.*

भवतः कर्णः ।

bhavataḥ karṇaḥ.
*Your ear.*

मम कर्णः ।

mama karṇaḥ.
*My ear.*

रोहितस्य कर्णः।

rohitasya karṇaḥ.
*Rohita's ear.*

भवतः नासिका।

bhavataḥ nāsikā.
*Your nose.*

मम नासिका।

mama nāsikā.
*My nose.*

रोहितस्य नासिका।

rohitasya nāsikā.
*Rohita's nose.*

समीचीनम्। गच्छतु।

samīcīnam. gacchatu.
*Very good! [You may] go!*

सुनिते भवती आगच्छतु। अहं "भवत्याः आभूषणं" वदामि। भवती "मम आभूषणं" वदतु। भवन्तः "सुनितायाः आभूषणं" इति वदन्तु। अस्तु वा?

sunite bhavatī āgacchatu. ahaṁ "bhavatyāḥ ābhūṣaṇaṁ" vadāmi. bhavatī "mama ābhūṣaṇaṁ" vadatu. bhavantaḥ "sunitāyāḥ ābhūṣaṇam" iti vadantu. astu vā?
*Sunita, you come, please. I say "your ornament", you say "my ornament", you all say "Sunita's ornament". Is it all right?*

भवत्याः आभूषणं।

bhavatyāḥ ābhūṣaṇaṁ.
*Your ornament.*

मम आभूषणम्।

mama ābhūṣaṇam.
*My ornament.*

सुनितायाः आभूषणम्।

sunitāyāḥ ābhūṣaṇam.
*Sunita's ornament.*

भवत्याः घटी।

bhavatyāḥ ghaṭī.
*Your watch.*

मम घटी।

mama ghaṭī.
*My watch.*

सुनितायाः घटी।

sunitāyāḥ ghaṭī.
*Sunita's watch.*

भवत्याः केशः।

bhavatyāḥ keśaḥ.
*Your hair.*

मम केशः।

mama keśaḥ.
*My hair.*

सुनितायाः केशः।

sunitāyāḥ keśaḥ.
*Sunita's hair.*

साधु साधु।

sādhu sādhu.
*Very good!*

---

पुनः एकम् अभ्यासं कुर्मः।

punaḥ ekam abhyāsaṁ kurmaḥ.
*Let's do one exercise again.*

कः कस्य मित्रम् अथवा का कस्याः सखी इति भवन्तः वदन्तु । उदाहरणं वदामि । "रोहितः अभिशेकस्य मित्रम् ।" "सुनीता प्रियाङ्कायाः सखी ।" इदानीं भवन्तः वदन्तु ।

kaḥ kasya mitram athavā kā kasyāḥ sakhī iti bhavantaḥ vadantu. udāharaṇaṁ vadāmi. "rohitaḥ abhiśekasya mitram." "sunītā priyāṅkāyāḥ sakhī." idānīṁ bhavantaḥ vadantu.
*You say, who is whose friend or girl-friend. I will do it for practice: "Rohita is Abhisheka's friend." "Sunita is Priyankaya's girl-friend." Now you say!*

कृष्णः वदतु ।

kṛṣṇaḥ vadatu.
*Krishna, you say!*

रोहितः अभिशेकस्य मित्रः ।

rohitaḥ abhiśekasya mitra**ḥ.**
*Rohita is Abhisheka's friend.* **(Mistake!)**

मित्रम् ।

mitra**m.**
*Friend.* **(Teacher corrects!)**

रोहितः अभिशेकस्य मित्रम् ।

rohitaḥ abhiśekasya mitram.
*Rohita is Abhisheka's friend.*

उत्तमम् ।

uttamam.
*Good!*

मधुरा श्रुत्याः सखी ।

madhurā śrutyāḥ sakhī.
*Madhura is Shruti's girl-friend.*

उत्तमम् ।

uttamam.
*Good!*

इदानीं वयं बहुवचनस्य अभ्यासं कुर्मः ।

idānīṁ vayaṁ bahu-vacanasya abhyāsaṁ kurmaḥ.
*Now we do exercise in plural.*

छात्रः । छात्राः ।

chātraḥ. chātrāḥ.
*Student. Students.*

दन्तकूर्चः । दन्तकूर्चाः ।

danta-kūrcaḥ. danta-kūrcāḥ.
*Toothbrush. Toothbrushes.*

चषकः । चषकाः ।

caṣakaḥ. caṣakāḥ.
*Glass. Glasses.*

बालकः । बालकाः ।

bālakaḥ. bālakāḥ.
*Boy. Boys.*

सैनिकः । सैनिकाः ।

sainikaḥ. sainikāḥ.
*Soldier. Soldiers.*

वृक्षः । वृक्षाः ।

vṛkṣaḥ. vṛkṣāḥ.
*Tree. Trees.*

---

*HINDI: These are masculine words ending in* **-a.** *In all the plural forms* **–āh** *are added in the end.*

---

छात्रा । छात्राः ।

chātrā. chātrāḥ.
*Student. Students.*

पत्रिका । पत्रिकाः ।

patrikā. patrikāḥ.
*Newspaper. Newspapers.*

सिक्थवर्तिका। सिक्थवर्तिकाः।

sikthavartikā. sikthavartikāḥ.
*Candle. Candles.*

पेटिका। पेटिकाः।

peṭikā. peṭikāḥ.
*Box. Boxes.*

उत्पीठिका। उत्पीठिकाः।

utpīṭhikā. utpīṭhikāḥ.
*Table. Tables.*

---

*HINDI: Feminine words ending in* **-ā** *take visarga* **(ḥ)** *ending in plural.*

---

लेखनी। लेखन्यः।

lekhanī. lekhanyaḥ.
*Pen. Pens.*

अङ्कनी। अङ्कन्यः।

aṅkanī. aṅkanyaḥ.
*Pencil. Pencil.*

घटी। घट्यः।

ghaṭī. ghaṭyaḥ.
*Watch. Watches.*

कूपी। कूप्यः।

kūpī. kūpyaḥ.
*Bottle. Bottles.*

---

*HINDI: Feminine words ending in* **-ī** *change the ending in plural to* **-yaḥ.**

---

पर्णम्। पर्णानि।

parṇam. parṇāni.
*Leaf. Leafs.*

पुस्तकम्। पुस्तकानि।

pustakam. pustakāni.
*Book. Books.*

कङ्कणम्। कङ्कणानि।

kaṅkaṇam. kaṅkaṇāni.
*Bangle. Bangles.*

फलम्। फलानि।

phalam. phalāni.
*Fruit. Fruits.*

सङ्गणकम्। सङ्गणकानि।

saṅgaṇakam. saṅgaṇakāni.
*Computer. Computers.*

---

*HINDI: Neuter words ending in* **-m** *change the ending in plural to* **-āni.**

---

छात्रः अस्ति। छात्राः सन्ति।

chātraḥ asti. chātrāḥ santi.
*Student is. Students are.*

छात्रा अस्ति। छात्राः सन्ति।

chātrā asti. chātrāḥ santi.
*Student is. Students are.*

दन्तकूर्चः अस्ति। दन्तकूर्चाः सन्ति।

danta-kūrcaḥ asti. danta-kūrcāḥ santi.
*Toothbrush is. Toothbrushes are.*

दन्तकूर्चाः। वदन्तु।

danta-kūrcāḥ. vadantu.
*Toothbrush. Say!*

दन्तकूर्चाः।

danta-kūrcāḥ.
*Toothbrush.*

चमसः अस्ति । चमसाः सन्ति ।

camasaḥ asti. camasāḥ santi.
*Spoon is. Spoons are.*

अङ्कनी अस्ति । अङ्कन्यः सन्ति ।

aṅkanī asti. aṅkanyaḥ santi.
*Pencil is. Pencils are.*

पर्णम् अस्ति । पर्णानि सन्ति ।

parṇam asti. parṇāni santi.
*Leaf is. Leafs are.*

अहम् एकवचने वदामि भवन्तः परिवर्तनं कुर्वन्तु ।

वृक्षः अस्ति ।

aham eka-vacane vadāmi bhavantaḥ parivartanaṁ kurvantu. vṛkṣaḥ asti.
*I say singular, you make a change... Tree is.*

वृक्षाः सन्ति ।

vṛkṣāḥ santi.
*Trees are.*

बालकः अस्ति ।

bālakaḥ asti.
*Boy is.*

बालकाः सन्ति ।

bālakāḥ santi.
*Boys are.*

गायकः अस्ति ।

gāyakaḥ asti.
*Singer is.*

गायकाः सन्ति ।

gāyakāḥ santi.
*Singers are.*

लेखकः अस्ति ।

lekhakaḥ asti.
*Writer is.*

लेखकाः सन्ति ।

lekhakāḥ santi.
*Writers are.*

आपणः अस्ति ।

āpaṇaḥ asti.
*Shop is.*

आपणाः सन्ति ।

āpaṇāḥ santi.
*Shops are.*

बालिका अस्ति ।

bālikā asti.
*Girl is.*

बालिकाः सन्ति ।

bālikāḥ santi.
*Girls are.*

पत्रिका अस्ति ।

patrikā asti.
*Newspaper is.*

पत्रिकाः सन्ति ।

patrikāḥ santi.
*Newspapers are.*

पत्रम् अस्ति ।

patram asti.
*Leaf is.*

पत्राणि सन्ति ।

patrāṇi santi.
*Leafs are.*

पुष्पम् अस्ति ।

puṣpam asti.
*Flower is.*

पुष्पाणि सन्ति ।

puṣpāṇi santi.
*Flowers are.*

मन्दिरम् अस्ति ।

mandiram asti.
*Temple is.*

मन्दिराणि सन्ति ।

mandirāṇi santi.
*Temples are.*

फलम् अस्ति ।

phalam asti.
*Fruit is.*

फलानि सन्ति ।

phalāni santi.
*Fruits are.*

पर्णम् अस्ति ।

parṇam asti.
*Leaf is.*

पर्णानि सन्ति ।

parṇāni santi.
*Leafs are.*

अङ्कनी अस्ति ।

aṅkanī asti.
*Pencil is.*

अङ्कन्यः सन्ति ।

aṅkanyaḥ santi.
*Pencils are.*

लेखनी अस्ति । लेखन्यः सन्ति ।

lekhanī asti. lekhanyaḥ santi.
*Pen is. Pens are.*

---

इदानीम् एकम् अभ्यासं कुर्मः । बालिकाः सन्ति ।

बालकाः सन्ति ।

idānīm ekam abhyāsaṁ kurmaḥ. bālikāḥ santi. bālakāḥ santi.
*Now we do one exercise. Girls are [there]. Boys are [there].*

बालकः एकवचनवाक्यं वदति बालिकाः बहुवचनरूपं वदन्ति । तस्य वाक्यस्य बहुवचनरूपं वदन्ति । बालिका एकवचनवाक्यं वदति बालकाः परिवर्तयन्ति । अस्तु वा ? अस्तु ?

bālakaḥ ekavacana-vākyaṁ vadati bālikāḥ bahuvacana-rūpaṁ vadanti. tasya vākyasya bahuvacana-rūpaṁ vadanti. bālikā ekavacana-vākyaṁ vadati bālakāḥ parivartayanti. astu vā? astu?
*A boy says a sentence in singular and girls say it in plural. They say his sentence in plural. A girl says a sentence in singular, boys change it to plural. Is it all right? All right?*

अस्तु ।

astu.
*All right!*

वदतु ।

vadatu.
*Say!*

बालिका अस्ति ।

bālikā asti.
*Girl is.*

बालिकाः सन्ति ।

bālikāḥ santi.
*Girls are.*

उत्तमम्।

uttamam.
*Good!*

पुस्तकम् अस्ति।

pustakam asti.
*Book is.*

पुस्तकानि सन्ति।

pustakāni santi.
*Books are.*

वृक्षः अस्ति।

vṛkṣaḥ asti.
*Tree is.*

वृक्षाः सन्ति।

vṛkṣāḥ santi.
*Trees are.*

लेखनी अस्ति।

lekhanī asti.
*Pen is.*

लेखन्यः सन्ति।

lekhanyaḥ santi.
*Pens are.*

पत्रिका अस्ति।

patrikā asti.
*Newspaper is.*

पत्रिकाः सन्ति।

patrikāḥ santi.
*Newspapers are.*

घटी अस्ति।

ghaṭī asti.
*Watch is.*

घट्यः सन्ति।

ghaṭyaḥ santi.
*Watches are.*

उत्तमम्। साधु साधु।

uttamam. sādhu sādhu.
*Good! Congratulations!*

कृष्ण, उत्तिष्ठतु।

kṛṣṇa, uttiṣṭhatu.
*Krishna, stand up!*

सः छात्रः। ते छात्राः।

saḥ chātraḥ. te chātrāḥ.
*He [is] a student. They [are] students.*
***(The verb "to be" is implied, it doesn't need to be explicitely expressed.)***

सः पुरुषः। ते पुरुषाः।

saḥ puruṣaḥ. te puruṣāḥ.
*He [is] a man. They [are] men.*

सः कः ?

saḥ kaḥ?
*Who is he?*

सः पुरुषः।

saḥ puruṣaḥ.
*He is a man.*

ते के ?

te ke?
*Who are they?*

ते पुरुषाः।

te puruṣāḥ.
*They are men.*

कः पुरुषः ?

kaḥ puruṣaḥ?
*Who is a man?*

सः पुरुषः।

saḥ puruṣaḥ.
*He is a man.*

हस्तं दर्शयन्तु।

hastaṁ darśayantu.
*Show with your hand.*

सः कः ?

saḥ kaḥ?
*Who is he?*

सः पुरुषः।

saḥ puruṣaḥ.
*He is a man.*

कः पुरुषः ?

kaḥ puruṣaḥ?
*Who is a man?*

सः पुरुषः।

saḥ puruṣaḥ.
*He is a man.*

ते पुरुषाः।

te puruṣāḥ.
*They are men.*

ते के ?

te ke?
*Who are they?*

ते पुरुषाः।

te puruṣāḥ.
*They are men.*

के पुरुषाः ?

ke puruṣāḥ?
*Who are men?*

ते पुरुषाः।

te puruṣāḥ.
*They are men.*

अक्षता उत्तिष्ठतु।

akṣatā uttiṣṭhatu.
*Akshata, stand up!*

बालिका। बालिकाः। सा बालिका। ताः बालिकाः।

bālikā. bālikāḥ. sā bālikā. tāḥ bālikāḥ.
*Girl. Girls. She is a girl. They are girls.*

सा पेटिका। ताः पेटिकाः।

sā peṭikā. tāḥ peṭikāḥ.
*That is a box. Those are boxes.*

सा का ?

sā kā?
*What is that?*

सा पेटिका।

sā peṭikā.
*That is a box.*

ताः काः ?

tāḥ kāḥ?
*What are those?*

ताः पेटिकाः।

tāḥ peṭikāḥ.
*Those are boxes.*

का पेटिका ?

kā peṭikā?
*Which box?*

सा पेटिका।

sā peṭikā.
*That box.*

सर्वे हस्तं दर्शयन्तु ।

sarve hastaṁ darśayantu.
*You all show with hands.*

का पेटिका ?

kā peṭikā?
*Which box?*

सा पेटिका ।

sā peṭikā.
*That box.*

काः पेटिकाः ?

kāḥ peṭikāḥ?
*What are boxes?*

ताः पेटिकाः ।

tāḥ peṭikāḥ.
*Those are boxes.*

तत् चित्रम् । तानि चित्राणि ।

tat citram. tāni citrāṇi.
*That is a picture. Those are pictures.*

तत् किम् ?

tat kim?
*What is that?*

तत् चित्रम् ।

tat citram.
*That is a picture.*

तानि कानि ?

tāni kāni?
*What are those?*

तानि चित्राणि ।

tāni citrāṇi.
*Those are pictures.*

समीचीनम् ।

samīcīnam.
*Good!*

ते वृक्षाः ।

te vṛkṣāḥ.
*Those are trees.*

एते छात्राः ।

ete chātrāḥ.
*These are students.*

एते वृक्षाः ।

ete vṛkṣāḥ.
*These are trees.*

ते छात्राः ।

te chātrāḥ.
*Those (masc.) are students.*

एते के ?

ete ke?
*What are these?*

ते वृक्षाः ।

te vṛkṣāḥ.
*Those are trees.*

उत्तमम् ।

uttamam.
Good!

---

*HINDI: The words* ***tat*** *(for far away objects of persons) and* ***etat*** *(for close objects of persons) change in this way in masculine plural:* ***tat*** *changes to* ***te.*** *Per example:*

---

ते वृक्षाः ।

te vṛkṣāḥ.
*Those are trees.*

*HINDI: **Etat** changes to **ete.** Per example:*

एते छात्राः।

ete chātrāḥ.
*These are students.*

ताः घट्यः।

tāḥ ghaṭyaḥ.
*Those are watches.*

एताः बालिकाः।

etāḥ bālikāḥ.
*These are girls.*

एताः घट्यः।

etāḥ ghaṭyaḥ.
*These are watches.*

ताः बालिकाः।

tāḥ bālikāḥ.
*Those are girls.*

एताः काः ?

etāḥ kāḥ?
*What are these?*

ताः घट्यः।

tāḥ ghaṭyaḥ.
*Those are watches.*

काः घट्यः?

kāḥ ghaṭyaḥ?
*What are watches?*

ताः घट्यः।

tāḥ ghaṭyaḥ.
*Those are watches.*

एताः काः ?

etāḥ kāḥ?
*What are these?*

ताः घट्यः।

tāḥ ghaṭyaḥ.
*Those are watches.*

बहुसमीचीनम्।

bahu-samīcīnam.
*Very good!*

*HINDI: When persons or objects of feminine gender are far away the form **tāḥ** is used and when they are near by **etāḥ** is used. Per example:*

ताः घट्यः।

tāḥ ghaṭyaḥ.
*Those are watches.*

एताः बालिकाः।

etāḥ bālikāḥ.
*These are girls.*

*HINDI: When persons or objects of neuter gender are far away the form **tāni** is used and when they are near by **etāni** is used. Per example:*

तानि फलानि।

tāni phalāni.
*Those are fruits.*

एतानि पुस्तकानि।

etāni pustakāni.
*These are books.*

तानि पुस्तकानि।

tāni pustakāni.
*Those are books.*

एतानि फलानि ।

etāni phalāni.
*These are fruits.*

एतानि फलानि ।

etāni phalāni.
*These are fruits.*

एतानि कानि ?

etāni kāni?
*These are what?*

तानि फलानि ।

tāni phalāni.
*Those are fruits.*

साधु साधु ।

sādhu sādhu.
*Great!*

भवान् बालकः । भवन्तः बालकाः ।

bhavān bālakaḥ. bhavantaḥ bālakāḥ.
*You are a boy. You are boys.*

भवती बालिका । भवत्यः बालिकाः ।

bhavatī bālikā. bhavatyaḥ bālikāḥ.
*You are a girl. You are girls.*

अहं भारतीया । वयं भारतीयाः ।

ahaṁ bhāratīyā. vayaṁ bhāratīyāḥ.
*I am Indian. We are Indians.*

वयं के ?

vayaṁ ke?
*What are we?*

वयं भारतीयाः ।

vayaṁ bhāratīyāḥ.
*We are Indians.*

अहं देशभक्ता ।

ahaṁ deśabhaktā.
*I am a patriot.*

वयं के ?

vayaṁ ke?
*What are we?*

वयं देशभक्ताः ।

vayaṁ deśabhaktāḥ.
*We are patriots.*

भवन्तः बालकाः ।

bhavantaḥ bālakāḥ.
*You are boys.*

भवन्तः के ?

bhavantaḥ ke?
*What are you?*

वयं बालकाः ।

vayaṁ bālakāḥ.
*We are boys.*

भवत्यः बालिकाः ।

bhavatyaḥ bālikāḥ.
*You are girls.*

भवत्यः काः ?

bhavatyaḥ kāḥ?
*What are you?*

वयं बालिकाः ।

vayaṁ bālikāḥ.
*We are girls.*

समीचीनम् ।

samīcīnam.
*Good!*

SCREEN:

**भवान् - भवन्तः**

**bhavān – bhavantaḥ**
***you (masc.) – they (masc.)***

**भवती - भवत्यः**

**bhavatī – bhavatyaḥ**
***you (fem.) – they (fem.)***

**अहम् - वयम्**

**aham – vayam**
***I – we***

---

*HINDI: You must have understood the meaning of all these words.*

---

अहं भारतीया। भवन्तः के ?

ahaṁ bhāratīyā. bhavantaḥ ke?
*I am Indian. What are you?*

वयं भारतीयाः।

vayaṁ bhāratīyāḥ.
*We are Indians.*

अहं देशभक्ता।

ahaṁ deśabhaktā.
*I am a patriot.*

वयं देशभक्ताः।

vayaṁ deśabhaktāḥ.
*We are patriots.*

अहं राष्ट्रभक्ता।

ahaṁ rāṣṭrabhaktā.
*I am a patriot.*

वयं राष्ट्रभक्ताः।

vayaṁ rāṣṭrabhaktāḥ.
*We are patriots.*

अहं चतुरा।

ahaṁ caturā.
*I am clever.*

वयं चतुराः।

vayaṁ caturāḥ.
*We are smart.*

अहं मूर्खा।

ahaṁ mūrkhā.
*I am stupid.*

वयं मूर्खाः।

vayaṁ mūrkhāḥ.
*We are stupid.*

---

**सुभाषितम्।**

**subhāṣitam.**
***Verse.***

वयम् इदानीम् एकं सुभाषितं शृण्मः।

vayam idānīm ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now we hear a verse.*

नाभिषेको न संस्कारः सिंहस्य क्रियते वने।
विक्रमार्जितसत्त्वस्य स्वयमेव मृगेन्द्रता॥

nābhiṣeko na saṁskāraḥ siṁhasya kriyate vane.
vikramārjita-sattvasya svayam eva mṛgendratā.

na – *not;* abhiṣekaḥ – *ceremonial bathing;* na – *not;* saṁskāraḥ – *ceremony;* siṁhasya – *of lion;* kriyate – *is done;* vane – *in the forrest;* vikramārjita-sattvasya – *by his own ability, strength;* svayam – *by himself;* eva – *certainly;* mṛgendratā – *the rulership of animals.*

*The lion becomes the king of animals not by ceremonial bathing nor by samskara ceremony, his rulership is established by his own ability.*

वयम् इदानीं यत् सुभाषितं श्रुतवन्तः तस्य अर्थः एवम् अस्ति ।

vayam idānīṁ yat subhāṣitaṁ śrutavantaḥ tasya arthaḥ evam asti.
*Now that we've heard this verse, here is it's meaning:*

सिंहः वनराजः इति प्रसिद्धः । किन्तु तस्य कोऽपि अभिषेकं न करोति, कम् अपि संस्कारं न ददाति । तथापि सः वनराजः । कथम् ?

siṁhaḥ vanarājaḥ iti prasiddhaḥ. kintu tasya ko 'pi abhiṣekaṁ na karoti, kam api saṁskāraṁ na dadāti. tathāpi saḥ vanarājaḥ. katham?
*The lion is famous as the king of animals. But he doesn't make any abhisheka or samskara. Despite that he is the king of animals. How [is it so]?*

सः स्वसामर्थ्येन एव स्वप्रयत्नेन एव वनस्य आधिपत्यं प्राप्नोति ।

saḥ sva-sāmarthyena eva sva-prayatnena eva vanasya ādhipatyaṁ prāpṇoti.
*He achieves rulership of forrest by his own ability, by his endeavor.*

एवम् एव स्वमर्थ्यवान् पुरुषः स्वस्य प्रयत्नेन एव अत्युन्नतं पदं प्राप्तुं शक्नोति ।

evam eva sāmarthyavān puruṣaḥ svasya prayatnena eva atyunnataṁ padaṁ prāptuṁ śaknoti.
*In the same way the able person can by his own endeavor also attain the highest abode.*

---

**कथा**

**kathā**
**Story**

अतिसरलां रम्यां कथां शृणुमः । एकां कथां वदामि ।

atisaralāṁ ramyāṁ kathāṁ śṛṇumaḥ. ekāṁ kathāṁ vadāmi.
*We hear a very simple nice story. I tell one story.*

कश्चन वृद्धः अस्ति । सः बहुनिशक्तः । तस्य शक्तिः नास्ति । जीर्णं शरीरम् अस्ति । चलितुं न शक्नोति ।

kaścana vṛddhaḥ asti. saḥ bahu-niśaktaḥ. tasya śaktiḥ nāsti. jīrṇaṁ śarīram asti. calituṁ na śaknoti.
*There is an old man. He is very week. His strength is not there. His body is old and worn out. He can't walk.*

सः बुभुक्षितः अस्ति । सः एकं वनं गच्छति । वने सर्वत्र भ्रमणं करोति । "खादितुं किम् अपि लभ्यते वा ?" इति सर्वत्र भ्रमणं करोति ।

saḥ bubhukṣitaḥ asti. saḥ ekaṁ vanaṁ gacchati. vane sarvatra bhramaṇaṁ karoti. khādituṁ kim api labhyate vā? iti sarvatra bhramaṇaṁ karoti.
*He is hungry. He goes to one forrest. He wanders everywhere in the forrest. "Is there something to obtain to eat?" thus he wanders everywhere.*

सः एकं वृक्षं समीपं गच्छति । वृक्षं पश्यति । उत्तमानि फलानि सन्ति । किन्तु फलानि उपरि सन्ति ।

saḥ ekasya vṛkṣasya samīpaṁ gacchati. vṛkṣaṁ paśyati. uttamāni phalāni santi. kintu phalāni upari santi.
*He goes close to a tree. He looks at the tree, on it there are trees. But the fruits are up there.*

सः वृद्धः चिन्तयति"फलानि उपरि सन्ति अहं निशक्तः अस्मि। कथं प्राप्णोमि ? किं करोमि ?" इति चिन्तयति।

saḥ vṛddhaḥ cintayati: "phalāni upari santi ahaṁ niḥśaktaḥ asmi. kathaṁ prāpṇomi? kiṁ karomi?" iti cintayati.
*The old man thinks: "the fruits are up, I am weak; how do I get [them], what do I do?" so he thinks.*

"वृक्षः उन्नतः अस्ति अहं निशक्तः अस्मि। आरोहणं कर्तुं न शक्नोमि। किं करोमि ? कथं फलं प्राप्णोमि ?" इति चिन्तयति।

"vṛkṣaḥ unnataḥ asti ahaṁ niśaktaḥ asmi. ārohaṇaṁ kartuṁ na śaknomi. kiṁ karomi? kathaṁ phalaṁ prāpṇomi?" iti cintayati.
*"The tree is tall I am weak. I can't climb. What do I do? How do I get the fruits?" Thus he thinks.*

वृक्षस्य उपरि वानराः सन्ति। वृद्धः एकम् उपायं करोति। एकं शिलाखन्दं स्वीकरोति शिलाखन्दम् उपरि क्षिपति। वानराः कुपितः भवन्ति फलानि अधः क्षिपन्ति। वृद्धः सन्तोषेण फलं सर्वं खादति। बहु सन्तुष्टः भवति।

vṛkṣasya upari vānarāḥ santi. vṛddhaḥ ekam upāyaṁ karoti. ekaṁ śilākhaṇḍaṁ svīkaroti śilākhaṇḍam upari kṣipati. vānarāḥ kupitaḥ bhavanti phalāni adhaḥ kṣipanti. vṛddhaḥ santoṣeṇa phalaṁ sarvaṁ khādati. bahu santuṣṭaḥ bhavati.
*Up on the tree there are monkeys. The old man makes a trick. He takes a stone and throws the stone up. The monkeys get angry and throw down the fruits. The old man very happily eats all the fruit. He is very hapy.*

कथायाः अर्थं ज्ञातवन्तः ?

kathāyāḥ arthaṁ jñātavantaḥ?
*Was the meaning of the story known to you?*

आम् ज्ञातः।

ām, jñātaḥ.
*Yes, it was known.*

धन्यवादः। नमो नमः।

dhanyavādaḥ. namo namaḥ.
*Thank you! Salutation to all!*

# LESSON 5 – OVERVIEW

*In the fifth lesson you will learn* **ekavācanam** *(singular) and* **bahuvācanam** *(plural) of many* **kriyāpadas** *(verbs) in* **laṭ-lakāra** *(present tense) and* **loṭ-lakāra** *(imperative tense or mood) in* **prathama-puruṣa** *(3rd pers.) and* **uttama-puruṣa** *(1st pers.). You will practice saying personal pronouns, numbers, hours of the day. You will learn* **saptamī-vibhakti** *(locative case).*

## VERB ENDINGS IN PRESENT TENSE:

**prathama-puruṣa-bahuvācanam** *(3rd pers. pl.)* **-nti**
**uttama-puruṣa-bahuvācanam** *(1st pers. pl.)* **-maḥ**

## VERB ENDINGS IN IMPERATIVE:

**prathama-puruṣa-bahuvācanam** *(3rd pers. pl.)* **-ntu** *(in case of* **bhavat** *used for 2nd pers. sing.)*

| | | |
|---|---|---|
| भवान् गच्छतु । | bhavān gacchatu. | *You go! / He should go! (masc. sing.)* |
| भवन्तः गच्छन्तु । | bhavantaḥ gacchantu. | *You go! / They should go! (masc. pl.)* |
| भवती गच्छतु । | bhavatī gacchatu. | *You go! / She should go! (fem. sing.)* |
| भवत्यः गच्छन्तु । | bhavatyaḥ gacchantu. | *You go! / They should go! (fem. pl.)* |

## सप्तमीविभक्ति **saptamī-vibhakti** *locative*

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| *m.* | स्यूतः | syūtaḥ | *bag* | => | स्यूते | syūte | *in the bag* |
| *f.* | पेटिका | peṭikā | *box* | => | पेटिकायाम् | peṭikāyām | *in the box* |
| | कूपी | kūpī | *bottle* | => | कूप्याम् | kūpyām | *in the bottle* |
| *n.* | नगरम् | nagaram | *city* | => | नगरे | nagare | *in the city* |
| | सप्तवादने | sapta-vādanam | *seven o'clock* | => | सप्तवादने | sapta-vādane | *at seven o'clock* |

## AVYAYAS

| | | |
|---|---|---|
| कति ? | kati? | *How many?* |
| कदा ? | kadā? | *When?* |

# Lesson 5

*HINDI: In this lesson we will practice singular and plural of the verbs* (**kriyāpadas**).

नमो नमः।

namo namaḥ.
*Respects.*

संस्कृतभाषाशिक्षणे भवतां सर्वेषां स्वागतम्।

saṁskṛta-bhāṣā-śikṣaṇe bhavatāṁ sarveṣāṁ svāgatam.
*Welcome [to you all] to the study of Sanskrit language.*

आरम्भे मम परिचयं वदामि।

ārambhe mama paricayaṁ vadāmi.
*In the begining I [will] introduce myself.*

मम नाम वेङ्कतरमणः।

mama nāma veṅkata-ramaṇaḥ.
*My name is Venkata-ramana.*

भवतः नाम किम्?

bhavataḥ nāma kim?
*What is your name?*

*The names of the students are:*

| | | | | |
|---|---|---|---|---|
| श्रीनिवास कट्टी | विश्वास तन्त्री | सुशीलेन्द्रः | | |
| Śrīnivāsa Kaṭṭī | Viśvāsa Tantrī | Suśīlendraḥ | | |
| अनन्तशयनः | हरीशः | हरिश सरलायः | | |
| Anantaśayanaḥ | Harīśaḥ | Hariśa Saralāyaḥ | | |
| योगेन्द्रः | अनूपः | प्रकाशः | वारुणी | |
| Yogendraḥ | Anūpaḥ | Prakāśaḥ | Vāruṇī | |
| अनुश्री | सिन्धुः | मिथिला | पवित्रा | विद्या |
| Anuśrī | Sindhuḥ | Mithilā | Pavitrā | Vidyā |
| उमा | चन्द्रिका | अम्बिका | वेदवती | दीपिका |
| Umā | Candrikā | Ambikā | Vedavatī | Dīpikā |

अहं शिक्षकः। भवान् कः?

ahaṁ śikṣakaḥ. bhavān kaḥ?
*I am a teacher. What are you?*

अहं छात्रः।

ahaṁ chātraḥ.
*I am a student.*

भवान् कः?

bhavān kaḥ?
*What are you?*

अहं कार्यकर्ता।

ahaṁ kāryakartā.
*I am a volounteer (activist).*

भवती का?

bhavatī kā?
*What are you?*

अहं छात्रा।

ahaṁ chātrā.
*I am a student (fem.).*

भवती का?

bhavatī kā?
*What are you?*

अहं गृहिणी।

ahaṁ gṛhiṇī.
*I am a housewife.*

भवान् उत्तिष्ठतु ।

bhavān uttiṣṭhatu.
*You stand up!*

भवान् उत्तिष्ठति ।

bhavān uttiṣṭhati.
*You stand up.*

भवन्तः उत्तिष्ठन्ति ।

bhavantaḥ uttiṣṭhanti.
*You (pl.) stand up.*

भवान् उपविशतु ।

bhavān upaviśatu.
*You sit down!*

भवान् उपविशति ।

bhavān upaviśati.
*You sit down.*

भवन्तः उपविशन्ति ।

bhavantaḥ upaviśanti.
*You (pl.) sit down.*

भवती उत्तिष्ठतु ।

bhavatī uttiṣṭhatu.
*You stand up!*

भवती उत्तिष्ठति ।

bhavatī uttiṣṭhati.
*You stand up.*

भवत्यः उत्तिष्ठन्ति ।

bhavatyaḥ uttiṣṭhanti.
*You (pl.) stand up.*

भवती उपविशतु ।

bhavatī upaviśatu.
*You sit down!*

भवती उपविशति ।

bhavatī upaviśati.
*You sit down.*

भवत्यः उपविशन्ति ।

bhavatyaḥ upaviśanti.
*You (pl.) sit down.*

"उत्तिष्ठति" एकवचनम् । "उत्तिष्ठन्ति" बहुवचनम् ।

"uttiṣṭhati" ekavacanam. "uttiṣṭhanti" bahuvacanam.
"Uttiṣṭhati" *is singular.* "Uttiṣṭhanti" *is plural.*

अहम् एकवचनं वदामि भवन्तः बहुवचनं वदन्तु ।

अभ्यासं कुर्मः । अस्तु वा ?

aham ekavacanaṁ vadāmi bhavantaḥ bahuvacanaṁ vadantu. abhyāsaṁ kurmaḥ. astu vā?
*I say singular, you say plural. We do an exercise. All right?*

उत्तिष्ठति । उत्तिष्ठन्ति ।

uttiṣṭhati. uttiṣṭhanti.
*You (sing.) stand up. You (pl.) stand up.*

उपविशति । उपविशन्ति ।

upaviśati. upaviśanti.
*You (sing.) sit down. You (pl.) sit down.*

हसति । हसन्ति ।

hasati. hasanti.
*You (sing.) laugh. You (pl.) laugh.*

पठति । पठन्ति ।

paṭhati. paṭhanti.
*You (sing.) read. You (pl.) read.*

लिखति । लिखन्ति ।

likhati. likhanti.
*You (sing.) write. You (pl.) write.*

*HINDI: in the present tense third person singular and plural the verb form changes like this:*
**gacchati – gacchanti, paṭhati – paṭhanti.**

उपविशतु। उपविशन्तु।

upaviśatu! upaviśantu!
*You (he, she, it) should sit! You (pl., they) should sit!*

प्रार्थना। अहम् एकं वाक्यं वदामि, भवन्तः बहुवचनं वदन्तु। अभ्यासं कुर्मः। पुनर् एकम् अभ्यासं कुर्मः।

prārthanā. aham ekaṁ vākyaṁ vadāmi bhavantaḥ, bahu-vacanaṁ vadantu. abhyāsaṁ kurmaḥ. punar ekam abhyāsaṁ kurmaḥ.
*Request. I say one sentence, you say it in plural. We do an exercise. Again we do one exercise.*

वदतु। वदन्तु।

vadatu. vadantu.
*You say! You (pl.) say!*

नयतु। नयन्तु।

nayatu. nayantu.
*You take! You (pl.) take!*

नृत्यतु। नृत्यन्तु।

nṛtyatu. nṛtyantu.
*You dance! You (pl.) dance!*

अहम् उपविशामि। अहम् उत्तिष्ठामि।

aham upaviśāmi. aham uttiṣṭhāmi.
*I sit down. I stand up.*

वयम् उत्तिष्ठामः।

vayam uttiṣṭhāmaḥ.
*We stand up.*

भवन्तः उपविशन्तु।

bhavantaḥ upaviśantu.
*You (pl.) sit down!*

वयम् उत्तिष्ठामः।

vayam uttiṣṭhāmaḥ.
*We stand up.*

अभ्यासं कुर्मः।

abhyāsaṁ kurmaḥ.
*We do an exercise.*

अहं गच्छामि। वयं गच्छामः।

ahaṁ gacchāmi. vayaṁ gacchāmaḥ.
*I go. We go.*

अहं पठामि। वयं पथामः।

ahaṁ paṭhāmi. vayaṁ pathāmaḥ.
*I read. We read.*

अहं लिखामि। वयं लिखामः।

ahaṁ likhāmi. vayaṁ likhāmaḥ.
*I write. We write.*

अहं हसामि। वयं हसामः।

ahaṁ hasāmi. vayaṁ hasāmaḥ.
*I laugh. We laugh.*

*HINDI: these were the forms of present tense in the first person singular and plural.*

भवान् गच्छति। भवन्तः गच्छन्ति।

bhavān gacchati. bhavantaḥ gacchanti.
*You go (masc. sing.). You go (masc. pl.).*

भवती गच्छति। भवत्यः गच्छन्ति।

bhavatī gacchati. bhavatyaḥ gacchanti.
*You go (fem. sing.). You go (fem. pl.).*

इदानीम् अहं दर्शयामि भवन्तः वदन्तु।

idānīm ahaṁ darśayāmi bhavantaḥ vadantu.
*Now I show, you say.*

भवान् गच्छति । भवन्तः गच्छन्ति ।

bhavān gacchati. bhavantaḥ gacchanti.
*You go (masc. sing.). You go (masc. pl.).*

भवती गच्छति । भवत्यः गच्छन्ति ।

bhavatī gacchati. bhavatyaḥ gacchanti.
*You go (fem. sing.). You go (fem. pl.).*

सः गच्छति । ते गच्छन्ति ।

saḥ gacchati. te gacchanti.
*He goes. They go. (Lit.: That [man] goes. Those [men] go.)*

एषः गच्छति । एते गच्छन्ति ।

eṣaḥ gacchati. ete gacchanti.
*This [man] goes. These [men] go.*

कः गच्छति ? के गच्छन्ति ?

kaḥ gacchati? ke gacchanti?
*Which [man] goes? Which [men] go?*

सा गच्छति । ताः गच्छन्ति ।

sā gacchati. tāḥ gacchanti.
*That [woman] goes. Those [women] go.*

एषा गच्छति । एताः गच्छन्ति ।

eṣā gacchati. etāḥ gacchanti.
*This [woman] goes. These [women] go.*

का गच्छति ? काः गच्छन्ति ?

kā gacchati? kāḥ gacchanti?
*What [woman] goes? What [women] go?*

तत् गच्छति । तानि गच्छन्ति ।

tat gacchati. tāni gacchanti.
*That goes. Those go (neut.).*

एतत् गच्छति । एतानि गच्छन्ति ।

etat gacchati. etāni gacchanti.
*This goes. These go (neut.).*

किं गच्छति ? कानि गच्छन्ति ?

kiṁ gacchati? kāni gacchanti?
*What goes. What (neut. pl.) go.*

अहं गच्छामि । वयं गच्छामः ।

ahaṁ gacchāmi. vayaṁ gacchāmaḥ.
*I go. We go.*

---

इदानीं पुनः एकम् अभ्यासं कुर्मः ।

idānīṁ punaḥ ekam abhyāsaṁ kurmaḥ.
*Now we again do one exercise.*

भवान् गच्छतु । भवन्तः गच्छन्तु ।

bhavān gacchatu. bhavantaḥ gacchantu.
*You go (masc. sing.)! You go (masc. pl.)!*

भवती गच्छतु । भवत्यः गच्छन्तु ।

bhavatī gacchatu. bhavatyaḥ gacchantu.
*You go (fem. sing.)! You go (fem. pl.)!*

सः गच्छतु । ते गच्छन्तु ।

saḥ gacchatu. te gacchantu.
*That [man] must go! Those [men] must go!*

एषः गच्छतु । एते गच्छन्तु ।

eṣaḥ gacchatu. ete gacchantu.
*This [man] must go! These [men] must go!*

कः गच्छतु ? के गच्छन्तु ?

kaḥ gacchatu? ke gacchantu?
*What [man] must go? What [men] must go?*

सा गच्छतु । ताः गच्छन्तु ।

sā gacchatu. tāḥ gacchantu.
*That [woman] must go! Those [women] must go!*

एषा गच्छतु । एताः गच्छन्तु ।

eṣā gacchatu. etāḥ gacchantu.
*This [woman] must go! These [women] must go!*

का गच्छतु ? काः गच्छन्तु ?

kā gacchatu? kāḥ gacchantu?
*What [woman] must go? What [women] must go?*

---

पुस्तकम् अस्ति । पुस्तकानि सन्ति ।

pustakam asti. pustakāni santi.
*[There] is a book. [There] are books.*

एकम्, द्वे, त्रिणि, चत्वारि । चत्वारि पुस्तकानि सन्ति ।

ekaṁ, dve, triṇi, catvāri. catvāri pustakāni santi.
*One, two three, four. [There] are four books.*

अत्र कति पुस्तकानि सन्ति ?

atra kati pustakāni santi?
*How many books are here?*

चत्वारि पुस्तकानि सन्ति ।

catvāri pustakāni santi.
*[There] are four books.*

हरीश ! गणयतु ।

harīśa! gaṇayatu.
*Harisha! count!*

एकम्, द्वे, त्रिणि, चत्वारि, पञ्च ।

ekam, dve, triṇi, catvāri, pañca.
*One, two three, four, five.*

कति अङ्कन्यः सन्ति ?

kati aṅkanyaḥ santi?
*How many pencils are [there]?*

पञ्च अङ्कन्यः सन्ति ।

pañca aṅkanyaḥ santi.
*[There] are five pencils.*

भवती वदतु ।

bhavatī vadatu.
*You (fem.) say!*

एकं द्वे त्रिणि चत्वारि पञ्च षट् ।

ekaṁ, dve, triṇi, catvāri, pañca, ṣaṭ.
*One, two, three, four, five, six.*

कति पर्णानि सन्ति ?

kati parṇāni santi?
*How many leafs are [there]?*

षट् पर्णानि सन्ति ।

ṣaṭ parṇāni santi.
*[There] are six leafs.*

एकं द्वे त्रिणि चत्वारि पञ्च षट् सप्त अष्ट ।

ekaṁ, dve, triṇi, catvāri, pañca, ṣaṭ, sapta, aṣṭa.
*One, two, three, four, five, six, seven, eight.*

कति चमसाः सन्ति ?

kati camasāḥ santi?
*How many spoons are [there]?*

अष्ट चमसाः सन्ति ।

aṣṭa camasāḥ santi.
*[There] are eight spoons.*

अत्र कति बालकाः सन्ति ?

atra kati bālakāḥ santi?
*How many boys are here?*

प्रकाशः ! गनयतु !

prakāśa! ganayatu!
*Prakasha! count!*

एकं द्वे त्रिणि चत्वारि पञ्च षट् सप्त अष्ट नव । नव छात्राः सन्ति ।

ekaṁ, dve, triṇi, catvāri, pañca, ṣaṭ, sapta, aṣṭa, nava. nava chātrāḥ santi.
*One, two, three, four, five, six, seven, eight, nine. [There] are nine students.*

पाण्डवाः कति जनाः ?

pāṇḍavāḥ kati janāḥ?
*How many Pandavas are there?*

पाण्डवाः पञ्च जनाः ।

pāṇḍavāḥ pañca janāḥ.
*There are five Pandavas. (Lit: … are five men.)*

कौरवाः कति जनाः ?

kauravāḥ kati janāḥ?
*How many Kauravas are there?*

कौरवाः शत जनाः ।

kauravāḥ śata janāḥ.
*There are hundred Kauravas.*

वर्षे कति मासाः सन्ति ?

varṣe kati māsāḥ santi?
*How many months are [there] in a year?*

वर्षे द्वादश मासाः सन्ति ।

varṣe dvādaśa māsāḥ santi.
*In a year [there] are twelve months.*

मासे कति दिनानि सन्ति ?

māse kati dināni santi?
*How many days are in a month?*

मासे त्रिंशत् दिनानि सन्ति ।

māse triṁśat dināni santi.
*In a month [there] are thirty days.*

पक्षे कति दिनानि सन्ति ?

pakṣe kati dināni santi?
*How many days are in a forthnight?*

पक्षे पञ्चदश दिनानि सन्ति ।

pakṣe pañcadaśa dināni santi.
*In a forthnight (a pakṣa) [there] are fifteen days.*
*(It actually varies a day or two +/- according to Indian lunar-solar callen-dar; however the days in each* paksha *are always numbered from "first" to "fourteenth" and the fifteenth is called purnima – full moon, or amavasya – empty moon; sometimes some days are skipped, sometimes some are repeated; thus Indian fourthnight is not* <u>*fourteen*</u> *days like in the West).*

अहम् उत्तरं वदामि भवन्तः प्रश्नं पृच्छन्तु । उदहरणं वदामि ।

aham uttaraṁ vadāmi bhavantaḥ praśnaṁ pṛcchantu. udaharaṇaṁ vadāmi.
*I say the reply, you (pl.) ask a question! I say an example for practice.*

अत्र त्रिंशत् जनाः सन्ति । अत्र कति जनाः सन्ति ?

atra triṁśat janāḥ santi. atra kati janāḥ santi?
*Here are thirty men. How many men are here?*

इति भवन्तः पृच्छन्तु ।

iti bhavantaḥ pṛcchantu.
*In this way you ask!*

अत्र त्रिंशत् जनाः सन्ति । अत्र कति जनाः सन्ति ?

atra triṁśat janāḥ santi. atra kati janāḥ santi?
*Here are thirty men. How many men are here?*

त्रिंशत् चित्राणि सन्ति । कति चित्राणि सन्ति ?

triṁśat citrāṇi santi. kati citrāṇi santi?
*[There] are thirty pictures. How many pictures are [there]?*

त्रिंशत् दन्ताः सन्ति । कति दन्ताः सन्ति ?

triṁśat dantāḥ santi. kati dantāḥ santi?
*[There] are thirty teeth. How many teeth are [there]?*

---

*HINDI: Sanskrit word* **kati** *means "how many".*

---

एषः दण्डः । एषः हस्तः । दण्डः । हस्तः ।

eṣaḥ daṇḍaḥ. eṣaḥ hastaḥ. daṇḍaḥ. hastaḥ.
*This [is] a stick. This [is] a hand. Stick. Hand.*

दण्डः हस्ते अस्ति ।

daṇḍaḥ haste asti.
*The stick is in the hand.*

दण्डः कुत्र अस्ति ?

daṇḍaḥ kutra asti?
*Where is the stick?*

दण्डः हस्ते अस्ति ।

daṇḍaḥ haste asti.
*The stick is in the hand.*

एषः आसन्दः ।

eṣaḥ āsandaḥ.
*This [is] a chair.*

दण्डः कुत्र अस्ति ?

daṇḍaḥ kutra asti?
*Where is the stick?*

दण्डः आसन्दे अस्ति ।

daṇḍaḥ āsande asti.
*The stick is on the chair.*

एषः स्यूतः ।

eṣaḥ syūtaḥ.
*This [is] a bag.*

एषा कूपी ।

eṣā kūpī.
*This [is] a bottle.*

कूपी कुत्र अस्ति ?

kūpī kutra asti?
*Where is the bottle?*

कूपी स्यूते अस्ति ।

kūpī syūte asti.
*The bottle is in the bag.*

एतत् किम् ?

etat kim?
*What is this?*

धनम् ।

dhanam.
*Money.*

एषः कोषः ।

eṣaḥ koṣaḥ.
*This [is] a pocket.*

धनं कुत्र अस्ति ?

dhanaṁ kutra asti?
*Where is the money?*

धनं कोषे अस्ति ।

dhanaṁ koṣe asti.
*The money is in the pocket.*

वार्ता पत्रिकायाम् अस्ति ।

vārtā patrikāyām asti.
*The news is in the magazine.*

वार्ता कुत्र अस्ति ?

vārtā kutra asti?
*Where is the news?*

वार्ता पत्रिकायाम् अस्ति ।

vārtā patrikāyām asti.
*The news is in the magazine.*

स्थालिका । फलं कुत्र अस्ति ?

sthālikā. phalaṁ kutra asti?
*Plate. Where is the fruit?*

फलं स्थालिकायाम् अस्ति ।

phalaṁ sthālikāyām asti.
*The fruit is on the plate.*

जलं कूप्याम् अस्ति ।

jalaṁ kūpyām asti.
*Water is in the bottle.*

जलं कुत्र अस्ति ?

jalaṁ kutra asti?
*Where is water?*

जलं कूप्याम् अस्ति ।

jalaṁ kūpyām asti.
*Water is in the bottle.*

अङ्गुलीयकम् । अङ्गुलीयकम् अङ्गुल्याम् अस्ति ।

aṅgulīyakam. aṅgulīyakam aṅgulyām asti.
*The ring is on the finger.*

अङ्गुलीयकं कुत्र अस्ति ?

aṅgulīyakaṁ kutra asti?
*Where is the ring?*

अङ्गुलीयकम् अङ्गुल्याम् अस्ति ।

aṅgulīyakam aṅgulyām asti.
*The ring is on the finger.*

---

*HINDI:* **haste, āsande, syūte, koṣe, patrikāyām, sthālikāyām, kūpyām** *are formed with the locative endings* (**saptamī-vibhakti**), *taking the meaning* **"in"** *or* **"on"** *or* **"at"**.

---

इदानीम् एकम् अभ्यासं कुर्मः । एकं पत्रं दर्शयामि ।

वृक्षः । वृक्षे ।

idānīm ekam abhyāsaṁ kurmaḥ. ekaṁ patraṁ darśayāmi. vṛkṣaḥ. vṛkṣe.
*Now we do one exercise. I show one paper. Tree. On the tree.*

वृक्षः । वृक्षे ।

vṛkṣaḥ. vṛkṣe.
*Tree. On the tree.*

इदानीं वदन्तु ।

idānīṁ vadantu.
*Now you say!*

आपणः । आपणे ।

āpaṇaḥ. āpaṇe.
*Shop. In the shop.*

वित्तकोषः । वित्तकोषे ।

vittakoṣaḥ. vittakoṣe.
*Bank. In the bank.*

विद्यालयः । विद्यालये ।

vidyālayaḥ. vidyālaye.
*School. In the school.*

पुस्तकम् । पुस्तके ।

pustakam. pustake.
*Book. In the book.*

हिमालयः । हिमालये ।

himālayaḥ. himālaye.
*Himalaya. On Himalaya.*

विद्यालयः । विद्यालये ।

vidyālayaḥ. vidyālaye.
*School. In the school.*

मार्गः । मार्गे ।

mārgaḥ. mārge.
Street. On the street.

आसन्दः । आसन्दे ।

āsandaḥ. āsande.
*Chair. On the chair.*

नगरम् । नगरे ।

nagaram. nagare.
*City. In the city.*

मन्दिरम् । मन्दिरे ।

mandiram. mandire.
*Temple. In the temple.*

स्थालिका । स्थालिकायाम् ।

sthālikā. sthālikāyām.
*Plate. On the plate.*

सञ्चिका । सञ्चिकायाम् ।

sañcikā. sañcikāyām.
*File. In the file.*

पेटिका । पेटिकायाम् ।

peṭikā. peṭikāyām.
*Box. In the box.*

कूपी । कूप्याम् ।

kūpī. kūpyām.
*Bottle. In the bottle.*

घटी । घट्याम् ।

ghaṭī. ghaṭyām.
*Watch. On the watch.*

अङ्कनी । अङ्कन्याम् ।

aṅkanī. aṅkanyām.
*Pencil. On the pencil.*

लेखनी । लेखन्याम् ।

lekhanī. lekhanyām.
*Pen. On the pen.*

---

इदानीं पुनः एकम् अभ्यासं कुर्मः ।

idānīṁ punaḥ ekam abhyāsaṁ kurmaḥ.
*Now we do one exercise again.*

स्यूतः, पुस्तकम्, अस्ति । पश्यन्तु, वाक्यं वदामि ।

syūtaḥ, pustakam, asti. paśyantu, vākyaṁ vadāmi.
*Bag, book, is. Look, I make a sentence.*

स्यूते पुस्तकम् अस्ति । वदन्तु ।

syūte pustakam asti. vadantu.
*The book is in the bag. Say!*

स्यूते पुस्तकम् अस्ति ।

syūte pustakam asti.
*The book is in the bag.*

ग्रामे गृहम् अस्ति ।

grāme gṛham asti.
*The house is in the village.*

वाटिकायां फलम् अस्ति ।

vāṭikāyāṁ phalam asti.
*Fruit is in the garden.*

शालायां शिक्षकः अस्ति ।

śālāyāṁ śikṣakaḥ asti.
*The teacher is in the school.*

लेखन्यां मसी अस्ति ।

lekhanyāṁ masī asti.
*Ink is in the pen.*

नद्यां मीनः अस्ति ।

nadyāṁ mīnaḥ asti.
*Fish is in the river.*

समीचीनम् । इदानीम् अहं शब्दद्वयं वदामि भवन्तः मिलित्वा वदन्तु योजयित्वा वदन्तु । लखनऊ, उत्तरप्रदेशः ।

samīcīnam. idānīm ahaṁ śabda-dvayaṁ vadāmi bhavantaḥ militvā vadantu, yojayitvā vadantu. lakhanaū, uttara-pradeśaḥ.
*Good! Now I say two words, you say after joining them. Lucknow, Uttar-pradesh.*

लखनऊ उत्तरप्रदेशे अस्ति ।

lakha**naū** uttara-pradeśe asti.
*Lucknow is in Uttar-pradesh.* ***(This combination of letters doesn't ordinarly appear in Sanskrit; it is borrowed from Hindi)***

पुनः वदन्तु ।

punaḥ vadantu.
*Say again!*

लखनऊ उत्तरप्रदेशे अस्ति।

lakhanaū uttara-pradeśe asti.
*Lucknow is in Uttar-pradesh.*

भोपाल्, मध्यप्रदेशः।

bhopāl, madhya-pradeśaḥ.
*Bhopal, Madhya-pradesh.*

भोपाल् मध्यप्रदेशे अस्ति।

bhopāl madhya-pradeśe asti.
*Bhopal is in Madhya-pradesh.*

मुम्बै, महाराष्ट्रम्।

mumbai, mahārāṣṭram.
*Mumbai, Maharashtra.*

मुम्बै महाराष्ट्रे अस्ति।

mumbai mahārāṣṭre asti.
*Mumbai is in Maharashtra.*

मैसूरु, कर्णाटक।

maisūru, karṇāṭaka.
*Mysore, Karnataka.*

मैसूरु कर्णाटके अस्ति।

maisūru karṇāṭake asti.
*Mysore is in Karnataka.*

इदानीं भवन्तः एककवाक्यं कथयन्ति वा ?

idānīṁ bhavantaḥ eka-eka-vākyaṁ kathayanti vā?
*[Would] you now say one sentence each?*

अस्तु।

astu.
*Yes.*

कः वदति आरम्भे ? भवान् वदतु।

kaḥ vadati ārambhe? bhavān vadatu.
*Who says first? (Lit: … in the beginning?) You say!*

लेखनी आपणे अस्ति।

lekhanī āpaṇe asti.
*Pen is in the shop.*

शिक्षकः विद्यालये अस्ति।

śikṣakaḥ vidyālaye asti.
*Teacher is in school.*

गोपालः ग्रामे अस्ति।

gopālaḥ grāme asti.
*Cowherd is in the village.*

फलं वृक्षे अस्ति।

phalaṁ vṛkṣe asti.
*The fruit is on the tree.*

गृहिणी गृहे अस्ति।

gṛhiṇī gṛhe asti.
*Housewife is in the house.*

देवालयः ग्रामे अस्ति।

devālayaḥ grāme asti.
*Temple is in the village.*

भवती वदतु।

bhavatī vadatu.
*You (fem.) say!*

दन्ताः मुखे सन्ति।

dantāḥ mukhe santi.
*Teeth are in the mouth.*

---

एकम् अभ्यासं कुर्मः।

ekam abhyāsaṁ kurmaḥ.
*We do one exercise.*

"मम गृहं भारतदेशे अस्ति" इति वदामि। भवन्तः "भारतदेशे कुत्र अस्ति ?" इति पृच्छन्तु।

"mama gṛhaṁ bhārata-deśe asti" iti vadāmi. bhavantaḥ "bhāratadeśe kutra asti?" iti pṛcchantu.
*I say: "My home is in India." You ask: "Where in India is it?"*

भवतः गृहं कुत्र अस्ति ?

bhavataḥ gṛhaṁ kutra asti?
*Where is your home?*

मम गृहं भारतदेशे अस्ति।

mama gṛhaṁ bhārata-deśe asti.
*My home is in India.*

भारतदेशे कुत्र अस्ति ?

bhārata-deśe kutra asti?
*Where in India is it?*

भारतदेशे कर्णाटकप्रदेशे अस्ति।

bhārata-deśe karṇāṭaka-pradeśe asti.
*It is in India in Karnataka state.*

कर्णाटकप्रदेशे कुत्र अस्ति ?

karṇāṭaka-pradeśe kutra asti?
*Where in Karnataka state is it?*

कर्णाटकप्रदेशे बेङ्गलूरुनगरे अस्ति।

karṇāṭaka-pradeśe bengalūru-nagare asti.
*It is in Karnataka state in Bangalore.*

बेङ्गलूरुनगरे कुत्र अस्ति ?

bengalūru-nagare kutra asti?
*Where in Bangalore is it?*

बेङ्गलूरुनगरे विद्यारण्यपुरे अस्ति।

bengalūru-nagare vidyāraṇya-pure asti.
*It is in Bangalore in Vidyaranya-pura.*

विद्यारण्यपुरे कुत्र अस्ति ?

vidyāraṇya-pure kutra asti?
*Where in Vidyaranya-pura is it?*

विद्यारण्यपुरे पञ्चममुख्यमार्गे अस्ति।

vidyāraṇya-pure pañcama-mukhya-mārge asti.
*It is in Vidyaranya-pura on the fifth main street.*

पञ्चममुख्यमार्गे कुत्र अस्ति ?

pañcama-mukhya-mārge kutra asti?
*Where on the fifth main street is it?*

पञ्चममुख्यमार्गे दशम-उपमार्गे अस्ति।

pañcama-mukhya-mārge daśama-upamārge asti.
*It is on the fifth main street on the tenth side street.*

दशम-उपमार्गे कुत्र अस्ति ?

daśama-upamārge kutra asti?
*Where on the tenth side street is it?*

दशम-उपमार्गे त्रितीयभवने अस्ति।

daśama-upamārge tritīya-bhavane asti.
*It is on the tenth side street in the third building.*

त्रितीय-भवने कुत्र अस्ति ?

tritīya-bhavane kutra asti?
*Where in the third building is it?*

तत्र एव अस्ति।

tatra eva asti.
*It is just there.*

---

*HINDI: These are the forms with locative endings* (**saptamī-vibhakti**).

---

भगिणी, सारनाथः कुत्र अस्ति ?

bhagiṇī, sāranāthaḥ kutra asti?
*Sister, where is Saranatha?*

सारनाथः बिहारे अस्ति ।

sāranāthaḥ bihāre asti.
*Saranatha is in Bihar.*

बिहारे अस्ति ? सत्यं वा ?

bihāre asti? satyaṁ vā?
*It is in Bihar? Is it true?*

पश्यामि ।

paśyāmi.
*I look (let me see).*

न, उत्तरप्रदेशे अस्ति ।

na, uttara-pradeśe asti.
*No, it is in Uttar Pradesh.*

अहो ! उत्तरप्रदेशे अस्ति ।

aho! uttara-pradeśe asti.
*Oh, it is in Uttar Pradesh.*

---

अहं पञ्चवादने उत्तिष्ठामि । भवान् कदा उत्तिष्ठति ?

ahaṁ pañca-vādane uttiṣṭhāmi. bhavān kadā uttiṣṭhati?
*I get up at five o'clock. When do you get up?*

अहं पञ्चवादने उत्तिष्ठामि ।

ahaṁ pañca-vādane uttiṣṭhāmi.
*I get up at five o'clock.*

भवान् कदा दन्तधावनं करोति ?

bhavān kadā danta-dhāvanaṁ karoti?
*When do you brush your teeth?*

अहं सार्धसप्तवदने दन्तधावनं करोमि ।

ahaṁ sārdha-sapta-vadane danta-dhāvanaṁ karomi.
*I brush my teeth at half past seven.*

भवान् कदा योगासनं करोति ?

bhavān kadā yogāsanaṁ karoti?
*When do you do yoga asanas?*

अहम् अष्टवादने योगासनं करोमि ।

aham aṣṭa-vādane yogāsanaṁ karomi.
*I do yoga asanas at eight o'clock.*

भवान् कदा विद्यालयं गच्छति ?

bhavān kadā vidyālayaṁ gacchati?
*When do you go to school?*

अहम् अष्टवादने विद्यालयं गच्छामि ।

aham aṣṭa-vādane vidyālayaṁ gacchāmi.
*I go to school at eight o'clock.*

भवती कदा विद्यालयं गच्छति ?

bhavatī kadā vidyālayaṁ gacchati?
*When do you go to school?*

अहम् नववादने विद्यालयं गच्छामि ।

aham nava-vādane vidyālayaṁ gacchāmi.
*I go to school at nine o'clock.*

भवती कदा पूजां करोति ?

bhavatī kadā pūjāṁ karoti?
*When do you do puja?*

अहं सप्तवादने पूजां करोमि ।

ahaṁ sapta-vādane pūjāṁ karomi.
*I do puja at seven o'clock.*

---

इदानीं "कदा" इति शब्दम् उपयुज्य प्रश्नं पृच्छन्तु ।

अहम् उत्तरं वदामि ।

idānīṁ "kadā" iti śabdam upayujya praśnaṁ pṛcchantu. aham uttaraṁ vadāmi.
*Now you ask questions using the word "when". I [will] say the answer.*

प्रकाश ! पृच्छतु ।

prakāśa! pṛcchatu.
*Prakasha! Ask!*

भवान् कदा पूजां करोति ?

bhavān kadā pūjāṁ karoti?
*When do you do puja?*

अहं पञ्चवादने पूजां करोमि ।

ahaṁ pañca-vādane pūjāṁ karomi.
*I do puja at five o'clock.*

भवान् कदा क्रीडति ?

bhavān kadā krīḍati?
*When do you play?*

अहं न क्रीडामि ।

ahaṁ na krīḍāmi.
*I don't play.*

भवान् कदा उत्तिष्ठति ?

bhavān kadā uttiṣṭhati?
*When do you get up?*

अहं चतुर्वादने उत्तिष्ठामि ।

ahaṁ catur-vādane uttiṣṭhāmi.
*I get up at four o'clock.*

भवान् कदा उपाहरं स्वीकरोति ?

bhavān kadā upāharaṁ svīkaroti?
*When do you eat breakfast?*

अहं सप्तवादने उपाहरं स्वीकरोमि ।

ahaṁ sapta-vādane upāharaṁ svīkaromi.
*I eat (lit.: take) breakfast at seven o'clock.*

भवान् कदा विद्यालयं गच्छति ?

bhavān kadā vidyālayaṁ gacchati?
*When do you go to school?*

अहम् अष्टवादने विद्यालयं गच्छामि ।

aham aṣṭa-vādane vidyālayaṁ gacchāmi.
*I go to school at eight o'clock.*

भवान् कदा योगासनं करोति ?

bhavān kadā yogāsanaṁ karoti?
*When do you do yoga asanas?*

अहं सार्धपञ्चवादने योगासनं करोमि ।

ahaṁ sārdha-pañca-vādane yogāsanaṁ karomi.
*I do yoga asanas at half past five.*

---

*HINDI: About the word* ***"when"*** **(kadā)** *and the exercise that follows ...*

---

गोपालः इति एकः बालकः अस्ति । गोपालस्य दिनचरी अत्र अस्ति । इदानीम् अहं चित्रं दर्शयामि भवन्तः वाक्यं वदन्तु । अस्तु वा ?

gopālaḥ iti ekaḥ bālakaḥ asti. gopālasya dinacarī atra asti. idānīm ahaṁ citraṁ darśayāmi bhavantaḥ vākyaṁ vadantu. astu vā?
*Gopala is one boy. Here is his daily schedule. Now I show a picture, you say a sentence. All right?*

गोपालः षड्वादने उत्तिष्ठति ।

gopālaḥ ṣaḍ-vādane uttiṣṭhati.
*Gopala gets up at six o'clock.*

गोपालः सपादषड्वादने दन्तधावनं करोति ।

gopālaḥ sapāda-ṣaḍ-vādane danta-dhāvanaṁ karoti.
*Gopala brushes his teeth at quarter past six.*

गोपालः सार्धषड्वादने योगासनं करोति ।

gopālaḥ sārdha-ṣaḍ-vādane yogāsanaṁ karoti.
*Gopala practices yoga-asanas at half past six.*

गोपालः पादोनसप्तवादने स्नानं करोति ।

gopālaḥ pādona-sapta-vādane snānaṁ karoti.
*Gopala takes a bath at quarter to seven.*

न न । पादोन-अष्टवादनम् । वदन्तु इदानीम् ।

na na. pādona-aṣṭa-vādanam. vadantu idānīm.
*No, no. Quarter to eight. Say now!*

पदोन-अष्टवादनम्।

padona-aṣṭa-vādanam.
*Quarter to eight.*

पूर्णवाक्यं वदन्तु।

pūrṇa-vākyaṁ vadantu.
*Say the ful sentence.*

गोपालः पादोन-अष्टवादने स्नानं करोति।

gopālaḥ pādona-aṣṭa-vādane snānaṁ karoti.
*Gopala takes a bath at quarter to eight.*

गोपालः सर्ध-अष्टवादने उपाहरं स्वीकरोति।

gopālaḥ sardha-aṣṭa-vādane upāharaṁ svīkaroti.
*Gopala takes his breakfast at half past eight.*

गोपालः नववादने शालां गच्छति।

gopālaḥ nava-vādane śālāṁ gacchati.
*Gopala goes to school at nine o'clock.*

इदानीम् अहं प्रश्नं पृच्छामि। वदन्तु।

idānīm ahaṁ praśnaṁ pṛcchāmi. vadantu.
*Now I ask a question. You answer.*

गोपालः किं करोति ? वदतु।

gopālaḥ kiṁ karoti? vadatu.
*What does Gopala do? Say!*

गोपालः सर्धषड्वादने योगाभ्यासं करोति।

gopālaḥ sardha-ṣaḍ-vādane yogābhyāsaṁ karoti.
*Gopala practices yoga at half past six.*

भवान् वदतु। किं करोति ?

bhavān vadatu. kiṁ karoti?
*You say! What does he do?*

गोपालः सर्ध-अष्टवादने अल्पाहारं स्वीकरोति।

gopālaḥ sardha-aṣṭa-vādane alpāhāraṁ svīkaroti.
*Gopala takes his breakfast at half past eight.*

भवान् वदतु।

bhavān vadatu.
*You say!*

गोपालः नववादने शालां **गच्छ**।

gopālaḥ nava-vādane śālāṁ **gaccha**.
*Gopala **go** to school at nine o'clock.* ***(Mistake!)***

**गच्छति**। पुनः वदतु।

**gacchati.** punaḥ vadatu.
***Goes.*** ***(Teacher corrects!)*** *Say again!*

गोपालः नववादने शालां गच्छति।

gopālaḥ nava-vādane śālāṁ gacchati.
*Gopala goes to school at nine o'clock.*

---

सुभाषितम्।

**subhāṣitam.**
***Verse.***

इदानीं वयम् एकं सुभाषितं शृण्मः।

idānīṁ vayam ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now, we listen to one verse.*

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति॥

vajrād api kaṭhorāṇi mṛdūni kusumād api
lokottarāṇāṁ cetāṁsi ko hi vijñātum arhati

vajrāt – *then fire;* api – *also;* kaṭhorāṇi – *sharp, piercing;* mṛdūni – *soft;* kusumāt – *then lotus;* api – *also;* loka-uttarāṇāṁ – *extraordinary, beyond common;* cetāṁsi – *minds;* kaḥ – *who;* hi – *certainly;* vijñātum – *to understand;* arhati – *deserves.*

*Who can understand the minds of the extraordinary men, which are sometimes more piercing then fire, and sometimes softer then lotus.*

श्रुतस्य सुभाषितस्य अर्थः एवम् अस्ति ।

śrutasya subhāṣitasya arthaḥ evam asti:
*The meaning of the verse [we] heard is as follows:*

महापुरुषाणाम् । महापुरुषाः जानन्ति किल ? महापुरुषाणां चेतांसि । चेतांसि, मनांसि । कदाचित् वज्रादपि कठोराणि भवन्ति । कठोरं भवति वज्रादपि । कदाचित् कुसुमादपि मृदूनि भवन्ति ।

mahāpuruṣāṇāṁ ... mahāpuruṣāḥ jānanti kila? mahāpuruṣāṇāṁ cetāṁsi ... cetāṁsi, manāṁsi. kadācit vajrād api kaṭhorāṇi bhavanti. kaṭhoraṁ bhavati vajrād api. kadācit kusumād api mṛdūni bhavanti.
*Of great personalities ... you know great personalities, don't you? Their minds ... minds, spirits. Sometimes more piercing then fire. It is piercing like fire. Sometimes they are soft like lotus.*

कुसुमं नाम ? पुष्पम् । "पुष्पादपि मृदूनि भवन्ति ।" अतः सुभाषितकारः वदति "महापुरुषाणां चेतांसि कः ज्ञातुं शक्नोति ?" इति प्रश्नं पृच्छति ।

kusumaṁ nāma? puṣpam. "puṣpād api mṛdūni bhavanti." ataḥ subhāṣita-kāraḥ vadati "mahāpuruṣāṇāṁ cetāṁsi kaḥ jñātuṁ śaknoti" iti praśnaṁ pṛcchati.
*Lotus in other words? Flower. They are like flower petals. Thus the writer of the verse says: "Who can understand the minds of great personalities?" He asks that question.*

महापुरुषाणां चेतांसि ज्ञातुम् एव न शक्नुमः इति अस्य सुभाषितस्य अर्थः ।

mahāpuruṣāṇāṁ cetāṁsi jñātum eva na śaknumaḥ iti asya subhāṣitasya arthaḥ.
*We cannot know the mind of great personalities, that is the meaning of this verse.*

---

## कथा

**kathā**
***Story***

गङ्गातीरे एकः साधुः अस्ति । सः सज्जनः । सर्वदा परोपकारं करोति । दयालुः अपि आसीत् सः ।

gaṅgā-tīre ekaḥ sādhuḥ asti. saḥ sajjanaḥ. sarvadā paropakāraṁ karoti. dayāluḥ api āsīt saḥ.
*On the banks of Ganga there was one holy man. He was a saintly person. Ha always engaged in actions for benefit of others. He was also very kind, merciful.*

यः कोऽपि आगत्य सहाय्यं पृच्छति चेत्, सः परोपकारं करोति ।

yaḥ ko 'pi āgatya sahāyyaṁ pṛcchati cet, saḥ paropakāraṁ karoti.
*If anyone comes to ask for help, he acts for their welfare.*

एकः बालकः आगत्य किम् अपि पृच्छति, तस्य सहाय्यं करोति ।

ekaḥ bālakaḥ āgatya kim api pṛcchati, tasya sahāyyaṁ karoti.
*After one boy comes asking something, he helps him.*

एकदा सः साधुः स्नानार्थं गङ्गनदीं गच्छति । सः गङ्गनद्याम् अवतरति, स्नानं करोति । तदा प्रवाहे एकः वृश्चिकः आगच्छति ।

ekadā saḥ sādhuḥ snānārthaṁ gaṅgā-nadīṁ gacchati. saḥ gaṅgā-nadyām avatarati, snānaṁ karoti. tadā pravāhe ekaḥ vṛścikaḥ āgacchati.
*Once that holy man goes to bathe in the Ganges. He descends in the Ganges and bathes. Then a scorpion comes down the flow.*

महान् प्रवाहः अस्ति । तदा एकः वृश्चिकः आगच्छति । वृश्चिकस्य स्वभावः दंशनम्, दुष्टस्वभावः ।

mahān pravāhaḥ asti. tadā ekaḥ vṛścikaḥ āgacchati. vṛścikasya svabhāvaḥ daṁśanam, duṣṭa-svabhāvaḥ.
*The flow was very strong. Then one scorpion comes. Scorpion's nature is biting, stinging, bad nature.*

सः वृश्चिकः तस्य समीपम् आगच्छति । तदा सः साधुः "वृश्चिकः रक्षणीयः" इति चिन्तयति । सः साधुः गृह्णाति ।

saḥ vṛścikaḥ tasya samīpam āgacchati. tadā saḥ sādhuḥ "vṛścikaḥ rakṣaṇīyaḥ" iti cintayati. saḥ sādhuḥ gṛhṇāti.
*That scorpion comes near him. Then the holy man thinks: "The scorpion should be protected." The holy man grabs [it].*

सः वृश्चिकः बहुवारं तस्य हस्तं दशति । एकवारं सः त्यजति, पुनः दशति । पुनः गृह्णाति दशति ।

saḥ vṛścikaḥ bahu-vāraṁ tasya hastaṁ daśati. ekavāraṁ saḥ tyajati, punaḥ daśati. punaḥ gṛhṇāti, daśati.
*The scorpion stings his hand many times. Once he lets it go, it stings again. When he takes it up, it stings again.*

तथापि सः साधुः वृश्चिकं न त्यजति । सम्यक् गृह्णाति, अत्र तटम् आनेतुं प्रयत्नं करोति ।

tathāpi saḥ sādhuḥ vṛścikaṁ na tyajati. samyak gṛhṇāti, atra taṭam ānetuṁ prayatnaṁ karoti.
*Still the holly man doesn't abandon it. He holds it well and tries to bring it here, to the river bank.*

सः साधुः वृश्चिकं त्यजति । पुनः चिन्तयति "एषः वृश्चिकः रक्षणीयः ।" सः वृश्चिकं पुनः गृह्णाति, सावधानं नदीतटम् आनयति ।

saḥ sādhuḥ vṛścikaṁ tyajati. punaḥ cintayati "eṣaḥ vṛścikaḥ rakṣaṇīyaḥ." saḥ vṛścikaṁ punaḥ gṛhṇāti, sāvadhānaṁ nadī-taṭam ānayati.
*The holy man drops the scorpion. He thinks again: "The scorpion should be saved." He takes it again and carefully bring is to the bank of the river.*

तत्र एकः पुरुषः सर्वं पश्यन् भवति ।

tatra ekaḥ puruṣaḥ sarvaṁ paśyan bhavati.
*There stands a man observing everything.*

तदा सः पुरुषः पृच्छति "भोः, किमर्थं वृश्चिकं रक्षति ? सः दशति किल ?" इति ।

tadā saḥ puruṣaḥ pṛcchati: "bhoḥ, kim arthaṁ vṛścikaṁ rakṣati? saḥ daśati kila?" iti.
*Then the man asks. "Oh, sir! What for do you save the scorpion? It [will] sting [you], won't it?"*

तदा साधुः वदति "भोः तस्य स्वभावः सः दुष्टस्वभावः । मम स्वभावः परोपकारः । क्षुद्रः जन्तुः । सः यथा स्वस्वभावं न त्यजति, तथा अहं मनुष्यः । मम स्वस्वभावं कथं त्यजामि ?" इति सः साधुः तं वदति ।

tadā sādhuḥ vadati "bhoḥ, tasya svabhāvaḥ [saḥ] duṣṭa-svabhāvaḥ. mama svabhāvaḥ paropakāraḥ. kṣudraḥ jantuḥ. saḥ yathā sva-svabhāvaṁ na tyajati, tathā ahaṁ manuṣyaḥ. mama sva-svabhāvaṁ kathaṁ tyajāmi?" iti saḥ sādhuḥ taṁ vadati.
*Then the holy man says: "Oh, sir! It's nature is bad nature. My nature is doing good to all. It's a mean creature. As it doesn't abandon its nature, thus I am a human, how can I abandon my own nature?" So the holy man speaks that.*

सज्जनस्य स्वभावः कीदृशः भवति किल ?

sajjanasya svabhāvaḥ kīdṛśaḥ bhavati kila?
*What a nature does the holly man have, doesn't he?*

कथायाः अर्थः ज्ञातः खलु ?

kathāyāḥ arthaḥ jñātaḥ khalu?
*Have you understood the meaning of the story?*

ज्ञातः।

jñātaḥ.
*[Yes, we have] understood.*

धन्यवादः। नमो नमः।

dhanyavādaḥ. namo namaḥ.
*Thank you! Salutation to all!*

# LESSON 6 – OVERVIEW

*In the sixth lesson you will learn the days of the week from Sunday to Saturday and the words for today, tomorrow and yesterday. You will do exercises in asking "What is the time?" and answering. You will learn* **dvitīyā-vibhakti** *(accusative case) which always indicates the* ***object*** *of the activity.*

## कः समयः ? **kaḥ samayaḥ?** ***What is the time?***

| | | |
|---|---|---|
| दश-अधिक-षड्वादनम् । | daśa-**adhika**-ṣaḍ-vādanam. | *Ten* ***past*** *six.* |
| पञ्च-न्यून-सप्तवादनम् । | pañca-**nyūna**-sapta-vādanam. | *Five minutes* ***to*** *seven.* |

## *GREETINGS, SALUTATIONS*

| | | |
|---|---|---|
| सुप्रभातम् । | suprabhātam. | *Good morning!* |
| शुभरात्रिः । | śubha-rātriḥ. | *Good evening!* |
| नमो नमः । / नमस्कारः । | namo namaḥ. / namaskāraḥ. | *Good day!* |
| नमस्ते । | namaste. | *Hello!* |
| हरिः ओम् । | hariḥ om! | *Hello!* |

## द्वितीयाविभक्ति **dvitīyā-vibhakti** ***accusative***

***- the object of activity***

| | | | | | | |
|---|---|---|---|---|---|---|
| *m* | शिक्षकः | śikṣak**aḥ** | *teacher* | => | शिक्षकम् | śikṣak**am** |
| *f* | स्थालिका | sthālik**ā** | *plate* | => | स्थालिकाम् | sthālik**ām** |
| | अङ्गुली | aṅgul**ī** | *finger* | => | अङ्गुलीम् | aṅgul**īm** |
| *n* | नगरम् | nagar**am** | *city* | => | नगरम् | nagar**am** |

# Lesson 6

---

*HINDI: In the previous lesson we did exercise with the words* ***kati, kadā*** *in interrogative sentences. Today we will continue.*

---

नमो नमः ।

namo namaḥ.
*Respects.*

अद्य बुधवासरः ।

adya budha-vāsaraḥ.
*Today is Wednesday.*

श्वः गुरुवासरः ।

śvaḥ guru-vāsaraḥ.
*Tomorrow is Thursday.*

अद्य कः वासरः ?

adya kaḥ vāsaraḥ?
*What day is today?*

अद्य बुधवासरः ।

adya budha-vāsaraḥ.
*Today is Wednesday.*

पुनः वदतु ।

punaḥ vadatu.
*Say again!*

अद्य बुधवासरः ।

adya budha-vāsaraḥ.
*Today is Wednesday.*

बुधवासरः कदा ?

budha-vāsaraḥ kadā?
*When is Wednesday?*

बुधवासरः अद्य ।

budha-vāsaraḥ adya.
*Wednesday is today.*

श्वः कः वासरः ? भवान् वदतु ।

śvaḥ kaḥ vāsaraḥ? bhavān vadatu.
*Tomorow is what day? You say!*

श्वः गुरुवासरः ।

śvaḥ guru-vāsaraḥ.
*Tomorrow is Thursday.*

पुनः वदतु ।

punaḥ vadatu.
*Say again!*

श्वः गुरुवासरः ।

śvaḥ guru-vāsaraḥ.
*Tomorrow is Thursday.*

गुरुवासरः कदा ?

guru-vāsaraḥ kadā?
*When is Thursday?*

श्वः । श्वः गुरुवासरः ।

śvaḥ. śvaḥ guru-vāsaraḥ.
*Tomorrow. Tomorrow is Thursday.*

परश्वः शुक्रवासरः ।

paraśvaḥ śukra-vāsaraḥ.
*The day after tomorrow is Friday.*

शुक्रवासरः कदा ? भवती वदतु ।

śukra-vāsaraḥ kadā? bhavatī vadatu.
*When is Friday? You say!*

परश्वः शुक्रवासरः ।

paraśvaḥ śukra-vāsaraḥ.
*The day after tomorrow is Friday.*

परश्वः कः वासरः ? भवान् वदतु ।

paraśvaḥ kaḥ vāsaraḥ? bhavān vadatu.
*After tomorrow is what day?You say!*

परश्वः शुक्रवासरः ।

paraśvaḥ śukra-vāsaraḥ.
*The day after tomorrow is Friday.*

शुक्रवासरः कदा ? भवान् वदतु ।

śukra-vāsaraḥ kadā? bhavān vadatu.
*When is Friday? You say!*

परश्वः शुक्रवासरः ।

paraśvaḥ śukra-vāsaraḥ.
*The day after tomorrow is Friday.*

अद्य बुधवासरः ।

adya budha-vāsaraḥ.
*Today is Wednesday.*

ह्यः मङ्गलवासरः ।

hyaḥ maṅgala-vāsaraḥ.
*Yesterday is Tuesday.*

मङ्गलवासरः कदा ?

maṅgala-vāsaraḥ kadā?
*When is Tuesday?*

ह्यः मङ्गलवासरः ।

hyaḥ maṅgala-vāsaraḥ.
*Yesterday is Tuesday.*

परह्यः सोमवासरः ।

parahyaḥ soma-vāsaraḥ.
*The day before yesterday is Monday.*

भवान् वदतु । परह्यः कः वासरः ?

bhavān vadatu. parahyaḥ kaḥ vāsaraḥ?
*You say! What day is the day before yesterday?*

परह्यः सोमवासरः ।

parahyaḥ soma-vāsaraḥ.
*The day before yesterday is Monday.*

सोमवासरः कदा ? भवती वदतु ।

soma-vāsaraḥ kadā? bhavatī vadatu.
*When is Monday? You say!*

सोमवासरः परह्यः ।

soma-vāsaraḥ parahyaḥ.
*Monday is the day before yesterday.*

इदानीम् एवमेव अभ्यासं कुर्मः ।

idānīm evam eva abhyāsaṁ kurmaḥ.
*In this way now we do exercise.*

अद्य भानुवासरः इति चिन्तयन्तु ।

adya bhānu-vāsaraḥ iti cintyayantu.
*Today is Sunday, think this way.*

अहं प्रश्नं पृच्छामि, वदन्तु ।

ahaṁ praśnaṁ pṛcchāmi, vadantu.
*I ask a question, you say!*

अद्य भानुवासरः । भवती वदतु । भानुवासरः कदा ?

adya bhānu-vāsaraḥ. bhavatī vadatu. bhānu-vāsaraḥ kadā?
*Today is Sunday. You say! When is Sunday?*

अद्य भानुवासरः ।

adya bhānu-vāsaraḥ.
*Today is Sunday.*

सोमवासरः कदा ? भवती वदतु ।

soma-vāsaraḥ kadā? bhavatī vadatu.
*When is Monday? You say!*

श्वः सोमवासरः।

śvaḥ soma-vāsaraḥ.
*Tomorrow is Monday.*

मङ्गलवासरः कदा ? भवान् वदतु।

maṅgala-vāsaraḥ kadā? bhavān vadatu.
*When is Tuesday? You say!*

परश्वः मङ्गलवासरः।

paraśvaḥ maṅgala-vāsaraḥ.
*The day after tomorrow is Tuesday.*

अद्य कः वासरः ?

adya kaḥ vāsaraḥ?
*What day is today?*

अद्य भानुवासरः।

adya bhānu-vāsaraḥ.
*Today is Sunday.*

शनिवासरः कदा ? प्रकाशः वदतु।

śani-vāsaraḥ kadā? prakāśaḥ vadatu.
*When is Saturday? Prakasha, you say!*

ह्यः शनिवासरः।

hyaḥ śani-vāsaraḥ.
*Saturday is yesterday.*

शुक्रवास्रः कदा ? भवती वदतु।

śukravāsraḥ kadā? bhavatī vadatu.
*When is Friday? You say!*

परह्यः शुक्रवासरः।

parahyaḥ śukra-vāsaraḥ.
*Friday is the day before yesterday.*

इदानीं भवन्तः वदन्तु।

idānīṁ bhavantaḥ vadantu.
*No you all say!*

अद्य भानुवासरः।

adya bhānu-vāsaraḥ.
*Today is Sunday.*

केवलम् "अद्य, ह्यः, परह्यः"। एवम् अभ्यासं कुर्वन्तु।

kevalam "adya, hyaḥ, parahyaḥ". evam abhyāsaṁ kurvantu.
*Only "today, yesterday, the day before yesterday." Thus we do an exercise.*

अद्य बुधवासरः। श्वः गुरुवासरः। गुरुवासरः कद ?

adya budha-vāsaraḥ. śvaḥ guru-vāsaraḥ. guru-vāsaraḥ kadā?
*Today is Wednesday, tomorrow is Thursday. When is Thursday?*

श्वः गुरुवासरः।

śvaḥ guru-vāsaraḥ.
*Tomorrow is Thursday.*

शुक्रवासरः कदा ?

śukra-vāsaraḥ kadā?
*When is Friday?*

परश्वः शुक्रवासरः।

paraśvaḥ śukra-vāsaraḥ.
*The day after tomorrow is Friday.*

परश्वः शुक्रवासरः। प्रपरश्वः शनिवासरः।

शनिवासरः कदा ?

paraśvaḥ śukra-vāsaraḥ. praparaśvaḥ śani-vāsaraḥ. śani-vāsaraḥ kadā?
*The day after tomorrow is Friday. The day after the-day-after-tomorrow is Saturday. When is Saturday?*

प्रपरश्वः शनिवासरः।

praparaśvaḥ śani-vāsaraḥ.
*The day after the-day-after-tomorrow is Saturday.*

पुनः वदन्तु ।

punaḥ vadantu.
*Repeat!*

प्रपरश्वः शनिवासरः ।

praparaśvaḥ śani-vāsaraḥ.
*The day after the-day-after-tomorrow is Saturday.*

ह्यः मङ्गलवासरः ।

hyaḥ maṅgala-vāsaraḥ.
*Yesterday is Tuesday.*

मङ्गलवासरः कदा ?

maṅgala-vāsaraḥ kadā?
*When is Tuesday?*

ह्यः मङ्गलवासरः ।

hyaḥ maṅgala-vāsaraḥ.
*Yesterday is Tuesday.*

सोमवासरः कदा ?

soma-vāsaraḥ kadā?
*When is Monday?*

परह्यः सोमवासरः ।

parahyaḥ soma-vāsaraḥ.
*The day before yesterday is Monday.*

परह्यः सोमवासरः । प्रपरह्यः भानुवासरः ।

parahyaḥ soma-vāsaraḥ. praparahyaḥ bhānu-vāsaraḥ.
*The day before yesterday is Monday. The day before the-day-before-yesterday is Sunday.*

भानुवासरः कदा ?

bhānu-vāsaraḥ kadā?
*When is Sunday?*

प्रपरह्यः भानुवासरः ।

praparahyaḥ bhānu-vāsaraḥ.
*The day before the-day-before-yesterday is Sunday.*

पुनः वदन्तु ।

punaḥ vadantu.
*Say again!*

प्रपरह्यः भानुवासरः ।

praparahyaḥ bhānu-vāsaraḥ.
*The day before the-day-before-yesterday is Sunday.*

---

इदानीं पुनः एकम् अभ्यासं कुर्मः ।

idānīṁ punaḥ ekam abhyāsaṁ kurmaḥ.
*Now we do one exercise again.*

ह्यः शुक्रवासरः इति चिन्तयन्तु ।

hyaḥ śukra-vāsaraḥ iti cintayantu.
*Think as if yesterday is Friday.*

अहं प्रश्नं पृच्छामि उत्तरं वदन्तु ।

ahaṁ praśnaṁ pṛcchāmi uttaraṁ vadantu.
*I ask a question, you say the answer.*

शनिवासरः कदा ?

śani-vāsaraḥ kadā?
*When is Saturday?*

अद्य शनिवासरः ।

adya śani-vāsaraḥ.
*Today is Saturday.*

समीचीनम् ।

samīcīnam.
*Good!*

भानुवासरः कदा ?

bhānu-vāsaraḥ kadā?
*When is Sunday?*

श्वः भानुवासरः ।

śvaḥ bhānu-vāsaraḥ.
*Tomorrow is Sunday.*

सोमवासरः कदा ?

soma-vāsaraḥ kadā?
*When is Monday?*

परश्वः सोमवासरः ।

paraśvaḥ soma-vāsaraḥ.
*The day after tomorrow is Monday.*

मङ्गलवासरः कदा ?

maṅgala-vāsaraḥ kadā?
*When is Tuesday?*

प्रपरश्वः मङ्गलवासरः ।

praparaśvaḥ maṅgala-vāsaraḥ.
*Tuesday is the day after the-day-after-tomorrow.*

गुरुवासरः कदा ?

guru-vāsaraḥ kadā?
*When is Thursday?*

परह्यः गुरुवासरः ।

parahyaḥ guru-vāsaraḥ.
*Thursday is the day before yesterday.*

बुधवासरः कदा ?

budha-vāsaraḥ kadā?
*When is Wednesday?*

प्रपरह्यः बुधवासरः ।

praparahyaḥ budha-vāsaraḥ.
*Wednesday is the day before the-day-before-yesterday.*

मङ्गलवासरः कदा ।

maṅgala-vāsaraḥ kadā.
*When is Tuesday.*

प्रपरह्यः । वदन्तु । पुनः वदन्तु ।

praparahyaḥ. vadantu. punaḥ vadantu.
*The day before the-day-before-yesterday. Say again.*
*(**Obviously a mistake! It should be** **praparaśvaḥ**.)*

प्रपरह्यः मङ्गलवासरः ।

praparahyaḥ maṅgala-vāsaraḥ.
*Tuesday is the day before the-day-before-yesterday.*

---

SCREEN:

| | | |
|---|---|---|
| **अद्य** | **adya** | ***today*** |
| **श्वः** | **śvaḥ** | ***tomorrow*** |
| **परश्वः** | **paraśvaḥ** | ***after tomorrow*** |
| **प्रपरश्वः** | **praparaśvaḥ** | ***the day after after-tomorrow*** |
| **अद्य** | **adya** | ***today*** |
| **ह्यः** | **hyaḥ** | ***yesterday*** |
| **परह्यः** | **parahyaḥ** | ***before yesterday*** |
| **प्रपरह्यः** | **praparahyaḥ** | ***the day before before-yesterday*** |

---

*HINDI: You have learned the meaning of the words*
*Now, let us learn the names of the days of the week.*

---

SCREEN:

| | | |
|---|---|---|
| **भानुवासरः** | **bhānu-vāsaraḥ** | ***Sunday (Sun)*** |
| **सोमवासरः** | **soma-vāsaraḥ** | ***Monday (Moon)*** |
| **मङ्गलवासरः** | **maṅgala-vāsaraḥ** | ***Tuesday (Mars)*** |
| **बुधवासरः** | **budha-vāsaraḥ** | ***Wednesday (Mercur)*** |
| **गुरुवासरः** | **guru-vāsaraḥ** | ***Thursday (Jupiter)*** |
| **शुक्रवासरः** | **śukra-vāsaraḥ** | ***Friday (Venus)*** |
| **शनिवासरः** | **śani-vāsaraḥ** | ***Saturday (Saturn)*** |

---

इदानीं कः समयः ?

idānīṁ kaḥ samayaḥ?
*What's the time now?*

पञ्चवादनम् ।

pañca-vādanam.
*Five o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What's the time?*

षड्वादनम् ।

ṣaḍ-vādanam.
*Six o'clock.*

इदानीं कः समयः ?

idānīṁ kaḥ samayaḥ?
*What's the time now?*

द्वादशवादनम् ।

dvādaśa-vādanam.
*Twelve o'clock.*

---

*HINDI: You learned how to tell the time by looking at the clock. Now let us practice this exercise further.*

---

कः समयः ? वदतु ।

kaḥ samayaḥ? vadatu.
*What is the time? Say!*

एकवादनम् ।

eka-vādanam.
*One o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

द्विवादनम् ।

dvi-vādanam.
*Two o'clock.*

कः समयः ?

kaḥ samayaḥ?
*What is the time?*

त्रिवादनम् ।

tri-vādanam.
*Three o'clock.*

इदानीं कः समयः ?

idānīṁ kaḥ samayaḥ?
*What is the time now?*

चतुर्वादनम् ।

catur-vādanam.
*Four o'clock.*

इदानीं कः समयः ? वदतु ।

idānīṁ kaḥ samayaḥ? vadatu.
*What is the time now? Say!*

सपादपञ्चवादनम् ।

sapāda-pañca-vādanam.
*Quarter past five.*

इदानीम् ?

idānīm?
*And now?*

पदोनषड्वादनम् ।

padona-ṣaḍ-vādanam.
*quarter to six.*

इदानीं कः समयः ?

idānīṁ kaḥ samayaḥ?
*What is the time now?*

पञ्च-अधिकषड्वादनम् ।

pañca-adhika-ṣaḍ-vādanam.
*Five minutes past six.*

पुनः वदन्तु ।

punaḥ vadantu.
*Say again!*

इदानीं कथयन्तु ।

idānīṁ kathayantu.
*Say now!*

दश-अधिकषड्वादनम् ।

daśa-adhika-ṣaḍ-vādanam.
*Ten past six.*

इदानीं वदन्तु ।

idānīṁ vadantu.
*Say now!*

विंशति-अधिकषड्वादनम् ।

viṁśati-adhika-ṣaḍ-vādanam.
*Twenty minutes past six.*

पञ्चविंशति-अधिकषड्वादनम् ।

pañcaviṁśati-adhika-ṣaḍ-vādanam.
*Twentyfive past six.*

इदानीम् ?

idānīm?
*Now?*

पञ्च-उन-सप्तवादनम् ।

pañca-**una**-sapta-vādanam.
*Five minutes to seven.* **(Mistake!)**

पञ्चन्यूनसप्तवादनम् ।

pañca-**nyūna**-sapta-vādanam.
*Five minutes to seven.* **(Teacher corrects!)**

इदानीं कः समयः ?

idānīṁ kaḥ samayaḥ?
*Now what is the time?*

दशन्यूनसप्तवादनम् ।

daśa-nyūna-sapta-vādanam.
*Ten minutes to seven.*

इदानीं कः समयः ?

idānīṁ kaḥ samayaḥ?
*Now what is the time?*

पादोनसप्तवादनम् ।

pādona-sapta-vādanam.
*Quarter to seven.*

---

वयं प्रातःकले मिलामः चेत्, किं वदामः ?

vayaṁ prātaḥ-kāle milāmaḥ cet, kiṁ vadāmaḥ?
*If we meet in the morning, what do we say?*

सुप्रभातम् ।

suprabhātam.
*Good morning!*

रत्रौ किं वदामः ? शुभरात्रिः ।

ratrau kiṁ vadāmaḥ? śubha-rātriḥ.
*What do we say in the evening? Good evening!*

किं वदामः ?

kiṁ vadāmaḥ?
*What do we say?*

शुभरात्रिः ।

śubharātriḥ.
*Good evening!*

अन्यसमये मिलन्ति चेत्, किं वदामः ? नमो नमः ।

anya-samaye milanti cet, kiṁ vadāmaḥ? namo namaḥ.
*If we meet at some other time, what do we say? Hello, good day! (Lit.: Respect.)*

वदन्तु ।

vadantu.
*Say!*

नमो नमः ।

namo namaḥ.
*Good day!*

अथवा नमस्कारः । वदन्तु ।

athavā namaskāraḥ. vadantu.
*Or good day! Say!*

नमस्कारः ।

namaskāraḥ.
*Good day!*

प्रातः किं वदन्ति ?

prātaḥ kiṁ vadanti?
*What do you say in the morning?*

सुप्रभातम् ।

suprabhātam.
*Good morning!*

सायङ्काले, रत्रौ किं वदन्ति ?

sāyaṅ-kāle, ratrau kiṁ vadanti?
*In the evening, at night, what do you say?*

शुभरात्रिः ।

śubha-rātriḥ.
*Good evening!*

अन्यस्मिन् समये किं वदन्ति ?

anyasmin samaye kiṁ vadanti?
*In other time what do you say?*

नमो नमः । नमस्कारः । नमस्ते ।

namo namaḥ. namaskāraḥ. namaste.
*(These three salutations ...)*

---

क्षम्यताम् । कक्षणम् ।

kṣamyatām. kakṣaṇam.
*Excuse me. One minute!*

हरिः ओम् ।

hariḥ om!
*Hello!*

आम्, आम् । वेङ्कटरमणः । कुशलं, कुशलम् । अस्तु । सायङ्काले अगच्छामि । पञ्चवादने अगच्छामि । अस्तु । धन्यवादः ।

ām, ām. veṅkaṭa-ramaṇaḥ. kuśalaṁ, kuśalam. astu. sāyaṅ-kāle āgacchāmi. pañca-vādane agacchāmi. astu. dhanyavādaḥ!
*Yes, yes, (it's) Venkata-ramana. Good, good! All right. I [will] come in the evening. I [will] come at five o'clock. Ok. Thank you!*

पश्यन्तु । यदा दूरवाणी आगच्छति, तदा किं वदन्ति ?

paśyantu. yadā dūravāṇī āgacchati, tadā kiṁ vadanti?
*Look! When the telephone rings (lit.: comes), then what do you say?*

"हेलो"

"helo" ...
*Hallo ...*

"हेलो" स्थाने "हरिः ओम्" इति वदामः ।

"helo" sthāne "hariḥ om" iti vadāmaḥ.
*Instead of hello we say hariḥ om.*

किं वदामः ?

kiṁ vadāmaḥ?
*What do we say?*

हरिः ओम् ।

hariḥ om.
*Hariḥ om.*

पुनः वदन्तु ।

punaḥ vadantu.
*Say again!*

हरिः ओम्।

hariḥ om.
*Hariḥ om.*

एवं कृत्वा वदन्तु।

evaṁ kṛtvā vadantu.
*After doing this way, say!*

हरिः ओम्।

hariḥ om.
*Hariḥ om.*

समीचीनम्।

samīcīnam.
*Good!*

---

*HINDI:* **suprabhātam, śubharātriḥ, namo namaḥ,** etc. are phrases for greetings. Instead of "hello" "**hariḥ oṁ**" should be used for asnwering the phone etc.

---

पश्यन्तु। अत्र दण्डः अस्ति, चमसः अस्ति, दन्तकूर्चः अस्ति, दुरवणी अस्ति, करवस्त्रम् अस्ति, पुस्तकम् अस्ति।

paśyantu. atra daṇḍaḥ asti, camasaḥ asti, danta-kūrcaḥ asti, duravaṇī asti, karavastram asti, pustakam asti.
*Look! Here is a stick, a spoon, a toothbrush, a telephone, a handkerchief, a book.*

पश्यतु। दण्डः। दण्डं स्वीकरोमि। चमसः। अहं चमसं स्वीकरोमि। दन्तकूर्चं स्वीकरोमि। सिक्थवर्तिका। सिक्थवर्तिकां स्वीकरोमि। अङ्कनी। अङ्कनीं स्वीकरोमि। लेखनी। अहं लेखनीं स्वीकरोमि। दुरवाणी। अहं दुरवाणीं स्वीकरोमि। करवस्त्रं स्वीकरोमि। पुस्तकं स्वीकरोमि।

paśyatu. daṇḍaḥ. daṇḍaṁ svīkaromi. camasaḥ. ahaṁ camasaṁ svīkaromi. danta-kūrcaṁ svīkaromi. sikthavartikā. sikthavartikāṁ svīkaromi. aṅkanī. aṅkanīṁ svīkaromi. lekhanī. ahaṁ lekhanīṁ svīkaromi. duravāṇī. ahaṁ duravāṇīṁ svīkaromi. karavastraṁ svīkaromi. pustakaṁ svīkaromi.
*Look! The stick. I take the stick. The spoon. I take the spoon. I take the toothbrush. The candle. I take the candle. The pencil. I take the pencil. The pen. I take the pen. The telephone. I take the telephone. I take the handkerchief. I take the book.*

इदानीम् अहं पुस्तकं स्थापयामि, करवस्त्रं स्थापयामि, दुरवाणीं स्थापयामि, लेखनीं स्थापयामि, अङ्कनीं स्थापयामि, दण्डं स्थापयामि, दन्तकूर्चं स्थापयामि, चमसं स्थापयामि।

idānīm ahaṁ pustakaṁ sthāpayāmi, karavastraṁ sthāpayāmi, duravāṇīṁ sthāpayāmi, lekhanīṁ sthāpayāmi, aṅkanīṁ sthāpayāmi, daṇḍaṁ sthāpayāmi, danta-kūrcaṁ sthāpayāmi, camasaṁ sthāpayāmi.
*Now I put down the book, I put down the handkerchief, I put down the telephone, I put down the pen, I put down the pencil, I put down the stick, I put down the toothbrush, I put down the spoon.*

अहं पुस्तकं ददामि, दण्डं ददामि, दुरवाणीं न ददामि, सिक्थवर्तिकां ददामि, दन्तकूर्चं ददामि, लेखनीं ददामि, अहं चमसं ददामि, स्वीकरोतु। अङ्कनीं ददामि।

ahaṁ pustakaṁ dadāmi, daṇḍaṁ dadāmi, duravāṇīṁ na dadāmi, sikthavartikāṁ dadāmi, danta-kūrcaṁ dadāmi, lekhanīṁ dadāmi, ahaṁ camasaṁ dadāmi, svīkarotu. aṅkanīṁ dadāmi.
*I give the book, I give the stick, I don't give the telephone, I give the candle, I give the toothbrush, I give the pen, I give the spoon, here, take! I give the pencil.*

भवान् किं ददाति ?

bhavān kiṁ dadāti?
*What do you give?*

पुस्तकं ददामि।

pustakaṁ dadāmi.
*I give the book.*

भवती किं ददाति ?

bhavatī kiṁ dadāti?
*What do you give?*

अहं चमसं ददामि।

ahaṁ camasaṁ dadāmi.
*I give the spoon.*

भवान् किं ददाति ?

bhavān kiṁ dadāti?
*What do you give?*

अहम् अङ्कनीं ददामि।

aham aṅkanīṁ dadāmi.
*I give the pencil.*

भवती किं ददाति ?

bhavatī kiṁ dadāti?
*What do you give?*

दन्तकूर्चं ददामि।

danta-kūrcaṁ dadāmi.
*I give the toothbrush.*

भवान् किं ददाति ?

bhavān kiṁ dadāti?
*What do you give?*

अहं दण्डं ददामि।

ahaṁ daṇḍaṁ dadāmi.
*I give the stick.*

किं ददाति भवती ?

kiṁ dadāti bhavatī?
*Waht do you give?*

अहं सिक्थवर्तिकां ददामि।

ahaṁ sikthavartikāṁ dadāmi.
*I give the candle.*

भवती किं ददाति ?

bhavatī kiṁ dadāti?
*What do you give?*

अहं लेखनीं ददामि।

ahaṁ lekhanīṁ dadāmi.
*I give the pen.*

अस्तु। समीचीनम्। धन्यवादः।

astu. samīcīnam. dhanyavādaḥ.
*All right. Good! Thank you.*

भवतः नाम किम् ?

bhavataḥ nāma kim?
*What is your name?*

मम नाम सुशीलेन्द्रः।

mama nāma suśīlendraḥ.
*My name is Sushilendra.*

अहं सुशीलेन्द्रं पृच्छामि।

ahaṁ suśīlendraṁ pṛcchāmi.
*I ask Sushilendra.*

भवत्यः नाम किम् ?

bhavatyaḥ nāma kim?
*What is your name?*

मम नाम सिन्धुः।

mama nāma sindhuḥ.
*My name is Sindhu.*

अहं सिन्धुं पृच्छामि।

ahaṁ sindhuṁ pṛcchāmi.
*I ask Sindhu.*

भवत्यः नाम किम् ?

bhavatyaḥ nāma kim?
*What is your name?*

मम नाम वेदवती ।

mama nāma vedavatī.
*My name is Vedavati.*

अहं वेदवतीं पृच्छामि ।

ahaṁ vedavatīṁ pṛcchāmi.
*I ask Vedavati.*

सुशीलेन्द्रः । सुशीलेन्द्रम् ।

suśīlendraḥ. suśīlendram.
***(pointing out different endings.)***

सिन्धुः । सिन्धुम् ।

sindhuḥ. sindhum.

वेदवती वेदवतीं ।

vedavatī vedavatīṁ.

इदानीम् अहम् एतत् दर्शयामि । अभ्यासं कुर्मः ।

idānīm aham etat darśayāmi. abhyāsaṁ kurmaḥ.
*Now I show this. We do an exercise.*

| | |
|---|---|
| राधेश्यामः । | राधेश्यामम् । |
| rādheśyāmaḥ. | rādheśyāmam. |
| बाबुलालः । | बाबुलालम् । |
| bābulālaḥ. | bābulālam. |
| रमानन्दः । | रमानन्दम् । |
| ramānandaḥ. | ramānandam. |
| शिक्षकः । | शिक्षकम् । |
| śikṣakaḥ. | śikṣakam. |
| आपणिकः । | आपणिकम् । |
| āpaṇikaḥ. | āpaṇikam. |
| वित्तकोषः । | वित्तकोषम् । |
| vittakoṣaḥ. | vittakoṣam. |
| नायकः । | नायकम् । |
| nāyakaḥ. | nāyakam. |
| विद्यालयः । | विद्यालयम् । |
| vidyālayaḥ. | vidyālayam. |
| मन्दिरम् । | मन्दिरम् । |
| mandiram. | mandiram. |
| पुस्तकम् । | पुस्तकम् । |
| pustakam. | pustakam. |
| नगरम् । | नगरम् । |
| nagaram. | nagaram. |
| मालविका । | मालविकाम् । |
| mālavikā. | mālavikām. |
| स्थालिका । | स्थालिकाम् । |
| sthālikā. | sthālikām. |
| सुशीला । | सुशीलाम् । |
| suśīlā. | suśīlām. |
| कूपी । | कूपीम् । |
| kūpī. | kūpīm. |
| अङ्गुली । | अङ्गुलीम् । |
| aṅgulī. | aṅgulīm. |
| घटी । | घटीम् । |
| ghaṭī. | ghaṭīm. |
| लेखनी । | लेखनीम् । |
| lekhanī. | lekhanīm. |

---

भगवद्गीता ।

bhagavad-gītā.
*Bhagavad-gita.*

परित्रणाय साधूनां विनाशाय च दुष्कृताम् ।

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

paritraṇāya sādhūnāṁ vināśāya ca duṣkṛtāṁ
dharma-saṁsthāpanārthāya sambhavāmi yuge yuge
*"To protect the saintly, to destroy the miscreants and to reestablish the lost principles of dharma, I descend from age to age."*

अहं भगवद्गीतां पठामि ।

ahaṁ bhagavad-gītāṁ paṭhāmi.
*I read Bhagavad-gita.*

भवन्तः किं किं पठन्ति ? वदन्तु ।

bhavantaḥ kiṁ kiṁ paṭhanti? vadantu.
*What do you read? Say!*

अहं वार्तापत्रिकां पठामि ।

ahaṁ vārtāpatrikāṁ paṭhāmi.
*I rad the newspaper.*

अहं रामायणं पठामि ।

ahaṁ rāmāyaṇaṁ paṭhāmi.
*I read Ramayana.*

अहं काव्यं पठामि ।

ahaṁ kāvyaṁ paṭhāmi.
*I read a book of poetry.*

अहं महाभारतं पठामि ।

ahaṁ mahābhārataṁ paṭhāmi.
*I read Mahabharata.*

अहं वेदान्तं पठामि ।

ahaṁ vedāntaṁ paṭhāmi.
*I read Vedanta.*

अहं सुन्दरकाण्डं पठामि ।

ahaṁ sundara-kāṇḍaṁ paṭhāmi.
*I read Sundara-kandam* **(chapter of Ramayana)***?*

अहं सुभाषितं पठामि ।

ahaṁ subhāṣitaṁ paṭhāmi.
*I read a verse.*

अहं विद्यालयं गच्छामि । विद्यालयः । विद्यालयम् ।

अहं विद्यालयं गच्छामि ।

ahaṁ vidyālayaṁ gacchāmi. vidyālayaḥ. vidyālayam.
*I go to school. School. To school.*

भवन्तः कुत्र कुत्र गच्छन्ति ? वदन्तु ।

bhavantaḥ kutra kutra gacchanti? vadantu.
*Where do you go? Say!*

अहं मुम्बैनगरं गच्छामि ।

ahaṁ mumbai-nagaraṁ gacchāmi.
*I go to Mumbai.*

अहं बिहारं गच्छामि ।

ahaṁ bihāraṁ gacchāmi.
*I go to Bihar.*

अहं तिरुपथिं गच्छामि ।

ahaṁ tirupathiṁ gacchāmi.
*I go to Tirupathi.*

अहं अरण्यं गच्छामि ।

aham araṇyaṁ gacchāmi.
*I go to the forrest.*

अहं मन्दिरं गच्छामि ।

ahaṁ mandiraṁ gacchāmi.
*I go to the temple.*

अहं स्वर्गं गच्छामि ।

ahaṁ svargaṁ gacchāmi.
*I go to heaven (to svarga).*

---

इदानीं वयम् एकम् अभ्यासं कुर्मः ।

idānīṁ vayam ekam abhyāsaṁ kurmaḥ.
*Now we do one exercise.*

माधवः, ग्रामः, गच्छति ।

mādhavaḥ, grāmaḥ, gacchati.
*Madhava, goes, village.*

माधवः ग्रामं गच्छति ।

mādhavaḥ grāmaṁ gacchati.
*Madhava goes to the village.*

माधवः विद्यालयं गच्छति ।

mādhavaḥ vidyālayaṁ gacchati.
*Madhava goes to school.*

माधवः मथुरां गच्छति ।

mādhavaḥ mathurāṁ gacchati.
*Madhava goes to Mathura.*

माधवः वाटिकां गच्छति ।

mādhavaḥ vāṭikāṁ gacchati.
*Madhava goes to the garden.*

माधवः दिल्लीं गच्छति ।

mādhavaḥ dillīṁ gacchati.
*Madhava goes to Delhi.*

माधवः पुरीं गच्छति ।

mādhavaḥ purīṁ gacchati.
*Madhava goes to Puri.*

इदानीं भवन्तः वाक्यं वदन्तु कः कः कुत्र गच्छति इति । ज्ञातं वा ? भवती वदतु ।

idānīṁ bhavantaḥ vākyaṁ vadantu kaḥ kaḥ kutra gacchati iti. jñātaṁ vā? bhavatī vadatu.
*Now you say a sentence who goes where. You understand? You say!*

पवित्रा चलनचित्रमन्दिरं गच्छति ।

pavitrā calana-citra-mandiraṁ gacchati.
*Pavitra goes to the cinema.*

दीपिका इन्द्रलोकं गच्छति ।

dīpikā indra-lokaṁ gacchati.
*Dipika goes to Indraloka (heaven).*

सुशीलेन्द्रः पातालं गच्छति ।

suśīlendraḥ pātālaṁ gacchati.
*Sushilendra goes to Patala (hell).*

हरीशः हिमालयं गच्छति ।

harīśaḥ himālayaṁ gacchati.
*Harisha goes to Himalaya.*

अनन्तः अन्यं गच्छति ।

anantaḥ anyaṁ gacchati.
*Ananta goes somewhere else.*

एवम् ।

evam.
*Indeed.*

इदानीं पुनः अभ्यासं कुर्मः ।

idānīṁ punaḥ abhyāsaṁ kurmaḥ.
*Now we do an exercise again.*

बालकः आपणः गच्छति ।

bālakaḥ āpaṇaḥ gacchati.
*Boy goes to the shop.*

पश्यतु । बालकः आपणं गच्छति ।

paśyatu. bālakaḥ āpaṇaṁ gacchati.
*Look! The boy goes to the shop.*

गणेशः विदेशं गच्छति ।

gaṇeśaḥ videśaṁ gacchati.
*Ganesha goes abroad.*

माता नगरं गच्छति ।

mātā nagaraṁ gacchati.
*Mother goes to the city.*

सुधा वनं गच्छति ।

sudhā vanaṁ gacchati.
*Sudha goes to the forrest.*

यानं वाटिकां गच्छति ।

yānaṁ vāṭikāṁ gacchati.
*The vehicle goes to the garden.*

शीला आग्रां गच्छति।

śīlā āgrāṁ gacchati.
*Shila goes to Agra.*

प्रदीपः नदीं गच्छति।

pradīpaḥ nadīṁ gacchati.
*Pradipa goes to the river.*

दण्डम्। दन्तकूर्चम्। पुस्तकम्। लेखनीम्।

द्वितीयाविभक्ति। अकरान्त। आकरान्त। ईकरान्त।

daṇḍam. danta-kūrcam. pustakam. lekhanīm. *Stick. Toothbrush. Book. Pen.* (*stressing the accusative ending -m*).

---

*HINDI:* **daṇḍam, danta-kūrcam, pustakam, lekhanīm** *are the examples of accusative ending* **-m** (**dvitīyā-vibhakti**) *in case of the words ending in* **-a, -ā** and **-ī** (**a-karānta. ā-karānta. ī-karānta**).

---

## सुभाषितम्।

**subhāṣitam.**
***Verse.***

इदानीं वयम् एकं सुभाषितं शृण्मः।

idānīṁ vayam ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now, we listen to one verse.*

अन्नदानं परं दानं विद्यादानमतः परम्।

अन्नेन क्षणिका तृप्तिः यावज्जीवं च विद्यया॥

anna-dānaṁ paraṁ dānaṁ vidyā-dānam ataḥ param
annena kṣaṇikā tṛptiḥ yāvaj jīvaṁ ca vidyayā

anna-dānam – *donation of food;* param – *supreme;* dānam – *donation;* vidyā-dānam – *donation of knowledge;* ataḥ – *then that;* param – *supreme;* annena – *by food;* kṣaṇikā – *for a moment;* tṛptiḥ – *satisfaction;* yāvat – *for as long as;* jīvam – *life;* ca - *but;* vidyayā – *by knowledge.*

*Donation of food is the supreme donation, but the donation of knowledge is still superior. Food bring satisfaction for only a moment, while knowledge lasts for life.*

दानं करणीयम्। अन्नदानम् यदि कुर्मः महादानम् इति वदन्ति। अन्नदानं महादानम्।

dānaṁ karaṇīyam. anna-dānam yadi kurmaḥ mahā-dānam iti vadanti. anna-dānaṁ mahā-dānam.
*We should give donation. If we give food, that is the greatest donation – so they say. Donation of food is the greatest donation.*

परन्तु अन्नेन क्षणिका तृप्तिः। यदि अन्नदानं कुर्मः, यदा बुभुक्षा भवति, तावत् पर्यन्तं तिष्ठति। एकं दिनं वा, अर्धदिनं वा तिष्ठति।

parantu annena kṣaṇikā tṛptiḥ. yadi anna-dānaṁ kurmaḥ, yadā bubhukṣā bhavati, tāvat paryantaṁ tiṣṭhati. ekaṁ dinaṁ vā, ardhadinaṁ vā tiṣṭhati.
*But the food brings satisfaction for only a moment. If we donate food when there is hunger, only for that longit remains. One day or half a day it stays.*

परन्तु यदि विद्यादानं कुर्मः, यावद् जीवं तिष्ठति। अतः "विद्यादानं महादानम्" इति सुभाषितकारः वदति।

parantu yadi vidyā-dānaṁ kurmaḥ, yāvad jīvaṁ tiṣṭhati. ataḥ vidyā-dānaṁ mahā-dānam iti subhāṣita-kāraḥ vadati.
*But if we donate knowledge it stays for as long as we live. Therefore the author of the verse says "the donation of knowledge is the supreme donation".*

---

## कथा

**kathā**
**Story**

अहम् एकं कथां कथयामि। शृण्वन्तु।

aham ekaṁ kathāṁ kathayāmi. śṛṇvantu.
*I tell one story. Listen!*

चन्द्रगुप्तः इति एकः महाराजः आसीत्। सः महाराजः मघदद्देशं पालयति स्म। मघदद्देशस्य राजा आसीत्।

candraguptaḥ iti ekaḥ mahārājaḥ āsīt. saḥ mahārājaḥ maghada-deśaṁ pālayati sma. maghada-deśasya rājā āsīt.
*Candragupta was a king. That king was ruling the kingdom of Maghada. He was the king of Maghada.*

तस्य अमात्यः, चन्द्रगुप्तस्य अमात्यः चाणक्यः इति। सः बहुबुद्धिमान् निःस्पृहः च आसीत्। आशा नास्ति तस्य।

tasya amātyaḥ, candraguptasya amātyaḥ cāṇakyaḥ iti. saḥ bahu-buddhimān niḥspṛhaḥ ca āsīt. āśā nāsti tasya.
*His counselor was Canakya. He was very intelligent and very dettached (desireless). He had no desires.*

यद्यपि सः महाराजस्य अमात्यः, तथापि सः सरलजीवनं यापयति स्म। सामान्यजीवनं, सरलजीवनं यपयति स्म।

yadyapi saḥ mahārājasya amātyaḥ, tathāpi saḥ sarala-jīvanaṁ yāpayati sma. sāmānya-jīvanaṁ, sarala-jīvanaṁ yapayati sma.
*Although he was the kings advisor, still he was leading a very simple life.*

एकदा चन्द्रगुप्तः चाणक्यम् आह्वयति प्रजाभ्यः दातुं कम्बलान् इच्छति। "प्रजाभ्यः वितरणं करोतु" इति।

ekadā candraguptaḥ cāṇakyam āhvayati, prajābhyaḥ dātuṁ kambalān icchati. "prajābhyaḥ vitaraṇaṁ karotu" iti.
*Once Candragupta calls Canakya, and wants to donate blankets to his subjects. "Pass over, grant them to my subjects."*

सः, चाणक्यः तस्य गृहं नयति। कम्बलान् तस्य गृहं नयति।

saḥ, cāṇakyaḥ tasya gṛhaṁ nayati. kambalān tasya gṛhaṁ nayati.
*Canakya takes them to his home. He takes the blankets to his home.*

वस्तुतः चाणक्यः महा अमात्यः। तथापि सः कुटीरे वासं करोति। सः कम्बलान् तस्य कुटीरं नयति।

vastutaḥ cāṇakyaḥ mahā amātyaḥ. tathāpi saḥ kuṭīre vāsaṁ karoti. saḥ kambalān tasya kuṭīraṁ nayati.
*Actually Canakya is a great advisor. Still he lives in a hut. He takes the blankets to his hut.*

चाणक्यः गृहं नीत्वा अत्र राशिं कृतवान्। कम्बलानां राशिः अस्ति अत्र।

cāṇakyaḥ gṛhaṁ nītvā atra rāśiṁ kṛtavān. kambalānāṁ rāśiḥ asti atra.
*After taking them home he piled them up. Here is a pile of blankets.*

शैत्यकालः आसीत्। सः शयनं कृतवान्। बहुशैत्यम्। सः कम्पते स्म। तथापि सः कम्बनं विना शयनं कृतवान्।

śaityakālaḥ āsīt. saḥ śayanaṁ kṛtavān. bahu-śaityam. saḥ kampate sma. tathāpi saḥ kambanaṁ vinā śayanaṁ kṛtavān.
*It was the cold season. He lay down. It was very cold, he was shaking. Still, he slept without a blanket.*

एकः चोरः । "एषः महाधनिकः अस्ति, यतः महाराजस्य अमात्यः । अस्य गृहे बहूनि धनानि सन्ति । चोरयामः ।" मित्रेण सह आगतवान् ।

ekaḥ coraḥ. "eṣaḥ mahā-dhanikaḥ asti, yataḥ mahārājasya amātyaḥ. asya gṛhe bahūni dhanāni santi. corayāvaḥ." mitreṇa saha āgatavān.
*A thief [thinks:] "This is a very rich men, as he is the king's advisor. Many riches are in his home. We steal." He came there with his friend.*
***(You will hear plural spoken and dual written down!)***

आगत्य पश्यति चाणक्यः निद्रां करोति । शैत्यकालः । बहुशैत्यम् अस्ति । कम्पते । तथापि सः पार्श्वे पश्यति कम्बनानां राशिः अस्ति । तथापि सः न धृतवान् ।

āgatya paśyati cāṇakyaḥ nidrāṁ karoti. śaitya-kālaḥ. bahu-śaityam asti. kampate. tathāpi saḥ pārśve paśyati kambanānāṁ rāśiḥ asti. tathāpi saḥ na dhṛtavān.
*When he comes he sees Canakya is sleeping. It is winter, it's very cold. He is shaking. Still, he sees there is a pile of blankets besides him. Despite that he doesn't use them to cover himself.*

एतयोः बहु आश्चर्यम् अभवत् "कम्बलानां राशिः । चाणक्यः तथैव सुप्तवान्, पत्नी तथैव सुप्तवती" इति तस्य आश्चर्यम् अभवत्, चोरस्य ।

etayoḥ bahu āścaryam abhavat. "kambalānāṁ rāśiḥ. cāṇakyaḥ tathaiva suptavān, patnī tathaiva suptavatī" iti tasya āścaryam abhavat, corasya.
*The two thiefs were wondering ... "There is a pile of blankets. Canakya sleeps without them, his wife sleeps without them," thus he wondered ... the thief.*

अनन्तरं सः चोरः अन्तः गत्वा चाणक्यम् उत्थापयति । चाणक्यः उत्थाय उपविशति । "भोः किमर्थम् आगतवन्तौ" इति पृच्छति ।

anantaraṁ saḥ coraḥ antaḥ gatvā cāṇakyam utthāpayati. cāṇakyaḥ utthāya upaviśati. "bhoḥ, kim artham āgatavantau" iti pṛcchati.
*Then, after entering, the thief woke Canakya up. When Canakya awoke, he sat down. "Oh, what for have the two of you come," he asks.*

अनन्तरं चोरः पृच्छति "भोः महाशय ! अत्र कम्बनानां राशिः अस्ति, तथापि न धृतवान् किल । शैत्यकालः, शैत्यम् अस्ति । किमर्थम् एवं कृतवान् ? किम् अर्थं न धृतवान् ?" इति सः चोरः कुतूहलेन पृच्छति ।

anantaraṁ coraḥ pṛcchati: "bhoḥ mahāśaya! atra kambanānāṁ rāśiḥ asti, tathāpi na dhṛtavān kila. śaityakālaḥ. śaityam asti. kim artham evaṁ kṛtavān? kim arthaṁ na dhṛtavān?" iti saḥ coraḥ kutūhalena pṛcchati.
*Then the theif asked: "Oh, dear sir! Here is a pile of blankets but you don't use them! It's winter, it's cold. Why did you do that? Why didn't you use them?" thus the thief asks with curiosity.*

तदा चाणक्यः एवं वदति "भोः, कम्बलानां राशिः अस्ति । राजा मदर्थं न दत्तवान् । कम्बलान् मदर्थं न दत्तवान् । प्रजाभ्यः वितरणं कर्तुं दत्तवान्, अतः अहम् एतान् कम्बलान् न धरामि" इति सः वदति ।

tadā cāṇakyaḥ evaṁ vadati "bhoḥ, kambalānāṁ rāśiḥ asti. rājā mad-arthaṁ na dattavān. kambalān māt arthaṁ na dattavān. prajābhyaḥ vitaraṇaṁ kartuṁ dattavān, ataḥ aham etān kambalān na dharāmi" iti saḥ vadati.
*Then Canakya says thus: "Oh, the pile of blankets is there. The king hasn't given them for me. He hasn't given the blankets for me. He gave them so that I pass them over to his subjects. Therefore I don't use the blankets." Thus he says.*

चोरस्य आश्चर्यं भवति "किमर्थम् एवम् अस्ति ?" इति ।

corasya āścaryaṁ bhavati. "kim artham evam asti?" iti.
*The thief wondered: "Why is it so?"*

तदा चोरः वदति । तदा चोरः चाणक्यं पृच्छति "महाशय ! भवान् कीदृशः । कीदृशः दयालुः ।

अथवा निःस्पृहः अस्ति। आवाम् इतः परं चौर्यकार्यं न कुर्वः। अतः भवतः सकाशात् आवां शिक्षितवन्तौ। अतः इतः परम् आवां चौर्यकार्यं न कुर्वः" इति तौ चौर्यकार्यं त्यक्त्वा सज्जनौ भवतः।

tadā coraḥ vadati. tadā coraḥ cāṇakyaṁ pṛcchati: "mahāśaya! bhavān kīdṛśaḥ. kīdṛśaḥ dayāluḥ. athavā niḥspṛhaḥ asti. āvām itaḥ paraṁ cauryakāryaṁ na kurvaḥ. ataḥ bhavataḥ sakāśāt āvāṁ śikṣitavantau. ataḥ itaḥ paraṁ āvāṁ cauryakāryaṁ na kurvaḥ" iti tau cauryakāryaṁ tyaktvā sajjanau bhavataḥ.
*Then the thief speaks. Then the thief asks Canakya: "O, sir! What kind of person are you? How merciful, kind! And desireless as well. From now on we will not steal anymore. We learned from you. Therefore from now on we won't steal anymore." Thus after abandoning stealing they became saintly men.*

तदा चोरः वदति "भोः, भवतः निःस्पृहं दृष्ट्वा आवयोः लज्जा भवति। वयम् इतः परं चौरकार्यं न कुर्मः" इति क्षमां याचतः।

tadā coraḥ vadati "bhoḥ, bhavataḥ niḥspṛhaṁ dṛṣṭvā āvayoḥ lajjā bhavati. āvām itaḥ paraṁ caurakāryaṁ na kurvaḥ" iti kṣamāṁ yācataḥ.
*Then the thief said: "Oh, seeing your detachment we are ashamed. From now on we won't steel." Thus they begged for forgiveness.*

कथायाः अर्थः ज्ञातः वा ?

kathāyāḥ arthaḥ jñātaḥ vā?
*Have you understood the story?*

ज्ञातः।

jñātaḥ.
*We've understood.*

अहो ! चाणक्यस्य निःस्पृहता।

aho! cāṇakyasya niḥspṛhatā.
*Behold! Canakya's dettachment.*

अस्तु। धन्यवादः। नमो नमः।

astu. dhanyavādaḥ. namo namaḥ.
*All right. Thank you. Salute to you all!*

नमो नमः।

namo namaḥ.

# LESSON 7 – OVERVIEW

*In the seventh lesson you will do further practice of* **dvitīyā-vibhakti** *(accusative case) with verbs "to give", "to take", "to read", "to eat" . You will learn how to make polite requests. You will do exercises in receiving a guest and having a simple conversation with him. You will learn the words expressing: in front of, behind, left, right, up, down.*

## POLITE REQUEST

| | | |
|---|---|---|
| कृपया ददातु । | kṛpayā dadātu. | *Please give.* |
| स्वीकरोतु । | svīkarotu. | *Please take.* |
| धन्यवादः । | dhanyavādaḥ. | *Thank you.* |

## AVYAYAS FOR LOCATION

***- used with ṣaṣṭhī-vibhakti (genitive)***

| | | |
|---|---|---|
| कुत्र ? | kutra? | *Where?* |
| पुरतः | purataḥ | *in front of* |
| पृष्ठतः | pṛṣṭhataḥ | *behind* |
| दक्षिणतः | dakṣiṇataḥ | *on the right* |
| वामतः | vāmataḥ | *on the left* |
| उपरि | upari | *above (up)* |
| अधः | adhaḥ | *bellow (down)* |

# Lesson 7

*HINDI: In the last lesson we did some practice of* ***dvitīyā-vibhakti*** *(accusative) in this lesson we will do further practices.*

वयम् आरम्भे पूर्वतन पाठस्य किञ्चित् स्मरणं कुर्मः।

vayam ārambhe pūrvatana pāṭhasya kiñcit smaraṇaṁ kurmaḥ.
*In the begining we remember a little of the previous lesson.*

अत्र बहूनि वस्तूनि सन्ति। करदीपः अस्ति। अहं करदीपं स्वीकरोमि। अहम् उपनेत्रं स्वीकरोमि।

atra bahūni vastūni santi. karadīpaḥ asti. ahaṁ karadīpaṁ svīkaromi. aham upanetraṁ svīkaromi.
*Here are many things. A hand torch. I take the torchlight. I take the eyeglasses.*

अहम् उपनेत्रं ददामि। स्वीकरोतु। बहुसमीचीनम्।

aham upanetraṁ dadāmi. svīkarotu. bahu-samīcīnam.
*I give the eyeglasses. Take (please)! Very good!*

अहं करदीपं ददामि।

ahaṁ karadīpaṁ dadāmi.
*I give the hand torch.*

एवमव वाक्यं वदामः। अहं पुस्तकं ददामि। अहं धनं ददामि। अहं पत्रं ददामि।

evam eva vākyaṁ vadāmaḥ. ahaṁ pustakaṁ dadāmi. ahaṁ dhanaṁ dadāmi. ahaṁ patraṁ dadāmi.
*In this way we say sentences. I give the book. I give the money. I give the letter.*

तथा वाक्यानि वदामः। इदानीं भवन्तः एकमेकं वाक्यं वदन्ति वा ? किं किं ददाति ? वदतु।

tathā vākyāni vadāmaḥ. idānīṁ bhavantaḥ ekam ekaṁ vākyaṁ vadanti vā? kiṁ kiṁ dadāti? vadatu.
*Thus we say sentences. Now shall each of you say a sentence? What (different things) to you give. Say!*

अहं फलं ददामि।

ahaṁ phalaṁ dadāmi.
*I give the fruit.*

भवती फलं ददाति। उत्तमम्।

bhavatī phalaṁ dadāti. uttamam.
*She gives (or: you give) the fruit. Good!*

अहं लेखनीं ददामि।

ahaṁ lekhanīṁ dadāmi.
*I give the pen.*

अहं पत्रं ददामि।

ahaṁ patraṁ dadāmi.
*I give the sheet (or the letter).*

अहं वस्त्रं ददामि।

ahaṁ vastraṁ dadāmi.
*I give the clothes.*

अहं नेत्रं ददामि।

ahaṁ netraṁ dadāmi.
*I give the eye.*

नेत्रं ददाति ? नेत्रदानं करोति ? बहु उत्तमम्।

समीचीनम्।

netraṁ dadāti? netra-dānaṁ karoti? bahu uttamam. samīcīnam.
*You give the eye? You do eye-donation? Very good! Great!*

अहं कङ्कणं ददामि।

ahaṁ kaṅkaṇaṁ dadāmi.
*I give the bracelet.*

अहं फलं ददामि।

ahaṁ phalaṁ dadāmi.
*I give the fruit.*

बहु समीचीनम्।

bahu samīcīnam.
*Very good!*

कृपया उपनेत्रं ददातु।

kṛpayā upanetraṁ dadātu.
*Please, give [me] the eyeglases.*

धन्यवादः।

dhanyavādaḥ.
*Thank you.*

कृपया करदीपं ददातु।

kṛpayā karadīpaṁ dadātu.
*Please, give [me] the hand torch.*

धन्यवादः।

dhanyavādaḥ.
*Thank you!*

कृपया – ददातु। वयं यदा किम् अपि प्रार्थनं कुर्मः,

"कृपया ददातु" वदामः। किं वाक्यं वदामः ?

kṛpayā - dadātu. vayaṁ yadā kim api prārthanaṁ kurmaḥ, "kṛpayā dadātu" vadāmaḥ. kiṁ vākyaṁ vadāmaḥ?
*Please – give. When we want to make some request, we say: "Please, give." What sentence do we say?*

कृपया ददातु।

kṛpayā dadātu.
*Please, give.*

---

वयम् इदानीम् एकम् अभ्यासं कुर्मः।

vayam idānīm ekam abhyāsaṁ kurmaḥ.
*Now we make an exercise.*

मम समीपे बहूनि वस्तूनि सन्ति। अहम् एकमेकं वस्तु दर्शयामि। उदाहरणम्। करदीपः। सर्वे "कृपया करदीपं ददातु" वदन्तु।

mama samīpe bahūni vastūni santi. aham ekam ekaṁ vastu darśayāmi. udāharaṇam: karadīpaḥ. sarve "kṛpayā karadīpaṁ dadātu" vadantu.
*Near me there are many things. I will show the things one by one. Example: Hand torch. You all say: "Please, give [me, us, them] the hand torch."*
***(To whom the thing is given, is not expressed. It is understood from the situation and the context.)***

दन्तकूर्चः। कृपया दन्तकूर्चं ददातु।

danta-kūrcaḥ. kṛpayā danta-kūrcaṁ dadātu.
*Toothbrush. Please, give [me] the toothbrush.*

चमसः। कृपया चमसं ददातु।

camasaḥ. kṛpayā camasaṁ dadātu.
*Spoon. Please, give [me] the spoon.*

कङ्कतम्। कृपया कङ्कतं ददातु।

kaṅkatam. kṛpayā kaṅkataṁ dadātu.
*Bracelet. Please, give [me] the bracelet.*

सङ्गणकम्। कृपया सङ्गणकं ददातु।

saṅgaṇakam. kṛpayā saṅgaṇakaṁ dadātu.
*Computer. Please, give [me] the computer.*

ध्वनिमुद्रिका। कृपया ध्वनिमुद्रिकां ददातु।

dhvani-mudrikā. kṛpayā dhvani-mudrikāṁ dadātu.
*Cassette. Please, give [me] the cassette.*

सान्द्रमुद्रिका। कृपया सान्द्रमुद्रिकां ददातु।

sāndra-mudrikā. kṛpayā sāndra-mudrikāṁ dadātu.
*CD. Please, give [me] the CD.*

सिदिरोम् इत्यर्थे सान्द्रमुद्रिका इति वदामः। पुनः वदन्तु।

"sidi-rom" ity arthe sāndra-mudrikā iti vadāmaḥ. punaḥ vadantu.
*In the meaning of CD-ROM we say* sāndra-mudrikā.

कृपया सान्द्रमुद्रिकां ददातु।

kṛpayā sāndra-mudrikāṁ dadātu.
*Please, give [me] the CD.*

कर्तरी। कृपया कर्तरीं ददातु।

kartarī. kṛpayā kartarīṁ dadātu.
*Scissors. Please, give [me] the scissors.*

पत्रिका। कृपया पत्रिकां ददातु।

patrikā. kṛpayā patrikāṁ dadātu.
*Magazine. Please, give [me] the magazine.*

लेखनी। कृपया लेखनीं ददातु।

lekhanī. kṛpayā lekhanīṁ dadātu.
*Pen. Please, give [me] the pen.*

---

*HINDI: When you ask for a certain thing, you say:* **kṛpayā dadātu,** *"please, give (me)". The thing you ask for is in* **dvitīyā-vibhakti** *(accusative). All the words ending in* **-a, -ā,** *and* **-ī,** *take* **-m** *in accusative.*

---

वयम् इदानीम् अन्यम् एकम् अभ्यासं कुर्मः। भवतः नाम किम्?

vayam idānīm anyam ekam abhyāsaṁ kurmaḥ. bhavataḥ nāma kim?
*Now we do another exercise. What's your name?*

मम नाम मयूरः।

mama nāma mayūraḥ.
*My name is Mayura.*

एकं वाक्यं लिखामि। मयूरः ...... पठति। मयूरः किं किं पठति ? भवन्तः वदन्तु। भवती वदतु।

ekaṁ vākyaṁ likhāmi: mayūraḥ ......... paṭhati. mayūraḥ kiṁ kiṁ paṭhati? bhavantaḥ vadantu. bhavatī vadatu.
*I write a sentence. Mayura .......... reads. What [various thing] does he read? You [all] say! You (fem.) say!*

मयूरः पत्रिकां पठति।

mayūraḥ patrikāṁ paṭhati.
*Mayura reads the magazine.*

मयूरः पद्यं पठति।

mayūraḥ padyaṁ paṭhati.
*Mayura reads [a book of] poetry.*

मयूरः समाचारपत्रं पठति।

mayūraḥ samācāra-patraṁ paṭhati.
*Mayura reads newspaper.*

मयूरः भगवद्गीतां पठति।

mayūraḥ bhagavadgītāṁ paṭhati.
*Mayura reads Bhagavad-gita.*

मयूरः पुस्तकं पठति।

mayūraḥ pustakaṁ paṭhati.
*Mayura reads a book.*

मयूरः वेदं पठति।

mayūraḥ vedaṁ paṭhati.
*Mayura reads the Vedas.*

मयूरः वाक्यं पठति ।

mayūraḥ vākyaṁ paṭhati.
*Mayura reads a sentence.*

मयूरः पाठ्यपुस्तकं पठति ।

mayūraḥ pāṭhya-pustakaṁ paṭhati.
*Mayura reads a text book.*

मयूरः बृहद्वाक्यं पठति ।

mayūraḥ bṛhad-vākyaṁ paṭhati.
*Mayura reads a big (long) sentence.*

---

इदानीम् अन्यत् वाक्यं वदामि । अहम् अन्नं खादामि । अहं फलं खादामि । भवन्तः किं किं खादन्ति ? वदन्ति वा ? भवती वदतु ।

idānīm anyat vākyaṁ vadāmi. aham annaṁ khādāmi. ahaṁ phalaṁ khādāmi. bhavantaḥ kiṁ kiṁ khādanti? vadanti vā? bhavatī vadatu.
*Now I say another sentence. I eat rice. I eat a fruit. What [various things] do you eat? Would you [all] say? You (fem.) say!*

अहं पायसं खादामि ।

ahaṁ pāyasaṁ khādāmi.
*I eat sweet milk dish.*

अहम् आम्रफलं खादामि ।

aham āmraphalaṁ khādāmi.
*I eat mango.*

अहं मोदकं खादामि ।

ahaṁ modakaṁ khādāmi.
*I eat a sweet.*

अहं "चकलेत्" खादामि ।

ahaṁ "cakalet" khādāmi.
*I eat chocolate.* **(using the english word)**

चाकलेहः । वदतु ।

cākalehaḥ. vadatu.
*Chocolate.* **(Sanskrit word.)** *Say!*

अहं चाकलेहं खादामि ।

ahaṁ cākalehaṁ khādāmi.
*I eat chocolate.*

अहं "अय्स्क्रीं" खादामि ।

aham "ayskrīṁ" khādāmi.
*I eat ice-cream.* **(Using the english word.)**

पयोहिमम् । वदतु ।

payohimam. vadatu.
*Ice cream.* **(Sanskrit word.)** *Say!*

अहं पयोहिमं खादामि ।

ahaṁ payohimaṁ khādāmi.
*I eat ice-cream.*

अहं फलं खादामि ।

ahaṁ phalaṁ khādāmi.
*I eat fruit.*

---

*HINDI: Let's see how a guest is welcomed when he comes to your house.*

---

भवत्याः नाम किम् ?

bhavatyāḥ nāma kim?
*What is your name?*

मम नाम अहल्या ।

mama nāma ahalyā.
*My name is Ahalya.*

चिन्तयन्तु अहल्या मम अतिथिः अस्ति । सा मम गृहम् आगच्छति । अहं कथं तया सह सम्भाषणं करोमि इति भवन्तः शृण्वन्तु ।

cintayantu ahalyā mama atithiḥ asti. sā mama gṛham āgacchati. ahaṁ kathaṁ tayā saha sambhāṣaṇaṁ karomi iti bhavantaḥ śṛṇvantu.
*Think that Ahalya is my guest. She comes to my home. Please listen to how I talk with her.*

आगच्छतु । ओ ! आगच्छतु, आगच्छतु । उपविशतु । कुशलं वा ?

āgacchatu. o! āgacchatu, āgacchatu. upaviśatu. kuśalaṁ vā?
*Come! Oh! Come, come! Sit down! How are you?*

आम् । सर्वं कुशलम् ।

ām. sarvaṁ kuśalam.
*Yes. Everything is fine.*

गृहे सर्वं कुशलम् ?

gṛhe sarvaṁ kuśalam?
*Is everything fine at home?*

आम्, सर्वं कुशलम् । अत्र अपि कुशलम् ?

ām, sarvaṁ kuśalam. atra api kuśalam?
*Yes, everything is fine. Is here fine as well?*

आम्, अत्र अपि सर्वं कुशलम् ।

ām, atra api sarvaṁ kuśalam.
*Yes, here everything is fine as well.*

माता कुशलिनी अस्ति ?

mātā kuśalinī asti?
*Is your mother fine?*

आम्, कुशलिनी ।

ām, kuśalinī.
*Yes, she is fine.*

भवत्याः अनुजः विद्यालयं गच्छति ?

bhavatyāḥ anujaḥ vidyālayaṁ gacchati?
*Does your younger brother go to school?*

आम्, गच्छति ।

ām, gacchati.
*Yes, he goes.*

किञ्चित् पानीयं ददामि ?

kiñcit pānīyaṁ dadāmi?
*I give [you] something to drink?*

मास्तु ।

māstu.
*[Please] don't.*

सङ्कोचः मास्तु । किञ्चित् स्वीकरोतु ।

saṅkocaḥ māstu. kiñcit svīkarotu.
*Don't be shy! Please take a little.*

किञ्चित् ।

kiñcit.
*A little.*

किं ददामि पानीयम् ?

kiṁ dadāmi pānīyam?
*What [should] I give [you] to drink?*

किम् अपि ।

kim api.
*Anything.*

चायं ददामि ?

cāyaṁ dadāmi?
*[Should] I give tea?*

आम् ।

ām.
*Yes.*

अस्तु ।

astu.
*All right.*

स्वीकरोतु । उष्णम् अस्ति । सम्यक् अस्ति ?

svīkarotu. uṣṇam asti. samyak asti?
*Please, take! It's hot. Is it good?*

सम्यक् अस्ति ।

samyak asti.
*It's good.*

किञ्चित् शर्करा अवश्यकी ?

kiñcit śarkarā avaśyakī?
*Would you like some sugar? (Is some sugar needed?)*

किम् अपि न आवश्यकम् ।

kim api na āvaśyakam.
*I don't need anything.*

सावधानं स्वीकरोतु ।

sāvadhānaṁ svīkarotu.
*Take it carefully.*

कः विशेषः ?

kaḥ viśeṣaḥ?
*What [are the] news?*

मम गृहे श्वः पूजा अस्ति ।

mama gṛhe śvaḥ pūjā asti.
*There is a ceremony at my home tomorrow.*

हो ?

ho?
Oh?

भगिनी नास्ति वा ?

bhaginī nāsti vā?
*[Your] lady, wife (lit.: sister) is not [here]?*

सा विद्यालयं गतवती अस्ति । कस्मिन् समये पूजा ?

sā vidyālayaṁ gatavatī asti. kasmin samaye pūjā.
*She went to school. At what time is the ceremony?*

सार्धपञ्चनववादने ।

sārdha-pañca-nava-vādane.
*At half past five nine.* **(Mistake!)**

सार्धनववादने, सार्धपञ्चवादने ?

sārdha-nava-vādane, sārdha-pañca-vādane?
*At half past five or at half past nine?*

सार्धपञ्चवादने ।

sārdha-pañca-vādane.
*At half past five.*

सार्धपञ्चवादने ।

sārdha-pañca-vādane.
*At half past five.*

सर्वे आगच्छन्तु ।

sarve āgacchantu.
*[You] all come!*

आगच्छामः ।

āgacchāmaḥ.
*We come.*

नमस्कारः ।

namaskāraḥ.
*Good bye!*

नमो नमः ।

namo namaḥ.
*Good bye!*

पुनर् मिलामः ।

punar milāmaḥ.
*Let us meet again.*

पुनर् मिलामः।

punar milāmaḥ.
*Let us meet again.*

अतिथिः यदा गृहम् आगच्छति कथं सम्भाषणं करणीयम् इति वयम् इदानीं दृष्टवन्तः।

atithiḥ yadā gṛham āgacchati kathaṁ sambhāṣaṇaṁ karaṇīyam iti vayam idānīṁ dṛṣṭavantaḥ.
*When a guest comes to [our] home, how we should talk [to him], we have now seen.*

---

इदानीम् अन्यम् एकम् अभ्यासं कुर्मः।

idānīm anyam ekam abhyāsaṁ kurmaḥ.
*Now we make another exercise.*

अत्र गणद्वयं अस्ति। एषः गणः अतिथिः, एषः गणः गृहस्थः।

atra gaṇa-dvayam asti. eṣaḥ gaṇaḥ atithiḥ, eṣaḥ gaṇaḥ gṛhasthaḥ.
*Here are two groups. This group is the guest, this group is the householder.*

अतिथिः गृहम् आगच्छति। तदा किं सम्भाषणं भवति इति अहम् एव वदामि। द्वयोः सम्भाषणम्।

atithiḥ gṛham āgacchati. tadā kiṁ sambhāṣaṇaṁ bhavati iti aham eva vadāmi. dvayoḥ sambhāṣaṇam.
*The guest comes to the house. Then what kind of conversation happens, that I [will] now say. Conversation of two [people].*

अहम् एवं करोमि चेत्, एषः गणः वदति, एवं करोमि चेत्, एषः गणः वदति। मम वाक्यं पुनः उच्चरणियम्। वदन्ति वा ?

aham evaṁ karomi cet, eṣaḥ gaṇaḥ vadati, evaṁ karomi cet, eṣaḥ gaṇaḥ vadati. mama vākyaṁ punaḥ uccaraṇiyam. vadanti vā?
*If I do like this, [then] this group [should] speak, if I do like this, [then] this group [should] speak. You should repeat my sentence. Will you speak?*

भवत्यः तत्र पश्यन्तु वदन्तु।

bhavatyaḥ tatra paśyantu vadantu:
*You (fem. pl.) look there and say:*

आगच्छतु। आगच्छतु।

āgacchatu. āgacchatu.
*Come! Come!*

धन्यवादः।

dhanyavādaḥ.
*Thank you.*

उपविशतु। कुशलं वा ?

upaviśatu. kuśalaṁ vā?
*Sit down! Are you all right?*

आम्, कुशलम्।

ām, kuśalam.
*Yes, I am all right.*

कः विशेषः ?

kaḥ viśeṣaḥ?
*Any news?*

विशेषः कोऽपि नास्ति।

viśeṣaḥ ko ’pi nāsti.
*No news.*

गृहे सर्वं कुशलम्?

gṛhe sarvaṁ kuśalam?
*Is everything fine at home?*

आम्, कुशलम्।

ām, kuśalam.
*Yes, it’s fine.*

पिता कार्यालयं गतवान्?

pitā kāryālayaṁ gatavān?
*Father went to the office?*

आम्, गतवान्।

ām, gatavān.
*Yes, he went.*

अनुजस्य परीक्षा समाप्ता ?

anujasya parīkṣā samāptā?
*Is your younger brother's exam finished?*

आम्, समाप्ता।

ām, samāptā.
*Yes, [it's] finished.*

ओ, विस्मृतवान्। पानीयं किं स्वीकरोति ?

o, vismṛtavān. pānīyaṁ kiṁ svīkaroti?
*O, I forgot. What [would] you take to drink?*

किम् अपि मास्तु।

kim api māstu.
*Nothing, really ...*

सङ्कोचः मास्तु। किञ्चित् स्वीकरोतु, भोः।

saṅkocaḥ māstu. kiñcit svīkarotu, bhoḥ.
*You don't need to be shy. Oh, take a little!*

किञ्चित् ददातु।

kiñcit dadātu.
*Give a little.*

किं ददामि ?

kiṁ dadāmi?
*What do I give?*

फलरसं ददातु।

phalarasaṁ dadātu.
*Give [me] fruit juice.*

अस्तु, ददामि।

astu, dadāmi.
*All right, I give.*

अन्यः विशेषः कः ?

anyaḥ viśeṣaḥ kaḥ?
*Any other matter?*

कोऽपि नास्ति।

ko 'pi nāsti.
*No, nothing.*

अस्तु। अहं गच्छामि।

astu. ahaṁ gacchāmi.
*All right. I go.*

किञ्चित् कालं तिष्ठतु।

kiñcit kālaṁ tiṣṭhatu!
*Stay for some [more] time!*

न, गच्छामि।

na, gacchāmi.
*No, I go.*

अस्तु। धन्यवादः।

astu. dhanyavādaḥ.
*All right. Thank you.*

धन्यवादः।

dhanyavādaḥ.
*Thank you.*

---

इदानीम् अन्यम् अभ्यासं कुर्मः।

idānīm anyam abhyāsaṁ kurmaḥ.
*Now we do another exercise.*

आसन्दः। आसन्दः अत्र अस्ति।

āsandaḥ. āsandaḥ atra asti.
*A chair. The chair is here.*

आसन्दः मम पुरतः अस्ति।

āsandaḥ mama purataḥ asti.
*The chair is in front of me.*

उत्पीठिका मम पृष्ठतः अस्ति।

utpīṭhikā mama pṛṣṭhataḥ asti.
*The table is behind (Lit: in back of) me.*

आसन्दः पुरतः अस्ति।

āsandaḥ purataḥ asti.
*The chair is in front.*

उत्पीटिका पृष्ठतः अस्ति।

utpīṭikā pṛṣṭhataḥ asti.
*The table is behind.*

आसन्दः कुत्र अस्ति ?

āsandaḥ kutra asti?
*Where is the chair?*

आसन्दः पुरतः अस्ति।

āsandaḥ purataḥ asti.
*The chair is in front.*

उत्पीटिका कुत्र अस्ति ?

utpīṭikā kutra asti?
*Where is the table?*

उत्पीठिका पृष्ठतः अस्ति।

utpīṭhikā pṛṣṭhataḥ asti.
*The table is behind.*

सङ्गणकं पुरतः अस्ति। कूपी पृष्ठतः अस्ति।

saṅgaṇakaṁ purataḥ asti. kūpī pṛṣṭhataḥ asti.
*The computer is in front. The bottle is behind.*

सङ्गणकं कुत्र अस्ति ?

saṅgaṇakaṁ kutra asti?
*Where is the computer?*

सङ्गणकं पुरतः अस्ति।

saṅgaṇakaṁ purataḥ asti.
*The computer is in front.*

कूपी कुत्र अस्ति ?

kūpī kutra asti?
*Where is the bottle.*

कूपी पृष्ठतः अस्ति।

kūpī pṛṣṭhataḥ asti.
*The bottle is behind.*

भवतः नाम किम् ?

bhavataḥ nāma kim?
*What is your name?*

मम नाम हेमन्तः।

mama nāma hemantaḥ.
*My name is Hemanta.*

भवतः नाम किम् ?

bhavataḥ nāma kim?
*What is your name?*

मम नाम वरुणः।

mama nāma varuṇaḥ.
*My name is Varuna.*

हेमन्तः वरुणस्य पुरतः अस्ति।

hemantaḥ varuṇasya purataḥ asti.
*Hemanta is in front of Varuna.*

हेमन्तः कुत्र अस्ति ?

hemantaḥ kutra asti?
*Where is Hemanta?*

हेमन्तः वरुणस्य पुरतः अस्ति।

hemantaḥ varuṇasya purataḥ asti.
*Hemanta is in front of Varuna.*

भवतः नाम किम् ?

bhavataḥ nāma kim?
*What is your name?*

मम नाम दिलीपः।

mama nāma dilīpaḥ.
*My name is Dilipa.*

दिलीपः वरुणस्य पृष्ठतः अस्ति।

dilīpaḥ varuṇasya pṛṣṭhataḥ asti.
*Dilipa is behind Varuna.*

दिलीपः कुत्र अस्ति ?

dilīpaḥ kutra asti?
*Where is Dilipa?*

दिलीपः वरुणस्य पृष्ठतः अस्ति।

dilīpaḥ varuṇasya pṛṣṭhataḥ asti.
*Dilipa is behind Varuna.*

भवत्यः नाम किम्?

bhavatyaḥ nāma kim?
*What is your name?*

मम नाम प्रिया।

mama nāma priyā.
*My name is Priya.*

भवत्यः नाम किम्?

bhavatyaḥ nāma kim?
*What is your name?*

मम नाम मेघा।

mama nāma meghā.
*My name is Megha.*

प्रिया मेघायाः पुरतः अस्ति।

priyā meghāyāḥ purataḥ asti.
*Priya is in front of Megha.*

प्रिया कुत्र अस्ति ?

priyā kutra asti?
*Where is Priya?*

प्रिया मेघायाः पुरतः अस्ति।

priyā meghāyāḥ purataḥ asti.
*Priya is in front of Megha.*

भवत्यः नाम किम्?

bhavatyaḥ nāma kim?
*What is your name?*

मम नाम अहल्या।

mama nāma ahalyā.
*My name is Ahalya.*

अहल्या मेघायाः पृष्ठतः अस्ति।

ahalyā meghāyāḥ pṛṣṭhataḥ asti.
*Ahalya is behind Megha.*

अहल्या कुत्र अस्ति ?

ahalyā kutra asti?
*Where is Ahalya?*

अहल्या मेघायाः पृष्ठतः अस्ति।

ahalyā meghāyāḥ pṛṣṭhataḥ asti.
*Ahalya is behind Megha.*

भवतः नाम किम्?

bhavataḥ nāma kim?
*What is your name?*

मम नाम विजयः।

mama nāma vijayaḥ.
*My name is Vijaya.*

विजय ! पुरतः आगच्छतु। न, न, पृष्ठतः गच्छतु।

vijaya! purataḥ āgacchatu. na, na, pṛṣṭhataḥ gacchatu.
*Vijaya! Come to the front! No, no, go to the back!*

विजयः पृष्ठतः गच्छति।

vijayaḥ pṛṣṭhataḥ gacchati.
*Vijaya, goes to the back.*

विजयः कुत्र गच्छति ?

vijayaḥ kutra gacchati?
*Where does Vijaya go?*

विजयः पृष्ठतः गच्छति ।

vijayaḥ pṛṣṭhataḥ gacchati.
*Vijaya, goes to the back.*

भवत्याः नाम किम् ?

bhavatyāḥ nāma kim?
*What is your name?*

मम नाम अर्चना ।

mama nāma arcanā.
*My name is Archana.*

भवत्याः नाम किम् ?

bhavatyāḥ nāma kim?
*What is your name?*

मम नाम माधुरी ।

mama nāma mādhurī.
*My name is Madhuri.*

अर्चना पुरतः आगच्छतु ।

arcanā purataḥ āgacchatu.
*Archana, come to the front!*

माधुरी पृष्ठतः गच्छतु । उपविशतु ।

mādhurī pṛṣṭhataḥ gacchatu. upaviśatu.
*Madhuri, go to the back! Sit!*

अहं पुरतः उपविशामि ।

ahaṁ purataḥ upaviśāmi.
*I sit in the front.*

भवती पुरतः उपविशति ? आगच्छतु ।

bhavatī purataḥ upaviśati? āgacchatu.
*You sit in the front? Come!*

भवती पृष्ठतः गच्छतु ।

bhavatī pṛṣṭhataḥ gacchatu.
*You go to the back!*

माधुरी पुरतः उपविशति ।

mādhurī purataḥ upaviśati.
*Madhuri sits in the front.*

कुत्र उपविशति ?

kutra upaviśati?
*Where does she sit?*

माधुरी पुरतः उपविशति ।

mādhurī purataḥ upaviśati.
*Madhuri sits in the front.*

अर्चना कुत्र उपविशति ?

arcanā kutra upaviśati?
*Where does Archana sit?*

अर्चना पृष्ठतः उपविशति ।

arcanā pṛṣṭhataḥ upaviśati.
*Archana sits in the back.*

भवतः नाम किम् ?

bhavataḥ nāma kim?
*What is your name?*

मम नाम प्रसन्नः ।

mama nāma prasannaḥ.
*My name is Prasanna.*

आगच्छतु ।

āgacchatu.
*Come!*

भवत्याः नाम किम् ?

bhavatyāḥ nāma kim?
*What is your name?*

मम नाम प्रिया।

mama nāma priyā.
*My name is Priya.*

प्रिया। आगच्छतु।

priyā. āgacchatu.
*Priya. Come!*

प्रसन्नः मम दक्षिणतः अस्ति। प्रिया मम वामतः अस्ति।

prasannaḥ mama dakṣiṇataḥ asti. priyā mama vāmataḥ asti.
*Prasanna is to my right. Priya is to my left.*

दक्षिणतः। वामतः। ज्ञातम्?

dakṣiṇataḥ. vāmataḥ. jñātam?
*To the right. To the left. Understood?*

गच्छतु।

gacchatu.
*Go!*

हेमन्तः कुत्र अस्ति ?

hemantaḥ kutra asti?
*Where is Hemanta?*

हेमन्तः मम वामतः अस्ति।

hemantaḥ mama vāmataḥ asti.
*Hemanta is to my left.*

वरुणः कुत्र अस्ति ?

varuṇaḥ kutra asti?
*Where is Varuna?*

वरुणः मम दक्षिणतः अस्ति।

varuṇaḥ mama dakṣiṇataḥ asti.
*Varuna is to my right.*

दिलीपः कुत्र अस्ति ?

dilīpaḥ kutra asti?
*Where is Dilipa?*

दिलीपः मम वामतः अस्ति।

dilīpaḥ mama vāmataḥ asti.
*Dilipa is to my left.*

अर्चना कुत्र अस्ति ?

arcanā kutra asti?
*Where is Archana?*

अर्चना मम वामतः अस्ति।

arcanā mama vāmataḥ asti.
*Archana is to my left.*

शुभाङ्गी कुत्र अस्ति ?

śubhāṅgī kutra asti?
*Where is Shubhangi?*

शुभाङ्गी मम दक्षिणतः अस्ति।

śubhāṅgī mama dakṣiṇataḥ asti.
*Shubangi is to my right.*

माधुरी कुत्र अस्ति ?

mādhurī kutra asti?
*Where is Madhuri?*

माधुरी मम वामतः अस्ति।

mādhurī mama vāmataḥ asti.
*Madhuri is to my left.*

---

वयम् इदानीम् अन्यम् एकम् अभ्यासं कुर्मः।

vayam idānīm anyam ekam abhyāsaṁ kurmaḥ.
*Now we [will] do another exercise.*

भवन्तः सर्वे पार्श्वे कः अस्ति इति वदेयुः। प्रसन्न !

आरम्भं करोतु। दक्षिणतः कः अस्ति ?

bhavantaḥ sarve pārśve kaḥ asti iti vadeyuḥ. prasanna! ārambhaṁ karotu. dakṣiṇataḥ kaḥ asti?
*You should all say, who is besides you. Prasanna! You begin. Who is to [your] right?*

मम दक्षिणतः हेमन्तः अस्ति ।

mama dakṣiṇataḥ hemantaḥ asti.
*To my right is Hemanta.*

हेमन्त ! वदतु ।

hemanta! vadatu.
*Hemanta! You say!*

मम दक्षिणतः मयूरः अस्ति ।

mama dakṣiṇataḥ mayūraḥ asti.
*To my right is Mayura.*

मम दक्षिणतः माधुरी अस्ति ।

mama dakṣiṇataḥ mādhurī asti.
*To my right is Madhuri.*

मम दक्षिणतः दीप्तिः अस्ति ।

mama dakṣiṇataḥ dīptiḥ asti.
*To my right is Dipti.*

मम दक्षिणतः प्रिया अस्ति ।

mama dakṣiṇataḥ priyā asti.
*To my right is Priya.*

भवती वदतु ।

bhavatī vadatu.
*You say!*

मम वामतः शुभाङ्गी अस्ति ।

mama vāmataḥ śubhāṅgī asti.
*To my left is Shubhangi.*

मम वामतः लक्ष्मीः अस्ति ।

mama vāmataḥ lakṣmīḥ asti.
*To my left is Lakshmi.*

मम वामतः श्रवन्तः अस्ति ।

mama vāmataḥ śravantaḥ asti.
*To my left is Shravanta.*

मम वामतः वरुणः अस्ति ।

mama vāmataḥ varuṇaḥ asti.
*To my left isVaruna.*

मम वामतः नवीनः अस्ति ।

mama vāmataḥ navīnaḥ asti.
*To my left is Navina.*

दक्षिणतः ।

dakṣiṇataḥ.
*(Now) to the right.*

मम दक्षिणतः दिलीपः अस्ति ।

mama dakṣiṇataḥ dilīpaḥ asti.
*To my right is Dilipa.*

मम दक्षिणतः विजयः अस्ति ।

mama dakṣiṇataḥ vijayaḥ asti.
*To my right is Vijaya.*

मम दक्षिणतः अर्चना अस्ति ।

mama dakṣiṇataḥ arcanā asti.
*To my right is Archana.*

मम दक्षिणतः महती अस्ति ।

mama dakṣiṇataḥ mahatī asti.
*To my right is Mahati.*

मम दक्षिणतः अहल्या अस्ति ।

mama dakṣiṇataḥ ahalyā asti.
*To my right is Ahalya.*

आकाशः उपरि अस्ति ।

ākāśaḥ upari asti.
*The sky is above.*

भूमिः अधः अस्ति ।

bhūmiḥ adhaḥ asti.
*The earth is down.*

आकाशः कुत्र अस्ति ?

ākāśaḥ kutra asti?
*Where is the sky?*

आकाशः उपरि अस्ति ।

ākāśaḥ upari asti.
*The sky is above.*

भूमिः कुत्र अस्ति ?

bhūmiḥ kutra asti?
*Where is the earth?*

भूमिः अधः अस्ति ।

bhūmiḥ adhaḥ asti.
*The earth is down.*

स्वर्गः उपरि अस्ति ।

svargaḥ upari asti.
*The heaven is up.*

पातालम् अधः अस्ति ।

pātālam adhaḥ asti.
*The hell is down.*

स्वर्गः कुत्र अस्ति ?

svargaḥ kutra asti?
*Where is the heaven?*

स्वर्गः उपरि अस्ति ।

svargaḥ upari asti.
*The heaven is up.*
***(The terms svarga and heaven are not the same, but there is a common underlying idea to both of them; same with hell...)***

पातालम् कुत्र अस्ति ?

pātālam kutra asti?
*Where is the hell?*

पातालम् अधः अस्ति ।

pātālam adhaḥ asti.
*The hell is down.*

उपरि । अधः ।

upari. adhaḥ.
*Up, above. Down, under.*

---

एतत् विषये अन्यम् अभ्यासं कुर्मः इदानीम् ।

etat viṣaye anyam abhyāsaṁ kurmaḥ idānīm.
*In that way we now make another exercise.*

अत्र कानिचित् पुस्तकानि सन्ति ।

atra kānicit pustakāni santi.
*Here are some books.*

किं पुस्तकं कस्य उपरि अस्ति वयम् इदानीं वदामः ।

kiṁ pustakaṁ kasya upari asti vayam idānīṁ vadāmaḥ.
*Now we [will] say which book is on top of which.*

रघुवंशः रामायणस्य उपरि अस्ति ।

raghuvaṁśaḥ rāmāyaṇasya upari asti.
*Raghuvamsha is on top of Ramayana.*

रघुवंशः कुत्र अस्ति ?

raghuvaṁśaḥ kutra asti?
*Where is Raghuvamsha?*

रघुवंशः रामायणस्य उपरि अस्ति ।

raghuvaṁśaḥ rāmāyaṇasya upari asti.
*Raghuvamsha is on top of Ramayana.*

ब्रह्मासूत्रं कुत्र अस्ति ?

brahmāsūtraṁ kutra asti?
*Where is Brahmasutra?*

ब्रह्मासूत्रं रघुवंशस्य उपरि अस्ति ।

brahmāsūtraṁ raghuvaṁśasya upari asti.
*Brahmasutra is on top of Raghuvamsha.*

महाभारतं कुत्र अस्ति ?

mahābhārataṁ kutra asti?
*Where is Mahabharata?*

महाभारतं ब्रह्मासूत्रस्य उपरि अस्ति ।

mahābhāratam̐ brahmāsūtrasya upari asti.
*Mahabharata is on top of Brahmasutra.*

ब्रह्मासूत्रं महाभारतस्य अधः अस्ति ।

brahmāsūtram̐ mahābhāratasya adhaḥ asti.
*Brahmasutra is under Mahabharata.*

ब्रह्मासूत्रं कुत्र अस्ति ?

brahmāsūtram̐ kutra asti?
*Where is Brahmasutra?*

ब्रह्मासूत्रं महाभारतस्य अधः अस्ति ।

brahmāsūtram̐ mahābhāratasya adhaḥ asti.
*Brahmasutra is under Mahabharata.*

रघुवंशः कुत्र अस्ति ?

raghuvam̐śaḥ kutra asti?
*Where is Raghuvamsha?*

रघुवंशः ब्रह्मासूत्रस्य अधः अस्ति ।

raghuvam̐śaḥ brahmāsūtrasya adhaḥ asti.
*Raghuvamsha is under Brahmasutra.*

रामायणं कुत्र अस्ति ?

rāmāyaṇam̐ kutra asti?
*Where is Ramayana?*

रामायणं रघुवंशस्य अधः अस्ति ।

rāmāyaṇam̐ raghuvam̐śasya adhaḥ asti.
*Ramayana is under Raghuvamsha.*

बहुसमीचीनम् ।

bahusamīcīnam.
*Very good!*

---

इदानीम् अन्यम् एकम् अभ्यासं कुर्मः ।

idānīm anyam ekam abhyāsam̐ kurmaḥ.
*Now we [will] do another exercise.*

“वामतः, दक्षिणतः, पुरतः, पृष्ठतः“ विषये अहं वदामि अभिनेयं करोमि, भवन्तः अपि वदन्तु अभिनेयं कुर्वन्तु ।

“vāmataḥ, dakṣiṇataḥ, purataḥ, pṛṣṭhataḥ” viṣaye aham̐ vadāmi abhineyam̐ karomi, bhavantaḥ api vadantu abhineyam̐ kurvantu.
*On the subject of “to the left, to the right, in front of, in the back of” I say and show, you also say and show.*

पुरतः । पुरतः ।

purataḥ. purataḥ.
*In the front of. In the front of.*

पृष्ठतः । पृष्ठतः ।

pṛṣṭhataḥ. pṛṣṭhataḥ.
*In the back of. In the back of.*

वामतः । वामतः ।

vāmataḥ. vāmataḥ.
*To the left. To the left.*

दक्षिणतः । दक्षिणतः ।

dakṣiṇataḥ. dakṣiṇataḥ.
*To the right. To the right.*

उपरि । उपरि ।

upari. upari.
*Above (up). Above (up).*

अधः । अधः ।

adhaḥ. adhaḥ.
*Bellow (down). Bellow (down).*

---

अहं पाटयामि । अनुसर ।

aham̐ pāṭhayāmi. anusara.
*I teach. You follow!*

एवं तिष्ठतु ।

evam̐ tiṣṭhatu.
*Sit like this.*

पुरतः। पृष्ठतः।

purataḥ. pṛṣṭhataḥ.
*To the front. To the back.*

दक्षिणतः। वामतः।

dakṣiṇataḥ. vāmataḥ.
*To the right. To the left.*

हस्तम् एवं करोतु। एवम्।

hastam evaṁ karotu. evam.
*Do with hand like this! Like this.*

पुरतः। पृष्ठतः।

purataḥ. pṛṣṭhataḥ.
*To the front. To the back.*

दक्षिणतः। वामतः।

dakṣiṇataḥ. vāmataḥ.
*To the right. To the left.*

---

**SCREEN**

| | |
|---|---|
| **पुरतः - पृष्ठतः** | **purataḥ – pṛṣṭhataḥ** |
| **वामतः - दक्षिणतः** | **vāmataḥ – dakṣiṇataḥ** |
| **उपरि - अधः** | **upari – adhaḥ** |

---

*HINDI: All these are* ***avyayas,*** *indeclinable words.*

---

## सुभाषितम्।

**subhāṣitam.**
***Verse.***

वयम् इदानीम् एकं सुभाषितं शृण्मः।

vayam idānīm ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now, we [will] listen to one verse.*

उपकारिषु यः साधुः साधुत्वे तस्य को गुणः।

अपकारिषु यः साधुः सः साधुरिति कीर्तितः॥

upakāriṣu yaḥ sādhuḥ sādhutve tasya ko guṇaḥ
apakāriṣu yaḥ sādhuḥ saḥ sādhuriti kīrtitaḥ

upakāriṣu – *in good actions;* yaḥ – *the one who;* sādhuḥ – *saintly person;* sādhutve – *holiness;* tasya – *of him;* kaḥ – *which;* guṇaḥ – *charac-teristic;* apakāriṣu – *in bad actions;* yaḥ – *the one who;* sādhuḥ – *saintly person;* saḥ – *he;* sādhuḥ – *saintly person;* iti – *thus;* kīrtitaḥ – *famous.*

*What good quality is of a saintly person, who sees holiness in good actions? A saintly person who sees it (even) in bad actions, (such a saint) is famous.*

लोके केचन जनाः अस्माकाम् उपकारं कुर्वन्ति।

अन्ये केचन अपकारं कुर्वन्ति।

loke kecana janāḥ asmākām upakāraṁ kurvanti.
anye kecana apakāraṁ kurvanti.
*Some people in the world act to our benefit. Other act against our benefit.*

ये उपकारं कुर्वन्ति, तेषां विषये सर्वे सन्तुष्टाः

भवन्ति। तेषां विषये साधुत्वं दर्शयन्ति एव।

ye upakāraṁ kurvanti, teṣāṁ viṣaye sarve santuṣṭāḥ bhavanti. teṣāṁ viṣaye sādhutvaṁ darśayanti eva.
*The ones who do benevolent acts, with their matters all are satisfied. In their matters only the goodness is shown.*

किन्तु यः अपकारं करोति, तस्य विषये अपि यः

साधुत्वं दर्शयति, यः तस्यापि उपकारं करोति, सः

वस्तुतः साधुः।

kintu yaḥ apakāraṁ karoti, tasya viṣaye api yaḥ sādhutvaṁ darśayati, yaḥ tasyāpi upakāraṁ karoti, saḥ vastutaḥ sādhuḥ.
*But the one who sees goodness in the person engaged in bad actions, and acts for his (bad person's) benefit, he is actually saintly person.*

अन्यथा “यः मम उपकारं करोति तस्य अहम्

उपकारं करोमि” इत्येते तत्र साधुत्वं किमपि नास्ति ।

anyathā “yaḥ mama upakāraṁ karoti tasya aham upakāraṁ karomi” ity ete tatra sādhutvaṁ kim api nāsti.
*In other words, there is no holines in [thinking] : “If one does good to me, I [will] do good to him.”*

यः अपकारं करोति तस्यापि उपकारं करोति सः

वस्तुतः साधुः ।

yaḥ apakāraṁ karoti tasyāpi upakāraṁ karoti saḥ vastutaḥ sādhuḥ.
*The one who does bad to someone, and still that man does good to him – such a man is truely a saint.*

---

कथा

**kathā**
**Story**

एकः ग्रामः अस्ति । ग्रामे एकः धनिकः अस्ति । सः

महाधनिकः । तस्य सुन्दरं भवनम् अस्ति । पत्नी अस्ति ।

पुत्राः सन्ति । गृहे सेवकाः सन्ति । कृषिभूमिः अस्ति ।

ekaḥ grāmaḥ asti. grāme ekaḥ dhanikaḥ asti. saḥ mahā-dhanikaḥ. tasya sundaraṁ bhavanam asti. patnī asti. putrāḥ santi. gṛhe sevakāḥ santi. kṛṣi-bhūmiḥ asti.
*There is a village. In the village there is a rich man. He is very rich. He has a beautiful house. He has a wife. He has sons. There are servants in the house. There is farmland.*

सर्वम् अपि अस्ति, तस्य कापि न्यूनता नास्ति । अतः

सः सर्वदा उपविशति । तथा सः धनिकः तिष्ठति ।

sarvam api asti, tasya kāpi nyūnatā nāsti. ataḥ saḥ sarvadā upaviśati. tathā saḥ dhanikaḥ tiṣṭhati.
*There is everything, there is no lack. Therefore he always sits. Thus he remains rich.*

परन्तु आश्चर्यं नाम तस्य समीपे सर्वम् अपि अस्ति,

किन्तु सः धनिकः निद्रां न प्राप्नोति । रात्रौ निद्राम्

एव कर्तुं सः न शक्नोति ।

parantu āścaryaṁ nāma tasya samīpe sarvam api asti, kintu saḥ dhanikaḥ nidrāṁ na prāpnoti. rātrau nidrām eva kartuṁ saḥ na śaknoti.
*But astonishingly, although everything is available to him, that rich man cannot get any sleep. During the night he cannot sleep.*

एकदा सः स्वगृहे उपविष्टवान् आसीत् , चिन्तनं कुर्वन्

आसीत् । तस्मिन् अपि दिने तस्य निद्रा न आगता ।

ekadā saḥ svagṛhe upaviṣṭavān āsīt, cintanaṁ kurvan āsīt, tasmin abhidine tasya nidrā na āgatā.
*Once when he was sitting in his house thinking, on that day also the sleep didn't come.*

"किमर्थं मम एवं भवति ?" इति तस्य मनसि महती

चिन्ता उत्पन्ना ।

“kim arthaṁ mama evaṁ bhavati?” iti tasya manasi mahatī cintā utpannā.
*“For what reason am I like this (in this state)?” that great anxious thought arose in his mind.*

तस्मिन् एव समये दूरतः सः एकं गीतां शृणोति ।

मधुरं गीताम् आसीत् ।

tasmin eva samaye dūrataḥ saḥ ekaṁ gītāṁ śṛṇoti. madhuraṁ gītām āsīt.
*At that very moment he hears a song from far away. It was a sweet song.*

"कः एवं गायति?" इति सः न जानति। "तथापि पश्यामि" इति चिन्तयित्वा सः गीतस्य ध्वनिम् अनुसरन् अग्रे अग्रे गच्छति।

"kaḥ evaṁ gāyati?" iti saḥ na jānati. "tathāpi paśyāmi" iti cintayitvā saḥ gītasya dhvanim anusaran agre agre gacchati.

*"Who sings like that?" he doesn't know. After thinking "I better take a look,"he followed the sound of the song and went further and furter.*

तस्य गृहतः समीपे एव एकं कुटीरं पश्यति सः। तस्मिन् कुटीरे कश्चन निर्धनः आसीत्। सः तत्र शयनं कृतवान् आसीत्। शयनं कृत्वा भित्तिम् आलम्ब्य, शयनं कृत्वा उच्चैः गायन् आसीत्। सन्तोषेण सः गायति।

tasya gṛhataḥ samīpe eva ekaṁ kuṭīraṁ paśyati saḥ. tasmin kuṭīre kaścana nirdhanaḥ āsīt. saḥ tatra śayanaṁ kṛtavān āsīt. śayanaṁ kṛtvā bhittim ālambya, śayanaṁ kṛtvā uccaiḥ gāyan āsīt. santoṣeṇa saḥ gāyati.

*Near his home he sees a hut. In that hut there was some poor man. He slept there. After lying down, leaning on the wall, after lying on the floor he sang loudly. He sings with pleasure.*

तस्य मुखे सन्तोषः दृष्यते। तत् दृष्ट्वा धनिकस्य आश्चर्यं भवति।

tasya mukhe santoṣaḥ dṛṣyate. tat dṛṣṭvā dhanikasya āścaryaṁ bhavati.

*On his face satisfaction reflected. Seeing that the rich man was puzzled.*

अतः सः प्रश्नं पृच्छति "भोः मित्र ! भवान् एतावता आनन्देन गायन् अस्ति। भवतः आनन्दस्य किं कारणम् ?" इति पृच्छति।

ataḥ saḥ praśnaṁ pṛcchati "bhoḥ mitra ! bhavān etāvatā ānandena gāyan asti. bhavataḥ ānandasya kiṁ kāraṇam?" iti pṛcchati.

*Therefore he asked a question "Oh, friend, you sing with such bliss. What is the cause of your bliss?" he asked.*

तदा सः निर्धनः उत्तरं वदति "महाशय ! मम समीपे धनं किमपि नास्ति। सत्यम्। तत् अहं जानामि। किन्तु अहं बहिः पश्यामि, प्रकृतिं पश्यामि।"

tadā saḥ nirdhanaḥ uttaraṁ vadati: "mahāśaya! mama samīpe dhanaṁ kim api nāsti. satyam. tat ahaṁ jānāmi. kintu ahaṁ bahiḥ paśyāmi, prakṛtiṁ paśyāmi."

*Then that poor man answers: "Oh, mister, there is no money near me. True. I know that. But I look outside and see the nature."*

इदानीं प्रकृतिः कथं शोभते। वसन्तकालः अस्ति। सर्वत्र पुष्पाणि विकसन्ति। भ्रमराः सञ्चारं कुर्वन्ति। वसन्तकालस्य सौन्दर्यं सर्वत्र दृश्यते।

"idānīṁ prakṛtiḥ kathaṁ śobhate. vasanta-kālaḥ asti. sarvatra puṣpāṇi vikasanti. bhramarāḥ sañcāraṁ kurvanti. vasanta-kālasya saundaryaṁ sarvatra dṛśyate."

*"Now the nature is so beautiful. It's spring time. Everywhere the flowers bloom. The bees roam here and there. The beauty of spring is seen everywhere."*

"एतत् अस्ति, अहं तत् पश्यामि। भवान् वस्तुतः किं करोति ? 'मम समीपे तत् नास्ति। एतत् नास्ति। अन्यत् नास्ति।' ततेव चिन्तनं करोति।"

"etat asti, ahaṁ tat paśyāmi. bhavān vastutaḥ kiṁ karoti? mama samīpe tat nāsti. etat nāsti. anyat nāsti. tat eva cintanaṁ karoti."

*"What is, I see that. What do you actually do? 'That is not close to me. This is not (close to me). Neither another thing.' Thus only you think."*

“यद्यपि भवतः समीपे बहु बहु अस्ति, तथापि भवान् यत् नास्ति तस्य विषये चिन्तनं करोति, अतः दुःखम् अनुभवति ।“

“yadyapi bhavataḥ samīpe bahu bahu asti, tathāpi bhavān yat nāsti tasya viṣaye cintanaṁ karoti, ataḥ duḥkham anubhavati.”
*“Even though much, much is near you, still you think about what is not with you (yours). Therefore you experience unhapiness.”*

“अहं यद् अस्ति तस्य विषये चिन्तनं करोमि, अतः अहं सुखवान् भवामि । एतत् एव रहस्यम् “ इति निर्धनः वदति ।

“ahaṁ yad asti tasya viṣaye cintanaṁ karomi, ataḥ ahaṁ sukhavān bhavāmi. etat eva rahasyam” iti nirdhanaḥ vadati.
*“I think about what is, therefore I am happy. In that way [there is] joy,” the poor man says.*

तस्य वचनं श्रुत्वा धनिकस्य ज्ञानोदयः भवति ।

tasya vacanaṁ śrutvā dhanikasya jñānodayaḥ bhavati.
*After hearing his speech, the rich man became enlightened.*

सत्यम् एव खलु । वयं सर्वदा अपि यत् अस्ति तस्य विषये चिन्तनं कुर्मः चेत् , सन्तोषम् अनुभवामः ।

“satyam eva khalu. vayaṁ sarvadā api yat asti tasya viṣaye cintanaṁ kurmaḥ cet, santoṣam anubhavāmaḥ.
*That’s true, indeed. If we always think of what is, we experience satisfaction.*

यद् नास्ति तस्य विषये एव चिन्तनं कुर्मः चेत् , वयम् अपि दुःखं अनुभवामः ।

yat nāsti tasya viṣaye eva cintanaṁ kurmaḥ cet, vayam api duḥkham anubhavāmaḥ.
*If we think of what isn’t, we will also become unhappy.*

कथायाः अर्थः ज्ञातः ?

kathāyāḥ arthaḥ jñātaḥ?
*Have you understood the story?*

आम् । ज्ञातः ।

ām. jñātaḥ.
*Yes, we’ve understood.*

धन्यवादः । नमो नमः ।

dhanyavādaḥ. namo namaḥ.
*Thank you. Salutations!*

नमो नमः ।

namo namaḥ.
*Salutations.*

---

**Teacher:**
विश्वासः
Viśvāsaḥ

**Students:**

| | | | | |
|---|---|---|---|---|
| प्रसन्नः | नवीनः | विजयः | हेमन्तः | वरुणः |
| Prasannaḥ | Navīnaḥ | Vijayaḥ | Hemantaḥ | Varuṇaḥ |
| विनोदः | श्रवन्त आर्यः | मयूरः | दिलीपः | |
| Vinodaḥ | Śravanta Āryaḥ | Mayūraḥ | Dilīpaḥ | |
| अहल्या | अर्चना | महती | दीप्तिः | मेघा |
| Ahalyā | Arcanā | Mahatī | Dīptiḥ | Meghā |
| शुभाङ्गी | प्रिया | लक्ष्मीः | माधुरी | |
| Śubhāṅgī | Priyā | Lakṣmīḥ | Mādhurī | |

---

# LESSON 8 – OVERVIEW

*In the seventh lesson you will repeat the practice of the words "in front of, behind, left, right, up, down." You will learn* **pañcamī -vibhakti** *(ablative case) ending* **-taḥ** *which can be used in singular regardless of the gender. You will learn some new* **avyayas.**

| | | |
|---|---|---|
| **पञ्चमीविभक्ति** | **pañcamī** | ***ablative*** |
| कुतः ? | kutaḥ? | *from where?* |
| ततः | tataḥ | *from there* |
| इतः | itaḥ | *from here* |

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| *m.* | ग्रामः | grāmaḥ | *village* | => | ग्रामतः | grāmataḥ | *from village* |
| *f.* | बालिका | bālikā | *girl* | => | बालिकातः | bālikātaḥ | *from girl* |
| | कूपी | kūpī | *bottle* | => | कूपीतः | kūpītaḥ | *from bottle* |
| *n.* | गृहम् | gṛham | *house* | => | गृहतः | gṛhataḥ | *from house* |

## AVYAYAS

| | | | | | |
|---|---|---|---|---|---|
| कथम् ? | katham? | *How?* | | | |
| उच्चैः | uccaiḥ | *loudly* | शनैः | śanaiḥ | *quietly* |
| शीघ्रम् | śīghram | *quickly* | मन्दम् | mandam | *slowly* |
| सम्यक् | samyak | *good (nice)* | | | |

# Lesson 8

*HINDI: In the last lesson we learned how to use the words* **purataḥ, pṛṣṭhataḥ, vāmataḥ, dakṣiṇataḥ, upari, adhaḥ** *(in front of, in the back of, left, right, above (up), bellow (down)). In this lesson we will practice* **pañcamī vibhakti** *(ablative case).*

नमो नमः।

namo namaḥ.
*Respects.*

संस्कृतभाषाशिक्षणे भवतां सर्वेषां स्वागतम्।

saṁskṛta-bhāṣā-śikṣaṇe bhavatāṁ sarveṣāṁ svāgatam.
*Welcome [to you all] to the study of Sanskrit language.*

वयं पूर्वतनपाठे "पुरतः पृष्ठतः वामतः दक्षिणतः" इत्यादीनाम् अभ्यासं कृतवन्तः स्मः। अर्थः ज्ञातः एव। पुनः एकवारं तस्य विषये वयम् अभ्यासं कुर्मः।

vayaṁ pūrvatana-pāṭhe "purataḥ pṛṣṭhataḥ vāmataḥ dakṣiṇataḥ" ityādīnām abhyāsaṁ kṛtavantaḥ smaḥ. arthaḥ jñātaḥ eva. punaḥ ekavāraṁ tasya viṣaye vayam abhyāsaṁ kurmaḥ.
*In the previous lesson we made exercise of "in front of, in the back of, to the left and to the right" etc.. You know the meaning. Once again we make exercise using these words.*

भवत्याः नाम किम्?

bhavatyāḥ nāma kim?
*What is your name?*

मम नाम लक्ष्मीः।

mama nāma lakṣmīḥ.
*My name is Lakshmi.*

लक्ष्मीः कुत्र अस्ति?

lakṣmīḥ kutra asti?
*Where is Lakshmi?*

लक्ष्मीः मम पुरतः अस्ति।

lakṣmīḥ mama purataḥ asti.
*Lakshmi is in front of me.*

भवत्याः नाम किम्?

bhavatyāḥ nāma kim?
*What is your name?*

मम नाम अहल्या।

mama nāma ahalyā.
*My name is Ahalya.*

अहल्या कुत्र अस्ति?

ahalyā kutra asti?
*Where is Ahalya?*

अहल्या मम पृष्ठतः अस्ति।

ahalyā mama pṛṣṭhataḥ asti.
*Ahalya is behind me.*

भवतः नाम किम्?

bhavataḥ nāma kim?
*What is your name?*

मम नाम विनोदः।

mama nāma vinodaḥ.
*My name is Vinoda.*

विनोदः कुत्र अस्ति?

vinodaḥ kutra asti?
*Where is Vinoda?*

विनोदः मम पृष्ठतः अस्ति।

vinodaḥ mama pṛṣṭhataḥ asti.
*Vinoda is behind me.*

भवतः नाम दिलीपः ? दिलीपः कुत्र अस्ति ?

bhavataḥ nāma dilīpaḥ? dilīpaḥ kutra asti?
*Your name is Dilipa? Where is Dilipa?*

दिलीपः मम पुरतः अस्ति ।

dilīpaḥ mama purataḥ asti.
*Dilipa is in front of me.*

भवत्याः नाम किम् ?

bhavatyāḥ nāma kim?
*What is your name?*

मम नाम प्रिया ।

mama nāma priyā.
*My name is Priya.*

भवतः नाम किम् ?

bhavataḥ nāma kim?
*What is your name?*

मम नाम श्रवन्तः ।

mama nāma śravantaḥ.
*My name is Shravanta.*

श्रवन्तः मम दक्षिणतः अस्ति । प्रिया मम वामतः अस्ति ।

śravantaḥ mama dakṣiṇataḥ asti. priyā mama vāmataḥ asti.
*Shravanta is to my right. Priya is to my left.*

आकाशः कुत्र अस्ति ?

ākāśaḥ kutra asti?
*Where is the sky?*

आकाशः उपरि अस्ति ।

ākāśaḥ upari asti.
*The sky is up.*

भूमिः कुत्र अस्ति ?

bhūmiḥ kutra asti?
*Where is the earth?*

भूमिः अधः अस्ति ।

bhūmiḥ adhaḥ asti.
*The earth is down.*

ध्वनिमुद्रिका । अमरकोषध्वनिमुद्रिका कुत्र अस्ति ।

dhvani-mudrikā. amarakoṣa-dhvani-mudrikā kutra asti.
*The cassette. Where is the Amarakosha cassette?*

तत्र कुत्र अस्ति ?

tatra kutra asti?
*Where there?*

सङ्गणकस्य उपरि अस्ति ।

saṅgaṇakasya upari asti.
*It's on top of the computer.*

---

इदानीम् अन्यम् अभ्यासं कुर्मः ।

idānīm anyam abhyāsaṁ kurmaḥ.
*Now we [will] do another exercise.*

अत्र एकं चित्रम् अस्ति । चित्रे एकः पुरुषः अस्ति ।

देवालयः अस्ति । देवालयः कुत्र अस्ति ?

atra ekaṁ citram asti. citre ekaḥ puruṣaḥ asti. devālayaḥ asti. devālayaḥ kutra asti?
*Here is one picture. On the picture is one man. [There] is a temple. Where is the temple?*

देवालयः पुरुषस्य पृष्ठतः अस्ति ।

devālayaḥ puruṣasya pṛṣṭhataḥ asti.
*The temple is behind the man.*

शकटः कुत्र अस्ति ?

śakaṭaḥ kutra asti?
*Where is the cart?*

शकटः पुरुषस्य पुरतः अस्ति ।

śakaṭaḥ puruṣasya purataḥ asti.
*The cart is in front of the man.*

विद्यालयः कुत्र अस्ति ?

vidyālayaḥ kutra asti?
*Where is the school?*

विद्यालयः पुरुषस्य दक्षिणतः अस्ति ।

vidyālayaḥ puruṣasya dakṣiṇataḥ asti.
*The school is to the man's right.*

वसतिमन्दिरं कुत्र अस्ति ?

vasati-mandiraṁ kutra asti?
*Where is the hostel?*

वसतिमन्दिरं पुरुषस्य वामतः अस्ति ।

vasati-mandiraṁ puruṣasya vāmataḥ asti.
*The hostel is to the man's left.*

शकटः अस्ति । कुक्कुरः अस्ति । कुक्कुरः कुत्र अस्ति ?

śakaṭaḥ asti. kukkuraḥ asti. kukkuraḥ kutra asti?
*[There] is the cart. [There] is the dog. Where is the dog?*

कुक्कुरः शकटस्य अधः अस्ति ।

kukkuraḥ śakaṭasya adhaḥ asti.
*The dog is under the cart.*

फलं कुत्र अस्ति ?

phalaṁ kutra asti?
*Where is the fruit?*

फलं शकटस्य उपरि अस्ति ।

phalaṁ śakaṭasya upari asti.
*The fruit is on the cart.*

---

अहम् इतः तत्र गच्छामि ।

aham itaḥ tatra gacchāmi.
*I go from here to there.*

अहम् इतः तत्र गच्छामि ।

aham itaḥ tatra gacchāmi.
*I go from here to there.*

प्रसन्न ! उत्तिष्ठतु । भवान् ततः अत्र आगच्छतु ।

prasanna! uttiṣṭhatu. bhavān tataḥ atra āgacchatu.
*Prasanna, stand up! Come here from there.*

कूपी अस्ति । इतः नयतु ।

kūpī asti. itaḥ nayatu.
*[There] is a bottle. Take [it] from here.*

प्रसन्नः कूपीम् इतः नयति ।

prasannaḥ kūpīm itaḥ nayati.
*Prasanna takes the bottle from here.*

भवान् ततः आनयतु । कूपीम् आनयतु । धन्यवादः । गच्छतु ।

bhavān tataḥ ānayatu. kūpīm ānayatu. dhanyavādaḥ. gacchatu.
*You bring it from there. Bring the bottle. Thank you! Go!*

तत् किम् ?

tat kim?
*What is that?*

धनस्यूतः ।

dhanasyūtaḥ.
*A wallet.*

धनस्यूतं ततः अत्र प्रेषयतु ।

dhanasyūtaṁ tataḥ atra preṣayatu.
*Send the wallet from there to here!*

धनस्यूतः । बहु धनम् अस्ति । मम न आवश्यकम् ।

dhanasyūtaḥ. bahu dhanam asti. mama na āvaśyakam.
*The wallet. A lot of money is [in it]. I don't need it.*

आगच्छतु । इतः नयतु । धन्यवादः ।

āgacchatu. itaḥ nayatu. dhanyavādaḥ.
*Come! Take [it] from here. Thank you.*

---

*HINDI: "From here" and "from there" is expressed with:* ***itaḥ*** *and* ***tataḥ,*** *per example:*

---

इतः नयतु ।

itaḥ nayatu.
*Take [it] from here.*

प्रसन्नः कूपीम् इतः नयति ।

prasannaḥ kūpīm itaḥ nayati.
*Prasanna takes the bootle from here.*

---

**SCREEN:**

**इतः नयतु । itaḥ nayatu. *Take [it] from here.***

**अहम् इतः गच्छामि । aham itaḥ gacchāmi.**

***I go from here.***

---

धनस्यूतं ततः अत्र प्रेषयतु ।

dhanasyūtaṁ tataḥ atra preṣayatu.
*Send the wallet from there to here.*

---

**SCREEN:**

**ततः अत्र प्रेषयतु । tataḥ atra preṣayatu.**

***Send [it] here from there.***

**ततः पुस्तकम् आनयतु । tataḥ pustakam ānayatu.**

***Bring the book from there.***

---

दण्डः । दण्डः हस्ते अस्ति ।

daṇḍaḥ. daṇḍaḥ haste asti.
*A stick. The stick is on the hand.*

दण्डः हस्ततः पतति । हस्ततः पतति ।

daṇḍaḥ hastataḥ patati. hastataḥ patati.
*The stick falls from the hand. Falls from the hand.*

चषकः । चषकः हस्ततः पतति ।

caṣakaḥ. caṣakaḥ hastataḥ patati.
*A glass. The glass falls from the hand.*

चषकः कुतः पतति ?

caṣakaḥ kutaḥ patati?
*The glass falls from where?*

चषकः हस्ततः पतति ।

caṣakaḥ hastataḥ patati.
*The glass falls from the hand.*

उपनेत्रम् । उपनेत्रम् हस्ततः न पतति ।

upanetram. upanetram hastataḥ na patati.
*Eyeglasses. Eyeglasses don't fall from the hand.*

फलम् । फलं वृक्षतः पतति ।

phalam. phalaṁ vṛkṣataḥ patati.
*A fruit. The fruit falls from the tree.*

फलं कुतः पतति ?

phalaṁ kutaḥ patati?
*The fruit falls from where?*

फलं वृक्षतः पतति ।

phalaṁ vṛkṣataḥ patati.
*The fruit falls from the tree.*

अहं गृहतः आगच्छामि । भवान् कुतः आगच्छति ?

ahaṁ gṛhataḥ āgacchāmi. bhavān kutaḥ āgacchati?
*I come from home. Where do you come from?*

अहं चित्रमन्दिरतः आगच्छामि ।

ahaṁ citra-mandirataḥ āgacchāmi.
*I come from the cinema.*

भवान् कुतः आगच्छति ?

bhavān kutaḥ āgacchati?
*Where do you come from?*

अहं देवालयतः आगच्छमि ।

ahaṁ devālayataḥ āgacchami.
*I come from the temple.*

भवती कुतः आगच्छति ?

bhavatī kutaḥ āgacchati?
*Where do you come from?*

अहं मन्दिरतः आगच्छमि ।

ahaṁ mandirataḥ āgacchami.
*I come from the temple.*

भवती कुतः आगच्छति ?

bhavatī kutaḥ āgacchati?
*Where do you come from?*

अहं विद्यालयतः आगच्छमि ।

ahaṁ vidyālayataḥ āgacchami.
*I come from school.*

| | |
|---|---|
| विद्यालयः | विद्यालयतः |
| vidyālayaḥ | vidyālayataḥ |
| चित्रमन्दिरम् | चित्रमन्दिरतः |
| citra-mandiram | citra-mandirataḥ |
| नगरम् | नगरतः |
| nagaram | nagarataḥ |
| ग्रामः | ग्रामतः |
| grāmaḥ | grāmataḥ |
| गृहम् | गृहतः |
| gṛham | gṛhataḥ |
| ग्रन्थालयः | ग्रन्थालयतः |
| granthālayaḥ | granthālayataḥ |
| अरण्यम् | अरण्यतः |
| araṇyam | araṇyataḥ |
| उज्जैनी | उज्जैनीतः |
| ujjainī | ujjainītaḥ |
| *Ujjaini* | *from Ujjaini* |
| काशी | काशीतः |
| kāśī | kāśītaḥ |
| *Kashi* | *from Kashi* |
| दिल्ली | दिल्लीतः |
| dillī | dillītaḥ |
| *Delhi* | *from Delhi* |
| लखनऊ | लखनऊतः |
| lakhanaū | lakhanaūtaḥ |
| *Lucknow* | *from Lucknow* |
| चेन्नै | चेन्नैतः |
| cennai | cennaitaḥ |
| *Chennai* | *from Chennai* |
| विदेशः | विदेशतः |
| videśaḥ | videśataḥ |
| *abroad* | *from abroad* |
| चन्द्रलोकः | चन्द्रलोकतः |
| candralokaḥ | candralokataḥ |
| *Moon planet* | *from Moon planet* |

पश्यन्तु ।

paśyantu.
*Look!*
***(The teacher writes on the blackboard and explains the ending "-taḥ", using the known words.)***

तत्र किम् अपि परिवर्तनं नास्ति ।

tatra kim api parivartanaṁ nāsti.
*There is no change.*

पुंलिङ्गशब्दे "विद्यालयः – विद्यालयतः" ।

puṁliṅga-śabde: vidyālayaḥ – vidyālayataḥ.
*In the masculine: school – from school.*

नपुंसकलिङ्गशब्दे "नगरम् – नगरतः" ।

napuṁsakaliṅga-śabde: nagaram – nagarataḥ.
*In the neuter: city – from city.*

---

*HINDI: In the meaning: "from the village", "from the city", "from the tree", etc. the forms* ***grāmataḥ, nagarataḥ, vṛkṣataḥ*** *are used. In the masculine the ending* ***-taḥ****, is used. Per example:*

---

**SCREEN:**

| | | | |
|---|---|---|---|
| **ग्रामतः** | **नगरतः** | **वृक्षतः** | **अरण्यतः** |
| **grāmataḥ** | **nagarataḥ** | **vṛkṣataḥ** | **araṇyataḥ** |
| ***from the village*** | ***...city*** | ***... tree*** | ***... forrest*** |
| **मन्दिरतः** | **वाटिकातः** | **काशीतः** | **दिल्लीतः** |
| **mandirataḥ** | **vāṭikātaḥ** | **kāśītaḥ** | **dillītaḥ** |
| ***from the temple*** | ***... garden*** | ***... Kashi*** | ***... Delhi*** |

---

एकम् एकं वाक्यं वदन्तु । भवती एकं वाक्यं वदतु ।

ekam ekaṁ vākyaṁ vadantu. bhavatī ekaṁ vākyaṁ vadatu.
*Say sentences [one each]! You (fem.) say one sentence!*

अहम् उद्यानतः आगच्छामि ।

aham udyānataḥ āgacchāmi.
*I come from the garden.*

न शृणोमि । उच्चैः वदतु ।

na śṛṇomi. uccaiḥ vadatu.
*I don't hear. Speak loudly!*

अहम् उद्यानतः आगच्छामि ।

aham udyānataḥ āgacchāmi.
*I come from the garden.*

भवान् वदतु ।

bhavān vadatu.
*You say!*

अहम् चित्रमन्दिरतः आगच्छामि ।

aham citra-mandirataḥ āgacchāmi.
*I come from the cinema.*

उच्चैः वदतु ।

uccaiḥ vadatu.
*Speak loudly!*

अहम् चित्रमन्दिरतः आगच्छामि ।

aham citra-mandirataḥ āgacchāmi.
*I come from the cinema.*

शुभाङ्गी शनैः वदति । प्रसन्नः उच्चैः वदति ।

śubhāṅgī śanaiḥ vadati. prasannaḥ uccaiḥ vadati.
*Shubhangi speaks quietly. Prasanna speaks loudly.*

शुभाङ्गी कथं वदति ?

śubhāṅgī kathaṁ vadati?
*How does Shubhangi speak?*

शुभाङ्गी शनैः वदति ।

śubhāṅgī śanaiḥ vadati.
*Shubhangi speaks quietly.*

प्रसन्नः कथं वदति ?

prasannaḥ kathaṁ vadati?
*How does Prasanna speak?*

प्रसन्नः उच्चैः वदति ।

prasannaḥ uccaiḥ vadati.
*Prasanna speaks loudly.*

सर्वे उच्चैः वदन्तु । प्रसन्नः कथं वदति ?

sarve uccaiḥ vadantu. prasannaḥ kathaṁ vadati?
*You all say loudly! How does Prasanna speak?*

प्रसन्नः उच्चैः वदति ।

prasannaḥ uccaiḥ vadati.
*Prasanna speaks loudly.*

शनैः वदन्तु । शुभाङ्गी कथं वदति ?

śanaiḥ vadantu. śubhāṅgī katham vadati?
*Speak quietly. How does Shubhangi speak?*

शुभाङ्गी शनैः वदति ।

śubhāṅgī śanaiḥ vadati.
*Shubhangi speaks quietly.*

---

अहम् इदानीम् एकं सुन्दरं संस्कृतगीतां श्रावयामि । सर्वे शृण्वन्तु ।

aham idānīm ekaṁ sundaraṁ saṁskṛta-gītāṁ śrāvayāmi. sarve śṛṇvantu.
*Now I will let you listen to one beautiful song in Sanskrit. You all listen!*

उच्चैः । उच्चैः ।

uccaiḥ. uccaiḥ.
*Loudly! Loudly! [Louder, louder!]*

शनैः । शनैः ।

śanaiḥ. śanaiḥ.
*Quietly! Quietly! [More quiet!]*

कुक्कुरः भषति । कुक्कुरः कथं भषति ?

kukkuraḥ bhaṣati. kukkuraḥ kathaṁ bhaṣati?
*The dog barks. How does the dog bark?*

कुक्कुरः उच्चैः भषति ।

kukkuraḥ uccaiḥ bhaṣati.
*The dog barks loudly.*

सिंहः गर्जति । सिंहः कथं गर्जति ?

siṁhaḥ garjati. siṁhaḥ kathaṁ garjati?
*The lion roars. How does the lion roar?*

सिंहः उच्चैः गर्जति ।

siṁhaḥ uccaiḥ garjati.
*The lion roars loudly.*

अन्यवाक्यानि वदन्तु ।

anya-vākyāni vadantu.
*Say other sentences!*

"ट्रेन्" उच्चैः शब्दं करोति ।

"train" uccaiḥ śabdaṁ karoti.
*"Train" makes a loud sound.* **(Using the English word!)**

रेल्यानम् उच्चैः शब्दं करोति ।

relyānam uccaiḥ śabdaṁ karoti.
*Train makes a lound sound.* **(Teacher correcting!)**

शिशुः उच्चैः रोदनं करोति ।

śiśuḥ uccaiḥ rodanaṁ karoti.
*A child cries loudly.*

---

*HINDI: In the sense of "loud" and "quiet", the words* ***uccaiḥ*** *and* ***śanaiḥ*** *are used.*

---

अहं गच्छामि । अहं शीघ्रं गच्छामि । अहं मन्दम् आगच्छामि ।

ahaṁ gacchāmi. ahaṁ śīghraṁ gacchāmi. ahaṁ mandam āgacchāmi.
*I go. I go quickly. I come slowly.*

शीघ्रम् । मन्दम् ।

śīghram. mandam.
*Quickly. Slowly.*

अर्थः ज्ञायते ।

arthaḥ jñāyate?
*Do you understand the meaning?*

उत्तिष्ठतु । आगच्छतु ।

uttiṣṭhatu. āgacchatu.
*Stand up! Come!*

एकं वाक्यं लिखतु ।

ekaṁ vākyaṁ likhatu.
*Write one sentence.*

अहल्या लिखति । शीघ्रं लिखतु ।

ahalyā likhati. śīghraṁ likhatu.
*Ahalya writes. Write quickly!*

अहल्या शीघ्रं लिखति ।

ahalyā śīghraṁ likhati.
*Ahalya writes quickly.*

अहल्या कथं लिखति ?

ahalyā kathaṁ likhati?
*How does Ahalya write?*

अहल्या शीघ्रं लिखति ।

ahalyā śīghraṁ likhati.
*Ahalya writes quickly.*

धन्यवादः ।

dhanyavādaḥ.
*Thank you.*

---

वयम् इदानीम् एकं क्रीडां क्रीडामः ।

vayam idānīm ekaṁ krīḍāṁ krīḍāmaḥ.
*Now we play one game.*

अहं इदानीम् एतस्य गणस्य एकं सुधाखण्डं ददामि एतस्य गणस्य एकं सुधाखण्डं ददामि । भवती सुधाखण्डं तस्यै ददातु । सा तस्यै ददातु । एवं दत्तव्यम् ।

aham idānīm etasya gaṇasya ekaṁ sudhākhaṇḍaṁ dadāmi etasya gaṇasya ekaṁ sudhākhaṇḍaṁ dadāmi. bhavatī sudhākhaṇḍaṁ tasyai dadātu. sā tasyai dadātu. evaṁ dattavyam.
*Now I give to this group one chalk, and I give to this group one chalk. You give the chalk to her. She should give it to her. In this way it should be given [on].*

भवान् तस्मै ददातु । सः तस्मै ददातु । शीघ्रं दत्तव्यम् ।

bhavān tasmai dadātu. saḥ tasmai dadātu. śīghraṁ dattavyam.
*You give to him. He should give to him. Give quickly.*

यः गणः शीघ्रं कार्यं समापयति, तस्य जयः । किन्तु दानसमये "शीघ्रम्" इति वक्तव्यम् । सुधाखण्डः भग्नः न भवेत् । ज्ञातम् ?

yaḥ gaṇaḥ śīghraṁ kāryaṁ samāpayati, tasya jayaḥ. kintu dāna-samaye "śīghram" iti vaktavyam. sudhākhaṇḍaḥ bhagnaḥ na bhavet. jñātam?
*The group which finishes the task quickly, that group wins. But while giving "shighram", must be uttered. The chalk should not break. Understood?*

ज्ञातम् ।

jñātam.
*Understood.*

आरम्भं कुर्मः । स्वीकरोतु ।

ārambhaṁ kurmaḥ? svīkarotu.
*Shall we begin? Take [please]!*

---

*HINDI: In the sense of "quickly" and "slowly", the words* ***śīghram*** *and* ***mandam*** *are used.*

---

कुक्कुरः कथं भषति ?

kukkuraḥ kathaṁ bhaṣati?
*How does dog bark?*

कुक्कुरः उच्चैः भषति ।

kukkuraḥ uccaiḥ bhaṣati.
*The dog barks loudly.*

सिंहः कथं गर्जति ?

siṁhaḥ kathaṁ garjati?
*How does the lion roar?*

सिंहः उच्चैः गर्जति ।

siṁhaḥ uccaiḥ garjati.
*The lion roars loudly.*

कथं गर्जति ? कथं भषति ? एवं प्रश्नं कुर्मः ।

kathaṁ garjati? kathaṁ bhaṣati? evaṁ praśnaṁ kurmaḥ.
*How does [it] roar? How does [it] bark? Thus we ask the question.*

*HINDI: The questions regarding loudness are asked with "how", **katham**.*

मम केशालाङ्कारः अस्ति। इदानीं मम केशालाङ्कारः कथम् अस्ति ?

mama keśālāṅkāraḥ asti. idānīṁ mama keśālāṅkāraḥ katham asti?
*I have a [good] hairstyle. Now how is my hairstyle?*

सम्यक् नास्ति ?

samyak nāsti?
*It is not good?*

सम्यक् नास्ति।

samyak nāsti.
*It is not good.*

अहं लिखामि।

ahaṁ likhāmi.
*I write.*

न। सम्यक् लिखामि।

na. samyak likhāmi.
*No. I write good [nice].*

कथं लिखामि ?

kathaṁ likhāmi?
*How do I write?*

सम्यक् अस्ति।

samyak asti.
*It is good [nice].*

अहं सम्यक् लिखामि।

ahaṁ samyak likhāmi.
*I write good [nice].*

माधुरी सम्यक् गायति।

mādhurī samyak gāyati.
*Madhuri sings good [nice].*

*HINDI: In the sense of "good", "nice", "well", the word **samyak** is used.*

अहं प्रतःकाले षड्वादने उत्तिष्ठामि। भवती कदा उत्तिष्ठति ?

ahaṁ prataḥ-kāle ṣaḍ-vādane uttiṣṭhāmi. bhavatī kadā uttiṣṭhati?
*In the morning I get up at six o'clock. When do you get up?*

अहं प्रतःकाले पञ्चवादने उत्तिष्ठामि।

ahaṁ prataḥ-kāle pañca-vādane uttiṣṭhāmi.
*In the morning I get up at five o'clock.*

भवान् कदा उत्तिष्ठति ?

bhavān kadā uttiṣṭhati?
*When do you get up?*

अहं प्रतःकाले षड्वादने उत्तिष्ठामि।

ahaṁ prataḥ-kāle ṣaḍ-vādane uttiṣṭhāmi.
*In the morning I get up at six o'clock.*

अहं दशवादने भोजनं करोमि। भोजने अहम् अन्नं खादामि। भवान् किं खादति ?

ahaṁ daśa-vādane bhojanaṁ karomi. bhojane aham annaṁ khādāmi. bhavān kiṁ khādati?
*I have a meal at ten o'clock. At meal I eat rice. What do you eat?*

अहं भोजनानन्तरं आम्रफलं खादामि।

ahaṁ bhojanānantaram āmraphalaṁ khādāmi.
*After the meal I eat mango.*

भवान् भोजने किं खादति ?

bhavān bhojane kiṁ khādati?
*What do you eat at meal?*

अहं भोजने रोटिकां खादामि ।

ahaṁ bhojane roṭikāṁ khādāmi.
*At meal I eat [unleavened flat] bread.*

भवान् किं खादति ?

bhavān kiṁ khādati?
*What do you eat?*

अहं भोजने लड्डुं खादामि ।

ahaṁ bhojane **laḍḍuṁ** khādāmi.
*At meal I eat laddu (a kind of sweet).* ***(Mistake!)***

उत्तमम् । लड्डुकं खादामि ।

uttamam. **laḍḍukaṁ** khādāmi.
*Good! I eat a sweet.* ***(Teacher corrects!)***

भवान् किं खादति ?

bhavān kiṁ khādati?
*What do you eat?*

अहं भोजनं रोटिकां खादामि ।

ahaṁ **bhojanaṁ** roṭikāṁ khādāmi.
***Meal*** *I eat bread.* ***(Mistake!)***

भोजने रोटिकां खादामि ।

**bhojane** roṭikāṁ khādāmi.
***At meal*** *I eat bread.* ***(Teacher corrects!)***

भवान् किं खादति ?

bhavān kiṁ khādati?
*What do you eat?*

अहं भोजने अन्नं खादामि ।

ahaṁ bhojane annaṁ khādāmi.
*At meal I eat rice.*

भवती किं खादति ?

bhavatī kiṁ khādati?
*What do you eat?*

अहं भोजने फलं खादामि ।

ahaṁ bhojane phalaṁ khādāmi.
*At meal I eat fruit.*

भवती किं खादति ?

bhavatī kiṁ khādati?
*What do you eat?*

अहं भोजने पायसं खादामि ।

ahaṁ bhojane pāyasaṁ khādāmi.
*At meal I eat sweet milk dish.*

"अहं भोजने" न आवश्यकम् । भवती किं खादति ?

"ahaṁ bhojane" na āvaśyakam. bhavatī kiṁ khādati?
*"I", "at meal" is not necessary. What do you eat?*

अहं मोदकं खादामि ।

ahaṁ modakaṁ khādāmi.
*I eat a sweet.*

भवती किं खादति ?

bhavatī kiṁ khādati?
*What do you eat?*

अहं रोटिकां खादामि ।

ahaṁ roṭikāṁ khādāmi.
*I eat bread.*

अहं सारं खादामि ।

ahaṁ sāraṁ khādāmi.
*I eat soup.*

अहं अन्नेन सह क्वथितं खादामि ।

aham annena saha kvathitaṁ khādāmi.
*I eat stew with rice.*

बहुसमीचीनम्। अहम् अन्नेन सह क्वथितं खादामि। सारं खादामि। व्यञ्जनं खादामि। पोलिकं खादामि।

bahusamīcīnam. aham annena saha kvathitaṁ khādāmi. sāraṁ khādāmi. vyañjanaṁ khādāmi. polikaṁ khādāmi.
*Very good! I eat stew with rice. I eat soup. I eat vegetable side dish. I eat a sweet dish called* polika.

सारः। क्वथितम्। व्यञ्जनम्। लवणम्। भोजनस्य अन्ते तक्रं पिबामि।

sāraḥ. kvathitam. vyañjanam. lavaṇam. bhojanasya ante takraṁ pibāmi.
*Soup. Stew. Vegetable side dish. Salt. At the end of the meal I drink buttermilk.*

अर्थः ज्ञयते ?

arthaḥ jñayate?
*Have you understood the meaning?*

ज्ञायते।

jñāyate.
*[Yes, we have] understood.*

---

## सुभाषितम्।

**subhāṣitam.**
***Verse.***

वयम् इदानीम् एकं सुभाषितं शृण्मः।

vayam idānīm ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now, we listen to one verse.*

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव॥

chāyām anyasya kurvanti tiṣṭhanti svayam ātape
phalāny api parārthāya vṛkṣāḥ sat-puruṣā iva

chāyām – *the shade;* anyasya – *of others;* kurvanti – *they make;* tiṣṭhanti – *they stay;* svayam – *themselves;* ātape – *in the heat;* phalāni – *fruits;* api – *also;* para-arthāya – *for benefit of others;* vṛkṣāḥ – *the trees;* sat-puruṣāḥ – *saintly men;* iva – *like.*

*The trees are like holy men, since they offer their shade and grow their fruits only for benefit of others while they themselves stand in the heat.*

वयम् इदानीं यत् सुभाषितं श्रुतवन्तः तस्य अर्थः एवम् अस्ति।

vayam idānīṁ yat subhāṣitaṁ śrutavāntaḥ tasya arthaḥ evam asti.
*Now that we have heard this verse, here is it's meaning.*

सुभाषितकारः वदति वृक्षाः सत्पुरुषाः इव। वृक्षाः सत्पुरुषाः यथा परोपकारं कुर्वन्ति, तथैव कुर्वन्ति।

subhāṣita-kāraḥ vadati vṛkṣāḥ satpuruṣāḥ iva. vṛkṣāḥ satpuruṣāḥ yathā paropakāraṁ kurvanti, tathaiva kurvanti.
*The composer of the verse says that trees are like saintly persons. Just like the holy men do good deeds for others, thus also the trees do.*

कथम् इत्युक्ते वृक्षाः स्वयम् आतपे तिष्ठन्ति। स्वयं कष्टम् अनुभवन्ति।

katham ity ukte vṛkṣāḥ svayam ātape tiṣṭhanti. svayaṁ kaṣṭham anubhavanti.
*How (if you say so) the trees stand in the heat and experience the difficulties.*

किन्तु अन्येषां जनानां छायां कल्पयन्ति। छायां अन्यस्य कुर्वन्ति, तिष्ठन्ति स्वयम् आतपे।

kintu anyeṣāṁ janānāṁ chāyāṁ kalpayanti. chāyām anyasya kurvanti, tiṣṭhanti svayam ātape.
*But they offer their shade to other men. They give the shade to others, while they stand in the heat.*

तस्मिन् वृक्षे यानि फलानि भवन्ति, तानि फलानि अपि वृक्षाः स्वयं न खादन्ति । फलान्य् अपि परार्थाय ।

tasmin vṛkṣe yāni phalāni bhavanti, tāni phalāni api vṛkṣāḥ svayaṁ na khādanti. phalāny api parārthāya.
*The fruits which are on that tree, the trees also don't eat those fruits themselves. The fruits are for others as well.*

एवमेव सत्पुरुषाः यत् सम्पादयन्ति, तत् अपि अन्येषां निमित्तम्। समाजनिमित्तम् एव ते तस्य उपयोगं कुर्वन्ति । अतः वृक्षाः सत्पुरुषाः इव ।

evam eva satpuruṣāḥ yat sampādayanti, tat api anyeṣāṁ nimittam. samāja-nimittam eva te tasya upayogaṁ kurvanti. ataḥ vṛkṣāḥ satpuruṣāḥ iva.
*In this way what the holy men acquire (earn), is meant only for others. They use it only for the sake of society. Therefore the trees are like holy men.*

---

## कथा

**kathā**
**Story**

अहम् इदानीम् एकां लघुकथां वदामि । सरला कथा अस्ति ।

aham idānīm ekaṁ laghu kathāṁ vadāmi. saralā kathā asti.
*Now I (will) tell you a story. It's a very simple story.*

सावाधनेन शृण्वन्तु ।

sāvādhanena śṛṇvantu.
*Listen carefully.*

कश्चन ग्रामः आसीत्। तस्मिन् ग्रामे एकः पण्डितः आसीत्। सः महान् विद्वान्। अनेकेषु शास्त्रेषु निश्नातः आसीत् सः।

kaścana grāmaḥ āsīt. tasmin grāme ekaḥ paṇḍitaḥ āsīt. saḥ mahān vidvān. anekeṣu śāstreṣu niśnātaḥ āsīt saḥ.
*There was one village. In that village lived a wise man. He was very learned. He was expert in many, many scrpitures.*

सः प्रतिदिनम् अध्ययनं करोति अध्यापनम् अपि करोति । प्रतिदिनं पाठनं करोति ।

saḥ pratidinam adhyayanaṁ karoti adhyāpanam api karoti. pratidinaṁ pāṭhanaṁ karoti.
*Every day he studies and also teaches. Every day he holds lessons.*

दूरदूरतः अपि छात्राः प्रतिदिनं तस्य समीपम् आगत्य शिक्षणं प्राप्नुवन्ति, प्रतिदिनं पाठार्थं आगच्छन्ति ।

dūra-dūrataḥ api chātrāḥ pratidinaṁ tasya samīpam āgatya śikṣaṇaṁ prāpnuvanti, pratidinaṁ pāṭhārtham āgacchanti.
*Every day disciples were coming from far, far away to his vicinity to get instructions and to study.*

तस्य पण्डितस्य एकः एव पुत्रः आसीत्। पुत्रस्य विषये पण्डितस्य महती प्रीतिः आसीत्। सः पुत्रः अपि सम्यक् पठति स्म ।

tasya paṇḍitasya ekaḥ eva putraḥ āsīt. putrasya viṣaye paṇḍitasya mahatī prītiḥ āsīt. saḥ putraḥ api samyak paṭhati sma.
*The wise man had only one son. He felt great affection for his son. The son also studied very well.*

एकस्मिन् दिने छात्राः यथा पूर्वं गुरोः समीपम् आगतवन्तः ।

ekasmin dine chātrāḥ yathā pūrvaṁ guroḥ samīpam āgatavantaḥ.
*On one day the disciples came to the teacher like previously.*

गुरुः तान् सर्वान् यथा पूर्वं पाठितवान्। व्याकरणं वा न्यायशास्त्रं वा। किञ्चित् शास्त्रं सः सर्वान् छात्रान् यथा पूर्वं पाठितवान्।

guruḥ tān sarvān yathā pūrvaṁ pāṭhitavān. vyākaraṇaṁ vā nyāya-śāstraṁ vā. kiñcit śāstraṁ saḥ sarvān chātrān yathā pūrvaṁ pāṭhitavān.
*The teacher tought them as previously. Either grammar or logic. He thought all the disciples a little of the scriptures like previously.*

छात्राः सर्वे पाठं श्रुत्वा सन्तुष्टाः स्वग्रामम् अनन्तरं गतवन्तः।

chātrāḥ sarve pāṭhaṁ śrutvā santuṣṭāḥ svagrāmam anantaraṁ gatavantaḥ.
*After listening to the lesson all the disciples were satisfied and they went to their villages.*

सायङ्कालः अभवत्। तस्मिन् दिने अकस्मात् तस्य पण्डितस्य पुत्रस्य महान् ज्वरः आगतः। सः औषधम् आनीतवान् परन्तु प्रयोजनं न अभवत्। रात्रिसमये सः बालकः मृतः एव अभवत्।

sāyaṅ-kālaḥ abhavat. tasmin dine akasmāt tasya paṇḍitasya putrasya mahān jvaraḥ āgataḥ. saḥ auṣadham ānītavān parantu prayojanaṁ na abhavat. rātri-samaye saḥ bālakaḥ mṛtaḥ eva abhavat.
*In the evening that day the pandit's son sudenly got high fever. He brought him a medicine but it was of no use. In the night the boy died.*

पण्डितस्य एकः एव पुत्रः। सः पुत्रः अपि मृतः अभवत्। पण्डितस्य महत् दुःखं जातम्।

paṇḍitasya ekaḥ eva putraḥ. saḥ putraḥ api mṛtaḥ abhavat. paṇḍitasya mahat duḥkhaṁ jātam.
*The pandit had one one child. Even that child died. The pandit was very sad.*

सहजं सः बहुदुःखेन एव पुत्रस्य कार्याणि यानि करणीयानि, तानि सर्वाणि कृतवान्।

sahajaṁ saḥ bahu-duḥkhena eva putrasya kāryāṇi yāni karaṇīyāni, tāni sarvāṇi kṛtavān.
*Naturally with great sorrow he performed all the necessary rituals that are to be performed.*

तस्य शिष्याः सर्वे अन्यग्रामेषु निवसन्ति। ते एतां वार्तां न जानन्ति।

tasya śiṣyāḥ sarve anya-grāmeṣu nivasanti. te etāṁ vārtāṁ na jānanti.
*All his disciples live in other villages. They don't know this news.*

अनन्तरदिने प्रातःकले ते सर्वे यथा पूर्वं पाठार्थं आगतवन्तः।

anantara-dine prātaḥ-kale te sarve yathā pūrvaṁ pāṭhārtham āgatavantaḥ.
*In the morning the next day they all came to study as previously.*

गुरुः दृष्टवान् सर्वे छात्राः पाठार्थम् आगतवन्तः। अनुक्षणं गुरुः स्वस्थाने उपविष्टवान् सर्वान् अपि पाठितवान्।

guruḥ dṛṣṭavān sarve chātrāḥ pāṭhārtham. āgatavantaḥ, anukṣaṇaṁ guruḥ svasthāne upaviṣṭavān sarvān api pāṭhitavān.
*The teacher saw all the disciples have come for study. Immediately he sat on his place and taught them all.*

प्रतिदिनं यथा पाठयति तथैव एकघण्टापर्यन्तं पाठनं कृतवान्।

pratidinaṁ yathā pāṭhayati tathaiva eka-ghaṇṭā-paryantaṁ pāṭhanaṁ kṛtavān.
*Just as there was class every day, so he thought a class till one hour had passed.*

पाठः समाप्तः। छात्राः सर्वे गुरोः पुत्रं न दृष्टवन्तः। अद्य पुत्रः न दृश्यते। "कुत्र ?" इति तेषां संशयः भवति।

pāṭhaḥ samāptaḥ. chātrāḥ sarve guroḥ putraṁ na dṛṣṭavantaḥ. "adya putraḥ na dṛśyate. kutra?" iti teṣāṁ saṁśayaḥ bhavati.
*The class was over. The disciples haven't seen the teacher's son. "Today the son is not to be seen. Where [is he]?" that was their doubt.*

ते गुरुं पृष्टवन्तः "भवतः पुत्रः कुत्र ?" इति। तदा गुरुः पूर्वदिने प्रवृत्तं सर्वम् उक्तवान्।

te guruṁ pṛṣṭavantaḥ "bhavataḥ putraḥ kutra?" iti. tadā guruḥ pūrva-dine pravṛttaṁ sarvam uktavān.
*They asked the teacher: "Where is your son?" Then the teacher told them of all that happened the day before.*

छात्राः उक्तवन्तः "कीदृशः भवान्। किमर्थम् अस्मान् पूर्वम् एव न उक्तवान् ?"

chātrāḥ uktavantaḥ: "kīdṛśaḥ bhavān. kim artham asmān pūrvam eva na uktavān?"
*The disciples said: "What kind of person are you! Why haven't you told us before?"*

तदा गुरुः उक्तवान् "भवन्तः सर्वे दूरदूरग्रामतः पाठं श्रोतुम् आगतवन्तः। एतावन्तः शिष्याः दूरतः पाठं श्रोतुम् आगतवन्तः। अहं पाठं न करोमि चेत् भवतां सर्वेषां समयः व्यर्थः न भवति ? अतः पाठनं मम धर्मः" इति।

tadā guruḥ uktavān "bhavantaḥ sarve dūra-dūra-grāmataḥ pāṭhaṁ śrotum āgatavantaḥ. etāvantaḥ śiṣyāḥ dūrataḥ pāṭhaṁ śrotum āgatavantaḥ. ahaṁ pāṭhaṁ na karomi cet bhavatāṁ sarveṣāṁ samayaḥ vyarthaḥ na bhavati? ataḥ pāṭhanaṁ mama dharmaḥ" iti.
*Then the teacher said: "You all came from the villages far, far away to listen to the class. So many disciples have come from far to listen to the class. If I don't hold the class, won't the time of all of you be wasted? Therefore teaching is my dharma."*

वस्तुतः अस्माकं देशे एतदृशाः महात्मनः आसन्, ये अत्यन्तकष्टपरिस्थितौ अपि स्वकीयं जीवनं तथैव यापितवन्तः।

vastutaḥ asmākaṁ deśe etadṛśāḥ mahātmanaḥ āsan, ye atyanta-kaṣṭa-paristhitau api svakīyaṁ jīvanaṁ tathaiva yāpitavantaḥ.
*Actually in our country such great men lived. Those who even in the most difficult circumstances they went on with (lit. spent) their life all the same.*

कथायाः अर्थः ज्ञातः ?

kathāyāḥ arthaḥ jñātaḥ?
*Have you understood the story?*

आम्। ज्ञातः।

ām. jñātaḥ.
*Yes, we've understood.*

धन्यवादः। नमो नमः।

dhanyavādaḥ. namo namaḥ.
*Thank you. Salutations!*

नमो नमः।

namo namaḥ.
*Salutations.*

# LESSON 9 – OVERVIEW

*In the ninth lesson you will practice* **pañcamī -vibhakti** *(ablative case) ending* **–taḥ** *for going or coming from somewhere. You will learn to use compounds with* **-artham** *meaning "for that (purpose)" and the* **avyayas api** *"also", "as well",* **astu** *"all right" and* **māstu** *"don't, enough".*

| | | |
|---|---|---|
| किमर्थम् ? | kim artham? | *what for, why?* |
| ज्ञानार्थं पठामि । | jñān**ārthaṁ** paṭhāmi. | I study for [acquiring] knowledge. |
| आनन्दार्थं नृत्यं करोमि । | ānand**ārthaṁ** nṛtyaṁ karomi. | *I dance for pleasure.* |

**AVYAYAS**

| | | |
|---|---|---|
| अपि | api | *also, as well* |
| अस्तु | astu | *all right, OK (let it be so; expressing agreement)* |
| मास्तु | māstu | *don't, enough (let it not be so; expressing objection, disagreement)* |

# Lesson 9

नमो नमः।

namo namaḥ.
*Respects.*

संस्कृतभाषाशिक्षणे भवतां सर्वेषां हार्दं स्वागतम्।

saṁskṛta-bhāṣā-śikṣaṇe bhavatāṁ sarveṣāṁ hārdaṁ svāgatam.
*Heartly welcome [to you all] to the study of Sanskrit language.*

अहं पठामि। ग्रन्थं पठामि। अहं जानामि। अहं विज्ञानं जानामि।

ahaṁ paṭhāmi. granthaṁ paṭhāmi. ahaṁ jānāmi. ahaṁ vijñānaṁ jānāmi.
*I read. I read a book. I know. I know science.*

अहं पृच्छामि। अहं यतीन्द्रं पृच्छामि। भवन्तः वदन्तु कं कं पृच्छन्ति।

ahaṁ pṛcchāmi. ahaṁ yatīndraṁ pṛcchāmi. bhavantaḥ vadantu kaṁ kaṁ pṛcchanti.
*I ask. I ask Yatindra. You say, whom do you ask!*

अहं यतीन्द्रं पृच्छामि।

ahaṁ yatīndraṁ pṛcchāmi.
*I ask Yatindra.*

अहं सुहासं पृच्छामि।

ahaṁ suhāsaṁ pṛcchāmi.
*I ask Suhasa.*

अहं नकुलं पृच्छामि।

ahaṁ nakulaṁ pṛcchāmi.
*I ask Nakula.*

अहं स्वातीं पृच्छामि।

ahaṁ svātīṁ pṛcchāmi.
*I ask Svati.*

अहं रञ्जितां पृच्छामि।

ahaṁ rañjitāṁ pṛcchāmi.
*I ask Ranjita.*

वयम् इदानीम् एकम् अभ्यासं कुर्मः।

vayam idānīm ekam abhyāsaṁ kurmaḥ.
*Now we [will] do one exercise.*

उदाहरणं वदामि। रामः आनन्तं पृच्छति। बाणचिह्नम् अस्ति। यत्र बाणचिह्नम् अस्ति, सः पृच्छति।

udāharaṇaṁ vadāmi. rāmaḥ ānantaṁ pṛcchati. bāṇa-cihnam asti. yatra bāṇacihnam asti, saḥ pṛcchati.
*I say an example. Rama asks Anasta. [Here] is an arrow mark. Where there is an arrow, that one asks.*

रामः आनन्तं पृच्छति। वदन्तु।

rāmaḥ ānantaṁ pṛcchati. vadantu.
*Rama asks Ananta. Say!*

रामः आनन्तं पृच्छति।

rāmaḥ ānantaṁ pṛcchati.
*Rama asks Ananta.*

रामः अमरं पृच्छति।

rāmaḥ amaraṁ pṛcchati.
*Rama asks Amara.*

रामः मालतीं पृच्छति।

rāmaḥ mālatīṁ pṛcchati.
*Rama asks Malati.*

रामः सुरेशं पृच्छति ।

rāmaḥ sureśaṁ pṛcchati.
*Rama asks Suresha.*

रामः लतां पृच्छति ।

rāmaḥ latāṁ pṛcchati.
*Rama asks Lata.*

रामः कां पृच्छति ? सर्वे वदन्तु ।

rāmaḥ kāṁ pṛcchati? sarve vadantu.
*Rama asks whom? You all say!*

रामः लतां पृच्छति ।

rāmaḥ latāṁ pṛcchati.
*Rama asks Lata.*

रामः रमेशं पृच्छति ।

rāmaḥ rameśaṁ pṛcchati.
*Rama asks Ramesha.*

अनन्तः लतां पृच्छति ।

anantaḥ latāṁ pṛcchati.
*Ananta asks Lata.*

लता रमेशं पृच्छति ।

latā rameśaṁ pṛcchati.
*Lata asks Ramesha.*

भारती रमेशं पृच्छति ।

bhāratī rameśaṁ pṛcchati.
*Bharati asks Ramesha.*

भारती अमरं पृच्छति ।

bhāratī amaraṁ pṛcchati.
*Bharati asks Amara.*

अमरः मालतीं पृच्छति ।

amaraḥ mālatīṁ pṛcchati.
*Amara asks Malati.*

मालती सुरेशं पृच्छति ।

mālatī sureśaṁ pṛcchati.
*Malati asks Suresha.*

गीता सुरेशं पृच्छति ।

gītā sureśaṁ pṛcchati.
*Gita asks Suresha.*

गीता अनन्तं पृच्छति ।

gītā anantaṁ pṛcchati.
*Gita asks Ananta.*

---

*HINDI: With* **pṛcchati, paṭhati, likhati** *etc.* **dvitīyā-vibhakti** *is used.*

---

***(In the following exercise ablative is used. We know the meaning of the words from previous lessons.)***

अहं गृहतः आगच्छामि । गृहम् । गृहतः ।

ahaṁ gṛhataḥ āgacchāmi. gṛhaṁ. gṛhataḥ.
*I come from home. Home. From home.*

अहं विदेशतः आगच्छामि ।

ahaṁ videśataḥ āgacchāmi.
*I come from abroad.*

| | |
|---|---|
| विदेशः<br>videśaḥ | विदेशतः<br>videśataḥ |
| विद्यालयः<br>vidyālayaḥ | विद्यालयतः<br>vidyālayataḥ |
| आपणः<br>āpaṇaḥ | आपणतः<br>āpaṇataḥ |
| वित्तकोषः<br>vittakoṣaḥ | वित्तकोषतः<br>vittakoṣataḥ |
| मार्गः<br>mārgaḥ | मार्गतः<br>mārgataḥ |

| | |
|---|---|
| कार्यालयः<br>kāryālayaḥ | कार्यालयतः<br>kāryālayataḥ |
| हिमालयः<br>himālayaḥ | हिमालयतः<br>himālayataḥ |
| वृक्षः<br>vṛkṣaḥ | वृक्षतः<br>vṛkṣataḥ |
| वाटिका<br>vāṭikā | वाटिकातः<br>vāṭikātaḥ |
| सञ्चिका<br>sañcikā | सञ्चिकातः<br>sañcikātaḥ |
| स्थालिका<br>sthālikā | स्थालिकातः<br>sthālikātaḥ |
| नदी<br>nadī | नदीतः<br>nadītaḥ |
| लेखनी<br>lekhanī | लेखनीतः<br>lekhanītaḥ |
| कूपी<br>kūpī | कूपीतः<br>kūpītaḥ |
| मन्दिरम्<br>mandiram | मन्दिरतः<br>mandirataḥ |
| पुष्पम्<br>puṣpam | पुष्पतः<br>puṣpataḥ |

---

पेटिका। पेटिका अस्ति। एषा का ?

peṭikā. peṭikā asti. eṣā kā?
*A box. [There] is a box. What is this (fem.)?*

पेटिका।

peṭikā.
*A box.*

उपनेत्रं अस्ति। अहं पेटिकातः उपनेत्रं स्वीकरोमि।

upanetram asti. ahaṁ peṭikātaḥ upanetraṁ svīkaromi.
*(There) are eyeglasses. I take the eyeglasses from the box.*

कूप्यां जलम् अस्ति। कूप्यां किम् अस्ति ?

kūpyāṁ jalam asti. kūpyāṁ kim asti?
*Water is in the bottle. What is in the bottle.*

जलम् अस्ति।

jalam asti.
*[There] is water.*

कूप्यां जलम् अस्ति।

kūpyāṁ jalam asti.
*The water is in the bottle.*

चषकः अस्ति।

caṣakaḥ asti.
*[There] is a cup.*

अहं कूपीतः जलं स्वीकरोमि।

ahaṁ kūpītaḥ jalaṁ svīkaromi.
*I take the water from the bottle.*

कूपी। कूपीतः।

kūpī. kūpītaḥ.
*The bottle. From the bottle.*

सञ्चिका। अहं सञ्चिकातः पत्रं स्वीकरोमि।

sañcikā. ahaṁ sañcikātaḥ patraṁ svīkaromi.
*A file. I take a sheet of paper from the file.*

सञ्चिका। सञ्चिकातः।

sañcikā. sañcikātaḥ.
*The file. From the file.*

शारदातः लेखनीं स्वीकरोमि।

śāradātaḥ lekhanīṁ svīkaromi.
*I take a pen from Sharada.*

शारदा । शारदातः ।

śāradā. śāradātaḥ.
*Sharada. From Sharada.*

भवन्तः वदन्तु । कुतः किं स्वीकरोति ।

bhavantaḥ vadantu. kutaḥ kiṁ svīkaroti.
*You say. What do you take from where!*

अहं यतीन्द्रतः करवस्त्रतं स्वीकरोमि ।

ahaṁ yatīndrataḥ karavast**ratam** svīkaromi.
*I take the handkerchief from Yatindra.* **(Mistake!)**

करवस्त्रं स्वीकरोमि ।

karavastraṁ svīkaromi.
*I take the handkerchief.* **(Teacher corrects!)**

अहं यतीन्द्रतः करवस्त्रं स्वीकरोमि ।

ahaṁ yatīndrataḥ karavastraṁ svīkaromi.
*I take the handkerchief from Yatindra.*

अहं कुषतः लेखनीं स्वीकरोमि ।

ahaṁ k**u**ṣataḥ lekhanīṁ svīkaromi.
*I take a pen from the p**u**cket.*

कोषतः । वदतु ।

k**o**ṣataḥ. vadatu.
*From the p**o**cket. Say!*

अहं कोषतः लेखनीं स्वीकरोमि ।

ahaṁ koṣataḥ lekhanīṁ svīkaromi.
*I take a pen from the pocket.*

अहं शारदातः पुस्तकं स्वीकरोमि ।

ahaṁ śāradātaḥ pustakaṁ svīkaromi.
*I take the book from Sharada.*

अहं सुहासतः करवस्त्रं स्वीकरोमि ।

ahaṁ suhāsataḥ karavastraṁ svīkaromi.
*I take the handkerchief from Suhasa.*

पुनः वदतु ।

punaḥ vadatu.
*Say again!*

अहं सुहासतः करवस्त्रं स्वीकरोमि ।

ahaṁ suhāsataḥ karavastraṁ svīkaromi.
*I take the handkerchief from Suhasa.*

---

अहम् आनयामि ।

aham ānayāmi.
*I bring.*

वित्तकोषतः धनम् आनयामि । नदीतः जलम् आनयामि । वदन्तु भवन्तः कुतः किम् आनयन्ति । यतीन्द्र ! वदतु ।

vittakoṣataḥ dhanam ānayāmi. nadītaḥ jalam ānayāmi. vadantu bhavantaḥ kutaḥ kim ānayanti. yatīndra! vadatu.
*I bring the money from the bank. I bring the water from the river. Say what do you bring from where. Yatindra! You say!*

अहम् अरण्यतः फलम् आनयामि ।

aham araṇyataḥ phalam ānayāmi.
*I bring the fruit from the forest.*

अहम् आपणतः पुस्तकम् आनयामि ।

aham āpaṇataḥ pustakam ānayāmi.
*I bring the book from the shop.*

पुनः वदतु ।

punaḥ vadatu.
*Say again!*

अहम् आपणतः पुस्तकम् आनयामि ।

aham āpaṇataḥ pustakam ānayāmi.

*I bring the book from the shop.*

अहं विपणितः घटीम् आनयामि ।

ahaṁ vipaṇitaḥ ghaṭīm ānayāmi.
*I bring the watch from the market.*

अहं शालतः पुस्तकम् आनयामि ।

ahaṁ śā**la**taḥ pustakam ānayāmi.
*I bring the book from school.* **(Mistake!)**

शालातः । पुनः वदतु ।

śā**lā**taḥ. punaḥ vadatu.
*From school.* **(Teacher corrects!)** *Say!*

अहं शालातः पुस्तकम् आनयामि ।

ahaṁ śālātaḥ pustakam ānayāmi.
*I bring the book from the school.*

अहं विद्यालयतः सुधाखण्डम् आनयामि ।

ahaṁ vidyālayataḥ sudhākhaṇḍam ānayāmi.
*I brign the chalk from the school.*

अहं वाटिकातः पुष्पम् आनयामि ।

ahaṁ vāṭikātaḥ puṣpam ānayāmi.
*I bring the flower from the garden.*

---

अहम् उत्तरं वदामि, भवन्तः प्रश्नं कुर्वन्तु । गङ्गा हिमालयतः प्रवहति ।

aham uttaraṁ vadāmi, bhavantaḥ praśnaṁ kurvantu. gaṅgā himālayataḥ pravahati.
*I say the answer, you ask the question! Ganga flows from Himalaya.*

गङ्गा कुतः प्रवहति ?

gaṅgā kutaḥ pravahati?
*Ganga flows from where?*

रामः विद्यालयतः आगच्छति ।

rāmaḥ vidyālayataḥ āgacchati.
*Rama comes from school.*

रामः कुतः आगच्छति ?

rāmaḥ kutaḥ āgacchati?
*Rama comes from where?*

गीता विपणितः गच्छति ।

gītā vipaṇitaḥ gacchati.
*Gita goes from the market.*

गीता कुतः गच्छति ?

gītā kutaḥ gacchati?
*Gita goes from where?*

सीता अरण्यतः आगच्छति ।

sītā araṇyataḥ āgacchati.
*Sita comes from the forrest.*

सीता कुतः आगच्छति ?

sītā kutaḥ āgacchati?
*Sita comes from where?*

गङ्गा हिमालयतः प्रवहति ।

gaṅgā himālayataḥ pravahati.
*Ganga flows from Himalaya.*

गङ्गा कुतः प्रवहति ?

gaṅgā kutaḥ pravahati?
*Ganga flows from where?*

रामः विद्यालयतः आगच्छति ।

rāmaḥ vidyālayataḥ āgacchati.
*Rama comes from school.*

रामः कुतः आगच्छति ?

rāmaḥ kutaḥ āgacchati?
*Rama comes from where?*

सीता अरण्यतः गच्छति ।

sītā araṇyataḥ gacchati.

*Sita goes from the forrest.*

सीता कुतः गच्छति ?

sītā kutaḥ gacchati?
*Sita goes from where?*

लता विपणितः आगच्छति ।

latā vipaṇitaḥ āgacchati.
*Lata comes from the market.*

लता कुतः आगच्छति ?

latā kutaḥ āgacchati?
*Lata comes from where?*

फलं वृक्षतः पतति ।

phalaṁ vṛkṣataḥ patati.
*The fruit falls from the tree.*

भलं कुतः पतति ?

**bh**alaṁ kutaḥ patati?
*The fruit falls from where?* **(Mistake!)**

न, न । भलं न । फलम् ।

na, na. **bh**alaṁ na. **ph**alam.
*No, no. Not* ***bh****alam.* ***Ph****alam.* **(Teacher corrects!)**

फलं वृक्षतः पतति ।

phalaṁ vṛkṣataḥ patati.
*The fruit falls from the tree.*

फलं कुतः पतति ?

phalaṁ kutaḥ patati?
*The fruit falls from where?*

रामः अरण्यतः नयति ।

rāmaḥ araṇyataḥ nayati.
*Rama leads (takes) from the forrest.*

रामः कुतः नयति ?

rāmaḥ kutaḥ nayati?
*Rama leads from where?*

बाबुलालः वित्तकोषतः आगच्छति ।

bābulālaḥ vittakoṣataḥ āgacchati.
*Babulala comes from the bank.*

बाबुलालः कुतः आगच्छति ?

bābulālaḥ kutaḥ āgacchati?
*Babulala comes from where?*

वाहनं मार्गतः पतति ।

vāhanaṁ mārgataḥ patati.
*The vehicle falls from the road.*

वाहनं कुतः पतति ?

vāhanaṁ kutaḥ patati?
*The vehicle falls from where?*

---

*HINDI: To express going or coming from somewhere or something the ending* ***-taḥ*** *is used in the meaning of* **pañcamī-vibhakti.**

---

अहं गच्छामि । अहम् आपणं गच्छामि । आपणतः मन्दिरं गच्छामि । मन्दिरतः वित्तकोषं गच्छामि । वित्तकोषतः विपणिं गच्छामि । विपणितः गृहम् आगच्छामि ।

ahaṁ gacchāmi. aham āpaṇaṁ gacchāmi. āpaṇataḥ mandiraṁ gacchāmi. mandirataḥ vittakoṣaṁ gacchāmi. vittakoṣataḥ vipaṇiṁ gacchāmi. vipaṇitaḥ gṛham āgacchāmi.
*I go. I go to the shop. From the shop I go to the temple. From the temple I go to the bank. From the bank I go to the market. From the market I come home.*

भवन्तः वदन्तु कुतः कुत्र गच्छन्ति । वदन्ति वा ? वदतु ।

bhavantaḥ vadantu kutaḥ kutra gacchanti. vadanti vā? vadatu.

*You say where do you go from where. [Would] you say? Say!*

अहं विद्यालयं गच्छामि। विद्यालयतः मन्दिरं गच्छामि। मन्दिरतः आपणं गच्छामि। आपणतः गृहम् आगच्छामि।

ahaṁ vidyālayaṁ gacchāmi. vidyālayataḥ mandiraṁ gacchāmi. mandirataḥ āpaṇaṁ gacchāmi. āpaṇataḥ gṛham āgacchāmi.
*I go to the school. From the school I go to the temple. From the temple I go to the shop. From the shop I come home.*

अहं विद्यालयं गच्छामि। विद्यालयतः हिमालयं गच्छामि। हिमालयतः गृहम् आगच्छामि।

ahaṁ vidyālayaṁ gacchāmi. vidyālayataḥ himālayaṁ gacchāmi. himālayataḥ gṛham āgacchāmi.
*I go to the school. From the school I go to Himalaya. From Himalaya I come home.*

अहं मन्दिरं गच्छामि। मन्दिरतः मृगालयं गच्छामि। मृगालयतः विद्यालयं गच्छामि। विद्यालयतः पुनः गृहम् आगच्छामि।

ahaṁ mandiraṁ gacchāmi. mandirataḥ mṛgālayaṁ gacchāmi. mṛgālayataḥ vidyālayaṁ gacchāmi. vidyālayataḥ punaḥ gṛham āgacchāmi.
*I go to the temple. From the temple I go to the ZOO? From the ZOO I go to school. From the school I come home again.*

अहं विद्यालयं गच्छामि। विद्यालयतः हिमालयं गच्छामि। हिमालयतः स्वर्गं गच्छामि। स्वर्गतः पुनः गृहम् आगच्छामि।

ahaṁ vidyālayaṁ gacchāmi. vidyālayataḥ himālayaṁ gacchāmi. himālayataḥ svargaṁ gacchāmi. svargataḥ punaḥ gṛham āgacchāmi.
*I go to the school. From the school I go to Himalaya. From Himalaya I go to heaven. From the heaven I come home again.*

रामानन्दः अस्ति। रामानन्दः प्रवासं करोति। सः कुतः कुत्र गच्छति, इत्य् अस्मिन् विषये वयम् एकम् अभ्यासं कुर्मः।

rāmānandaḥ asti. rāmānandaḥ pravāsaṁ karoti. saḥ kutaḥ kutra gacchati, ity asmin viṣaye vayam ekam abhyāsaṁ kurmaḥ.
*[There] is [a man called] Ramananda. Ramananda travels. Where does he go from where, on that subject we will do one exercise.*

रामानन्दः लखनऊ गच्छति। रामानन्दः कुत्र गच्छति ?

rāmānandaḥ lakhnaū gacchati. rāmānandaḥ kutra gacchati?
*Ramananda goes to Lucknow. Ramananda goes where?*

रामानन्दः लखनऊ गच्छति।

rāmānandaḥ lakhnaū gacchati.
*Ramananda goes to Lucknow.*

लखनऊतः नागपुरं गच्छति।

lakhnaūtaḥ nāgapuraṁ gacchati.
*From Lucknow he goes to Nagpur.*

नागपुरतः बेङ्गलूरु गच्छति।

nāgapurataḥ beṅgalūru gacchati.
*From Nagpur he goes to Bengaluru.*

बेङ्गलूरुतः चेन्नै गच्छति।

beṅgalūrutaḥ cennai gacchati.
*From Bengaluru he goes to Chennai.*

चेन्नैतः रामेश्वरं गच्छति।

cennaitaḥ rāmeśvaraṁ gacchati.
*From Chennai he goes to Rameshvaram.*

रामेश्वरतः अहमदाबादं गच्छति।

rāmeśvarataḥ ahamadābādaṁ gacchati.

*From Rameshvaraṁ he goes to Ahmadabad.*

अहमदाबादं गच्छति । वदन्तु ।

ahamadābādaṁ gacchati. vadantu.
*He goes to Ahmadabad. Say!*

अहमदाबादं गच्छति ।

ahamadābādaṁ gacchati.
*He goe sto Ahmadabad.*

अहमदाबादतः लखनऊ आगच्छति ।

ahamadābādataḥ lakhnaū āgacchati.
*From Ahmadabad he comes to Lacknow.*

---

अहं पठामि । अहं ज्ञानार्थं पठामि ।

ahaṁ paṭhāmi. ahaṁ jñānārthaṁ paṭhāmi.
*I study. I study for [acquiring] knowledge.*

पिपासा अस्ति । अहं जलं पिबामि । पिपासा निवारणार्थं जलं पिबामि ।

pipāsā asti. ahaṁ jalaṁ pibāmi. pipāsā nivāraṇārthaṁ jalaṁ pibāmi.
*(There) is thirst. I drink water. I dring water for quenching the thirst.*

आनन्दार्थं नृत्यं करोमि ।

ānandārthaṁ nṛtyaṁ karomi.
*I dance for pleasure.*

शन्त्यर्थं शायनं करोमि ।

śantyarthaṁ śayanaṁ karomi.
*I lie down for peacefulness.*

अहं ज्ञानार्थं रामायणं पठामि ।

ahaṁ jñānārthaṁ rāmāyaṇaṁ paṭhāmi.
*I read Ramayana for knowledge.*

भवान् ज्ञानार्थं किं पठति ?

bhavān jñānārthaṁ kiṁ paṭhati?
*What do you read for [acquiring] knowledge?*

अहं ज्ञानार्थं रामायणं पठामि ।

ahaṁ jñānārthaṁ rāmāyaṇaṁ paṭhāmi.
*I read Ramayana for knowledge.*

अहम् आनन्दार्थं गीतां गायामि ।

aham ānandārthaṁ gītāṁ gāyāmi.
*I sing a song for pleasure.*

भवाण् आनन्दार्थं किं करोति ?

bhavāṇ ānandārthaṁ kiṁ karoti?
*What do you do for pleasure?*

अहम् आनन्दार्थं नृत्यं करोमि ।

aham ānandārthaṁ nṛtyaṁ karomi.
*I dance for pleasure.*

शारदा वदतु आनन्दार्थं किं करोति ?

śāradā vadatu ānandārthaṁ kiṁ karoti?
*Sharada, say, what do you do for pleasure?*

अहम् आनन्दार्थं पश्यामि ।

aham ānandārthaṁ paśyāmi.
*I watch for pleasure.*

आनन्दार्थं पठति । आनन्दार्थं क्रीडति ।

ānandārthaṁ paṭhati. ānandārthaṁ krīḍati.
*He reads for pleasure. He plays for pleasure.*

अहं पाठनार्थं ग्रन्थालयं गच्छामि । पाठनार्थं कुत्र कुत्र गच्छति ? प्रमोदः वदतु ।

ahaṁ pāṭhanārthaṁ granthālayaṁ gacchāmi. pāṭhanārthaṁ kutra kutra gacchati? pramodaḥ vadatu.
*I go to the library for study. Where do you go for study? Pramoda, you say!*

पाठनार्थं शालां गच्छामि ।

pāṭhanārthaṁ śālāṁ gacchāmi.

*I go to school for study.*

पाठनार्थं ग्रन्थालयं गच्छामि ।

pāṭhanārthaṁ granthālayaṁ gacchāmi.
*I go to the library for study.*

पाठनार्थं विद्यालयं गच्छामि ।

pāṭhanārthaṁ vidyālayaṁ gacchāmi.
*I go to school for study.*

औषधार्थं औषधालयं गच्छति ।

auṣadhārtham auṣadhālayaṁ gacchati.
*I go to the hospital for medicine.*

रामेशः पाठनार्थं विद्यालयं गच्छति । किम् अर्थं विद्यालयं गच्छति ?

rāmeśaḥ pāṭhanārthaṁ vidyālayaṁ gacchati. kim arthaṁ vidyālayaṁ gacchati?
*Ramesha goes to school for knowledge. What for does he go school?*

पाठनार्थं विद्यालयं गच्छति ।

pāṭhanārthaṁ vidyālayaṁ gacchati.
*He goes to school for knowledge.*

पुनः वदन्तु ।

punaḥ vadantu.
*Say again!*

रामेशः पाठनार्थं विद्यालयं गच्छति ।

rāmeśaḥ pāṭhanārthaṁ vidyālayaṁ gacchati.
*Ramesha goes to school for knowledge.*

अहम् उत्तरं वदामि, भवन्तः प्रश्नं वदन्तु । राधाकृष्णः विद्यालयं गच्छति ।

aham uttaraṁ vadāmi, bhavantaḥ praśnaṁ vadantu. rādhākṛṣṇaḥ vidyālayaṁ gacchati.
*I say the answer, you say the question. Radhakrishna goes to school.*

राधाकृष्णः पाठनार्थं विद्यालयं गच्छति ।

rādhākṛṣṇaḥ pāṭhanārthaṁ vidyālayaṁ gacchati.
*Radhakrishna goes to school for knowledge.*

राधाकृष्णः किमर्थं विद्यालयं गच्छति ?

rādhākṛṣṇaḥ kim arthaṁ vidyālayaṁ gacchati?
*What does Radhakrishna go to school for? (Lit: Radhakrishna goes to school for what purpose?)*

पुनः वदन्तु ।

punaḥ vadantu.
*Say again!*

राधाकृष्णः किमर्थं विद्यालयं गच्छति ?

rādhākṛṣṇaḥ kim arthaṁ vidyālayaṁ gacchati?
*What does Radhakrishna go to school for?*

सीता पाठनार्थं ग्रन्थालयं गच्छति ।

sītā pāṭhanārthaṁ granthālayaṁ gacchati.
*Sita goes to library for study.*

सीता किमर्थं ग्रन्थालयं गच्छति ?

sītā kim arthaṁ granthālayaṁ gacchati?
*What does Sita go to library for?*

रामः ध्यानार्थं मन्दिरं गच्छति ।

rāmaḥ dhyānārthaṁ mandiraṁ gacchati.
*Rama goes to the temple for meditation.*

रामः किमर्थं मन्दिरं गच्छति ?

rāmaḥ kim arthaṁ mandiraṁ gacchati?
*What does Rama go to the temple for?*

आनन्दार्थं दूरदर्शनं पश्यति ।

ānandārthaṁ dūradarśanaṁ paśyati.
*He (she) watches the television for pleasure.*

आनन्दार्थं किमर्थं पश्यति ?

ānandārthaṁ kim arthaṁ paśyati?
*He (she) watches for pleasure for what?* ***(Mistake!)***

न, न। किमर्थं दूरदर्शनं पश्यति ?

na, na. kim arthaṁ dūradarśanaṁ paśyati?
*No, no. What for does he (she) watch the television?*
***(Teacher corrects!)***

आनन्दार्थं दूरदर्शनं पश्यति।

ānandārthaṁ dūradarśanaṁ paśyati.
*He (she) watches the television for pleasure.*

किमर्थं दूरदर्शनं पश्यति ?

kim arthaṁ dūradarśanaṁ paśyati?
*What for does he (she) watch the television?*

औषधार्थं चिकित्सालयं गच्छति।

auṣadhārthaṁ cikitsālayaṁ gacchati.
*He (she) goes to the hospital for medicine.*

किमर्थं चिकित्सालयं गच्छति ?

kim arthaṁ cikitsālayaṁ gacchati?
*Why does he (she) go to the hospital?*

फलार्थम् उद्यानं गच्छति।

phalārtham udyānaṁ gacchati.
*He (she) goes to garden for fruit.*

किमर्थम् उद्यानं गच्छति ?

kim artham udyānaṁ gacchati?
*He (she) goes to garden for what?*

भोजनार्थम् उपाहारमन्दिरं गच्छति।

bhojanārtham upāhāra-mandiraṁ gacchati.
*He (she) goes to the restaurant for meal.*

किमर्थम् उपाहारमन्दिरं गच्छति ?

kim artham upāhāra-mandiraṁ gacchati?
*He (she) goes to the restaurant for what?*

पाठनार्थं सखीगृहं गच्छति।

pāṭhanārthaṁ sakhī-gṛhaṁ gacchati.
*He (she) goes to the (girl-)friend's shome for study.*

किमर्थं सखीगृहं गच्छति ?

kim arthaṁ sakhī-gṛhaṁ gacchati?
*He (she) goes to the (girl-)friend's home for what?*

---

*HINDI: "For pleasure, for peace, for joy" – for these the question **kim artham?** (what for?) is used.*

---

यतीन्द्र ! उत्तिष्ठतु। यतीन्द्रः उत्तिष्ठति। यतीन्द्रः किं करोति ?

yatīndraḥ uttiṣṭhatu! yatīndraḥ uttiṣṭhati.
yatīndraḥ kiṁ karoti?
*Yatindra [should] stand up! Yatindra stands up. What does Yatindra do?*

यतीन्द्रः उत्तिष्ठति।

yatīndraḥ uttiṣṭhati.
*Yatindra stands up.*

आदित्यः उत्तिष्ठतु।

ādityaḥ uttiṣṭhatu.
*Aditya [should] stand up!*

यतीन्द्रः उत्तिष्ठति आदित्यः **अपि** उत्तिष्ठति।

yatīndraḥ uttiṣṭhati ādityaḥ **api** uttiṣṭhati.
*Yatindra stands up, aditya **also** stands up.*

आदित्यः उपविशतु।

ādityaḥ upaviśatu.
*Aditya [should] sit down!*

आदित्यः उपविशति।

ādityaḥ upaviśati.
*Aditya sits down.*

यतीन्द्रः अपि उपविशति।

yatīndraḥ api upaviśati.
*Yatindra also sits down.*

श्रीनिका लिखतु। शारदा अपि लिखतु।

śrīnikā likhatu. śāradā api likhatu.
*Shrinika, write! Sharada, you also write!*

श्रीनिका लिखति। शारदा अपि लिखति।

śrīnikā likhati. śāradā api likhati.
*Shrinika writes. Sharada also writes.*

---

नाटकं पश्यति। चित्रम् अपि पश्यति।

nāṭakaṁ paśyati. citram api paśyati.
*He observes the theatre play. He also observes the picture.*

अहं वाक्यद्वयं वदामि "रामः गच्छति। कृष्णः गच्छति।" भवन्तः वदन्तु "रामः गच्छति कृष्णः अपि गच्छति। " वदन्ति वा ?

ahaṁ vākyadvayaṁ vadāmi: "rāmaḥ gacchati. kṛṣṇaḥ gacchati." bhavantaḥ vadantu "rāmaḥ gacchati kṛṣṇaḥ api gacchati." vadanti vā?
*I say a pair of sentences: "Rama goes. Krishna goes." You say: "Rama goes, Krishna also goes." [Will] you say?*

रामः गच्छति। कृष्णः गच्छति।

rāmaḥ gacchati. kṛṣṇaḥ gacchati.
*Rama goes. Krishna goes.*

रामः गच्छति, कृष्णः अपि गच्छति।

rāmaḥ gacchati, kṛṣṇaḥ api gacchati.
*Rama goes, Krishna also goes.*

रमेशः उपविशति। कृष्णः उपविशति।

rameśaḥ upaviśati. kṛṣṇaḥ upaviśati.
*Ramesha sits down, Krishna sits down.*

रमेशः उपविशति, कृष्णः अपि उपविशति।

rameśaḥ upaviśati, kṛṣṇaḥ api upaviśati.
*Ramesha sits down, Krishna also sits down.*

---

*HINDI: I know Hindi and I **also** know Sanskrit. In the sense of **"also"** the word **api** is used.*

---

यतीन्द्र ! उत्तिष्ठतु। आगच्छतु।

yatīndra! uttiṣṭhatu. āgacchatu.
*Yatindra! Stand up! Come!*

अस्तु, आगच्छामि।

astu, āgacchāmi.
*All right, I come.*

जलं पिबतु।

jalaṁ pibatu.
*Drink water!*

अस्तु, पिबामि।

astu, pibāmi.
*All right, I drink.*

गच्छतु।

gacchatu.
*Go!*

अस्तु, गच्छामि।

astu, gacchāmi.
*All right, I go.*

भवान् गायति वा ? अस्तु, गायतु।

bhavān gāyati vā? astu, gāyatu.
*Do you sing? All right, sing!*

"पठतु संस्कृतं ... "

"paṭhatu saṁskṛtaṁ ..."
*Study Sanskrit ...*

मास्तु, मास्तु, मास्तु।

māstu, māstu, māstu ...
*Don't! Enough, enough ...*

अहं ताडयामि ।

ahaṁ tāḍayāmi.
*I beat.*

अस्तु, ताडयतु ।

astu, tāḍayatu.
*All right, beat!*

अस्तु । अस्तु ।

astu. astu.
*All right. All right.*

देवः प्रत्यक्षः भवति । सः भवान् पृच्छति, अथवा भवती पृच्छति "विद्यां ददातु । धनं ददातु ।" देवः किं वदति ?

devaḥ pratyakṣaḥ bhavati. saḥ bhavān pṛcchati, athavā bhavatī pṛcchati "vidyāṁ dadātu. dhanaṁ dadātu." devaḥ kiṁ vadati?
*God becomes visible to you. If you (masc.) or you (fem.) asked: "Give me knowledge! Give me money!" what would God say?*

तथा अस्तु ।

tathā astu.
*So be it!*

---

*HINDI: Using the word* ***astu*** *we express the meaning of accepting the statement (suggestion ...). Per example:*

---

अस्तु । आगच्छामि ।

astu. āgacchāmi.
*All right. I come.*

अस्तु, पिबामि ।

astu, pibāmi.
*All right, I drink.*

सुभाषितम् ।

**subhāṣitam.**
*Verse.*

वयम् इदानी् एकं सुभाषितं शृण्मः ।

vayam idānīm ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now, we [will] listen to one verse.*

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।

निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता ।

ṣaḍ doṣāḥ puruṣeṇeha hātavyā bhūtim icchatā
nidrā tandrā bhayaṁ krodhaḥ ālasyaṁ dīrgha-sūtratā

ṣaḍ – *six;* doṣāḥ – *mistakes;* puruṣeṇa – *by men;* iha – *here;* hātavyā – *to be destroyed;* bhūtim – *prosperity;* icchatā – *desiring;* nidrā – *sleep;* tandrā – *laziness;* bhayam – *fear;* krodhaḥ – *anger;* ālasyam – *idleness;* dīrgha-sūtratā – *procrastrination.*

*Six faults of men one should wish to destroy are: sleep, laziness, fear, anger, idleness, procrastrination.*

वयम् इदानीं यत् सुभाषितं श्रुतवन्तः तस्य अर्थः एवम् अस्ति ।

vayam idānīṁ yat subhāṣitaṁ śrutavāntaḥ tasya arthaḥ evam asti.
*Now that we have heard this verse, here is it's meaning.*

यः पुरुषः ऐश्वर्यम् इच्छति, समृद्धिम् इच्छति, अभिवृद्धिम् इच्छति, सम्पदम् इच्छति, सः एतान् सर्वान् दोषान् दूरी कुर्यात् ।

yaḥ puruṣaḥ aiśvaryam icchati, samṛddhim icchati, abhivṛddhim icchati, sampadam icchati, saḥ etān sarvān doṣān dūrī kuryāt.
*A man who wishes opulence, who wishes fortune, who wishes prosperity, who wishes wealth, that man should keep all these faults far away (give them up).*

के एते दोषाः ? निद्रा । सर्वात्र निद्रा न करणिया ।

ke ete doṣāḥ? nidrā. sarvātra nidrā na karaṇiyā.
*Which faults? Sleep. One shouldn't sleep everywhere.*

तन्द्रा । सर्वदा निद्रावस्थायाम् एव भवति । तथा न भवेत् । तन्द्रा न भवेत् ।

tandrā. sarvadā nidrāvasthāyām eva bhavati. tathā na bhavet. tandrā na bhavet.
*Lazyness. Always being only in sleepy state. It shouldn't be so. There shouldn't be any laziness.*

भयम् । सर्वेषु विषयेषु भयं न भवेत् ।

bhayam. sarveṣu viṣayeṣu bhayaṁ na bhavet.
*Fear. In all matters fear shouldn't be there.*

क्रोधः । कोपः । यत्र यत्र आवशकता अस्ति तत्र कोपः करणियः । यत्र कोपस्य आवशयकता नास्ति, तत्र क्रोधः न दर्शनीयः ।

krodhaḥ. kopaḥ. yatra yatra āvaśyakatā asti tatra kopaḥ karaṇiyaḥ. yatra kopasya āvaśakatā nāsti, tatra krodhaḥ na darśanīyaḥ.
*Anger. Rage. Wherever it is necesary, there one should get angry. But where rage is not necessary, there anger shouldn't be shown.*

आलस्यम् । वयं तु सर्वदा विद्यार्थिनः एव । जीवने सर्वस्मिन् क्षने अपि वयं शिक्षणं प्राप्नुंअः । अतः अस्मासु कदापि आलस्यं न भवेत् ।

ālasyam. vayaṁ tu sarvadā vidyārthinaḥ eva. jīvane sarvasmin kṣane api vayaṁ śikṣaṇaṁ prāpnumaḥ. ataḥ asmāsu kadāpi ālasyaṁ na bhavet.
*Idleness. We are always just learners. In life in every moment we are receiving lessons. Therefore there should never be idleness in us.*

दीर्घसूत्रता । कार्यम् अद्य करोमि, न श्वः करोमि, परश्वः करोमि, परश्वः सयंकाले करोमि । एवं विलम्बः न भवेत् । अद्यतनकार्यम् अद्य करोमि । इदानीम् एव करोमि । इति एवं भवेत् ।

dīrgha-sūtratā. kāryam adya karomi, na śvaḥ karomi, paraśvaḥ karomi, paraśvaḥ sayaṅ-kāle karomi. evaṁ vilambaḥ na bhavet. adyatana-kāryam adya karomi. idānīm eva karomi. iti evaṁ bhavet.
*Procrastrination. I do the work today, not tomorow, after tomorrow, after tomorrow in the evening. There shouldn't be such delaying. I do todays work today. I do it now. Thus it should be.*

---

## कथा

**kathā**
**Story**

अहम् इदानीम् एकां लघुकथां वदामि । सरला कथा अस्ति ।

aham idānīm ekaṁ laghu kathāṁ vadāmi.
*Now I (will) tell you a simple story.*

कश्चन आश्रमः । तत्र धौम्यः इति महर्षिः पाठयति स्म । बहुशिष्याः तस्य समीपे पठनार्थम् आगच्छन्ति स्म ।

kaścana āśramaḥ. tatra dhaumyaḥ iti maharṣiḥ pāṭhayati sma. bahu-śiṣyāḥ tasya samīpe paṭhanārtham āgacchanti sma.
*[There was] some ashram. There a great sage named Dhaumya was teaching. Many disciples were coming to him to study.*

एकदा महती वृष्टिः आसीत् । क्षेत्रं सर्वम् अपि जलपूर्णम् आसीत् । जलप्रवाहः आसीत् ।

ekadā mahatī vṛṣṭhiḥ āsīt. kṣetraṁ sarvam api jala-pūrṇam āsīt. jala-pravāhaḥ āsīt.
*Once there was a heavy rain. All the field was filled with water. There was a flood.*

धौम्यः शिष्यम् आह्वयति, वदति अपि "शिष्य ! कृषिक्षेत्रं सर्वं जलपूर्णम् अस्ति। सर्वत्र प्रवाहः अस्ति। अतः कुत्रापि जलबन्धः नष्टः स्यत्। भवान् कृषिक्षेत्रं गत्वा तत् निवारयतु" इति वदति।

dhaumyaḥ śiṣyam āhvayati, vadati api: "śiṣya! kṛṣi-kṣetraṁ sarvaṁ jala-pūrṇam asti. sarvatra pravāhaḥ asti. ataḥ kutrāpi jala-bandhaḥ naṣṭaḥ syat. bhavān kṛṣi-kṣetraṁ gatvā tat nivārayatu" iti vadati.
*Dhaumya calls a student and says: "Student! All the field is full of water. Flood is everywhere. Therefore somewhere the dam might be destroyed. After going to the field remove the fault," so he said.*

शिष्यः कृषिक्षेत्रं गच्छति सर्वत्र पश्यति। एकत्र जलबन्धः नष्टः अस्ति।

śiṣyaḥ kṛṣi-kṣetraṁ gacchati sarvatra paśyati. ekatra jala-bandhaḥ naṣṭaḥ asti.
*The student goes to the field and looks everywhere. In one place the dam is destroyed.*

शिष्यः चिन्तयति। यत्र जलबन्धः नष्टः अस्ति तत्र मृत्तिकां स्थापयति। किन्तु जलप्रवाहः अधिकः अस्ति इति कारणतः तत् न तिष्ठति।

śiṣyaḥ cintayati. yatra jala-bandhaḥ naṣṭaḥ asti tatra mṛttikāṁ sthāpayati. kintu jala-pravāhaḥ adhikaḥ asti iti kāraṇataḥ tat na tiṣṭhati.
*The student thingks. Where the dam is destroyed, there he puts soil. But the flood is great, due to that reason it doesn't hold.*

बहुजलं तत्र गच्छति, अतः शिष्यः चिन्तयति "किं करोमि ? एवं करोमि" इति चिन्तयति। स्वस्य शरीरम् एव तत्र स्थापयति। स्वशिरः स्थापयति जलबन्धं सम्यक् करोति।

bahu-jalaṁ tatra gacchati, ataḥ śiṣyaḥ cintayati "kiṁ karomi? evaṁ karomi," iti cintayati. svasya śarīram eva tatra sthāpayati. svaśiraḥ sthāpayati jala-bandhaṁ samyak karoti.
*A lot of water flows there therefore the student thinks: "What do I do? Thus I do," he thinks. He set there his own body. He put his body there and fixed the ban.*

एवं जलबन्धं सम्यक् कर्तुं स्वशरीरं स्थापयित्वा, तत्र जलबन्धस्य समीकरणं करोति।

evaṁ jala-bandhaṁ samyak kartuṁ svaśarīraṁ sthāpayitvā, tatra jala-bandhasya samīkaraṇaṁ karoti.
*Thus to fix the ban he set his body there and fixed the dam.*

किञ्चित् समयानन्तरं शिष्यः न आगतः। गुरुः चिन्तयति "शिष्यः कुत्र गतः ? न आगतः।" इति चिन्तयित्वा कृषिक्षेत्रं गच्छति तत्र पश्यति।

kiñcit samayānantaraṁ śiṣyaḥ na āgataḥ. guruḥ cintayati: "śiṣyaḥ kutra gataḥ? na āgataḥ." iti cintayitvā kṛṣi-kṣetraṁ gacchati tatra paśyati.
*Some time later the student didn't come back. The teacher thinks: "Where is the student? He didn't come." Thus thinking he goes to the field and there he looks.*

शिष्यः जलबन्धे स्वशरीरं स्थापयित्वा शयनं कृतवान् अस्ति। गुरुः तं पश्यति।

śiṣyaḥ jala-bandhe svaśarīraṁ sthāpayitvā śayanaṁ kṛtavān asti. guruḥ taṁ paśyati.
*The student puting his body in the dam lay down. Guru looks at him.*

गुरोः शिष्यं दृष्ट्वा अतीव आनन्दः भवति। सः अतीव सन्तुष्टः तस्मै ज्ञानं ददाति। सन्तोषेण तम् आलिङ्गति च।

guroḥ śiṣyaṁ dṛṣṭvā atīva ānandaḥ bhavati. saḥ atīva santuṣṭaḥ tasmai jñānaṁ dadāti. santoṣeṇa tam āliṅgati ca.

*Seing the student the teacher was very happy. He is very satisfied and gives him knowledge. He embraces him with joy.*

एवं स्वशरीरेण जलबन्धं समीकृत्य गुरोः वचनस्य परिपालनं कृतवन्।

evaṁ svaśarīreṇa jala-bandhaṁ samīkṛtya guroḥ vacanasya paripālanaṁ kṛtavan.
*Thus by fixing the dam with his body he followed the words of his teacher.*

कर्तव्यं सम्यक् रीत्या समाप्तवान्। सः एव शिष्यः अस्ति आरूणिः इति। तस्य उद्दालकः इति अपरं नामधेयम् अस्ति।

kartavyaṁ samyak rītyā samāptavān. saḥ eva śiṣyaḥ asti ārūṇiḥ iti. tasya uddālakaḥ iti aparaṁ nāmadheyam asti.
*He completed his duty in proper manner. This disciple is known as Aruni. He also had another name, Uddalaka.*

अहो ! शिष्यस्य कर्तव्या परता।

aho! śiṣyasya kartavyā paratā.
*Oh! The disciple's duty consciousness is great!*

कथायाः अर्थः ज्ञातः किल ?

kathāyāḥ arthaḥ jñātaḥ kila?
*Have you understood the story?*

आम्। ज्ञातः।

ām. jñātaḥ.
*Yes, we've understood.*

धन्यवादः। नमो नमः।

dhanyavādaḥ. namo namaḥ.
*Thank you. Salutations!*

नमो नमः।

namo namaḥ.
*Salutations.*

---

**Teacher:**

शान्तला

Śāntalā

**Students:**

| पल्लवी | शारदा | श्रीनिका | स्नेहा | |
|---|---|---|---|---|
| Pallavī | Śāradā | Śrīnikā | Snehā | |
| आरभी | आरती | स्वाती | रञ्जिता | लहरी |
| Ārabhī | Āratī | Svātī | Rañjitā | Laharī |

| यतीन्द्रः | आदित्यः | नकुलः | यशवन्तः |
|---|---|---|---|
| Yatīndraḥ | Ādityaḥ | Nakulaḥ | Yaśavantaḥ |
| सन्दीपः | भरतः | प्रमोदः | प्रशान्तः |
| Sandīpaḥ | Bharataḥ | Pramodaḥ | Praśāntaḥ |
| सुहासः | | | |
| Suhāsaḥ | | | |

---

# LESSON 10 – OVERVIEW

*In the tenth lesson you will do further practice of* **praśnārthakas** *(interrogatives):* **kim, kutra, kati, kadā, kutaḥ, kim artham, katham**. *You will learn* **ktavatu-pratyāya** *(ending* **-vat**) *used to express activities in the past in a simple way. You will practice* **loṭ-lakāra** *(imperative tense or mood) in connection with* **sambodhana** *(imperative case). You will also begin to learn* **lṛt-lakāra** *(future tense).*

## KTAVATU-PRATYĀYA (ENDING "-VAT" – EXPRESSING PAST TENSE):

**puṁliṅga-ekavācanam** *(masc. sing.)* **-vān**
**strīliṅga-ekavācanam** *(fem. sing.)* **- vatī**

| | | | | | | |
|---|---|---|---|---|---|---|
| *m.* | पठति | paṭhati | *(he, she) reads* | पठितवान् | paṭhitavān | *he read* |
| *f.* | गच्छति | gacchati | *(he, she) goes* | गतवती | gatavatī | *she went* |

## BHAVIṢYAT-KĀLA (FUTURE TENSE)

**uttama-puruṣa-ekavācanam** *(1st pers. sing.)* **-syāmi (-ṣyāmi)**
**uttama-puruṣa-bahuvācanam** *(1st pers. pl.)* **-syāmaḥ (-ṣyāmaḥ)**

| | | | | | |
|---|---|---|---|---|---|
| पठिष्यामि | paṭhiṣyāmi | *I will study* | पठिष्यामः | paṭhiṣyāmaḥ | *we will study* |
| ज्ञास्यामि | jñāsyāmi | *I will know* | ज्ञास्यामः | jñāsyāmaḥ | *we will know* |

## SAMBHODANAM (IMPERATIVE CASE):

| | | | | | |
|---|---|---|---|---|---|
| राजेन्द्रः | rājendraḥ | *Rajendra* => | राजेन्द्र | rājendra | *Rajendra!* |
| अनीता | anītā | *Anita* => | अनीते | anīte | *Anita!* |

# Lesson 10

नमो नमः ।

namo namaḥ.
*Respects.*

नमो नमः ।

namo namaḥ.
*Respects.*

केचन प्रश्नार्थकाः सन्ति । तत्र सप्त प्रसिद्धाः सन्ति ।

यथा "किम्" । वदन्तु ।

kecana praśnārthakāḥ santi. tatra sapta prasiddhāḥ santi. yathā "kim". vadantu.
*There are some interrogatives. There are seven most important (famous, well known). Like "what". Say!*

| | | | |
|---|---|---|---|
| किम् | कुत्र | कति | कदा |
| kim | kutra | kati | kadā |
| *what* | *where* | *how many* | *when* |

| | | |
|---|---|---|
| कुतः | कथम् | किमर्थम् |
| kutaḥ | katham | kim artham |
| *from where* | *how* | *what for, why* |

अहम् इदानीम् उत्तरं वदामि, भवन्तः सर्वेऽपि एतेषां अर्थं जानन्ति । अहम् उत्तरं वदामि, भवन्तः प्रश्नं पृच्छन्ति ।

aham idānīm uttaraṁ vadāmi, bhavantaḥ sarve 'pi eteṣām arthaṁ jānanti. aham uttaraṁ vadāmi, bhavantaḥ praśnaṁ pṛcchanti.
*Now I [will] say the answer, you also know the meaning. I say the answer, you ask the question.*

यथा – "रामः पुस्तकं पठति ।"

yathā – "rāmaḥ pustakaṁ paṭhati."
*Like – "Rama reads a book."*

रामः किं पठति ?

rāmaḥ kiṁ paṭhati?
*What does Rama read? (Lit: Rama reads what?)*

गीता पुस्तकं पठति ।

gītā pustakaṁ paṭhati.
*Gita reads a book.*

गीता किं पठति ?

gītā kiṁ paṭhati?
*Gita reads what?*

लता जलं पिबति ।

latā jalaṁ pibati.
*Lata drinks water.*

लता किं पिबति ?

latā kiṁ pibati?
*Lata drinks what?*

तत् कृष्णफलकम् ।

tat kṛṣṇaphalakam.
*That [is] a blackboard.*

तत् किम् ?

tat kim?
*What [is] that?*

पुनः वदन्तु ।

punaḥ vadantu.
*Say again!*

तत् किम् ?

tat kim?
*What [is] that?*

दण्डदीपः तत्र अस्ति ।

daṇḍadīpaḥ tatra asti.
*Tube bulb is there.*

दण्डदीपः कुत्र अस्ति ?

daṇḍadīpaḥ kutra asti?
*Where is the tube bulb?*

लखनऊ उत्तरप्रदेशे अस्ति ।

lakhanaū uttara-pradeśe asti.
*Lucknow is in Uttar Pradesh.*

लखनऊ कुत्र अस्ति ?

lakhanaū kutra asti?
*Lucknow is where?*

मथुरा उत्तरप्रदेशे अस्ति ।

mathurā uttara-pradeśe asti.
*Mathura is in Uttar Pradesh.*

मथुरा कुत्र अस्ति ?

mathurā kutra asti?
*Where is Mathura?*

लाल्भाग् बेङ्गलूरुनगरे अस्ति ।

lālbhāg beṅgalūru-nagare asti.
*Lalbhag is in Bangalore.*

लाल्भाग् कुत्र अस्ति ?

lālbhāg kutra asti?
*Lalbhag is in where?*

अधिकारी कार्यालये अस्ति ।

adhikārī kāryālaye asti.
*Officer is in the office.*

अधिकारी कुत्र अस्ति ?

adhikārī kutra asti?
*Where is the officer?*

जनः गृहे अस्ति ।

janaḥ gṛhe asti.
*Man is at home.*

जनः कुत्र अस्ति ?

janaḥ kutra asti?
*Where is the man?*

---

अत्र नव बालकाः सन्ति ।

atra nava bālakāḥ santi.
*Here are nine boys.*

प्रश्नं कुर्वन्तु ।

praśnaṁ kurvantu.
*Ask the question!*

अत्र कति बालकाः सन्ति ?

atra kati bālakāḥ santi?
*How many boys are here?*

दश दण्डदीपाः सन्ति ।

daśa daṇḍadīpāḥ santi.
*[There] are ten tube bulbs.*

कति दण्डदीपाः सन्ति ?

kati daṇḍadīpāḥ santi?
*How many tube bulbs [are there]?*

मार्गे नव वाहनानि गच्छन्ति ।

mārge nava vāhanāni gacchanti.
*Nine vehicles go on the street.*

मार्गे कति वाहनानि गच्छन्ति ?

mārge kati vāhanāni gacchanti?
*How many vehicles go on the street?*

मम समीपे दश पुस्तकानि सन्ति ।

mama samīpe daśa pustakāni santi.
*Ten books are next to me.*

भवत्याः समीपे कति पुस्तकानि सन्ति ?

bhavatyāḥ samīpe kati pustakāni santi?
*How many books are next to you (fem.)?*

सूर्योदयः प्रतःकाले भवति ।

sūryodayaḥ prataḥ-kāle bhavati.
*Sunrise is in the morning.*

सूर्योदयः कदा भवति ?

sūryodayaḥ kadā bhavati?
*When is sunrise?*

सूर्यास्तः सायङ्काले भवति ।

sūryāstaḥ sāyaṅ-kāle bhavati.
*Sunset is in the evening.*

सूर्यास्तः कदा भवति ?

sūryāstaḥ kadā bhavati?
*Sunset is when?*

रामलालः प्रतःकाले कार्यालयं गच्छति ।

rāmalālaḥ prataḥ-kāle kāryālayaṁ gacchati.
*Ramalala goes to the office in the morning.*

रामलालः कदा कार्यालयं गच्छति ?

rāmalālaḥ kadā kāryālayaṁ gacchati?
*When does Ramalala go to the office?*

रमेशः दशवादने विद्यालयं गच्छति ।

rameśaḥ daśa-vādane vidyālayaṁ gacchati.
*Ramesha goes to school at ten o'oclock.*

रमेशः कदा विद्यालयं गच्छति ?

rameśaḥ kadā vidyālayaṁ gacchati?
*When does Ramesha go to school?*

सुधा सायङ्काले नृत्याभ्यासं करोति ।

sudhā sāyaṅ-kāle nṛtyābhyāsaṁ karoti.
*Sudha practices dancing in the evening.*

सुधा कदा नृत्याभ्यासं करोति ?

sudhā kadā nṛtyābhyāsaṁ karoti?
*When does Sudha practice dancing.*

मित्रं विदेशतः आगच्छति ।

mitraṁ videśataḥ āgacchati.
*Friend (neut.) comes from abroad.*

मित्रं कुतः आगच्छति ?

mitraṁ kutaḥ āgacchati?
*Friend comes from where?*

बन्धुः लखनऊतः आगच्छति ।

bandhuḥ (masc.) lakhanaūtaḥ āgacchati.
*Friend comes from Lucknow.*

बन्धुः कुतः आगच्छति ?

bandhuḥ kutaḥ āgacchati?
*Friend comes from where?*

सखी चेन्नैतः आगच्छति ।

sakhī cennaitaḥ āgacchati.
*Friend (fem.) comes from Chennai.*

सखी कुतः आगच्छति ?

sakhī kutaḥ āgacchati?
*The friend comes from where?*

गङ्गा हिमालयतः प्रवहति ।

gaṅgā himālayataḥ pravahati.
*Ganga flows from Himalaya.*

गङ्गा कुतः प्रवहति ?

gaṅgā kutaḥ pravahati?
*Ganga flows from where?*

प्रकशः दण्डदीपतः आगच्छति ।

prakaśaḥ daṇḍadīpataḥ āgacchati.
*Light comes from the tube bulb.*

प्रकाशः कुतः आगच्छति ?

prakāśaḥ kutaḥ āgacchati?
*Light comes from where?*

शिक्षणम् उत्तमम् अस्ति ।

śikṣaṇam uttamam asti.
*The lesson is very good.*

शिक्षणं कथम् अस्ति ?

śikṣaṇaṁ katham asti?
*How is the lesson?*

आरोग्यं समीचीनम् अस्ति ।

ārogyaṁ samīcīnam asti.
*The health is very good.*

आरोग्यं कथम् अस्ति ?

ārogyaṁ katham asti?
*How is the health?*

स्वास्थ्यम् उत्तमम् अस्ति ।

svāsthyam uttamam asti.
*The health is very good.*

स्वास्थ्यं कथम् अस्ति ?

svāsthyaṁ katham asti?
*How is the health?*

अनीता पठनार्थं विद्यालयं गच्छति ।

anītā paṭhanārthaṁ vidyālayaṁ gacchati.
*Anita goes to school for study.*

अनीता किमर्थं विद्यालयं गच्छति ?

anītā kim arthaṁ vidyālayaṁ gacchati?
*What does Anita go to school for?*

राधाकृष्णः औषधार्थं चिकित्सालयं गच्छति ।

rādhākṛṣṇaḥ auṣadhārthaṁ cikitsālayaṁ gacchati.
*Radhakrishna goes to the hospital for medicine.*

राधाकृष्णः किमर्थं चिकित्सालयं गच्छति ?

rādhākṛṣṇaḥ kim arthaṁ cikitsālayaṁ gacchati?
*What for does Radhakrishna go to the hospital?*

रमा पठनार्थं ग्रन्थालयं गच्छति ।

ramā paṭhanārthaṁ granthālayaṁ gacchati.
*Rama (fem.) goes to the library for study.*

रमा किमर्थं ग्रन्थालयं गच्छति ?

ramā kim arthaṁ granthālayaṁ gacchati?
*What for does Rama (fem.) go to the library?*

सा आनन्दार्थं नृत्यति ।

sā ānandārthaṁ nṛtyati.
*She dances for joy.*

सा किमर्थं नृत्यति ?

sā kim arthaṁ nṛtyati?
*What for does she dance?*

गृहिणी भोजनार्थं पाकशालां गच्छति ।

gṛhiṇī bhojanārthaṁ pākaśālāṁ gacchati.
*Housewife goes to the kitchen for meal.*

गृहिणी किमर्थं पाकशालां गच्छति ?

gṛhiṇī kim arthaṁ pākaśālāṁ gacchati?
*Why does the housewife go to the kitchen?*

---

भवन्तः एतेषां अर्थं सम्यक् ज्ञातवन्तः । इदानीं

भवन्तः मां प्रश्नं पृच्छन्तु अहम् उत्तरं वदामि ।

bhavantaḥ eteṣām arthaṁ samyak jñātavantaḥ. idānīṁ bhavantaḥ māṁ praśnaṁ pṛcchantu aham uttaraṁ vadāmi.
*You know well the meaning of these [words]. Now you ask me a question, I [will] say the answer.*

भवत्याः स्वास्थ्यं कथम् अस्ति ?

bhavatyāḥ svāsthyaṁ katham asti?
*How is your health?*

मम स्वास्थ्यम् उत्तमम् अस्ति ।

mama svāsthyam uttamam asti.
*My health is very good.*

भवती कुत्र वसति ?

bhavatī kutra vasati?
*Where do you reside?*

अहं गिरिनगरे वसामि ।

ahaṁ girinagare vasāmi.
*I reside in Girinagar.*

भवती कदा पाकं करोति ?

bhavatī kadā pākaṁ karoti?
*When do you cook?*

अहम् एकादशवादने पाकं करोमि ।

aham ekādaśa-vādane pākaṁ karomi.
*I cook at eleven o'clock.*

भवती कुतः मोदकं आनयति ?

bhavatī kutaḥ modakam ānayati?
*Where do you bring the sweet dish from?*

अहं आपणतः मोदकं आनयामि ।

aham āpaṇataḥ modakam ānayāmi.
*I bring the sweet dish from the store.*

भवती किं वदति ?

bhavatī kiṁ vadati?
*What do you say?*

अहं वाक्यं वदामि ।

ahaṁ vākyaṁ vadāmi.
*I say a sentence.*

भवत्याः गृहे कति जनाः सन्ति ?

bhavatyāḥ gṛhe kati janāḥ santi?
*How many people are at your home?*

मम गृहे चत्वारः जनाः सन्ति ।

mama gṛhe catvāraḥ janāḥ santi.
*[There] are four people at my home.*

भवती किमर्थं पठति ?

bhavatī kim arthaṁ paṭhati?
*Why do you read?*

अहं ज्ञानार्थं पठामि ।

ahaṁ jñānārthaṁ paṭhāmi.
*I read for knowledge.*

---

इदानीं भवत्सु एकः आगच्छतु । अनन्तरं भवन्तः सर्वे तं प्रश्नं पृच्छन्तु ।

idānīṁ bhavatsu ekaḥ āgacchatu. anantaraṁ bhavantaḥ sarve taṁ praśnaṁ pṛcchantu.
*Now [let] one of you come! Then all of you ask him question[s].*

बसवराज ! उत्तिष्ठतु । भवान् आगच्छतु ।

basavarāja! uttiṣṭhatu! bhavān āgacchatu.
*Basavaraja! Stand up! You come!*

इदानीं भवन्तः प्रश्नं पृच्छन्ति, सः उत्तरं वदति ।

idānīṁ bhavantaḥ praśnaṁ pṛcchanti, saḥ uttaraṁ vadati.
*No you (pl.) ask a question, he [will] say the answer.*

भवान् कदा निद्रां **करोमि** ?

bhavān kadā nidrāṁ **karomi**?
*When do you I [go to] sleep?* ***(Mistake!)***

न, न । भवान् कदा निद्रां **करोति** ?

na, na. bhavān kadā nidrāṁ **karoti**?
*No, no. When do you [go to] sleep?* ***(Teacher corrects!)***

पुनः पृच्छतु ।

punaḥ pṛcchatu.
*Ask again!*

भवान् कदा निद्रां करोति ?

bhavān kadā nidrāṁ karoti?
*When do you [go to] sleep?*

अहं दशवादने निद्रां करोमि ।

ahaṁ daśa-vādane nidrāṁ karomi.
*I [go to] sleep at ten o'clock.*

भवतः गृहे कति जनाः सन्ति ?

bhavataḥ gṛhe kati janāḥ santi?
*How many people are at your home?*

मम गृहे दश जनाः सन्ति ।

mama gṛhe daśa janāḥ santi.
*[There] are ten people at my home.*

भवती कुतः आगतवती ?

bhavatī kutaḥ āgatavatī?
*Where did you (fem.) come from?*

भवान् कुतः आगच्छति ?

bhavān kutaḥ āgacchati?
*Where do you (masc.) come from?*

अहं मैसूरुतः अगच्छामि ।

ahaṁ maisūrutaḥ agacchāmi.
*I come from Mysore.*

भवान् किं खादति ?

bhavān kiṁ khādati?
*What do you eat?*

अहं लड्डुकं खादामि ।

ahaṁ laḍḍukaṁ khādāmi.
*I eat a sweet.*

भवतः अध्ययनं कथं प्रचलति ?

bhavataḥ adhyayanaṁ kathaṁ pracalati?
*How does your study proceed?*

मम अध्ययनं सम्यक् प्रचलति ।

mama adhyayanaṁ samyak pracalati.
*My study proceeds well.*

भवान् किमर्थं गीतां गायति ?

bhavān kim arthaṁ gītāṁ gāyati?
*Why do you sing a song?*

अहम् आनन्दार्थं गीतां गायामि ।

aham ānandārthaṁ gītāṁ gāyāmi.
*I sing a song for pleasure.*

भवान् कुत्र वसति ?

bhavān kutra vasati?
*Where do you reside?*

अहं मैसूरुनगरे वसामि ।

ahaṁ maisūru-nagare vasāmi.
*I reside in Mysore.*

---

*HINDI: The interrogative words (listed above) allow us to ask many questions.*

---

मञ्जुनाथ ! उत्तिष्ठतु । आगच्छतु । गच्छतु ।

mañjunātha! uttiṣṭhatu. āgacchatu. gacchatu.
*Manjunatha! Stand up! Come. go.*

मञ्जुनाथः गच्छति ।

mañjunāthaḥ gacchati.
*Manjunatha goes.*

ओ, गृहं गतवान् ।

o, gṛhaṁ gatavān.
*Oh, he went home.*

मञ्जुनाथः गतवान् ।

mañjunāthaḥ gatavān.
*Manjunatha went.*

मञ्जुनाथ ! आगच्छतु ।

mañjunātha! āgacchatu!
*Manjunatha! Come!*

मञ्जुनाथः न गतवान् ।

mañjunāthaḥ na gatavān.
*Manjunatha didn't go.*

मञ्जुनाथः आगतवान् ।

mañjunāthaḥ āgatavān.
*Manjunatha came.*

उपविशतु ।

upaviśatu.
*Sit down!*

मञ्जुनाथः उपविष्टवान् ।

mañjunāthaḥ upaviṣṭavān.
*Manjunatha sat down.*

| | |
|---|---|
| उपविशति<br>upaviśati<br>*(he, she) sits* | उपविष्टवान्<br>upaviṣṭavān<br>*he sat* |
| गच्छति<br>gacchati<br>*(he, she) goes* | गतवान्<br>gatavān<br>*he went* |
| पठति<br>paṭhati<br>*(he, she) reads* | पठितवान्<br>paṭhitavān<br>*he read* |
| लिखति<br>likhati<br>*(he, she) writes* | लिखितवान्<br>likhitavān<br>*he wrote* |
| करोति<br>karoti<br>*(he, she) does* | कृतवान्<br>kṛtavān<br>*he did* |

जलम् पिबतु ।

jalam pibatu.
*Drink water!*

वेदवती जलं पीतवती ।

vedavatī jalaṁ pītavatī.
*Vedavati (she) drank the water.*

---

*HINDI: The ending* ***-vān*** *is used in the meaning of the verb to past tense in masculine,* ***-vatī*** *in feminine.*

---

अम्बिके ! उत्तिष्ठतु । आगच्छतु । "रामः" लिखतु ।

ambike! uttiṣṭhatu. āgacchatu. "rāmaḥ" likhatu.
*Ambika! Stand up! Come! Write: "Rama"!*

अम्बिका लिखति । अम्बिका लिखितवती ।

ambikā likhati. ambikā likhitavatī.
*Ambika writes. Ambika wrote.*

गच्छतु । उपविशतु ।

gacchatu. upaviśatu.
*Go! Sit down!*

| | |
|---|---|
| गच्छति<br>gacchati<br>*(he, she) goes* | गतवती<br>gatavatī<br>*(she) went* |
| आगच्छति<br>āgacchati<br>*(he, she) comes* | आगतवती<br>āgatavatī<br>*(she) came* |
| लिखति<br>likhati<br>*(he, she) writes* | लिखितवती<br>likhitavatī<br>*(she) wrote* |

मञ्जुनाथः गतवान् ।

mañjunāthaḥ gatavān.
*Manjunatha went.*

अम्बिका आगतवती ।

ambikā āgatavatī.
*Ambika came.*

अम्बिका गतवती ।

ambikā gatavatī.
*Ambika went.*

| | |
|---|---|
| गतवान् | गतवती |
| gatavān | gatavatī |
| *(he) went* | *(she) went* |

बालकः गतवान् । बालिका गतवती ।

bālakaḥ gatavān. bālikā gatavatī.
*The boy went. The girl went.*

बालकः पठितवान् । बालिका पठितवती ।

bālakaḥ paṭhitavān. bālikā paṭhitavatī.
*The boy read. The girl read.*

बालकः क्रीडितवान् । बालिका क्रीडितवती ।

bālakaḥ krīḍitavān. bālikā krīḍitavatī.
*The boy played. The girl played.*

बालकः उक्तवान् । बालिका उक्तवती ।

bālakaḥ uktavān. bālikā uktavatī.
*The boy said. The girl said.*

बालकः पृष्टवान् । बालिका पृष्टवती ।

bālakaḥ pṛṣṭavān. bālikā pṛṣṭavatī.
*The boy asked. The girl asked.*

बालकः स्थापितवान् । बालिका स्थापितवती ।

bālakaḥ sthāpitavān. bālikā sthāpitavatī.
*The boy put down. The girl put down.*

अहं पाठं कृतवती । भवान् किं कृतवान्?

ahaṁ pāṭhaṁ kṛtavatī. bhavān kiṁ kṛtavān?
*I studied. What did you do?*

अहं भोजनं कृतवान् ।

ahaṁ bhojanaṁ kṛtavān.
*I ate.*

अहं पाठं पठितवान् ।

ahaṁ pāṭhaṁ paṭhitavān.
*I studied the lesson.*

अहं चायं पीतवती ।

ahaṁ cāyaṁ pītavatī.
*I drank (fem.) tea.*

अहं ध्यानं कृतवती ।

ahaṁ dhyānaṁ kṛtavatī.
*I meditated (fem.).*

अहं पाकं कृतवती ।

ahaṁ pākaṁ kṛtavatī.
*I cooked (fem.).*

---

इदानीम् एकम् अभ्यासं कुर्मः ।

idānīm ekam abhyāsaṁ kurmaḥ.
*Now we do one exercise.*

"अहं पाठं पठामि" इति अहं वदामि, भवत्सु कश्चित् "अहं पाठं पठितवान्" वदति भवतीषु काचित् "अहं पाठं पठितवती" इति वदति ।

"ahaṁ pāṭhaṁ paṭhāmi" iti ahaṁ vadāmi, bhavatsu kaścit "ahaṁ pāṭhaṁ paṭhitavān" vadati bhavatīṣu kācit "ahaṁ pāṭhaṁ paṭhitavatī" iti vadati.
*I say "I study the lesson", [and then let] one of you (turning to the men) say: "I studied (masc.) the lesson," [and] one of you (turning to the women) say: "I studied (fem.) the lesson."*

उदहरणम् । अहं वाक्यं वदामि ।

udaharaṇam. ahaṁ vākyaṁ vadāmi.
*Practice. I say a sentence.*

अहं वाक्यं उक्तवान्। अहं वाक्यं उक्तवती।

ahaṁ vākyam uktavān. ahaṁ vākyam uktavatī.
*I said (masc.) a sentence. I said (fem.) a sentence.*

अहं ग्रामं गच्छामि।

ahaṁ grāmaṁ gacchāmi.
*I go to the village.*

अहं ग्रामं गतवान्।

ahaṁ grāmaṁ gatavān.
*I went (masc.) to the village.*

अहं काव्यं लिखामि।

ahaṁ kāvyaṁ likhāmi.
*I write poetry.*

अहं काव्यं लिखितवान्। अहं काव्यं लिखितवती।

ahaṁ kāvyaṁ likhitavān. ahaṁ kāvyaṁ likhitavatī.
*I wrote (masc.) poetry. I wrote (fem.) poetry.*

अहं चौर्यं करोमि।

ahaṁ cauryaṁ karomi.
*I steal. (Lit.: I do theft.)*

अहं चौर्यं कृतवान्। अहं चौर्यं कृतवती।

ahaṁ cauryaṁ kṛtavān. ahaṁ cauryaṁ kṛtavatī.
*I stole (masc.). I stole (fem.) (Lit: I did theft.)*

---

*HINDI:* ***gatavān, āgatavān, upaviṣṭavān*** *– all these have the meaning of past tense. From the present tense the root verb form of* ***kriyāpada*** *is changed with the ending* ***-vān*** *in masculine and with the ending* ***-vatī*** *in feminine.*

---

अहं गच्छामि। अहम् अद्य गच्छामि। श्वः गमिष्यामि।

ahaṁ gacchāmi. aham adya gacchāmi. śvaḥ gamiṣyāmi.
*I go. Today I go. Tomorrow I will go.*

गच्छामि - गमिष्यामि।

gacchāmi – gamiṣyāmi.
*I go – I will go.*

अहं पठामि। अद्य पठामि। श्वः पठिष्यामि।

ahaṁ paṭhāmi. adya paṭhāmi. śvaḥ paṭhiṣyāmi.
*I study. Today I study. Tomorrow I will study.*

पठामि - पठिष्यामि।

paṭhāmi – paṭhiṣyāmi.
*I study – I will study.*

गच्छामि - गमिष्यामि।

gacchāmi – gamiṣyāmi.
*I go – I will go.*

पिबामि - पास्यामि।

pibāmi – pāsyāmi.
*I drink – I will drink.*

क्रीडामि - क्रीडिष्यामि।

krīḍāmi – krīḍiṣyāmi.
*I play – I will play.*

वदामि - वदिष्यामि।

vadāmi – vadiṣyāmi.
*I say – I will say.*

लिखामि - लिखिष्यामि।

likhāmi – likhiṣyāmi.
*I write – I will write.* **(Mistake!)**

लेखिष्यामि। वदन्तु।

lekhiṣyāmi. vadantu. **(Teacher corrects!)**
*I will write. Say!*

लेखिष्यामि।

lekhiṣyāmi.
*I will write.*

अहं श्वः काव्यं लेखिष्यामि।

ahaṁ śvaḥ kāvyaṁ lekhiṣyāmi.
*Tomorrow I will write poetry.*

अहं श्वः चेन्नैनगरं गमिष्यामि ।

ahaṁ śvaḥ cennai-nagaraṁ gamiṣyāmi.
*Tomorrow I will go to the city of Chennai.*

अहं श्वः दूरदर्शनं द्रक्ष्यामि ।

ahaṁ śvaḥ dūradarśanaṁ drakṣyāmi.
*Tomorrow I will watch television.*

पश्यामि – द्रक्ष्यामि ।

paśyāmi – drakṣyāmi.
*I watch – I will watch.*

अहं गमिष्यामि । मञ्जुनाथः गमिष्यति । वेदावती गमिष्यति ।

ahaṁ gamiṣyāmi. mañjunāthaḥ gamiṣyati. vedāvatī gamiṣyati.
*I will go. Manjunatha will go. Vedavati will go.*

अहं गमिष्यामि । भवन्तः किं किं करिष्यन्ति ?

ahaṁ gamiṣyāmi. bhavantaḥ kiṁ kiṁ kariṣyanti?
*I will go. What [various activities] will you do?*

अहं पत्रं लेखिष्यामि ।

ahaṁ patraṁ lekhiṣyāmi.
*I will write a letter.*

अहं क्रीडां क्रीडिष्यामि ।

ahaṁ krīḍāṁ krīḍiṣyāmi.
*I will play a game.*

अहं क्षीरं पास्यामि ।

ahaṁ kṣīraṁ pāsyāmi.
*I will drink milk.*

अहं ग्रन्थं पठिष्यामि ।

ahaṁ granthaṁ paṭhiṣyāmi.
*I will read a book.*

अहं चित्रं द्रक्ष्यामि ।

ahaṁ citraṁ drakṣyāmi.
*I will watch a picture.*

अहं कार्यां करिष्यामि ।

ahaṁ kāryāṁ kariṣyāmi.
*I will do the work.*

अहम् एकवचनं वदामि, भवन्तः बहुवचनं वदन्ति ।

aham ekavacanaṁ vadāmi, bhavantaḥ bahuvacanaṁ vadanti.
*I say singular, you say plural.*

अहं ग्रन्थं पठिष्यामि ।

ahaṁ granthaṁ paṭhiṣyāmi.
*I will read a book.*

वयं ग्रन्थं पठिष्यामः ।

vayaṁ granthaṁ paṭhiṣyāmaḥ.
*We will read a book.*

अहं काव्यं लेखिष्यामि ।

ahaṁ kāvyaṁ lekhiṣyāmi.
*I will write poetry.*

वयं काव्यं लेखिष्यामः ।

vayaṁ kāvyaṁ lekhiṣyāmaḥ.
*We will write poetry.*

अहं संस्कृतं ज्ञास्यामि ।

ahaṁ saṁskṛtaṁ jñāsyāmi.
*I will know Sanskrit.*

वयं संस्कृतं ज्ञास्यामः ।

vayaṁ saṁskṛtaṁ jñāsyāmaḥ.
*We will know Sanskrit.*

अहं वस्त्रं नेष्यामि ।

ahaṁ vastraṁ neṣyāmi.
*I will take a dress.*

वयं वस्त्रं नेष्यामः।

vayaṁ vastraṁ neṣyāmaḥ.
*We will take a dress.*

---

*HINDI:* **gamiṣyati, paṭhiṣyati, kariṣyati** *– all these are future tense verb forms.*

---

उत्तिष्ठतु। तस्य नाम यतीशः। तस्य नाम किम् ?

uttiṣṭhatu. tasya nāma yatīśaḥ. tasya nāma kim?
*Stand up! His name is Yatisha. What is his name?*

तस्य नाम यतीशः।

tasya nāma yatīśaḥ.
*His name is Yatisha.*

यतीश ! उपविशतु।

yatīśa! upaviśatu.
*Yatisha! Sit down!*

तस्य नाम यतीशः। अहं सम्बोधनं करोमि "यतीश, उपविशतु" वदामि।

tasya nāma yatīśaḥ. ahaṁ sambodhanaṁ karomi, "yatīśa! upaviśatu" vadāmi.
*His name is Yatisha. When I make vocative, I say "Yatisha! Sit down!"*

अहम् एकं नाम वदामि, भवन्तः तस्य सम्बोधनरूपं कृत्वा "उपविशतु" इति योजयन्तु।

aham ekaṁ nāma vadāmi, bhavantaḥ tasya sambodhana-rūpaṁ kṛtvā "upaviśatu" iti yojayantu.
*I say one name, you make the vocative form and join it with "sit down".*

तस्य नाम राजेन्द्रः।

tasya nāma rājendraḥ.
*His name is Rajendra.*

राजेन्द्र ! उपविशतु।

rājendra! upaviśatu.
*Rajendra! Sit down!*

तस्य नाम श्रीधरः।

tasya nāma śrīdharaḥ.
*His name is Shridhara.*

श्रीधर ! उपविशतु।

śrīdhara, upaviśatu.
*Shridhara! Sit down!*

अम्बिके ! उत्तिष्ठतु।

ambike! uttiṣṭhatu.
*Ambika! Stand up!*

तस्याः नाम अम्बिका। अहं सम्बोधनं करोमि "अम्बिके ! उत्तिष्टतु"।

tasyāḥ nāma ambikā. ahaṁ sambodhanaṁ karomi "ambike! uttiṣṭatu".
*He name is Ambika. I make vocative: "Ambika! Stand up!"*

अम्बिके ! उपविशतु। अम्बिका। अम्बिके ! उपविशतु। किं वदन्ति ?

ambike! upaviśatu. ambikā. ambike! upaviśatu. kiṁ vadanti?
*Ambika! sit down! Ambika. Ambika! Sit down! What do you say?*

अम्बिके ! उपविशतु।

ambike! upaviśatu.
*Ambika! Sit down!*

अनीता। अनीते ! उपविशतु।

anītā. anīte! upaviśatu.
*Anita. Anita! Sit down!*

---

## सुभाषितम्।

**subhāṣitam.**
***Verse.***

### गते शोकं न कुर्वति भविष्यं नैव चिन्तयेत्।
### वर्तमानेषु कालेषु वर्तयन्ति विचक्षणाः॥

gate śokaṁ na kurvati bhaviṣyaṁ naiva cintayet
vartamāneṣu kāleṣu vartayanti vicakṣaṇāḥ

gate – *in that which has passed;* śokam – *sadness;* na – *not;* kurvati – *creates;* bhaviṣyam – *future;* na eva – *certainly not;* cintayet – *should think;* vartamāneṣu kāleṣu – *in the present times;* vartayanti – *live, are present;* vicakṣaṇāḥ – *intelligent men.*

*Sadness is not created in the past nor in the future, thus intelligent men live (are present) only in the present.*

### वयम् इदानीं यत् सुभाषितं श्रुतवन्तः तस्य अर्थः एवम् अस्ति।

vayam idānīṁ yat subhāṣitaṁ śrutavāntaḥ tasya arthaḥ evam asti.
*Now that we have heard this verse, here is it's meaning.*

### गते शोकं न कुर्वीता नाम गतविषये प्रवृत्तविषये दुःखं न करणीयम्।

gate śokaṁ na kurvītā nāma gata-viṣaye pravṛtta-viṣaye duḥkhaṁ na karaṇīyam.
*One should not be sad about the past. In other words, we shouldn't be miserable about the past matters, about the matters that had happened.*

### तथैव भविष्ये अपि स्वप्नः न द्रष्टव्यः। भविष्ये "एवं भविष्यति, एवं करिष्यामि" इति स्वप्नः अपि न द्रष्टव्यः, दुःखम् अपि न करणीयम्।

tathaiva bhaviṣye api svapnaḥ na draṣṭavyaḥ. bhaviṣye "evaṁ bhaviṣyati, evaṁ kariṣyāmi" iti svapnaḥ api na draṣṭavyaḥ, duḥkham api na karaṇīyam.
*Also in the future the dreams should not be shown. In the future "thus it will be, thus I will do" such dream should not be seen, and we should also not feel miserable.*

### भूते यत् प्रवृत्तम् अस्ति, पूर्वं जत् प्रवृत्तम् अस्ति, तत्र दुःखं अपि न करणीयम्।

bhūte yat pravṛttam asti, pūrvaṁ jat pravṛttam asti, tatra duḥkham api na karaṇīyam.
*What happened in the past, what happened before, there [about that] we shouldn't feel miserable.*

### अग्रे यद् भविष्यति तस्य स्वप्नः अपि न द्रष्टव्यः।

agre yad bhaviṣyati tasya svapnaḥ api na draṣṭavyaḥ.
*We shouldn't dream about what will happen later either.*

### वर्तमानकाले एव व्यवहारणीयम्। वर्तमानकाले एव स्थातव्यम्।

vartamāna-kāle eva vyavahāraṇīyam. vartamāna-kāle eva sthātavyam.
*We should only act in the present time. We should only stand in the present time.*

### तस्मिन् विषये एव यद् करणीयं यद् न करणीयं तद् विषये चिन्तनीयम्।

tasmin viṣaye eva yad karaṇīyaṁ, yad na karaṇīyaṁ, tad viṣaye cintanīyam.
*We should only think about what should be done and what shouldn't be done [now].*

### एवं विचक्षणः नाम बुद्धिमान्। बुद्धिमन्तः एवं कुर्वन्ति।

evaṁ vicakṣaṇaḥ nāma buddhimān. buddhimantaḥ evaṁ kurvanti.
*Such is the intelligent, the wise person. Thus act the wise.*

---

## कथा

**kathā**
**Story**

काचित् वृद्धा आसीत्। तस्याः चत्वारः पुत्राः आसन्।

kācit vṛddhā āsīt. tasyāḥ catvāraḥ putrāḥ āsan.
*There was some old woman. She had four sons.*

ते पुत्राः अतीव शुराः आसन्। माता वृद्धा सर्वदा अपि तान् मतृभूमिः विषये कथाः श्रावयति स्म।

te putrāḥ atīva śurāḥ āsan. mātā vṛddhā sarvadā api tān matṛ-bhūmiḥ viṣaye kathāḥ śrāvayati sma.
*These sons where very brave. The old mother always told them stories about the motherland.*

अतः ते सर्वे अपि रष्ट्रविषये, अस्माकां देशविषये बहुश्रद्धानवः आसन्।

ataḥ te sarve api raṣṭra-viṣaye, asmākāṁ deśa-viṣaye bahu-śraddhānavaḥ āsan.
*Therefore all of them were very faitful regarding the country, regarding our land.*

एकदा देशस्य उपरि शत्रूणाम् आक्रमणं भवति। तदा सर्वस्मिन् गृहे अपि एकैकः युद्धार्थं गच्छति।

ekadā deśasya upari śatrūṇām ākramaṇaṁ bhavati. tadā sarvasmin gṛhe api ekaikaḥ yuddhārthaṁ gacchati.
*Once there is [was] enemies' attack on the country. At that time one person from [in] each house goes [went] to the battle.*

तदा वृद्धा माता प्रथमपुत्रम् आह्वयति, तिलकं धारयति "भवान् युद्धार्थं गच्छतु" इति वदति।

tadā vṛddhā mātā prathama-putram āhvayati, tilakaṁ dhārayati "bhavān yuddhārthaṁ gacchatu" iti vadati.
*Then the old mother calls the first son, puts a mark on his face and says: "You go to the battle!"*

अनन्तरं प्रथमः पुत्रः युद्धार्थं गच्छति, तत्र शौर्येण युद्धं करोति, किन्तु वीरस्वार्गं प्राप्नोति।

anantaraṁ prathamaḥ putraḥ yuddhārthaṁ gacchati, tatra śauryeṇa yuddhaṁ karoti, kintu vīra-svārgaṁ prāpnoti.
*After that the first son goes to the fight, there he fights bravely, but (ultimately) attains paradise of heroes.*

तदा एषा वृद्धा माता "प्रथमः पुत्रः मृतः" इति वार्तां शृणोति। वृद्धा माता द्वितीयपुत्रम् आह्वयति, तम् अपि युद्धार्थं प्रेषयति। सः अपि शौर्येण युद्धं करोति। सः अपि वीरस्वार्गं प्राप्नोति।

tadā eṣā vṛddhā mātā "prathamaḥ putraḥ mṛtaḥ" iti vārtāṁ śṛṇoti. vṛddhā mātā dvitīya-putram āhvayati, tam api yuddhārthaṁ preṣayati. saḥ api śauryeṇa yuddhaṁ karoti. saḥ api vīra-svārgaṁ prāpnoti.
*Then this old mother hears the news: "The first son died." The old mother calls the second son and sends him as well to the fight. He also fights bravely. He also attains paradies of heroes.*

तदा वृद्धा माता त्रितीयपुत्रम् आह्वयति। त्रितीयपुत्रम् आलिङ्गति, प्रीत्या वदति "पुत्र ! भवान् अपि युद्धार्थं गच्छतु। देशस्य रक्षणं करोतु। अस्माकां देशस्य कर्तव्यम् अस्ति, अतः भवान् गच्छतु" इति वदति।

tadā vṛddhā mātā tritīya-putram āhvayati. tritīya-putram āliṅgati, prītyā vadati "putra! bhavān api yuddhārthaṁ gacchatu. deśasya rakṣaṇaṁ karotu. asmākāṁ deśasya kartavyam asti, ataḥ bhavān gacchatu" iti vadati.
*Then the old mother calls the third son. She embraces the third son with affection and says: "Oh, son, you also go to the battle! Protect the country! Our land needs to be (protected), therefore go!" thus she speaks.*

त्रितीयः पुत्रः अपि युद्धार्थं गच्छति, वीरस्वार्गं प्राप्नोति।

tritīyaḥ putraḥ api yuddhārthaṁ gacchati, vīra-svārgaṁ prāpnoti.
*The third son also goes to the battle and attains the paradise of heroes.*

त्रितीयः पुत्रः अपि युद्धार्थं गतवान् तत्र भीकरं युद्धं प्रवृत्तम्। किञ्चित् दिनानन्तरं वार्ता आगता त्रितीयः पुत्रः अपि मृतः।

tritīyaḥ putraḥ api yuddhārthaṁ gatavān, tatra bhīkaraṁ yuddhaṁ pravṛttam. kiñcit dinānantaraṁ vārtā āgatā, tritīyaḥ putraḥ api mṛtaḥ.
*After the third son has also gone to the fight, the frightful battle developed. Some days later the news came the third son was also dead.*

तदा ग्रामस्ताः सर्वे अपि वृद्धयः समीपम् आगतवन्तः।

tadā grāmastāḥ sarve api vṛddhāyāḥ samīpam āgatavantaḥ.
*Then the inhabitants of the vilage all came to the old woman.*

ते सर्वे वृद्धाम् उक्तवन्तः "मातः, भवत्याः त्रितीयः पुत्रः अपि रणरङ्गे मृतः अस्ति, अतः भवती चतुर्थं पुत्रं मा प्रेषयतु। भवत्याः अन्तिमासमये सः भवत्याः रक्षणार्थं भवत्याः कर्तव्यपालनार्थम् आवश्यकः अस्ति। अतः भवती चतुर्थं पुत्रं मा प्रेषयतु" इति।

te sarve vṛddhām uktavantaḥ "mātaḥ, bhavatyāḥ tritīyaḥ putraḥ api raṇaraṅge mṛtaḥ asti, ataḥ bhavatī caturthaṁ putraṁ mā preṣayatu. bhavatyāḥ antimā-samaye saḥ bhavatyāḥ rakṣaṇārthaṁ, bhavatyāḥ kartavya pālanārtham āvaśyakaḥ asti. ataḥ bhavatī caturthaṁ putraṁ mā preṣayatu" iti.
*They all said to the old woman: "O, mother, your third son died on the battlefiled as well, therefore don't send the fourth son! In your last hour he is necessary for your protection, to take care after you. Therefore don't send the fourth son!"*

तदा वृद्धा माता तेषां वचनं न शृणोति।

tadā vṛddhā mātā teṣāṁ vacanaṁ na śṛṇoti.
*Then the old mother doesn't listen to their speach.*

वृद्धा माता चतुर्थं पुत्रम् आह्वयति, वीरतिलकं धारयति, वदति अपि "पुत्र! भवान् गच्छतु, विधेयं प्राप्य आगच्छतु। अस्माकां देशस्य रक्षणम् अस्माकं कर्तव्यम्। अतः भवान् गच्छतु" इति चतुर्थपुत्रम् अपि प्रेषयति।

vṛddhā mātā caturthaṁ putram āhvayati, vīra-tilakaṁ dhārayati, vadati api: "putra! bhavān gacchatu, vidheyaṁ prāpya āgacchatu. asmākāṁ deśasya rakṣaṇam asmākaṁ kartavyam. ataḥ bhavān gacchatu" iti caturtha-putram api preṣayati.
*The old mother calls the fourth son, puts a heroic mark on his face and says: "O, son, you go, and after fulfilling your duty come back. We should protect our country. Therefore go!" thus she sends the fourth son as well.*

एवं रणरङ्गे भीकरं युद्धं प्रवृत्तम्। अनन्तरं वार्ता आगच्छति चतुर्थः पुत्रः अपि मृतः अस्ति।

evaṁ raṇaraṅge bhīkaraṁ yuddhaṁ pravṛttam. anantaraṁ vārtā āgacchati caturthaḥ putraḥ api mṛtaḥ asti.
*Thus on the battlefield frightful battle developed. Then the news comes [that] the four son is also dead.*

तदा मातुः नेत्रे अश्रूणि आगच्छन्ति। तदा ग्रामस्य अधिकारी वृद्धायाः समीपम् आगच्छति।

tadā mātuḥ netre aśrūṇi āgacchanti. tadā grāmasya adhikārī vṛddhāyāḥ samīpam āgacchati.
*Then the tears come to the mother's eye. Then the elder of the village comes to the old woman.*

सः मातरं वदति "भोः मातः! वयं पूर्वम् एव उक्तवन्तः, भवती चतुर्थं पुत्रं मा प्रेषयतु। किन्तु

भवती न श्रुतवती। चतुर्थम् अपि पुत्रं प्रेषितवती। वयम् इदानीं किं कुर्मः ? भवती इदानिं रोदनं करोति चेत्, किं प्रयोजनम् ?" इति पृच्छति।

saḥ mātaraṁ vadati: "bhoḥ mātaḥ! vayaṁ pūrvam eva uktavantaḥ, bhavatī caturthaṁ putraṁ mā preṣayatu. kintu bhavatī na śrutavatī. caturtham api putraṁ preṣitavatī. vayam idānīṁ kiṁ kurmaḥ? bhavatī idāniṁ rodanaṁ karoti cet, kiṁ prayojanam?" iti pṛcchati.
*He says to the mother: "Oh, mother! we told you before not to send your fourth son. But you didn't listen. You send the fourth as well. What do we do now? Now if you cry, what's the use of it?" thus he asks.*

तदा माता वदति "भोः महाशय ! मम चतुर्थः पुत्रः मृतः, इति रोदनं नास्ति, दुःखं नास्ति। मम मतृभूमेः रक्षणम् आवश्यं करणीयम्, इति इच्छा भवति, किन्तु देशस्य रक्षणार्थं प्रेषयितुं मम पञ्चमः पुत्रः नास्ति खलु। इति दुःखं भवति।

tadā mātā vadati: "bhoḥ mahāśaya! mama caturthaḥ putraḥ mṛtaḥ, iti rodanaṁ nāsti, duḥkhaṁ nāsti. mama matṛ-bhūmeḥ rakṣaṇam āvaśyaṁ karaṇīyam, iti icchā bhavati, kintu deśasya rakṣaṇārthaṁ preṣayituṁ mama pañcamaḥ putraḥ nāsti khalu. iti duḥkhaṁ bhavati."
*Then the mother says: "Oh, sir! I don't cry, I am not sad because my fourth son is dead. There is the need to protect my motherland, such is my desire, but, alas, there is no fifth son whom I could send to protect the land! Therefore I am unhappy."*

एवम् अस्माकं देशस्य रक्षणाय कतिचन मातरः स्वपुत्राणां बलिदनं कृतवत्यः। अतः एव इदानीम् अपि अस्माकं देशः सुरक्षितः अस्ति।

evam asmākaṁ deśasya rakṣaṇāya katicana mātaraḥ svaputrāṇāṁ balidanaṁ kṛtavatyaḥ. ataḥ eva idānīm api asmākaṁ deśaḥ surakṣitaḥ asti.
*Thus for the protection of our country some mothers made the offering, sacrifice of their sons. Only in this way is our land now protected, safe.*

धन्यवादः। नमो नमः।

dhanyavādaḥ. namo namaḥ.
*Thank you. Salutations!*

नमो नमः।

namo namaḥ.
*Salutations.*

---

Teacher:

शान्तला

Śāntalā

Students:

वेदवती जाह्नवी गीता भाघ्या कल्पना

Vedavatī Jāhnavī Gītā Bhāghyā Kalpanā

महादेवी अम्बिका प्रज्ञा

Mahādevī Ambikā Prajñā

मन्जुनाथः बसवराजः श्रीधरः

Manjunāthaḥ Basavarājaḥ Śrīdharaḥ

राजेन्द्रः सतीशः श्रेयसः वीरभद्रः

Rājendraḥ Satīśaḥ Śreyasaḥ Vīrabhadraḥ

यतीशः बसवराजः

Yatīśaḥ Basavarājaḥ

---

# LESSON 11 – OVERVIEW

*In the lesson eleven you will do further practice of* **ktavatu-pratyāya** *(ending* **-vat***) in plural and learn double* **praśnārthakas** *(interrogatives):* **kim kim***. You will learn some new* **avyāyas***.*

## KTAVATU-PRATYĀYA (ENDING "-VAT" – EXPRESSING PAST TENSE)

**puṁliṅga-bahuvācanam** *(masc. sing.)* **-vantaḥ**
**strīliṅga-bahuvācanam** *(fem. sing.)* **- vatyaḥ**

m. पठन्ति paṭha**nti** *(they) read* पठितवन्तः paṭhita**vantaḥ** *they read (masc.)*

f. गच्छन्ति gaccha**nti** *(they) go* गतवत्यः gata**vatyaḥ** *they went (fem.)*

## DOUBLE INTERROGATIVES

किं किं करोति ? kiṁ kiṁ karoti? *what (various activities) do you do?*

*When you repeat the interrogative word twice, you are asking: "What various thing do you do?" All the genders, cases and numbers can be used (***ke ke, kā kā, kāni kāni** *etc.). The rule applies for other interrogative words as well (***kutra kutra, kadā kadā** *etc.). Repeating others words such as* **ekam ekam** *can mean "One each," "one by one" etc.*

## ADJECTIVE ANYA (OTHER, ELSE):

m. अन्यः anyaḥ, f. अन्या anyā n. अन्यत् anyat

अन्यः कः **anyaḥ** kaḥ *Who else?* अन्यः कः **anyaḥ** ekaḥ *One other?*

## AVYAYAS

च ca *and (used in the very end of a list or optionally between each word:)*

भोजनं चायं जलं **च** इच्छामि । bhojanaṁ cāyaṁ jalaṁ **ca** icchāmi. *I want food, tea* ***and*** *watter.*

अतः ataḥ *so, therefore, thus (used to express consecutive relation)*

मम पिपासा अस्ति अतः जलं पिबामि । mama pipāsā asti ataḥ jalaṁ pibāmi. *I am thirsty so I drink water.*

एव eva *only, certainly (used* ***after*** *the word it relates to)*

इति iti *thus, so (used as a sort of quotation marks)*

# Lesson 11

*HINDI: Introduction, explaining what the lesson is going to be about.*

### नमो नमः ।

namo namaḥ.
*Respects.*

### संस्कृतभाषाशिक्षणे भवतां हार्दं स्वागतम् ।

saṁskṛta-bhāṣā-śikṣaṇe bhavatāṁ hārdaṁ svāgatam.
*Heartly welcome [to you] to the study of Sanskrit language.*

### पूर्वतनपाठे वयं क्तवतुप्रत्यायान्तानां परिचयं प्राप्तवन्तः ।
### अस्मिन् पाठे वयं तद्विषये अभ्यासं कुर्मः ।

pūrvatana-pāṭhe vayaṁ ktavatu-pratyāyāntānāṁ paricayaṁ prāptavantaḥ. asmin pāṭhe vayaṁ tad-viṣaye abhyāsaṁ kurmaḥ.
*In the previous lesson we got to know "ktavatu-pratyaya" (ending "-vat", expressing past tense). In this lesson we will do exercise on that subject.*

### अहम् एकं वाक्यं लिखामि ।

aham ekaṁ vākyaṁ likhāmi.
*I write one sentence.*

### बालकः विद्यालयं गतवान् । एकवचने अस्ति ।

bālakaḥ vidyālayaṁ gatavān. ekavacane asti.
*A boy went to school. [This] is in singular.*

### बालकाः विद्यालयं गतवन्तः ।

bālakāḥ vidyālayaṁ gatavantaḥ.
*Boys went to school.*

### एकवचनतः बहुवचनं प्रति परिवर्तनं कृतम् अस्ति ।

ekavacanataḥ bahuvacanaṁ prati parivartanaṁ kṛtam asti.
*The change from singular to plural is made.*

### इदानीम् एकवचनतः बहुवचनं प्रति परिवर्तनं कुर्वन्ति वा ?

idānīm ekavacanataḥ bahuvacanaṁ prati parivartanaṁ kurvanti vā?
*Will you now make the change from singular to plural?*

### आम् ।

ām.
*Yes.*

### यथा – बालकः विद्यालयं गतवान् ।

yathā – bālakaḥ vidyālayaṁ gatavān.
*Such as – a boy went to school.*

### बालकाः विद्यालयं गतवन्तः ।

bālakāḥ vidyālayaṁ gatavantaḥ.
*Boys went to school.*

### वदन्ति ? अहम् एकवचनं वदामि भवन्तः बहुवचनं वदन्तु ।

vadanti? aham ekavacanaṁ vadāmi, bhavantaḥ bahuvacanaṁ vadantu.
*[Will you] speak? I say singular, you say plural!*

### बालकः विद्यालयं गतवान् ।

bālakaḥ vidyālayaṁ gatavān.
*A boy went to school.*

### बालकाः विद्यालयं गतवन्तः ।

bālakāḥ vidyālayaṁ gatavantaḥ.
*Boys went to school.*

### युवकः योगाभ्यासं कृतवान् ।

yuvakaḥ yogābhyāsaṁ kṛtavān.
*A young man did the practice of yoga.*

### युवकाः योगाभ्यासं कृतवन्तः ।

yuvakāḥ yogābhyāsaṁ kṛtavantaḥ.
*Young men did the practice of yoga.*

नर्तकः नृत्यं कृतवान्।

nartakaḥ nṛtyaṁ kṛtavān.
*A dancer danced.*

नर्तकाः नृत्यं कृतवन्तः।

nartakāḥ nṛtyaṁ kṛtavantaḥ.
*Dancers danced.*

आलसः निद्रां कृतवान्।

ālasaḥ nidrāṁ kṛtavān.
*A lazy person slept.*

आलसाः निद्रां कृतवन्तः।

ālasāḥ nidrāṁ kṛtavantaḥ.
*Lazy persons slept.*

सैनिकः जयं प्राप्तवान्।

sainikaḥ jayaṁ prāptavān.
*A soldier gained the victory.*

सैनिकाः जयं प्राप्तवन्तः।

sainikāḥ jayaṁ prāptavantaḥ.
*Soldiers gained the victory.*

बालकः ग्रन्थं स्मृतवान्।

bālakaḥ granthaṁ smṛtavān.
*A boy remembered the book.*

बालकाः ग्रन्थं स्मृतवन्तः।

bālakāḥ granthaṁ smṛtavantaḥ.
*Boys remembered the book.*

एवमेव - बालिका पाठं पठितवती।

evam eva – bālikā pāṭhaṁ paṭhitavatī.
*In the same way – a girl studied the lesson.*

बालिकाः पाठं पठितवत्यः।

bālikāḥ pāṭhaṁ paṭhitavatyaḥ.
*Girls studied the lesson.*

बालिका विद्यालयं गतवती।

bālikā vidyālayaṁ gatavatī.
*A girl went to school.*

बालिकाः विद्यालयं गतवत्यः। स्त्रीलिङ्गे एवं रूपं भवति।

bālikāḥ vidyālayaṁ gatavatyaḥ. strī-liṅge evaṁ rūpaṁ bhavati.
*Girls went to school. Such is the form in the feminine gender.*

---

वयम् अभ्यासं कुर्मः ?

vayam abhyāsaṁ kurmaḥ?
*[Will] we do an excercise?*

आम्।

Ām.
*Yes.*

बालिका पाठं पठितवती।

bālikā pāṭhaṁ paṭhitavatī.
*A girl studied a lesson.*

बालिकाः पाठं पठितवत्यः।

bālikāḥ pāṭhaṁ paṭhitavatyaḥ.
*Girls studied a lesson.*

वैद्या चिकित्सालयं गतवती।

vaidyā cikitsālayaṁ gatavatī.
*A doctor (fem.) went to the hospital.*

वैद्याः चिकित्सालयं गतवत्यः।

vaidyāḥ cikitsālayaṁ gatavatyaḥ.
*Doctors (fem.) went to the hospital.*

सखी नगरं गतवती।

sakhī nagaraṁ gatavatī.

*Friend (fem.) went to the city.*

सख्यः नगरं गतवत्यः ।

sakhyaḥ nagaraṁ gatavatyaḥ.
*Friends (fem.) went to the city.*

भगिनी गानं गीतवती ।

bhaginī gānaṁ gītavatī.
*Sister sang a song.*

भगिन्यः गानं गीतवत्यः ।

bhaginyaḥ gānaṁ gītavatyaḥ.
*Sisters sang a song.*

लेखिका लेखं लिखितवती ।

lekhikā lekhaṁ likhitavatī.
*Writer (fem.) wrote an article.*

लेखिकाः लेखं लिखितवत्यः ।

lekhikāḥ lekhaṁ likhitavatyaḥ.
*Writers (fem.) wrote an article.*

नटी नृत्यं कृतवती ।

naṭī nṛtyaṁ kṛtavatī.
*Dancer (fem.) danced.*

नट्यः नृत्यं कृतवत्यः ।

naṭyaḥ nṛtyaṁ kṛtavatyaḥ.
*Dancers (fem.) danced.*

---

*HINDI: Just as in masculine in singular and plural there are* **-vān** *and* **-vantaḥ,** *thus in feminine there are* **-vatī** *and* **-vatyaḥ** *endings.*

---

अहं रामायणं महाभारतं भगवद्गीतां च पठामि ।

ahaṁ rāmāyaṇaṁ mahābhārataṁ bhagavad-gītāṁ ca paṭhāmi.
*I read Ramayana, Mahabharata and Bhagavad-gita.*

अहम् अन्नं पायसं लड्डुकं च खादामि ।

aham annaṁ pāyasaṁ laḍḍukaṁ ca khādāmi.
*I eat rice, milk sweet and another sweet dish.*

सुब्रह्मण्य ! लेखनीं करवस्त्रं च आनयतु ।

subrahmaṇya! lekhanīṁ karavastraṁ ca ānayatu.
*Subrahmanya! Bring a pen and a handkerchief!*

मया??? स्वीकरोतु, अर्य ।

mayā??? svīkarotu, arya.
*???? Here, respected teacher.*

धन्यवादः । गच्छतु ।

dhanyavādaḥ. gacchatu!
*Thank you. Go!*

अभिषेक ! आगच्छतु ।

abhiṣeka! āgacchatu!
*Abhisheka! Come!*

भवान् करवस्त्रं लेखनीं महाभारतं च नयतु ।

bhavān karavastraṁ lekhanīṁ mahābhārataṁ ca nayatu.
*You take [away] the handkerchief, the pen and Mahabharata!*

धन्यवादः ।

dhanyavādaḥ.
*Thank you.*

स्वागतम् ।

svāgatam.
*You are welcome.*

---

मम गृहे माता पिता भ्राता च सन्ति ।

mama gṛhe mātā pitā bhrātā ca santi.
*Mother, father and brother are in my house.*
*(Lit: In my house are …)*

भवतः गृहे के के सन्ति ?

bhavataḥ gṛhe ke ke santi?

*What people are in your house? (Lit.: Who who (masc. pl. nom.)) are in your house?)*

मम गृहे माता पिता अग्रजः अग्रजा पितामहा च सन्ति ।

mama gṛhe mātā, pitā, agrajaḥ, agrajā, pitāmahaḥ ca santi.
*In my house are mother, father, elder brother, elder sister and grandfather (father's father).*

भवत्याः गृहे के के सन्ति ?

bhavatyāḥ gṛhe ke ke santi?
*Who [all] is in your (fem.) house?*

मम गृहे माता पिता मातामही च सन्ति ।

mama gṛhe mātā pitā mātāmahī ca santi.
*In my house are mother, father and grandmother (mother's mother).*

भवत्याः गृहे के के सन्ति ?

bhavatyāḥ gṛhe ke ke santi?
*What people are in your (fem.) house?*

मम गृहे माता पिता पितामही अनुजा च सन्ति ।

mama gṛhe mātā pitā pitāmahī anujā ca santi.
*In my house are mother, father, grandmother (father's mother) and younger sister.*

भवन्तः किं किं खादन्ति वदन्तु ।

bhavantaḥ kiṁ kiṁ khādanti? vadantu!
*What [various things] do you eat? Say!*

अहं कदलीफलम् आम्रफलं मोदकं च खादामि ।

ahaṁ kadalī-phalam āmra-phalaṁ modakaṁ ca khādāmi.
*I eat banana, mango and a sweet dish.*

अहं लड्डुकं पायसं च खादामि ।

ahaṁ laḍḍukaṁ pāyasaṁ ca khādāmi.
*I eat sweet gram flour dish and sweet milk dish.*

---

भवन्तः कां कां भाषां जानन्ति ? वदन्ति वा ?

bhavantaḥ kāṁ kāṁ bhāṣāṁ jānanti? vadanti vā?
*Which languages do you know? Would you say?*

अहं संस्कृतभाषां कन्नदभाषां हिन्दिभाषाम्

अन्ग्लभाषां च जानामि ।

ahaṁ saṁskṛta-bhāṣāṁ kannada-bhāṣāṁ hindi-bhāṣām angla-bhāṣāṁ ca jānāmi.
*I know Sanskrit, Kannada, Hindi and English.*

अहं संस्कृतभाषां कन्नदभाषां हिन्दिभाषाम्

अन्ग्लभाषां च जानामि ।

ahaṁ saṁskṛta-bhāṣāṁ kannada-bhāṣāṁ hindi-bhāṣām angla-bhāṣāṁ ca jānāmi.
*I know Sanskrit, Kannada, Hindi and English.*

"भवन्तः किं किं कुर्वन्ति" इति वदन्ति वा ?

"bhavantaḥ kiṁ kiṁ kurvanti" iti vadanti vā?
*"What do you do?" would you say?*

अहं श्रवणं क्रीडनम् अध्ययनं च करोमि ।

ahaṁ śravaṇaṁ krīḍanam adhyayanaṁ ca karomi.
*I listen, play and study. (Lit.: I do the listening, playing and studying.)*

भवती किं किं करोति ?

bhavatī kiṁ kiṁ karoti?
*What [various activities] do you (fem.) do?*

अहं पाठनं नृत्यं च करोमि ।

ahaṁ pāṭhanaṁ nṛtyaṁ ca karomi.
*I study and dance.*

इदानीं भवन्तः "च" योजयित्वा वाक्यानि वदन्ति वा ?

idānīṁ bhavantaḥ "ca" yojayitvā vākyāni vadanti vā?
*Would you now say sentences joining "ca" (and)?*

आम्, वदामः ।

ām, vadāmaḥ.
*Yes, we [will] say.*

भवान् वदतु ।

bhavān vadatu!
*You say!*

अहं भोजनं चायं जलं च इच्छामि ।

ahaṁ bhojanaṁ cāyaṁ jalaṁ ca icchāmi.
*I want food, tea and watter.*

भवान् वदतु ।

bhavān vadatu!
*You say!*

अहं पद्यं गद्यं नाटकं च लिखामि ।

ahaṁ padyaṁ gadyaṁ nāṭakaṁ ca likhāmi.
*I write poetry, prose and drama.*

भवती वदतु ।

bhavatī vadatu!
*You (fem.) say!*

अहं देवालयं ग्रन्थालयं चिकित्सालयं च गच्छामि ।

ahaṁ devālayaṁ granthālayaṁ cikitsālayaṁ ca gacchāmi.
*I go to temple, library and hospital.*

भवती वदतु ।

bhavatī vadatu!
*You (fem.) say!*

अहं देवं गुरुं मातरं पितरं च नमामि ।

ahaṁ devaṁ guruṁ mātaraṁ pitaraṁ ca namāmi.
*I respect god, teacher, mother and father.*

अहं दिल्लिनगरं चेन्नैनगरम् उज्जैनिनगरं च दृष्टवान् ।
भवन्तः किं किं दृष्टवन्तः भवान् वदतु ?

ahaṁ dilli-nagaraṁ cennai-nagaram ujjaini-nagaraṁ ca dṛṣṭavān. bhavantaḥ kiṁ kiṁ dṛṣṭavantaḥ? bhavān vadatu!
*I saw Delhi, Chennai and Ujjaini. What did you (pl.) see? You say!*

अहं कुबलिनगरं धगवरनगरं कोल्कतनगरं च दृष्टवान् ।

ahaṁ kubali-nagaram??? dhagavara-nagaram??? kolkata-nagaraṁ ca dṛṣṭavān.
*I saw Kubali, Dhagavara and Kolkata.???*

अहं कोल्कतनगरं चेन्नैनगरं मुम्बैनगरं च दृष्टवती ।

ahaṁ kolkata-nagaraṁ cennai-nagaraṁ mumbai-nagaraṁ ca dṛṣṭavatī.
*I saw (fem.) Kolkata, Chennai and Mumabi.*

---

**SCREEN:**

**च** **ca** ***and***

---

*HINDI:* ***Ca*** *is* ***avyaya*** *(indeclinable word) used in the sense of "and" to connect the related things or actions.*

---

अभिषेकः कोलाहलं करोति अतः अहं ताडयामि ।

abhiṣekaḥ kolāhalaṁ karoti ataḥ ahaṁ tāḍayāmi.
*Abhisheka makes noise, so I beat [him].*

मम बहु पिपासा अस्ति अतः अहं जलं पिबामि ।

mama bahu pipāsā asti ataḥ ahaṁ jalaṁ pibāmi.
*I am very thirsty so I drink water.*

बहु बुभुक्षा अस्ति अतः भोजनं करोमि ।

bahu bubhukṣā asti ataḥ bhojanaṁ karomi.
*I am very hungry so I take a meal.*

वाहने इन्धनं नास्ति अतः वाहनं न चलति ।

vāhane indhanaṁ nāsti ataḥ vāhanaṁ na calati.
*In the vehicle there is no fuel, therefore the vehicle doesn't go.*

"अतः" उपयोगं कृत्वा वाक्यानि वदन्ति वा ?

"ataḥ" upayogaṁ kṛtvā vākyāni vadanti vā?
*Thus applying "ataḥ", would you say sentences?*

आम्, वदामः।

ām, vadāmaḥ.
*Yes, we [will] say.*

भवान् वदतु।

bhavān vadatu!
*You say!*

अहं विज्ञानी अतः अहं संशोधनं करोमि।

ahaṁ vijñānī ataḥ ahaṁ saṁśodhanaṁ karomi.
*I am knowledgable (clever), therefore I do corrections.*

भवती वदतु।

bhavatī vadatu!
*You (fem.) say!*

अहं परिश्रमं करोमि अतः परीक्षायाम् उत्तम-अङ्कान् प्राप्नोमि।

ahaṁ pariśramaṁ karomi ataḥ parīkṣāyām uttama-aṅkān prāpnomi.
*I endeavor a lot (I do hard labour) therefore I get good marks on the exam.*

मह्यम् आसक्तिः अस्ति अतः अहं ज्ञानं संपादयामि।

mahyam āsaktiḥ asti ataḥ ahaṁ jñānaṁ saṁpādayāmi.
*I am diligent, therefore I acquire knowledge.*
*(Lit: To me there is diligence (devotedness), therefore I acquire knowledge.)*

एतद्-विषये वयम् अन्यम् अभ्यासं कुर्मः।

etad-viṣaye vayam anyam abhyāsaṁ kurmaḥ.
*We do another exercise on this subject.*

यथा – गोपालः रुग्णः अस्ति अतः ...

yathā – gopālaḥ rugṇaḥ asti ataḥ ...
*Such as – the cowherd is ill, therefore …*

भवन्तः अग्रे पूरयन्ति ?

bhavantaḥ agre pūrayanti?
*Would you finish [the sentence]?*

यथा गोपालः रुग्णः अस्ति अतः सः शालां न गच्छति।

yathā – gopālaḥ rugṇaḥ asti ataḥ saḥ śālāṁ na gacchati.
*Such as – the cowherd is ill, therefore he doesn't go to school.*

भवन्तः वदन्ति वा ?

bhavantaḥ vadanti vā?
*[Will] you (pl.) say?*

आम्, वदामः।

ām vadāmaḥ.
*Yes, we [will] say.*

भवान् वदतु।

bhavān vadatu!
*You say!*

गोपालः रुग्णः अस्ति अतः सः निद्रं करोति।

gopālaḥ rugṇaḥ asti ataḥ saḥ nidraṁ karoti.
*The cowherd is ill, therefore he sleeps.*

उत्तमम्। उपविशतु।

uttamam. upaviśatu!
*Good. Sit down.*

अन्यः कः वदति ?

anyaḥ kaḥ vadati?
*Who else [would like] to say?*

सुब्रह्मण्य ! वदतु।

subrahmaṇya! vadatu!
*Subrahmanya! Say!*

गोपालः रुग्णः अस्ति अतः सः बरि??? किमपि न खादति।

gopālaḥ rugṇaḥ asti ataḥ saḥ bari??? kim api na khādati.
*The cowherd is ill, therefore he doesn't eat ???*

भवती वदतु ।

bhavatī vadatu!
*You say!*

गोपालः रुग्णः अस्ति अतः सः वैद्यालयं गच्छति ।

gopālaḥ rugṇaḥ asti ataḥ saḥ vaidyālayaṁ gacchati.
*The cowherd is ill, therefore he goes to the hospital.*

गोपालः रुग्णः अस्ति अतः सः गीतां न गायति ।

gopālaḥ rugṇaḥ asti ataḥ saḥ gītāṁ na gāyati.
*The cowherd is ill, therefore he doesn't sing a song.*

लावण्या वदतु ।

lāvaṇyā vadatu!
*Lavanya, say!*

गोपालः रुग्णः अस्ति अतः सः न क्रीडति ।

gopālaḥ rugṇaḥ asti ataḥ saḥ na krīḍati.
*The cowherd is ill, therefore he doesn't play.*

एवमेव मन्त्री आगच्छति अतः कार्यक्रमः भवति ।

evam eva – mantrī āgacchati ataḥ kāryakramaḥ bhavati.
*In the same way – minister comes, therefore there is a function.*

मन्त्री आगच्छति अतः जनसम्मर्दः भवति ।

mantrī āgacchati ataḥ jana-sammardaḥ bhavati.
*Minister comes therefore there is crowd of people.*

भवन्तः वदन्ति वा ?

bhavantaḥ vadanti vā?
*Would you (pl.) say?*

आम्, वदामः ।

ām, vadāmaḥ.
*Yes, we say.*

भवान् वदतु ।

bhavān vadatu!
*You (sing.) say!*

मन्त्री आगच्छति अतः आरक्षकः सिद्धः भवति ।

mantrī āgacchati ataḥ ārakṣakaḥ siddhaḥ bhavati.
*The minister comes therefore policeman is promoted.*

अन्या का वदति ? भवती वदति वा ? वदतु ।

anyā kā vadati? bhavatī vadati vā? vadatu!
*Who else [would like] to say? Would you (fem.) say? Say!*

मन्त्रिः आगच्छति अतः सर्वे तं नमन्ति ।

mantri**ḥ** āgacchati ataḥ sarve taṁ namanti.
*The minister comes therefore everybody shows him respect.* **(Mistake!)**

मन्त्रिः न । मन्त्री । वदति वा ?

mantriḥ na! mantrī. vadati vā?
*Not mantri**ḥ**! Mantrī. Would you say (again)?*

मन्त्री आगच्छति अतः सर्वे तं नमन्ति ।

mantrī āgacchati ataḥ sarve taṁ namanti.
*The minister comes therefore everybody shows him respect.*

भवती वदतु ।

bhavatī vadatu!
*You say (fem.)!*

मन्त्री आगच्छति अतः सभाङ्गारे सर्वे उत्तिष्ठन्ति ।

mantrī āgacchati ataḥ sabhāṅgāre sarve uttiṣṭhanti.
*The minister comes therefore everybody in the auditorium stands up.*

परीक्षा अस्ति अतः छात्राः निद्रां न कुर्वन्ति । एवं भवन्तः एकमेकं वाक्यं वदन्ति ?

parīkṣā asti ataḥ chātrāḥ nidrāṁ na kurvanti.
evaṁ bhavantaḥ ekam ekaṁ vākyaṁ vadanti?
*There is an exam, therefore the students don't sleep. In this way would each one of you say a sentence?*

आम्, वदामः।

āṁ, vadāmaḥ.
*Yes, we [will] say!*

वदन्तु।

vadantu!
*Say!*

परीक्षः अस्ति अतः सर्वे छात्राः शालाम् आगच्छन्ति।

parī**kṣaḥ** asti ataḥ sarve chātrāḥ śālām āgacchanti.
*There is an exam, therefore all the students come to school.* ***(Mistake!)***

परीक्षः न। परीक्षा अस्ति अतः ... वदतु। भवतः वाक्यं वदतु।

parīkṣaḥ na. parīkṣā asti ataḥ ... vadatu! bhavataḥ vākyaṁ vadatu.
*Not parīkṣa**ḥ**. There is parīkṣ**ā**,* therefore … Say! Say your sentence! ***(Teacher corrects!)***

परीक्षा अस्ति अतः सर्वे छात्राः शालाम् आगच्छन्ति।

parīkṣā asti ataḥ sarve chātrāḥ śālām āgacchanti.
*There is an exam, therefore all the students come to school.*

परीक्षा अस्ति अतः सर्वे छात्राः दैवभक्तं??? भवन्ति।

parīkṣā asti ataḥ sarve chātrāḥ daiva-bhaktaṁ??? bhavanti.
*There is an exam, therefore all the students are devoted to God. ???*

अत्र वदतु।

atra vadatu!
*Say [you] here!*

परीक्षा अस्ति अतः वयम् अधिकं पठामः।

parīkṣā asti ataḥ vayam adhikaṁ paṭhāmaḥ.
*There is an exam, therefore we study a lot.*

परीक्षा अस्ति अतः अहं परिश्रमेण पठामि।

parīkṣā asti ataḥ ahaṁ pariśrameṇa paṭhāmi.
*There is an exam, therefore I study with effort.*

परीक्षा अस्ति अतः वयं सर्वे सम्यक् पठामः।

parīkṣā asti ataḥ vayaṁ sarve samyak paṭhāmaḥ.
*There is an exam therefore we all study well.*

एवमेव – उत्सवः अस्ति अतः अहं सम्यग् मधुरं खादामि।

evam eva – utsavaḥ asti ataḥ ahaṁ samyag madhuraṁ khādāmi.
*In the same way – there is a festival therefore I eat the sweets well.*

वाक्यानि वदन्ति वा ?

vākyāni vadanti vā?
*[Would] you say (pl.) sentences?*

आम्, वदामः।

ām, vadāmaḥ.
*Yes, we [will] say.*

कः वदति ?

kaḥ vadati?
*Who says?*

अहं वदामि।

ahaṁ vadāmi.
*I say.*

उत्तिष्ठतु।

uttiṣṭhatu!
*Stand up!*

उत्सवः अस्ति अतः सर्वे जनाः उत्सुकाः भवन्ति।

utsavaḥ asti ataḥ sarve janāḥ utsukāḥ bhavanti.
*There is a festival therefore all the people are restless, anxious.*

अहं वदामि । उत्सवः भवति तदा सर्वे जनाः देवालयं गच्छन्ति ।

ahaṁ vadāmi. utsavaḥ bhavati tadā sarve janāḥ devālayaṁ gacchanti.
*I say. [When] there is a festival, then all the people go to the temple.*

उत्सवः अस्ति अतः सर्वे नववस्त्रं धरन्ति ।

utsavaḥ asti ataḥ sarve nava-vastraṁ dharanti.
*There is a festival, therefore all people dress new clothes.*

उत्सवः अस्ति अतः माता मोदकं पचति ।

utsavaḥ asti ataḥ mātā modakaṁ pacati.
*There is a festival therefore mother cooks a sweet.*

उत्सवः अस्ति अतः मम गृहे सर्वे जनाः पूजां कुर्वन्ति ।

utsavaḥ asti ataḥ mama gṛhe sarve janāḥ pūjāṁ kurvanti.
*There is a festival therefore everybody at my home perform the worship (puja).*

उत्सवः अस्ति अतः अहं देवं पूजयामि ।

utsavaḥ asti ataḥ ahaṁ devaṁ pūjayāmi.
*There is a festival therefore I worship God.*

---

*SCREEN:*

**अतः** **ataḥ** ***thus, so***

---

*HINDI:* ***ataḥ*** *is* ***avyaya*** *(indeclinable word) used in the sense of "thus", "so".*

---

मम हस्ते नाणकं अस्ति ।

mama haste nāṇakam asti.
*There is a coin in my hand.*

नाणकं वामहस्ते अस्ति वा ? दक्षिनहस्ते अस्ति वा ? वदन्तु ।

nāṇakaṁ vāma-haste asti vā? dakṣina-haste asti vā? vadantu!
*Is the coin in the left hand? Or is it in the right hand? Say!*

वामहस्ते ।

vāma-haste!
*In he left hand!*

दक्षिनहस्ते ।

dakṣina-haste!
*In the right hand!*

न, वामहस्ते ।

na, vāma-haste!
*No, in the left hand!*

न, दक्षिनहस्ते ।

na, dakṣina-haste!
*No, in the right hand!*

नाणकं वामहस्ते एव अस्ति ।

nāṇakaṁ vāma-haste eva asti.
*The coin is only in the left hand.*

अहं संस्कृतेन एव संभाषनं करोमि ।

ahaṁ saṁskṛtena eva sambhāṣanaṁ karomi.
*I do conversation only in Sanskrit.*

अहं देशसेवं एव करोमि ।

ahaṁ deśa-sevam eva karomi.
*I do only patriotic activities.*

अहं चायं एव पिबामि ।

ahaṁ cāyam eva pibāmi.
*I drink only tea.*

मम पिता कार्यालये एव अस्ति ।

mama pitā kāryālaye eva asti.
*My father is only in the office.*

एवम् "एव" उपयोगं कृत्वा वाक्यं वदन्ति

evam "eva" upayogaṁ kṛtvā vākyaṁ vadanti?
*Thus applying "eva" [would you] say sentences?*

आम्, वदामः।

ām, vadāmaḥ.
*Yes we [will] say.*

कः वदति ? वदतु।

kaḥ vadati? vadatu!
*Who [will] say? Say!*

अहं सत्यम् एव वदामि।

ahaṁ satyam eva vadāmi.
*I speak only truth.*

अहं मातुः आज्ञाम् एव पालयामि।

ahaṁ mātuḥ ājñām eva pālayāmi.
*I observe only mother's commands.*

अहं विद्याकले एव शास्त्रं करोमि। ???

ahaṁ vidyā-kale eva śāstraṁ??? karomi.
*In the time of learning??? I do only ???*

अहं गृहे एव जलं पिबामि।

ahaṁ gṛhe eva jalaṁ pibāmi.
*I drink water only at home.*

एवम् ?

evam?
*Is it so?*

अहं गृहे एव गायामि।

ahaṁ gṛhe eva gāyāmi.
*I sing only at home.*

मम सखी शालायाम् एव अस्ति।

mama sakhī śālāyām eva asti.
*My friend (fem.) is only in school.*

अहं परीक्षाकाले एव अभ्यासं करोमि।

ahaṁ parīkṣā-kāle eva abhyāsaṁ karomi.
*I practice only in the time of the exam.*

---

वयम् इदानीम् अन्यम् अभ्यासं कुर्मः।

vayam idānīm anyam abhyāsaṁ kurmaḥ.
*Now we [will] do another exercise.*

यथा – अहम् एकं वाक्यं लिखामि।

yathā – aham ekaṁ vākyaṁ likhāmi.
*Such as – I write one sentence.*

अहं प्रातः रोटिकां खादामि। एव।

ahaṁ prātaḥ roṭikāṁ khādāmi. eva.
*In the morning I eat unleavened bread. Only.*

अत्र एव योजयित्वा वाक्यं वदन्ति वा ?

atra "eva" yojayitvā vākyaṁ vadanti vā?
*[Would you] here say a sentence using "eva"?*

आम्, वदामः।

ām, vadāmaḥ.
*Yes, we [will] say.*

यथा – अहं प्रातः एव रोटिकां खादामि।

yathā – ahaṁ **prātaḥ eva** roṭikāṁ khādāmi.
*Such as – **only in the morning** I eat unleavened bread.*

सायङ्काले खादन्ति वा ?

sāyaṅ-kāle khādanti vā?
*Do you eat in the evening?*

न।

na.
*No.*

मध्याह्ने खादन्ति वा ?

madhyāhne khādanti vā?
*Do you eat at noon?*

न।

na.

*No.*

कदा खादन्ति ?

kadā khādanti?
*When do you eat?*

प्रातः एव ।

prātaḥ eva.
*Only in the morning.*

एवमेव अन्यत्र योजयन्ति वा ?

evam eva anyatra yojayanti vā?
*[Will you] in this way use [eva] elsewhere?*

आम् ।

ām.
*Yes.*

योजयतु ।

yojayatu!
*Apply [it]!*

अहं प्रातः **रोटिकाम् एव** खादामि ।

ahaṁ prātaḥ **roṭikām eva** khādāmi.
*In the morning I eat **only unleavened bread.***

**अहम् एव** प्रातः रोटिकां खादामि ।

**aham eva** prātaḥ roṭikāṁ khādāmi.
***Only I** eat unleavened bread in the morning.*

अहं प्रातः रोटिकां **खादामि एव** ।

ahaṁ prātaḥ roṭikāṁ **khādāmi eva.**
*In the morning I **only eat** unleavened bread.*

---

*SCREEN:*

**एव** **eva** ***only***

---

*HINDI: The word* **eva** *is used in the sense of "only".*

---

मालती ।

mālatī.
*Malati!*

आम् ?

ām?
*Yes?*

मम उपनेत्रं कुत्र अस्ति ?

mama upanetraṁ kutra asti?
*Where are my eyeglasses?*

तत्र एव अस्ति ।

tatra eva asti.
*There only.*

अत्र कुत्रापि नास्ति एव खलु ।

atra kutrāpi nāsti eva khalu.
*But they are nowhere around here.*

तत्र एव अस्ति, भोः । सम्यक् पश्यतु ।

tatra eva asti, bhoḥ. samyak paśyatu!
*Oh, they are only there. Look well!*

अत्र नास्ति एव ।

atra nāsti eva.
*They are certainly not here.*

अहं जानामि भोः तत्र एव अस्ति ।

ahaṁ jānāmi bhoḥ tatra eva asti.
*Oh, I know they are only there.*

अत्र नास्ति एव भोः !

atra nāsti eva, bhoḥ!
*O, they are not here!*

अहो, पश्यतु । तत्र एव अस्ति ।

aho, paśyatu! tatra eva asti.

*Oh, look! They are just there!*

ओहो ! अत्र एव अस्ति किल ।

oho! atra eva asti kila.
*Oh, they are just here, aren't they?*

अस्तु । गच्छामि ।

astu. gacchāmi.
*All right. I am going.*

---

सुब्रह्मण्य ! एकं वाक्यं वदतु ।

subrahmaṇya! ekaṁ vākyaṁ vadatu.
*Subrahmanya! say one sentence!*

अहं प्रतिदिनं शालां गच्छामि ।

ahaṁ pratidinaṁ śālāṁ gacchāmi.
*Every day I go to school.*

अहं न श्रुतवान्। सः किम् इति उक्तवान् ?

ahaṁ na śrutavān. saḥ kim iti uktavān?
*I didn't hear. What did he say?*

सः "अहं प्रतिदिनं शालां गच्छामि" इति उक्तवान्।

saḥ "ahaṁ pratidinaṁ śālāṁ gacchāmi" iti uktavān.
*He said: "I go to school every day."*

रमा प्रतिदिनं देवालयं गच्छति ।

ramā pratidinaṁ devālayaṁ gacchati.
*Rama goes to the temple every day.*

अहं न श्रुतवान्, भोः । सा किम् इति उक्तवती ?

ahaṁ na śrutavān, bhoḥ. sā kim iti uktavatī?
*Oh, I didn't hear you. What was it that she said?*

सा "रमा प्रतिदिनं देवालयं गच्छति" इति उक्तवती ।

sā "ramā pratidinaṁ devālayaṁ gacchati" iti uktavatī.
*She said: "Rama goes to school every day."*

---

इदानीम् एकम् अभ्यासं कुर्मः ?

idānīm ekam abhyāsaṁ kurmaḥ?
*Now we do one exercise?*

आम्, कुर्मः ।

ām, kurmaḥ.
*Yes, we do.*

अहम् एकं शब्दं लिखामि ।

aham ekaṁ śabdaṁ likhāmi.
*I write a word.*

परीक्षा ।

parīkṣā.
*Exam.*

अहं किम् इति लिखितवान् ?

ahaṁ kim iti likhitavān?
*What did I write? (What is it that I wrote?)*

भवान् "परीक्षा" इति लिखितवान्।

bhavān "parīkṣā" iti likhitavān.
*You wrote "exam".*

महाराजः ।

mahārājaḥ.
*King.*

अहं किम् इति लिखितवान् ?

ahaṁ kim iti likhitavān?
*What is it that I wrote?*

भवान् "महाराजः" इति लिखितवान्।

bhavān "mahārājaḥ" iti likhitavān.
*You wrote "king".*

सः कर्णे किं वदति ?

saḥ karṇe kiṁ vadati?
*What is he saying in your ear?*

एषः "अहं शालां गच्छामि" इति उक्तवान्।

eṣaḥ "ahaṁ śālāṁ gacchāmi" iti uktavān.

*He said: "I am going to school."*

सा किम् इति वदति ?

sā kim iti vadati?
*What does she say?*

सा "रामं??? पाठ पठति" इति वदति ।

sā "rāmaṁ??? pātha paṭhati" iti vadati.
(Maybe: sā "rāmaḥ pāṭhaṁ paṭhati" iti vadati.)
*She says: "Rama studies the lesson."???*

विनय ! सः कर्णे किम् इति उक्तवान्?

vinaya! saḥ karṇe kim iti uktavān?
*Vinaya! What did he say in your ear?*

एषः "श्वः शाला अस्ति वा" इति पृष्टवान् ।

eṣaḥ "śvaḥ śālā asti vā?" iti pṛṣṭavān.
*He asked: "Is there school tomorrow?"*

"श्वः शाला अस्ति वा ?" इति पृष्टवान् वा ? अस्तु ।

"śvaḥ śālā asti vā?" iti pṛṣṭavān vā? astu.
*Did he ask: "Is there school tomorrow?" All right.*

सा कर्णे किम् उक्तवती ?

sā karṇe kim uktavatī?
*What did she say in your ear?*

सा "मम वस्त्रं नूतनं वा ?" इति पृष्टवती ।

sā "mama vastraṁ nūtanaṁ vā?" iti pṛṣṭavatī.
*She asked: "Is my dress new?"*

"वस्त्रं नूतनं वा ?" इति पृष्टवती वा ?

"vastraṁ nūtanaṁ vā?" iti pṛṣṭavatī vā?
*So she asked: "Is the dress new?"*

अस्तु । उपविषतु ।

astu. upaviṣatu!
*Alright. Sit!*

"साधयतु अथवा विनश्यतु" ??? इति महात्मा गान्धीजी उक्तवान् । कः किम् इति उक्तवान् ।

"sādhayatu athavā vinaśyatu" ??? iti mahātmā gāndhījī uktavān. kaḥ kim iti uktavān?
*Mahatma Gandhi said: "Heed yourself or perish."???*
*Who was this and what did he say? (Lit.: Who what did he say?)*

"साधयतु अथवा विनष्यतु" इति महात्मा गान्धी उक्तवान् ।

"sādhayatu athavā vinaśyatu" iti mahātmā gāndhī uktavān.
*Mahatma Gandhi said: "Heed yourself or perish."*

---

इदानीम् एकम् अभ्यासं कुर्मः ।

idānīm ekam abhyāsaṁ kurmaḥ.
*Now we do one exercise.*

अहं पत्राणि प्रदर्शयामि । भवन्तः पत्रं दृष्ट्वा कः किं वदति इति वदन्ति वा ?

ahaṁ patrāṇi pradarśayāmi. bhavantaḥ patraṁ dṛṣṭvā kaḥ kiṁ vadati iti vadanti vā?
*I show sheats of papers. After seeing the paper you say who says what, will you?*

आम्, वदामः ।

ām, vadāmaḥ.
*Yes, we [will] say.*

"शरीरमाद्यं खलु धर्मसाधनम्" इति कालिदासः उक्तवान् ।

"śarīra-mādyaṁ khalu dharma-sādhanam" iti kālidāsaḥ uktavān.
*Kalidasa said: "Through the body all religious duties can be performed."*

"जै जवान् जै किसान्" इति लाल् बहादुर् शास्त्री उक्तवान् ।

"jai javān jai kisān" iti lāl bahādur śāstrī uktavān.

*Lal Bahadur Shastri said: "Victory to the soldier, victory to the farmer."*

"सहसा विदधीत न क्रियाम्" इति भारविः उक्तवान्।

"sahasā vidadhīta na kriyām" iti bhāraviḥ uktavān.
*Bharavi said: "One must not do anything in haste and rashly."*

"परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥"

इति श्रीकृष्णः उक्तवान्।

"paritrāṇāya sādhūnāṁ vināśāya ca duṣkṛtām dharma-saṁsthāpanārthāya sambhavāmi yuge yuge" iti śrīkṛṣṇaḥ uktavān.
*Shri Krishna said: "For the protection of the good, for the destruction of evil-doers, for the firm establishment of religion, I am born in every age."*

---

गृहे माता अस्ति। माता "सम्यक् पठतु" इति वदति।

gṛhe mātā asti. mātā "samyak paṭhatu" iti vadati.
*Mother is at home. She says: "Study well."*

भवतां गृहे माता किं किम् उक्तवती वदन्ति वा ?

bhavatāṁ gṛhe mātā kiṁ kim uktavatī vadanti vā?
*Would you say what did your mother say at your home?*

आम्, वदामः।

ām, vadāmaḥ.
*Yes, we [will] say.*

माता "अधिकं दूरदर्शनं न पश्यतु" इति उक्तवती।

mātā "adhikaṁ dūradarśanaṁ na paśyatu" iti uktavatī.
*Mother said: "Don't watch the television much."*

मम माता ... पुनः वदतु।

mama mātā ... punaḥ vadatu!
*My mother … say again!*

मम माता "अधिकं दूरदर्शनं न पश्यतु" इति उक्तवती।

mama mātā "adhikaṁ dūradarśanaṁ na paśyatu" iti uktavatī.
*My mother said: "Don't watch television much."*

"गृहकार्यं करोतु" इति माता उक्तवती।

"gṛha-kāryaṁ karotu" iti mātā uktavatī.
*Mother said: "Do the homework."*

"गृहे अन्ये के के किं वदन्ति?" इति वदन्तु।

"gṛhe anye ke ke kiṁ vadanti?" iti vadantu!
*Say what do various other people at you home say!*

मम पिता "सत्यं वद" इति उक्तवान्।

mama pitā "satyaṁ vada" iti uktavān.
*My father said: "(You) speak the truth!"*

अद्य मम पिता "शुभं भूयात्" इति उक्तवान्।

adya mama pitā "śubhaṁ bhūyāt" iti uktavān.
*Today my father said: "You should be good."*

---

*SCREEN:*

इति **iti** ***thus, so***

---

*HINDI: About the meaning of* **iti**

---

## सुभाषितम्

**subhāṣitam**

वयम् इदानीम् एकं सुभाषितं शृण्मः।

vayam idānīm ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now we hear one verse.*

आयत्यां गुणदोषज्ञः तदात्वे क्षिप्रनिश्चयः।

अतीते कार्यशेषज्ञो विपदा नाभिभूयते॥

āyatyāṁ guṇa-doṣa-jñaḥ tadātve kṣipra-niścayaḥ
atīte kārya-śeṣa-jño vipadā nābhibhūyate

āyatyām – *in the future;* guṇa-doṣa-jñaḥ – *the one who knows virtue and vice;* tadātve – *in the present moment;* kṣipra-niścayaḥ – *one who resolves quickly;* atīte – *in the past;* kārya-śeṣa-jñaḥ – *the one who knows the remainder of the activity;* vipadā – *by adversity;* na – *does not;* abhibhūyate – *overcome.*

*Adversity does not overcome the one who knows virtue and vice in the future, who resolves quickly in the present and who knows the remainder of the activity in the past.*

तस्य अर्थः एवम् अस्ति ।

tasya arthaḥ evam asti.
*Here is its [verse's] meaning.*

कश्चन उत्तमकार्यकर्ता कथं व्यवहारं करोति ? "भविष्यत्काले यत् कार्यं करणीयं, कार्यस्य गुणाः के अवगुणाः के" इति सः चिन्तयति ।

kaścana uttama-kārya-kartā kathaṁ vyavahāraṁ karoti? "bhaviṣyat-kāle yat kāryaṁ karaṇīyaṁ, kāryasya guṇāḥ ke avaguṇāḥ ke?" iti saḥ cintayati.
*How does a very good worker do his bussiness? "Which work is to be done in the future, what are that work's virtues and what are its vices," thus he thinks.*

तदात्वे क्षिप्रनिश्चयः । यदा कार्यं सन्निहितं भवति तदा अनुक्षणं निर्णयं करोति ।

tadātve kṣipra-niścayaḥ. yadā kāryaṁ sannihitaṁ bhavati tadā anukṣaṇaṁ nirṇayaṁ karoti.
*In the present moment he quickly decides. When the work is near, then he momentarily makes the decission.*

अतीते कार्यशेशज्ञः । यत् कार्यं शिष्टं भवति तस्य किम् इति चिन्तयति ।

atīte kārya-śeśa-jñaḥ. "yat kāryaṁ śiṣṭaṁ bhavati tasya kim?" iti cintayati.
*???In the past he knows the remainder of the business. "What(ever) work remains, what is of it?" thus he thinks.???*

एवं यत् कार्यम् अतीतम् अस्ति तत्र किं शिष्टम् इति चिन्तयति । विपदा न विभूयते ।

evaṁ "yat kāryam atītam asti tatra kiṁ śiṣṭam?" iti cintayati. vipadā na vibhūyate.
*In this way he thinks: "What(ever) work is in the past, what is left there?" (He) is not overcome by adversity. ???*

---

**Teacher:**

नागराजः

Nāgarājaḥ

**Students:**

| आकर्षसिंहः | अभिषेकः | आदित्यः | किरणः |
|---|---|---|---|
| Ākarṣa-siṁhaḥ | Abhiṣekaḥ | Ādityaḥ | Kiraṇaḥ |

| भरतः | सुब्रह्मण्य हेगडे | रितेश् भट् |
|---|---|---|
| Bharataḥ | Subrahmaṇya Hegaḍe | Riteś Bhaṭ |

विनयराज्

Vinayarāj

| नम्रता | अनुषा | लावण्या | ज्योति. एस् | पूजा |
|---|---|---|---|---|
| Namratā | Anuṣā | Lāvaṇyā | Jyoti. S | Pūjā |

| अमृता | सिन्धु वि. रेड्डि | नीता मूर्ती | पवित्रा |
|---|---|---|---|
| Amṛtā | Sindhu V. Reḍḍi | Nītā Mūrtī | Pavitrā |

विद्या आर. जे.

Vidyā R. J.

---

# LESSON 12 – OVERVIEW

*In lesson twelve you will learn some new* **avyayas** *and* **kriyāpadas** *(verbs). You will learn how to change sentences with* **iti** *to sentences with* **yat***. We will do practices with the vers* **as** *(to be) in third person singular and plural:*

## KRIYĀPADA AS – VERB TO BE

**uttama-puruṣa-ekavācanam** *(1st pers. sing.)* **(aham) asmi** *(I) am*
**uttama-puruṣa-bahuvācanam** *(1st pers. pl.)* **(vayam) smaḥ** *(we) are*

अहं वैद्यः अस्मि । ahaṁ vaidyaḥ **asmi**. *I am a doctor.*

वयं वैद्याः स्मः । vayaṁ vaidyāḥ **smaḥ**. *We are doctors.*

## AVYAYAS

यत् **yat** *that*

अहं वदामि यत् संस्कृतं पठतु । ahaṁ vadāmi **yat** saṁskṛtaṁ paṭhatu. *I say **that** you should study Sanskrit.*

**Yat** *is used as a sort of indirect speech as opposed to direct speech in which* **iti** *is used. Notice that person and tense remain the same while they change in English (per example – Mother said: "I am going home." => Mother said she is [was] going home.)*

अपि **api** *also, as well*

अहम् अपि गीतां गायामि । aham **api** gītāṁ gāyāmi. *I **also** sing a song.*

यदि - तर्हि **yadi – tarhi** *if – then*

यदि परीक्षा आगच्छति तर्हि सम्यक् पठति । yadi parīkṣā āgacchati tarhi samyak paṭhati. *If the exam is coming then he studies well.*

# Lesson 12

*HINDI: In the previous lesson we got to know some* **avyayas**. *In this lesson we will learn two or three more* **avyayas** *and two or three more* **kriyāpadas**.

### नमो नमः।

namo namaḥ.
*Respects.*

### संस्कृतभाषाशिक्षणे भवतां हार्दं स्वागतम्।

saṁskṛta-bhāṣā-śikṣaṇe bhavatām̐ hārdaṁ svāgatam.
*Heartly welcome [to you] to the study of Sanskrit language.*

### पूर्वतनपाठे "इति" इति विषये अभ्यासं कृतवन्तः। भवन्तः ज्ञातवन्तः किल ?

pūrvatana-pāṭhe "iti" iti viṣaye abhyāsaṁ kṛtavantaḥ. bhavantaḥ jñātavantaḥ kila?
*In the previous lesson we did exercises with "iti". You know it, don't you?*

### आम्, ज्ञातवन्तः।

ām, jñātavantaḥ.
*Yes, we know.*

### वाक्यानि वक्तुं शक्नुवन्ति किल ?

vākyāni vaktuṁ śaknuvanti kila?
*You can say sentences, can't you?*

### आम्। शक्नुमः।

ām. śaknūmaḥ.
*Yes, we can.*

### "साधयतु अथवा विनश्यतु" इति गान्धीमहोदयः उक्तवान्।

"sādhayatu athavā vinaśyatu" iti gāndhī-mahodayaḥ uktavān.
*Respected Gandhi said: "Heed yourself or perish."*

### "शरीरमाद्यं खलु धर्मसाधनम्" इति कालिदासः उक्तवान्।

"śarīra-mādyaṁ khalu dharma-sādhanam" iti kālidāsaḥ uktavān.
*Kalidasa said: "Through the body all religious duties can be performed."*

### "स्वराज्यं जन्मसिद्धः अधिकारः" इति तिलकः उक्तवान्।

"svarājyaṁ janma-siddhaḥ adhikāraḥ" iti tilakaḥ uktavān.
*(Balaganga-dhara) Tilaka said "Independece is one's birthright."*

### अन्यः कः वदति ?

anyaḥ kaḥ vadati?
*Who else [will] say?*

### "एकाग्रतया पठतु" इति मम माता सर्वदा उक्तवति।

"ekāgratayā paṭhatu" iti mama mātā sarvadā uktavatī.
*"Read with [one pointed] concentration," my mother always said.*

### एतदेव वाक्यं वयं परिवर्तणं कृत्वा वक्तुं शक्नूमः।

etad eva vākyaṁ vayaṁ parivartaṇaṁ kṛtvā vaktuṁ śaknūmaḥ.
*In this way we can say a sentence after making a change.*

### यथा – "एकाग्रतया पठतु" इति माता उक्तवती। माता उक्तवती यत् एकाग्रतया पठतु।

yathā – "ekāgratayā paṭhatu" iti mātā uktavatī.
mātā uktavatī yat ekāgratayā paṭhatu.
*Such as – Mother said "Read with concentration."*
*Mother said that you should read with concentration.*

"द्वारं पिद्धातु" इति शिक्षकः उक्तवान्। शिक्षकः उक्तवान् यत् द्वारं पिद्धातु।

"dvāraṁ pidadhātu" iti śikṣakaḥ uktavān. śikṣakaḥ uktavān yat dvāraṁ pidadhātu.
*The teacher said: "Shut the door!" The teacher said to shut the door.*

"संस्कृतं वदतु" इति अहं वदामि। अहं वदामि यत् संस्कृतं पठतु। अहं वदामि यत् संस्कृतं वदन्तु।

"saṁskṛtaṁ vadatu" iti ahaṁ vadāmi. ahaṁ vadāmi yat saṁskṛtaṁ paṭhatu. ahaṁ vadāmi yat saṁskṛtaṁ vadantu.
*I say: "Speak Sanskrit!" I say that you should study Sanskrit. I say that you (pl.) should speak Sanskrit.*

सेवकः वदति यत् दीपं ज्वालयतु।

sevakaḥ vadati yat dīpaṁ jvālayatu.
*The servant says that you should light the lamp.*

"उष्णं जलं पिबतु" इति वैद्यः वदति। वैद्यः वदति यत् उष्णं जलं पिबतु।

"uṣṇaṁ jalaṁ pibatu" iti vaidyaḥ vadati. vaidyaḥ vadati yat uṣṇaṁ jalaṁ pibatu.
*The doctor says: "Drink hot water!" The doctor says that you should drink hot water.*

"यत्" इति विषये ज्ञातवन्तः वा?

"yat" iti viṣaye jñātavantaḥ vā?
*Did you understand the subject "yat"?*

आम्, ज्ञातवन्तः।

ām, jñātavantaḥ.
*Yes, we understood.*

इदानीम् एकम् अभ्यासं कुर्मः।

idānīm ekam abhyāsaṁ kurmaḥ.
*Now we do one exercise.*

अहम् "इति" इति उपयोगं कृत्वा वाक्यं वदामि। भवन्तः परिवर्तनं कुर्वन्ति ?

aham "iti" iti upayogaṁ kṛtvā vākyaṁ vadāmi. bhavantaḥ parivartanaṁ kurvanti?
*I say a sentence using "iti". [Would] you do the change?*

आम्, कुर्मः।

ām, kurmaḥ.
*Yes we [will] do.*

उदहरणार्थं "सः अप्रयोजकः" इति पिता चिन्तयति। पिता चिन्तयति यत् सः अप्रयोजकः।

udaharaṇārthaṁ: "saḥ aprayojakaḥ" iti pitā cintayati. pitā cintayati yat saḥ aprayojakaḥ.
*For practice: Father thinks: "He is good for nothing." Father thinks that he is good for nothing.*

"कष्टम् अस्ति" इति अधिकारी वदति।

"kaṣṭham asti" iti adhikārī vadati.
*The officer says: "It is difficult."*

अधिकारी वदति यत् कष्टम् अस्ति।

adhikārī vadati yat kaṣṭham asti.
*The officer says that it is difficult.*

"सत्यं वद" इति गुरुः शिश्यं वदति।

"satyaṁ vada" iti guruḥ śiśyaṁ vadati.
*The teacher says to the pupil: "Speak the truth."*

गुरुः शिश्यं वदति यत् सत्यं वद।

guruḥ śiśyaṁ vadati yat satyaṁ vada.
*The teacher says to the pupil that he* **(you in Sanskrit!)** *should speak the truth.*

"न शक्नोमि" इति कृपय न वदतु।

"na śaknomi" iti kṛpaya na vadatu.
*Please don't say "I can't."*

कृपया न वदतु यत् न शक्नोमि।

kṛpayā na vadatu yat na śaknomi.
*Lit: Please don't say that I can't.* ***(To convey the correct meaning In English, the translation is: "Please don't say (that) you can't." In Sanskrit the person doesn't change.)***

"गृहपाठम् आनयतु" इति शिक्षिका वदति ।

"gṛha-pāṭham ānayatu" iti śikṣikā vadati.
*The teacher (fem.) says: "Bring the homework!"*

शिक्षिका वदति यत् गृहपाठम् आनयतु ।

śikṣikā vadati yat gṛhapāṭham ānayatu.
*The teacher says you should bring the homework.*

"धैर्यं सर्वत्र साधनम्" इति ज्येष्ठाः वदन्ति ।

"dhairyaṁ sarvatra sādhanam" iti jyeṣṭhāḥ vadanti.
*Elders (pl.) say: "Courage (patience, fortitude) is the [best] means in every place (occasion, situation)." (Lit.: Courage is the means everywhere.)*

ज्येष्ठाः वदन्ति यत् धैर्यं सर्वत्र साधनम् ।

jyeṣṭhāḥ vadanti yat dhairyaṁ sarvatra sādhanam.
*Elders (pl.) say that courage (patience, fortitude) is the [best] means in every place (occasion, situation).*

"दानं करोतु" इति माता उक्तवती ।

"dānaṁ karotu" iti mātā uktavatī.
*Mother said: "Do the acts of donation, charity."*
***(In other words "Be charitable.")***

माता उक्तवती यत् दानं करोतु ।

mātā uktavatī yat dānaṁ karotu!
*Mother said [that] you should do charity.*

"फलं खादतु" इति वैद्यः उक्तवान् ।

"phalaṁ khādatu" iti vaidyaḥ uktavān.
*The doctor said: "Eat fruit."*

वैद्यः उक्तवान् यत् फलं खादतु ।

vaidyaḥ uktavān yat phalaṁ khādatu!
*The doctor said [that] you should eat fruit.*

"अहं श्रान्ता" इति लता उक्तवती ।

"ahaṁ śrāntā" iti latā uktavatī.
*Lata said: "I am tired."*

लता उक्तवती यत् अहं श्रान्ता ।

latā uktavatī yat ahaṁ śrāntā.
*Lata said [that]* ***she was*** *tired. (Lit.: Lata said that I am tired.)*

इदानीं भवन्तः "इति" इति परिवर्तनं कृत्वा एकैकं वाक्यं वदन्ति वा ?

idānīṁ bhavantaḥ "iti" iti parivartanaṁ kṛtvā ekaikaṁ vākyaṁ vadanti vā?
*Would you now say one sentence each after doing the change of "iti".*

आम्, वदामः ।

ām, vadāmaḥ.
*Yes, we [will] say.*

वदतु ।

vadatu!
*Say.*

उपनिषद् वदति यत् सत्यं वद धर्मं चर ।

upaniṣad vadati yat satyaṁ vada dharmaṁ cara.
*Upanishad says that you should speak the truth and practice the prescribed duty (dharma).*

माता वदति यत् कोलाहलं मास्तु ।

mātā vadati yat kolāhalaṁ māstu.
*Mother says that there shouldn't be noise.*

माता वदति यत् क्रियाशीलः भवतु ।

mātā vadati yat kriyāśīlaḥ bhavatu.
*Mother says [that] you should be active. (Meaning: Mother says* ***I*** *should be active.)*

माता वदति यत् शुभां भूयात् ।

mātā vadati yat śubhāṁ bhūyāt.
*Mother says [that] I should be good, beautiful.*

पितामही वदति यत् पादं प्रक्षालयतु ।

pitāmahī vadati yat pādaṁ prakṣālayatu!
*Grandmother (father's mother) says I should wash [my] feet. (Lit.: … wash the foot.)*

---

*HINDI: The meaning of* yat *in Sanskrit is the same to the meaning of* jaha *in Hindi.*

---

पूर्वतनपाठे वयम् "अपि" इत्यस्य अभ्यासं कृतवन्तः। स्मरन्ति किल ?

pūrvatana-pāṭhe vayam "api" ity asya abhyāsaṁ kṛtavantaḥ. smaranti kila?
*In a previous lesson we did exercises with "api". You remember, don't you?*

आम्, स्मरामः।

ām, smarāmaḥ.
*Yes, we remember.*

अहम् एकम् उदाहरणं वदामि। अहं चलनचित्रं पश्यामि। अभिषेकः अपि चलनचित्रं पश्यति।

aham ekam udāharaṇaṁ vadāmi. ahaṁ calana-citraṁ paśyāmi. abhiṣekaḥ api calana-citraṁ paśyati.
*I say one example. I watch a movie. Abhisheka watches the movie as well.*

युवकः दूरदर्शनं पश्यति। अहम् अपि दूरदर्शनं पश्यामि।

yuvakaḥ dūradarśanaṁ paśyati. aham api dūradarśanaṁ paśyāmi.
*Young man watches television. I also watch television.*

शिक्षकः विद्यालयं गच्छति। अहम् अपि विद्यालयं गच्छमि।

śikṣakaḥ vidyālayaṁ gacchati. aham api vidyālayaṁ gacchami.
*The teacher goes to school. I also go to school.*

इदानीं वयम् एकम् अभ्यासं कुर्मः। अहम् एकं वाक्यं वदामि भवन्तः "अपि" योजयित्वा वाक्यं वदन्ति वा ?

idānīṁ vayam ekam abhyāsaṁ kurmaḥ. aham ekaṁ vākyaṁ vadāmi bhavantaḥ "api" yojayitvā vākyaṁ vadanti vā?
*Now we [will] do one exercise. I say one sentence, [and] you say a sentence adding "api", will you?*

वदामः।

vadāmaḥ.
*We [will] say.*

बालकः शालां गच्छति। भवन्तः "अहम् अपि शालां गच्छामि" इति वदन्ति। ज्ञातम्।

bālakaḥ śālāṁ gacchati. bhavantaḥ "aham api śālāṁ gacchāmi" iti vadanti. jñātam?
*A boy goes to school. You say: "I also go to school." [Have you] understood?*

आम्।

ām.
*Yes.*

बालकः शालां गच्छति।

bālakaḥ śālāṁ gacchati.
*A boy goes to school.*

अहम् अपि शालां गच्छामि।

aham api śālāṁ gacchāmi.
*I also go to school.*

अहं चायं पिबामि।

ahaṁ cāyaṁ pibāmi.
*I drink tea.*

अहम् अपि चायं पिबामि।

aham api cāyaṁ pibāmi.
*I also drink tea.*

सः गीतां गायति।

saḥ gītāṁ gāyati.
*He sings a song.*

अहम् अपि गीतां गायामि ।

aham api gītāṁ gāyāmi.
*I also sing a song.*

माता दूरदर्शनं पश्यति ।

mātā dūradarśanaṁ paśyati.
*Mother watches the television.*

अहम् अपि दूरदर्शनं पश्यामि ।

aham api dūradarśanaṁ paśyāmi.
*I also watch the television.*

रोगी चिकित्सालयं गच्छति ।

rogī cikitsālayaṁ gacchati.
*A sick person goes to the hospital.*

अहम् अपि चिकित्सालयं गच्छामि ।

aham api cikitsālayaṁ gacchāmi.
*I also go to the hospital.*

अहं देशसेवं करोमि ।

ahaṁ deśa-sevaṁ karomi.
*I do patriotic activities.*

अहम् अपि देशसेवं करोमि ।

aham api deśa-sevaṁ karomi.
*I also do patriotic activities.*

---

**अपि** **api** ***also, as well***

---

*HINDI: We all know the meaning of these …*

---

मम नाम नागराजः । अहं शिक्षकः अस्मि । अहं युवकः अस्मि । अहं देशभक्तः अस्मि । इदानीं भवन्तः एक-एकं वाक्यं वदन्ति वा ?

mama nāma nāgarājaḥ. ahaṁ śikṣakaḥ asmi. ahaṁ yuvakaḥ asmi. ahaṁ deśa-bhaktaḥ asmi. idānīṁ bhavantaḥ eka-ekaṁ vākyaṁ vadanti vā?
*My name is Nagaraja. I am a teacher. I am a young man. I am a patriot. Would each of you now say a sentence?*

आम्, वदामः ।

ām, vadāmaḥ.
*Yes, we [will] say.*

कः वदति ?

kaḥ vadati?
*Who [will] say?*

अहं दैवभक्तः अस्मि ।

ahaṁ daiva-bhaktaḥ asmi.
*I am a devoted to god.*

अहं क्रीडापटुः अस्मि ।

ahaṁ krīḍā-paṭuḥ asmi.
*I am an athlete.*

अहं बुद्धिमान् अस्मि ।

ahaṁ buddhimān asmi.
*I am inteligent.*

अहं गायिका अस्मि ।

ahaṁ gāyikā asmi.
*I am a singer.*

अहं रचयित्री अस्मि ।

ahaṁ racayitrī asmi.
*I am authoress (writer, compositor).*

अहं ब्रह्मास्मि ।

ahaṁ brahmāsmi.
*I am spirit (brahman).* ***(A well known Upanishadic aphorism.)***

भवन्तः "अस्मि" इत्यस्य विषये किञ्चित् ज्ञातवन्तः ।

bhavantaḥ "asmi" ity asya viṣaye kiñcit jñātavantaḥ.
*You have understood something on the subject of "asmi".*

---

इदानीं वयम् एकम् अभ्यासं कुर्मः ।

idānīṁ vayam ekam abhyāsaṁ kurmaḥ.
*Now we do one exercise.*

कृष्णफलके कतिचन शब्दाः सन्ति । तस्य उपयोगं कृत्वा भवन्तः वाक्यानि रचयन्ति ।

kṛṣṇaphalake katicana śabdāḥ santi. tasya upayogaṁ kṛtvā bhavantaḥ vākyāni racayanti.
*On the blackboard there are a few words. Using them form (complete, construct, compose) the sentences.*

अहं वैद्यः अस्मि । रचयन्ति ? रचयन्तु ।

ahaṁ vaidyaḥ asmi. racayanti? racayantu!
*I am a doctor. [Will you] form [a sentence]? You compose [it]!*

अहं वैद्यः अस्मि ।

ahaṁ vaidyaḥ asmi.
*I am a doctor.*

वदन्तु ।

vadantu!
*You [all] say!*

अहं शिक्षकः अस्मि ।

ahaṁ śikṣakaḥ asmi.
*I am a teacher.*

अहं वैज्ञानिकः अस्मि ।

ahaṁ vaijñānikaḥ asmi.
*I am a scientist.*

अहं कृषिकः अस्मि ।

ahaṁ kṛṣikaḥ asmi.
*I am a farmer.*

अहं चालकः अस्मि ।

ahaṁ cālakaḥ asmi.
*I am a driver.*

अहं गायिका अस्मि ।

ahaṁ gāyikā asmi.
*I am a singer.*

अहं देशभक्तः अस्मि ।

ahaṁ deśa-bhaktaḥ asmi.
*I am a patriot.*

अहं धनिकः अस्मि ।

ahaṁ dhanikaḥ asmi.
*I am a rich man.*

अहं अध्यापकः अस्मि ।

aham adhyāpakaḥ asmi.
*I am a teacher.*

इदानीम् अन्यम् एकं अभ्यासं कुर्मः ।

idānīm anyam ekam abhyāsaṁ kurmaḥ.
*Now we do one other exercise.*

अहं वाक्यं वदामि भवन्तः परिवर्तनं कृत्वा वदन्ति ।

ahaṁ vākyaṁ vadāmi bhavantaḥ parivartanaṁ kṛtvā vadanti.
*I say a sentence, you make a change and say it.*

यथा – अहं यं पृच्छामि सः एव वदतु । अस्तु वा ?

yathā – ahaṁ yaṁ pṛcchāmi saḥ eva vadatu! astu vā?
*Such as – whom I ask, let only him say! All right?*

भवान् शिक्षकः अस्ति ।

bhavān śikṣakaḥ asti.
*You are a teacher.*

अहं शिक्षकः अस्मि ।

ahaṁ śikṣakaḥ asmi.
*I am a teacher.*

भवान् मुर्खः अस्ति ।

bhavān murkhaḥ asti.
*You are a fool.*

अहं मुर्खः नास्मि।

ahaṁ murkhaḥ nāsmi.
*I am not a fool.*

भवान् चित्रकारः अस्ति।

bhavān citrakāraḥ asti.
*You are a painter.*

अहं चित्रकारः अस्मि।

ahaṁ citrakāraḥ asmi.
*I am a painter.*

भवती दुष्टा अस्ति।

bhavatī duṣṭā asti.
*You are a bad woman.*

अहं दुष्टा नास्मि।

ahaṁ duṣṭā nāsmi.
*I am not a bad woman.*

---

*HINDI: about the use of* **aham – asmi,** *"I am – we are", per example:* **aham aruna asmi** – *"I am Aruna."*

---

अहं नायकः अस्मि।

ahaṁ nāyakaḥ asmi.
*I am a hero.*

वयं नायकाः स्मः।

vayaṁ nāyakāḥ smaḥ.
*We are heroes.*

अहं देशभक्तः अस्मि।

ahaṁ deśa-bhaktaḥ asmi.
*I am a patriot.*

वयं देशभक्ताः स्मः।

vayaṁ deśa-bhaktāḥ smaḥ.
*We are patriots.*

अस्मि एकवचने। स्मः बहुवचने।

asmi ekavacane. smaḥ bahuvacane.
Asmi *(I am) is in singular.* Smaḥ *(we are) is in plural.*

इदानीं वयम् एकम् अभ्यासं कुर्मः वा ?

idānīṁ vayam ekam abhyāsaṁ kurmaḥ vā?
*Would we now do one exercise?*

आम्, कुर्मः।

ām, kurmaḥ.
*Yes, we (will) do.*

अहं भरतीयः अस्मि।

ahaṁ bharatīyaḥ asmi.
*I am Indian.*

वयं भरतीयाः स्मः।

vayaṁ bharatīyāḥ smaḥ.
*We are Indians.*

अहं सज्जनः अस्मि।

ahaṁ sajjanaḥ asmi.
*I am a good man.*

वयं सज्जनाः स्मः।

vayaṁ sajjanāḥ smaḥ.
*We are good men.*

अहं सन्तुष्टः अस्मि।

ahaṁ santuṣṭaḥ asmi.
*I am satisfied.*

वयं सन्तुष्टाः स्मः।

vayaṁ santuṣṭāḥ smaḥ.
*We are satisfied.*

अहं गायकः अस्मि।

ahaṁ gāyakaḥ asmi.
*I am a singer.*

वयं गायकाः स्मः।

vayaṁ gāyakāḥ smaḥ.
*We are singers.*

अहं वैद्यः अस्मि।

ahaṁ vaidyaḥ asmi.
*I am a doctor.*

वयं वैद्याः स्मः।

vayaṁ vaidyāḥ smaḥ.
*We are doctors.*

---

*HINDI: Plural of* **asmi** *is* **smaḥ**. *The verb follows the pronoun.*

---

**SCREEN:**

**अस्मि – स्मः asmi – smaḥ**

---

हरिः ओम्।

hariḥ om.
*Hello.*

हरिः ओम्।

hariḥ om.
Hello.

श्रीधरः खलु

śrīdharaḥ khalu?
*Is it Shridhara?*

आम्।

ām.
Yes.

अहं ललीतकुमारः वदामि।

ahaṁ lalīta-kumāraḥ vadāmi.
*I am Lalita-kumara speaking.*

अहो ललीतकुमरः। कुतः वदति ?

aho lalīta-kumaraḥ. kutaḥ vadati?
*Hello, Lalita-kumara. Where are you calling from?*

अहं भोपालतः वदामि। भवान् इदानीं कुत्र अस्ति ?

ahaṁ bhopālataḥ vadāmi. bhavān idānīṁ kutra asti?
*I am calling from Bhopala. Where are you now?*

अहं बेङ्गलूरुनगरे एव अस्मि।

ahaṁ beṅgalūru-nagare eva asmi.
*I am only in Bangalore.*

बेङ्गलूरुनगरे कुत्र अस्ति?

beṅgalūru-nagare kutra asti?
*Where in Bangalore are you?*

गिरिनगरे एव अस्मि।

girinagare eva asmi.
*Only in Giri-nagar.*

तन्नाम ??? गृहे एव अस्ति ?

tan nāma ??? gṛhe eva asti?
*??? So, you are you at home?*

गृहतः प्रस्थितवान्। मर्गे अस्मि।

gṛhataḥ prasthitavān. marge asmi.
*I left the home. I am on the street.*

एवम् ? भवन्तः सर्वे कथं सन्ति ?

evam? bhavantaḥ sarve kathaṁ santi?
*Is it so? How are all of you?*

वयं सर्वे कुशलिनः। भवन्तः ?

vayaṁ sarve kuśalinaḥ. bhavantaḥ?
*We are all fine. [And] you?*

वयं सर्वे कुशलिनः स्मः।

vayaṁ sarve kuśalinaḥ smaḥ.
*We are all fine.*

एवम्? कः विशेषः ?

Oh? kaḥ viśeṣaḥ?
*Oh? Any news?*

विशेषः कोऽपि नास्ति। कुशलवार्तां ज्ञात्वा एव दूरभाषां कृतवान्।

viśeṣaḥ ko'pi nāsti. kuśala-vārtāṁ jñātum eva dūrabhāṣāṁ kṛtavān.
*There are no news. I only called you on the phone to learn good news.*

एवम्? धन्यवादः।

evam? dhanyavādaḥ.
*Really? Thank you.*

नमो नमः।

namo namaḥ!
*Regards!*

---

चाकलेहः। चाकलेहम् इच्छन्ति ?

cākalehaḥ. cākaleham icchanti?
*Chocolate. Do you want chocolate?*

आम्, इच्छामः।

ām icchāmaḥ.

अत्र का इच्छति ?

atra kā icchati?
*Who wants it [from] here?*

यदि चाकलेहम् इच्छति तर्हि अत्र आगच्छतु।

yadi cākaleham icchati tarhi atra āgacchatu!
*If you want chocolate then come here!*

यदि अहं तत्र आगच्छामि भवान् ददाति वा ?

yadi ahaṁ tatra āgacchāmi bhavān dadāti vā?
*If I come there, [will] you give [it]?*

आम्, अवश्यं ददामि।

ām, avaśyaṁ dadāmi.
*Yes, I [will] certainly give.*

धन्यवादः।

dhanyavādaḥ.
*Thank you.*

स्वागतम्।

svāgatam.
*You're welcome.*

फलम् इच्छन्ति।

phalam icchanti.
*Do you want a fruit.*

आम्, इच्छामः।

ām, icchāmaḥ.
*Yes, we want.*

कः फलम् इच्छति ?

kaḥ phalam icchati?
*Who wants the fruit?*

अहम् इच्छामि।

aham icchāmi.
*I want.*

यदि फलम् इच्छति तर्हि अत्र आगच्छतु।

yadi phalam icchati tarhi atra āgacchatu!
*If you want the fruit, then come here!*

यदि अहं अत्र एव भवामि तर्हि तत् फलं न ददाति वा ?

yadi aham atra eva bhavāmi tarhi tat phalaṁ na dadāti vā?
*If I just stay here won't you then give me the fruit?*

न ददामि।

na dadāmi.
*I won't give.*

यदि फलम् अवश्यकं तर्हि अत्र आगच्छतु।

yadi phalam avaśyakaṁ tarhi atra āgacchatu!
*If you want the fruit, then come here!*

स्वीकरोतु।

svīkarotu!
*Here you are!*

धन्यवादः।

dhanyavādaḥ.
*Thank you.*

स्वागतम्।

svāgatam.
*You're welcome.*

पिपासा अस्ति वा ?

pipāsā asti vā?
*Are you thirsty? (Lit. Is there thirst?)*

न ... आम् ...

na ... ām ...
*No ... yes ...*

पिपासा नास्ति ? कस्य पिपासा अस्ति ?

pipāsā nāsti? kasya pipāsā asti?
*Nobody is thirsty? Who is thirsty?*

भवतः पिपासा अस्ति ?

bhavataḥ pipāsā asti?
*Are you thirsty?*

यदि पिपासा अस्ति तर्हि जलं पिबतु। आगच्छतु। स्वीकरोतु।

yadi pipāsā asti tarhi jalaṁ pibatu! āgacchatu! svīkarotu!
*If you are thirsty, then drink water! Come! Here you are!*

धन्यवादः।

dhanyavādaḥ.
*Thank you.*

स्वागतम्।

svāgatam.
*You're welcome.*

यदि व्याघ्रः आगच्छति तर्हि भवान् किं करोति ?

yadi vyāghraḥ āgacchati tarhi bhavān kiṁ karoti?
*If a tiger came, what would you do? (Lit.: If a tiger comes, then what do you do?)*

यदि व्याघ्रः आगच्छति तर्हि अहं व्याघ्रं ताडयामि।

yadi vyāghraḥ āgacchati tarhi ahaṁ vyāghraṁ tāḍayāmi.
*If a tiger came, I [would] beat the tiger.*

भवान् किं करोति ?

bhavān kiṁ karoti?
*What would you do? (lit.: "What do you do?")*

यदि व्याघ्रः आगच्छति तर्हि अहं तत्र एव उपविषामि।

yadi vyāghraḥ āgacchati tarhi ahaṁ tatra eva upaviṣāmi.
*If a tiger came, then I [would] sit just there.*

भवान् किं करोति ?

bhavān kiṁ karoti?
*What would you do?*

यदि व्याघ्रः आगच्छति तदा अहं धावामि।

yadi vyāghraḥ āgacchati **tadā** ahaṁ dhāvāmi.
*If a tiger comes* ***then*** *I [would] run.* ***(Mistake!)***

यदि व्याघ्रः आगच्छति तर्हि अहं धावामि। उत्तमम्।

yadi vyāghraḥ āgacchati **tarhi** ahaṁ dhāvāmi.
*If a tiger came then I [would] run.* ***(Teacher corrects!)***

भवान् किं करोति ?

bhavān kiṁ karoti?
*What would you do?*

यदि व्याघ्रः आगच्छति तर्हि अहं तत्र श्वासनं करोमि ।

yadi vyāghraḥ āgacchati tarhi ahaṁ tatra śvāsanaṁ karomi.
*If a tiger came [then] I [would] sleep there.*

भवती किं करोति ?

bhavatī kiṁ karoti?
*What would you do?*

यदि व्याघ्रः आगच्छति तर्हि अहं गीतां गायामि ।

yadi vyāghraḥ āgacchati tarhi ahaṁ gītāṁ gāyāmi.
*If a tiger came [then] I [would] sing a song.*

यदि व्याघ्रः आगच्छति तर्हि अहं सुभाषितां श्रावयामि ।

yadi vyāghraḥ āgacchati tarhi ahaṁ subhāṣitāṁ śrāvayāmi.
*If a tiger came [then] I [would] recite a verse.*

अहं यदि विदेशं गच्छामि तर्हि धनं सम्पादयामि ।

भवान् किं करोति ?

ahaṁ yadi videśaṁ gacchāmi tarhi dhanaṁ sampādayāmi. bhavān kiṁ karoti?
*If I went abroad I [would] acquire money. What [would] you do?*

अहं प्रसिद्धक्षेत्रं पश्यामि ।

ahaṁ prasiddha-kṣetraṁ paśyāmi.
*I [would] see famous places.*

अन्यः कः वदति ?

anyaḥ kaḥ vadati?
*Who else [will] say?*

यदि अहं विदेशं गच्छामि तर्हि अहं संस्कृतप्रचारं करोमि ।

yadi ahaṁ videśaṁ gacchāmi tarhi ahaṁ saṁskṛta-pracāraṁ karomi.
*If I went abroad, I [would] spread Sanskrit.*

यदि अहं विदेशं गच्छामि तर्हि अहं पठामि ।

yadi ahaṁ videśaṁ gacchāmi tarhi ahaṁ paṭhāmi.
*If I went abroad, I [would] study.*

यदि अहं विदेशं गच्छामि तर्हि अहं किमपि ग्रामं पश्यामि ।

yadi ahaṁ videśaṁ gacchāmi tarhi ahaṁ kim api grāmaṁ paśyāmi.
*If I went abroad I [would] see some vilage.*

यदि अहं विदेशं गच्छामि तर्हि अहं उन्नत-अध्यायनं करोमि ।

yadi ahaṁ videśaṁ gacchāmi tarhi aham unnata-adhyāyanaṁ karomi.
*If I went abroad I [would] do the highest study.*

यदि अहं विदेशं गच्छामि तर्हि अहं तत्र जनानां संस्कृतं पाथयामि ।

yadi ahaṁ videśaṁ gacchāmi tarhi ahaṁ tatra janānāṁ saṁskṛtaṁ pāthayāmi.
*If I went abroad I [would] teach the people there Sanskrit.*

यदि गृहे माता तर्जयति तर्हि भवन्तः किं कुर्वन्ति ।

yadi gṛhe mātā tarjayati tarhi bhavantaḥ kiṁ kurvanti?
*If mother at home scolds [you] then what do you do?*

यदि माता तर्जयति तर्हि अहं पितरं आशयामि ।

yadi mātā tarjayati tarhi ahaṁ pitaram āśayāmi.
*If mother scolds [me] then I retreat to [my] father.*

अहं वाक्यद्वयं वदामि भवन्तः यदि तर्हि योजयन्ति ।

ahaṁ vākya-dvayaṁ vadāmi bhavantaḥ yadi tarhi yojayanti.
*I say two sentences, you join them with "if … then".*

उदाहरणार्थम् अहं वदामि । धनम् अस्ति । ददातु ।

यदि धनम् अस्ति तर्हि ददातु ।

udāharaṇārtham ahaṁ vadāmi. dhanam asti. dadātu! yadi dhanam asti tarhi dadātu.
*For the sake of example I say:*

*There is money. Give! If there is money then give.*

दूरदर्शनम्। प्रवार्तयतु।

dūradarśanam. pravārtayatu.
*Television. Turn on (set in motion).*

यदि दूरदर्शनम् अस्ति तर्हि प्रवार्तयतु।

yadi dūradarśanam asti tarhi pravārtayatu.
*If there is television then turn [it] on.*

अहं वाक्यानि वदामि भवन्तः परिवर्तनं कुर्वन्ति ?

ahaṁ vākyāni vadāmi bhavantaḥ parivartanaṁ kurvanti?
*I say sentences, [will] you do the change?*

आम्, कुर्मः।

ām, kurmaḥ.
*Yes, we [will] do.*

वृष्ठिः भवति। सस्यानि आरोपयतु।

vṛṣṭhiḥ bhavati. sasyāni āropayatu.
*There is rain. [You] should grow crops.*

यदि वृष्ठिः भवति तर्हि सस्यानि आरोपयतु।

yadi vṛṣṭhiḥ bhavati tarhi sasyāni āropayatu.
*If there is rain then you should grow crops.*

परीक्षा आगच्छति। सम्यक् पठति।

parīkṣā āgacchati. samyak paṭhati.
*Exam is coming. He studies well.*

यदि परीक्षा आगच्छति तर्हि सम्यक् पठति।

yadi parīkṣā āgacchati tarhi samyak paṭhati.
*If the exam is coming then he studies well.*

जलम् अस्ति। स्नानं करोति।

jalam asti. snānaṁ karoti.
*There is water. [He] takes a bath.*

यदि जलम् अस्ति तर्हि स्नानं करोति।

yadi jalam asti tarhi snānaṁ karoti.
*If there is water then he takes a bath.*

प्रवासं करोमि। ज्ञानं सम्पादयामि।

pravāsaṁ karomi. jñānaṁ sampādayāmi.
*I make a journey. I attain knowledge.*

यदि प्रवासं करोमि तर्हि ज्ञानं सम्पादयामि।

yadi pravāsaṁ karomi tarhi jñānaṁ sampādayāmi.
*If I make a journey then I atain knowledge.*

शन्तिम् इच्छामि। भगवद्गीतां पठामि।

śantim icchāmi. bhagavad-gītāṁ paṭhāmi.
*I wish peace. I read Bhagavad-gita.*

यदि शन्तिम् इच्छामि तर्हि भगवद्गीतां पठामि।

yadi śantim icchāmi tarhi bhagavadgītāṁ paṭhāmi.
*If I wish peace then I read Bhagavad-gita.*

ज्ञानम् इच्छति। वेदं पठतु।

jñānam icchati. vedaṁ paṭhatu.
*He wants knowledge. He should study the Vedas.*

यदि ज्ञानम् इच्छति तर्हि वेदं पठतु।

yadi jñānam icchati tarhi vedaṁ paṭhatu.
*If he wants knowledge then he should study the Vedas.*

देशसेवं करोति। सन्तोषः भवति।

deśa-sevaṁ karoti. santoṣaḥ bhavati.
*He does patriotic activities. He is satisfied.*

यदि देशसेवं करोति तर्हि सन्तोषः भवति।

yadi deśasevaṁ karoti tarhi santoṣaḥ bhavati.
*If he does patriotic activities then he is satisfied.*

उत्तमा लेखनी अस्ति। मम कृते ददतु।

uttamā lekhanī asti. mama kṛte dadatu.
*There is a good pen. Give it to me!*

यदि उत्तमा लेखनी अस्ति तर्हि मम कृते ददतु।

yadi uttamā lekhanī asti tarhi mama kṛte dadatu.
*If there is a good pen then give it to me!*

संस्कृतं पठति । आनन्दः भवति ।

saṁskṛtaṁ paṭhati. ānandaḥ bhavati.
*He studies Sanskrit. There is joy.*

यदि संस्कृतं पठति तर्हि आनन्दः भवति ।

yadi saṁskṛtaṁ paṭhati tarhi ānandaḥ bhavati.
*If he studies Sanskrit then then he will be joyous. (Lit.: … then there is joy.)*

---

*HINDI:* about the meaning of "if … then …"

---

**SCREEN:**

**यदि - तर्हि** **yadi – tarhi** ***if – then***

---

## सुभाषितम्

**subhāṣitam**
***Verse.***

वयम् इदानीम् एकं सुभाषितं शृणमः ।

vayam idānīm ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now we [will] listen to one verse.*

अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम् ।
अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः ॥

amantram akṣaraṁ nāsti nāsti mūlam anauṣadham
ayogyaḥ puruṣo nāsti yojakas tatra durlabhaḥ

amantram – *not being a mantra;* akṣaraṁ – *a letter;* na asti – *is not;* na asti – *is not;* mūlam – *root;* anauṣadham – *not being a medicine;* ayogyaḥ – *not connected;* puruṣaḥ – *person;* na asti – *is not;* yojakaḥ – *there is not;* tatra – *there;* durlabhaḥ – *there is not.*

There is no letter (in the alphabet) that isn't a mantra (that can't be or isn't used in a mantra), there is no root (herb) that is not a medicine (from which medicine can't be made), there is no person who is uncapable. What is rare is the person who can use all these.

वयम् इदानीम् एकं सुभाषितं श्रुतवन्तः तस्य अर्थः एवम् अस्ति ।

vayam idānīm ekaṁ subhāṣitaṁ śrutavantaḥ tasya arthaḥ evam asti.
*Now that we have heard the verse, here is it's meaning.*

वर्णमालायां बहूनि अक्षराणि सन्ति । तदृषं एकम् अपि अक्षरं नास्ति मन्त्राय उपयोगः न भवति इति ।

varṇa-mālāyāṁ bahūni akṣarāṇi santi. tadṛṣam ekam api akṣaraṁ nāsti mantrāya upayogaḥ na bhavati iti.
*In the alphabet there are many letters. There is not even one such letter that is not used for mantra.*

एवमेव प्रपञ्चे बहूनि मूलानि सन्ति । तदृषं एकम् अपि मूलां नास्ति औषधाय योग्यं न इति ।

evameva prapañce bahūni mūlāni santi. tadṛṣam ekam api mūlāṁ nāsti auṣadhāya yogyaṁ na iti.
*In the same way there are many plant roots in the world. There is not even one such root that can be used as a medicine.*

एवमेव प्रपञ्चे बहुजनाः सन्ति । ते सर्वे अयोग्याः न । यदि कश्चन योजकः मिलति तर्हि ते सर्वे योग्याः भवितुम् अर्हन्ति ।

evam eva prapañce bahujanāḥ santi. te sarve ayogyāḥ na. yadi kaścana yojakaḥ milati tarhi te sarve yogyāḥ bhavitum arhanti.
*In the same way there are many people in the world. None of them is incapable, good for nothing (Lit: All of them are not incapable). If some capable man meets (them, gets in touch with them) then all of them can become useful.*

## कथा

**kathā**
**Story**

अहम् इदानीम् एकां कथां वदामि। सर्वे सावाधनेन शृण्वन्तु।

aham idānīm ekāṁ kathāṁ vadāmi. sarve sāvādhanena śṛṇvantu.
*I [will] now tell you a story. You all listen carefully.*

एकम् अरण्यम् अस्ति। अरण्ये एकः सन्न्यासी अस्ति। सः प्रतिदिनं भिक्षायचनं कृत्वा जीवनं करोति।

ekam araṇyam asti'raṇye ekaḥ sannyāsī asti. saḥ pratidinaṁ bhikṣā-yacanaṁ kṛtvā jīvanaṁ karoti.
*There is a forrest. In the forrest there is a renunciant. Every day he begs for alms and thus earns his living.*

तस्य हस्ते एकं सुवर्णकङ्कणम् अस्ति। सः चिन्तयाति "सुवर्णकङ्कणं दानं करोमि" इति। सः एकस्मिन् दिने जनान् आह्वयति घोषनं करोति।

tasya haste ekaṁ suvarṇa-kaṅkaṇam asti. saḥ cintayāti "suvarṇa-kaṅkaṇaṁ dānaṁ karomi" iti. saḥ ekasmin dine janān āhvayati ghoṣanaṁ karoti.
*In his hand there is a golden bracelet. He thinks: "I [will] donate the bracelet." One day he calls people and makes a speech.*

बहवः जनाः सन्मिलिताः भवन्ति। तदा सन्न्यासी घोषयति "अहं अत्यन्तं निर्धनाय सुवर्णकङ्कणं ददामि। अत्र कः निर्धनः अस्ति ?" इति।

bahavaḥ janāḥ sanmilitāḥ bhavanti. tadā sannyāsī ghoṣayati "aham atyantaṁ nirdhanāya suvarṇa-kaṅkaṇaṁ dadāmi. atra kaḥ nirdhanaḥ asti?" iti.
*Many people gather. Then the renunciant says [to them]: "I [will] give the golden bracelet to the poorest person. Who is poor here?"*

तदा बहवः जनाः "अहं निर्धनः, अहं निर्धनः" इति सन्न्यासी समीपं अगच्छन्ति। परन्तु सन्न्यासी कस्मै अपि सुवर्णकङ्कणं न ददाति।

tadā bahavaḥ janāḥ "ahaṁ nirdhanaḥ, ahaṁ nirdhanaḥ" iti sannyāsī samīpam agacchanti. parantu sannyāsī kasmai api suvarṇa-kaṅkaṇaṁ na dadāti.
*Then many people came to the renunciant saying: "I am poor, I am poor." But the renunciant didn't give the golden bracelet to anybody.*

एकस्मिन् दिने तस्य देशस्य महाराजः तेन मर्गेन आगच्छति। सः सन्न्यासिवचनं शृणोति। सः सन्न्यासि-आश्रमं गच्छति। सन्न्यासी महराजं समीपम् आह्वयति सुवर्णकङ्कणं महाराजाय ददति।

ekasmin dine tasya deśasya mahārājaḥ tena margena āgacchati. saḥ sannyāsi-vacanaṁ śṛṇoti. saḥ sannyāsi-āśramaṁ gacchati. sannyāsī maharājaṁ samīpam āhvayati suvarṇa-kaṅkaṇaṁ mahārājāya dadati.
*One day the king of his country came by his path. He heard the renunciant's speech. He goes to the renunciant's hermitage. Te renunciant calls the king closer and gives him the golden bracelet.*

सः सन्न्यासिनं पृच्छति "किं, भोः ? अहं महाराजा अस्मि। मम समीपे प्रभूतम् ऐश्वर्यम् अस्ति बहु धनम् अस्ति परन्तु भवान् मम कृते सुवर्णकङ्कणं ददाति" इति।

saḥ sannyāsinaṁ pṛcchati "kiṁ, bhoḥ? ahaṁ mahārājā asmi. mama samīpe prabhūtam aiśvaryam asti bahu dhanam asti parantu bhavān mama kṛte suvarṇa-kaṅkaṇaṁ dadāti" iti.
*He said to the renunciant: "What is this, sir? I am a great king. I have imense wealth, I have a lot of money, but you give me the golden bracelet."*

तदा सन्न्यासी वदति "यस्य आशा अधिकम् अस्ति तस्मै एव अहं सुवर्णकङ्कणं ददामि"।

tadā sannyāsī vadati: "yasya āśā adhikam asti tasmai eva ahaṁ suvarṇa-kaṅkaṇaṁ dadāmi."
*Then the renunciant says: "Whose hankering is great(est), only to him I give the golden bracelet."*

यद्यपि भवान् महाराजः अस्ति तथापि भवतः आशा अधिका अस्ति, भवतः इच्छा अस्ति – अहम् अन्यस्य राज्यस्य उपरि आक्रमनं करोमि जयं सम्पादयामि इतोऽपि अधिकम् ऐश्वर्यं सम्पादयामि इति ।

"yadyapi bhavān mahārājaḥ asti tathāpi bhavataḥ āśā adhikā asti, bhavataḥ icchā asti – aham anyasya rājyasya upari ākramanaṁ karomi, jayaṁ sampādayāmi ito 'pi adhikam aiśvaryaṁ sampādayāmi" iti.
*"Although you are a great king, still your hankering is very great, your desire is – I [will] make aggression on another kingdom, I [will] attain victory, and therefrom gain more wealth."*

अतः भवान् निर्धनः एव । अतः अहं एतत् सुवर्णकङ्कणं भवते दातुम् इच्छामि ।

"ataḥ bhavān nirdhanaḥ eva. ataḥ aham etat suvarṇa-kaṅkaṇaṁ bhavate dātum icchāmi."
*Therefore you are certainly poor. Therefore I want to give this golden bracelet to you.*

सन्न्यासिनः वचनं श्रुत्वा महाराजस्य ज्ञानोदयः भवति । सः लज्जया स्वराज्यं प्रति गमिष्यति ।

sannyāsinaḥ vacanaṁ śrutvā mahārājasya jñānodayaḥ bhavati. saḥ lajjayā svarājyaṁ prati gamiṣyati.
*After hearing the renunciants speech, the great king's knowledge arises. With shame he will go back towards his kingdom.*

कथायाः अर्थः ज्ञातः किल ?

kathāyāḥ arthaḥ jñātaḥ kila?
*Have you meaning of the story clear?*

ज्ञातः ।

jñātaḥ.
*It is clear.*

धन्यवादः । नमो नमः ।

dhanyavādaḥ. namo namaḥ.
*Thank you. Salutations.*

नमो नमः ।

namo namaḥ.
*Salutations.*

---

Teacher:

नागराजः

Nāgarājaḥ

Students:

| | | | |
|---|---|---|---|
| आकर्षसिंहः | अभिषेकः | आदित्यः | किरणः |
| Ākarṣa-siṁhaḥ | Abhiṣekaḥ | Ādityaḥ | Kiraṇaḥ |
| भरतः | सुब्रह्मण्य हेगडे | | रितेश् भट् |
| Bharataḥ | Subrahmaṇya Hegaḍe | | Riteś Bhaṭ |
| विनयराज् | | | |
| Vinayarāj | | | |

| | | | | |
|---|---|---|---|---|
| नम्रता | अनुषा | लावण्या | ज्योति. एस् | पूजा |
| Namratā | Anuṣā | Lāvaṇyā | Jyoti. S | Pūjā |
| अमृता | सिन्धु वि. रेड्डि | | नीता मूर्ती | पवित्रा |
| Amṛtā | Sindhu V. Reḍḍi | | Nītā Mūrtī | Pavitrā |
| विद्या आर. जे. | | | | |
| Vidyā R. J. | | | | |

---

# LESSON 13 – OVERVIEW

*In lesson thirteen you will do further practice of* **yadi – tarhi**. *You will learn how to use* **-taḥ – paryantam** *(from – to) and* **avyayas ārabhya** *(beginning from),* **kṛte** *(for the sake of) and* **yathā – tathā** *(as – so).*

## EXPRESSING "FROM – TO"

तः -taḥ *from* - पर्यन्तम् paryantam *to*

अहं दशवादनतः पञ्चवादनपर्यन्तं निद्रां करोमि ।

ahaṁ daśa-vādanataḥ pañca-vādana-paryantaṁ nidrāṁ karomi.
*I sleep from ten to five.*

## PAST TENSE (AORIST) OF BHU-DHĀTU (VERB "TO BE")

| | | | |
|---|---|---|---|
| **prathama-puruṣa-ekavācanam** *(3rd pers. sing.)* | आसीत | āsīt | *(he, she, it) was* |
| **uttama-puruṣa-ekavācanam** *(1st pers. sing.)* | आसाम् | āsam | *(I) was* |

## AVYAYAS

| | | | |
|---|---|---|---|
| *m.* | अर्जुनस्य कृते | arjunasya kṛte | *to Arjuna* |
| *f.* | शिक्षिकायाः कृते | śikṣikāyāḥ kṛte | *to the teacher* |
| | नद्याः कृते | nadyāḥ kṛte | *to the river* |
| *n.* | मित्रस्य कृते | mitrasya kṛte | *to the friend* |

*- noun in* **ṣaṣṭhī-vibhakti** + **kṛte** *convey the meaning of dative (of "giving to")*

आरभ्य adya ārabhya *from* today (on), *beggining from* today

अहम् अद्य आरभ्य ध्यानं करोमि । aham adya ārabhya dhyānaṁ karomi. *From today on I [will] meditate.*

यथा - तथा yathā – tathā *as, so*

अहं यथा करोमि भवान् तथा करोति । ahaṁ yathā karomi bhavān tathā karoti. *You do as I do. (Lit.: As I do so you do.)*

# Lesson 13

*HINDI: In the previous lesson you learned* **yadi – tarhi** *(**if – then**). In this lesson you will learn some new* **avyayas**.

नमो नमः ।

namo namaḥ.
*Respects.*

संस्कृतभाषाशिक्षणे भवतां हार्दं स्वागतम् ।

saṁskṛta-bhāṣā-śikṣaṇe bhavatāṁ hārdaṁ svāgatam.
*Heartly welcome [to you] to the study of Sanskrit language.*

वयं पूर्वतनपाठे "यदि - तर्हि" इत्येतम् अंशं ??? ज्ञातवन्तः । इदानीं तस्मिन् विशये किञ्चित् अभ्यासं कुर्मः ।

vayaṁ pūrvatana-pāṭhe "yadi – tarhi" ity etam aṁśaṁ??? jñātavantaḥ. idānīṁ tasmin viśaye kiñcit abhyāsaṁ kurmaḥ.
*In the previous lesson we have learned how to use the part ??? "if – then". Now we will do some practice in that subject matter.*

यदि स्वास्थ्यम् इच्छति तर्हि योगासनं करोतु ।

yadi svāsthyam icchati tarhi yogāsanaṁ karotu!
*If you want health then do yoga postures!*

भवन्तः वाक्यं वदन्ति वा ?

bhavantaḥ vākyaṁ vadanti vā?
*Would you (pl.) say a sentence?*

आम् ।

ām.
*Yes.*

यदि भवती मे गृहम् आगच्छति तर्हि अहं मोदकं ददामि ।

yadi bhavatī me gṛham āgacchati tarhi ahaṁ modakaṁ dadāmi.
*If you come to my home then I give [you] a sweet.*

यदि तपः करोति तर्हि मोक्षं प्राप्नोति ।

yadi tapaḥ karoti tarhi mokṣaṁ prāpnoti.
*If he does penance, then he achieves liberation.*

यदि शिक्षकः आगच्छति तर्हि अहं नमामि ।

yadi śikṣakaḥ āgacchati tarhi ahaṁ namāmi.
*If the teacher comes, then I show him respect.*

यदि उत्सवः अस्ति तर्हि अहं नूतनं वस्त्रं धरामि ।

yadi utsavaḥ asti tarhi ahaṁ nūtanaṁ vastraṁ dharāmi.
*If there is a festival, then I dres new clothes.*

अहं दशवादने निद्रां करोमि । षड्वादने उत्तिष्ठामि । अहं दशवादनतः षड्वादनपर्यन्तं निद्रां करोमि ।

ahaṁ daśa-vādane nidrāṁ karomi. ṣaḍ-vādane uttiṣṭhāmi. ahaṁ daśa-vādanataḥ ṣaḍ-vādana-paryantaṁ nidrāṁ karomi.
*I go to sleep at ten o'clock. I get up at six o'clock. I sleep from ten to six o'clock.*

भवान् कदा निद्रां करोति ?

bhavān kadā nidrāṁ karoti?
*When do you sleep?*

अहं रात्रौ नववादनतः पञ्चवादनपर्यन्तं निद्रां करोमि ।

ahaṁ ratrau nava-vādanataḥ pañca-vādana-paryantaṁ nidrāṁ karomi.
*I sleep at night from nine to five o'clock.*

भवान् कदा निद्रां करोति ?

bhavān kadā nidrāṁ karoti?
*When do you sleep?*

अहं दशवादनतः पञ्चवादनपर्यन्तं निद्रां करोमि ।

ahaṁ daśa-vādanataḥ pañca-vādana-paryantaṁ nidrāṁ karomi.
*I sleep from ten to five.*

अहं पञ्चवादनतः षड्वादनपर्यन्तम् अध्ययनं करोमि ।

ahaṁ pañca-vādanataḥ ṣaḍ-vādana-paryantam adhyayanaṁ karomi.
*I study from five to six.*

भवान् कदा अध्ययनं करोति ?

bhavān kadā adhyayanaṁ karoti?
*When do you study?*

अहं सार्धषड्वादनतः सार्धनववादनपर्यन्तम् अध्ययनं करोमि ।

ahaṁ sārdha-ṣaḍ-vādanataḥ sārdha-nava-vādana-paryantam adhyayanaṁ karomi.
*I study from half past six to half past nine.*

भवती कदा क्रीडति ?

bhavatī kadā krīḍati?
*When do you (fem.) play?*

अहं सार्धपञ्चवादनतः सप्तवादनपर्यन्तं क्रीडामि ।

ahaṁ sārdha-pañca-vādanataḥ sapta-vādana-paryantaṁ krīḍāmi.
*I play from half past five to seven.*

अत्युत्तमम् ।

atyuttamam.
*Very good.*

भवती कदा क्रीडति ?

bhavatī kadā krīḍati?
*When do you (fem.) play?*

अहं सायङ्काले चतुर्वादनतः पञ्चवादनपर्यन्तं क्रीडामि ।

ahaṁ sāyaṅ-kāle catur-vādanataḥ pañca-vādana-paryantaṁ krīḍāmi.
*I play from four to five in the evening.*

भवती कदा अध्ययनं करोति ?

bhavatī kadā adhyayanaṁ karoti?
*When do you (fem.) study?*

अहं सप्तवादनतः नववादनपर्यन्तं पाठं पठामि ।

ahaṁ sapta-vādanataḥ nava-vādana-paryantaṁ pāṭhaṁ paṭhāmi.
*I study the lesson from seven to nine.*

भवती कदा अध्ययनं करोति ?

bhavatī kadā adhyayanaṁ karoti?
*When do you (fem.) study?*

अहं सप्तवादनतः अष्टवादनपर्यन्तम् अध्ययनं करोमि ।

ahaṁ sapta-vādanataḥ aṣṭa-vādana-paryantam adhyayanaṁ karomi.
*I study from seven to eight o'clock.*

---

"-तः - पर्यन्तम्" - एतस्य अर्थं भवन्तः ज्ञातवन्तः । तद् विषये एकम् अभ्यासं कुर्मः ।

"-taḥ – paryantam" – etasya arthaṁ bhavantaḥ jñātavantaḥ. tad viṣaye ekam abhyāsaṁ kurmaḥ.
*The meaning of* "-tah – paryantam" *is known to you. We do one exercise on this subject.*

अत्र रमेशस्य दिनचरी अस्ति ।

atra rameśasya dinacarī asti.
*Here is Ramesha's schedule.*

पञ्चवादनम् । षड्वादनम् । योगासनम् ।

pañca-vādanam. ṣaḍ-vādanam. yogāsanam.
*Five o'clock. Six o'clock. Yoga postures.*

रमेशः पञ्चवादनतः षड्वादनपर्यन्तं योगासनं करोति ।

rameśaḥ pañca-vādanataḥ ṣaḍ-vādana-paryantaṁ yogāsanaṁ karoti.
*Ramesha does yoga postures from 5 to 6 o'clock.*

वदन्ति भवन्तः ?

vadanti bhavantaḥ?
*[Would] you say (pl.)?*

रमेशः सार्धषड्वादनतः सार्धसप्तवादनपर्यन्तम् अध्ययनं करोति ।

rameśaḥ sārdha-ṣaḍ-vādanataḥ sārdha-sapta-vādana-paryantam adhyayanaṁ karoti.
*Ramesha studies from half past six to half past seven.*

रमेशः सार्धसप्तवादनतः पादोन-अष्टवादनपर्यन्तं स्नानं करोति ।

rameśaḥ sārdha-sapta-vādanataḥ pādona-aṣṭa-vādana-paryantaṁ snānaṁ karoti.
*Ramesha takes a bath from half past seven to quarter to eight.*

रमेशः पादोन-अष्टवादनतः अष्टवादनपर्यन्तं पूजां करोति ।

rameśaḥ pādona-aṣṭa-vādanataḥ aṣṭa-vādana-paryantaṁ pūjāṁ karoti.
*Ramesha does puja from quarter to eight to eight.*

रमेशः अष्टवादनतः सार्ध-अष्टवादनपर्यन्तं जलपानं करोति ।

rameśaḥ aṣṭa-vādanataḥ sārdha-aṣṭa-vādana-paryantaṁ jalapānaṁ karoti.
*Ramesha drinks water from eight to half past eight.*

रमेशः सार्ध-अष्टवादनतः सपाददशवादनपर्यन्तं गृहकार्यं करोति ।

rameśaḥ sārdha-aṣṭa-vādanataḥ sapāda-daśa-vādana-paryantaṁ gṛha-kāryaṁ karoti.
*Ramesha does homework from half past eight to quarter past ten.*

रमेशः सार्धदशवादनतः सार्धचतुर्वादनपर्यन्तं विद्यालयं गच्छति ।

rameśaḥ sārdha-daśa-vādanataḥ sārdha-catur-vādana-paryantaṁ vidyālayaṁ gacchati.
*Ramesha goes to school from half past ten to half past four.*

रमेशः सपादपञ्चवादनतः सपादषड्वादनपर्यन्तं क्रीडति ।

rameśaḥ sapāda-pañca-vādanataḥ sapāda-ṣaḍ-vādana-paryantaṁ krīḍati.
*Ramesha plays from quarter past five to quarter past six.*

रमेशः पदोनसप्तवादनतः पदोन-अष्टवादनपर्यन्तम् अभ्यासं करोति ।

rameśaḥ padona-sapta-vādanataḥ padona-aṣṭa-vādana-paryantam abhyāsaṁ karoti.
*Ramesha does practise from quarter to six to eight.*

रमेशः सार्ध-अष्टवादनतः नववादनपर्यन्तं भोजनं करोति ।

rameśaḥ sārdha-aṣṭa-vādanataḥ nava-vādana-paryantaṁ bhojanaṁ karoti.
*Ramesha eats from half past eight to nine.*

रमेशः दशवादनतः पञ्चवादनपर्यन्तं निद्रां करोति ।

rameśaḥ daśa-vādanataḥ pañca-vādana-paryantaṁ nidrāṁ karoti.
*Ramesha sleeps from ten to five.*

---

अन्य अन्य अपि वाक्यानि वदामि ।

anya anya api vākyāni vadāmi.
*I [will] also say some other sentences.*

सोमवासरतः शनिवासरपर्यन्तं विद्यालयः अस्ति ।

soma-vāsarataḥ śani-vāsara-paryantaṁ vidyālayaḥ asti.
*The school is from Monday to Saturday.*

फेब्रिमासतः मेय्मासपर्यन्तं घर्मकालः अस्ति ।

febrari-māsataḥ mey-māsa-paryantaṁ gharma-kālaḥ asti.
*Hot season is from February till May.*

अहं मङ्गलवासरतः शुक्रवासरपर्यन्तं व्रतं करोमि ।

ahaṁ maṅgala-vāsarataḥ śukra-vāsara-paryantaṁ vrataṁ karomi.
*I take a vow from Tuesday to Friday.*

भवान् वाक्यं वदति ?

bhavān vākyaṁ vadati?
*[Would] you say a sentence?*

मम सोमवासरतः मङ्गलवासरपर्यन्तं संस्कृतस्य काक्षा अस्ति ।

mama soma-vāsarataḥ maṅgala-vāsara-paryantaṁ saṁskṛtasya kākṣā asti.
*From Monday to Tuesday I have Sanskrit lesson.*

मम सोमवारतः शनिवासरपर्यन्तं परीक्षा अस्ति ।

mama soma-**vārataḥ** śani-vāsara-paryantaṁ parīkṣā asti.
*From Monday to Saturday I have exam.* ***(Mistake! Soma-vār** is correct in Hindi, but not in Sanskrit.)*

सोमवासरतः । पुनः वदतु ।

soma-**vāsarataḥ.** punaḥ vadatu!
*From Monday. Say again!*

सोमवासरतः शनिवासरपर्यन्तं परीक्षा अस्ति ।

soma-vāsarataḥ śani-vāsara-paryantaṁ parīkṣā asti.
*The exam is from Monday to Saturday.*

मम सोमवासरतः बुधवासरपर्यन्तं नृत्यकक्षा अस्ति ।

mama soma-vāsarataḥ budha-vāsara-paryantaṁ nṛtya-kakṣā asti.
*I have dancing lesson from Monday to Wednesday.*

विद्यालये गुरुवासरतः शनिवासरपर्यन्तं स्पर्धा अस्ति ।

vidyālaye guru-vāsarataḥ śani-vāsara-paryantaṁ spardhā asti.
*Competition is from Thursday to Saturday.*

अन्यत्र अपि एतस्य उपयोगः भवति । यथा - भारतदेशः कन्यकुमारीतः कश्मिरपर्यन्तम् अस्ति, हिन्दुमहासागरतः हिमालयपार्वतपर्यन्तम् अस्ति ।

anyatra api etasya upayogaḥ bhavati. yathā – bhāratadeśaḥ kanyakumārītaḥ kaśmira-paryantam asti, hindu-mahā-sāgarataḥ himālaya-pārvata-paryantam asti.
*This is also used elsewhere (in other cases). Such as – India spreads from Kanyakumari to Kashmir, from Indian ocean to the mountains of Himalaya.*

कर्णाटक-एक्स्प्रेस् बेङ्गलूरुतः दिल्लिपर्यन्तं गच्छति ।

karṇāṭaka-ekspres beṅgalūrutaḥ dilli-paryantaṁ gacchati.
*Karnataka express goes from Bengalore to Delhi.*

ज्ञातवन्तः खलु ?

jñātavantaḥ khalu?
*Have you understood?*

आम्, ज्ञातवन्तः ।

ām, jñātavantaḥ.
*Yes, we understood.*

---

*HINDI: The meaning of* ***"from – to"*** *is expressed with* ***-tah – paryantam.***

---

धन्यवादः ।

dhanyavādaḥ.
*Thank you.*

पुनर् मिलामः ।

punar milāmaḥ.
*We meet again.*

रामनाल । रामनाल । कुत्र अस्ति ?

rāmanāla???. rāmanāla. kutra asti?
*Ramadala! Ramadala! Where are you?*

आगतः, श्रीमन्।

āgataḥ, śrīman.
*I came, mister.*

जानति कः समायः ? कुत्र गतवान् ?

jānati kaḥ samāyaḥ? kutra gatavān?
*Do you know what is the time? Where did you go?*

सार्धपञ्चवादनम्।

sārdha-pañca-vādanam.
*[It is] half past five.*

इयत् तव ??? पर्यन्तं किं कुर्वन् आसित ?

iyat tava ??? paryantaṁ kiṁ kurvan āsit?
*What have you been doing from then to now????*

अत्र एव आसं, श्रीमन्। बहिः।

atra eva āsaṁ, śrīman. bahiḥ.
*I was just here outside, mister.*

अन्दतम् म व अगतु ?

andatam ma va agatu ????????
*???*

कदा कार्यालयम् आगतवान ?

kadā kāryālayam āgatavān?
*When did you come to the office?*

सार्धनववादने।

sārdha-nava-vādane.
*At half past nine.*

तदा किं कृतवान ?

tadā kiṁ kṛtavān?
*What did you do then?*

स्वच्छतां कृतवान्।

svacchatāṁ kṛtavān.
*I was cleaning.*

कदा ?

kadā?
*When?*

सार्धनववादनतः दशवादनपर्यन्तं स्वच्छतां कृतवान्।

sārdha-nava-vādanataḥ daśa-vādana-paryantaṁ svacchatāṁ kṛtavān.
*From half past nine to ten I did the cleaning.*

ततः ?

tataḥ?
*[And] from that [time on]?*

दशवादनतः सार्ध-एकादशवादनपर्यन्तं पत्राणि परिशीलितवान्।

daśa-vādanataḥ sārdha-ekādaśa-vādana-paryantaṁ patrāṇi pariśīlitavān.
*From ten to half past eleven I was checking the mail.*

ततः किं कृतवान ?

tataḥ kiṁ kṛtavān?
*[And] what did you do from that [time on]?*

ततः सार्ध-एकादशवादने चायापनार्थं गतवान्।

tataḥ sārdha-ekādaśa-vādane cāyāpanārthaṁ gatavān.
*Then at half past eleven I went to take tea.*

ततः कदा आगतवान ?

tataḥ kadā āgatavān?
*When did you come [back] from [after] that?*

सपादद्वादशवादने।

sapāda-dvādaśa-vādane.
*At quarter past twelve.*

तन्नाम सार्ध-एकादशवादनतः

सपादद्वादशवादनपर्यन्तम् अपि चायं पीतवान् वा ?

tannāma sārdha-ekādaśa-vādanataḥ sapāda-dvādaśa-vādana-paryantam api cāyaṁ pītavān vā?
*So you've been drinking tea from half past eleven to quarter past twelve?*

ततः किं कृतवान ?

tataḥ kiṁ kṛtavān.
*[And] what did you do from that [time on]?*

सपादद्वादशतः द्विवादनपर्यन्तं पत्राणाम् उत्तरं

लिखितवान्।

sapāda-dvādaśataḥ dvi-vādana-paryantaṁ patrāṇām uttaraṁ likhitavān.
*From quarter past twelve to two I've been writing the replies to the mail.*

द्विवादनतः त्रिवादनपर्यन्तं भोजनविरामः। तदा

भोजनं कृतवान् खलु ?

dvi-vādanataḥ trivādana-paryantaṁ bhojana-virāmaḥ. tadā bhojanaṁ kṛtavān khalu?
*From two to three is break for the meal. Then you took the meal, didn't you?*

आम्, सत्यम्।

ām, satyam.
*Yes, that's true.*

त्रिवादनतः चतुर्वादनपर्यन्तं स्वस्थानि एव निद्रां

कृतवान।

tri-vādanataḥ catur-vādana-paryantaṁ svasthāni eva nidrāṁ kṛtavān.
*From three to four you only slept at your own place.*

न, हे श्रीमन्।

na, he śrīman.
*No, oh, mister.*

जानामि, भोः। ततः ?

jānāmi, bhoḥ. tataḥ?
*Oh, I know. And from then on?*

सपादचतुर्वादनतः पञ्चवादनपर्यन्तं पत्राणि सञ्चिकासु

स्थापितवान्।

sapāda-catur-vādanataḥ pañca-vādana-paryantaṁ patrāṇi sañcikāsu sthāpitavān.
*From quarter to four to five I was putting the letters in envelopes (or files).*

साधु साधु।

sādhu sādhu.
*Good, good.*

सार्धचतुर्वादनतः सार्धपञ्चवादनपर्यन्तम् उद्याने विहारं

कृतवान्।

sārdha-catur-vādanataḥ sārdha-pañca-vādana-paryantam udyāne vihāraṁ kṛtavān.
*From half past four to half past five you were taking leisure in the park.*

तथा नैव श्रीमन्।

tathā naiva śrīman.
*It was really not so, mister.*

सर्वम् अपि जानामि।

sarvam api jānāmi.
*I know everything.*

श्वः आराभ्या अहम् एव पदिशीलयिश्यामि??? ।

सार्धनववादनतः पञ्चवादनपर्यन्तं भवान् किं किं करोति

इति अहम् एव परिक्षायां करोमि। यदि आलस्यं

दर्शयसि तर्हि उद्योगतः निष्काशयामि। गच्छतु।

śvaḥ ārābhyā aham eva padiśīrayiśyāmi???. sārdha-nava-vādanataḥ pañca-vādana-paryantaṁ bhavān kiṁ kiṁ karoti iti aham eva paricayaṁ karomi. yadi ālasyaṁ darśayasi tarhi udyogataḥ niṣkāśayāmi. gacchatu!

*Tomorow in the beginning I will ???? From half past nine till five o'clock I will get familiar what you are doing. If you show idleness then I will fire you from [your] job. Go!*

---

भवत्सु प्रतिदिनं योगासनं के के कुर्वन्ति ?

bhavatsu pratidinaṁ yogāsanaṁ ke ke kurvanti?
*Who of (lit.: in) you does yoga postures every day?*

अहं करोमि ।

ahaṁ karomi.
*I do.*

भवान् करोति ?

bhavān karoti?
*You do?*

अहं करोमि ।

ahaṁ karomi.
*I do.*

भवान् करोति ?

bhavān karoti?
*You do?*

अहं न करोमि ।

ahaṁ na karomi.
*I don't do.*

न करोति ।

na karoti.
*You don't do.*

अवश्यं करोतु । अद्यारभ्य प्रतिदिनं योगासनं करोतु ।

avaśyaṁ karotu. adyārabhya pratidinaṁ yogāsanaṁ karotu.
*You should certainly do. Beginning from today do the yoga postures.*

भवान् करोति ?

bhavān karoti?
*Do you do?*

अहम् अपि न करोमि ।

aham api na karomi.
*I also don't do.*

तर्हि अद्यारभ्य मास्तु । श्वः आरभ्य योगासनं करोतु ।

tarhi adya ārabhya māstu. śvaḥ ārabhya yogāsanaṁ karotu!
*Then beginning from today you don't. Beginning from tomorrow do the yoga postures!*

अद्य आरभ्य । श्वः आरभ्य ।

adya ārabhya. śvaḥ ārabhya.
*From today on. [Beginning from today.] From tomorrow on. [Beginning from tomorrow.]*

अद्य आरभ्य भवन्तः किं किं कुर्वन्ति ? वदन्तु ।

adya ārabhya bhavantaḥ kiṁ kiṁ kurvanti? vadantu!
*What [will] you (pl.) do from today on? Say!*

अहम् अद्य आरभ्य संयक् पठामि ।

aham adya ārabhya saṁyak paṭhāmi.
*From today on I [will] study well.*

अहम् अद्य आरभ्य अधिकं न क्रीडामि ।

aham adya ārabhya adhikaṁ na krīḍāmi.
*From today on I [will] not play much.*

अहम् अद्य आरभ्य ध्यानं करोमि ।

aham adya ārabhya dhyānaṁ karomi.
*From today on I [will] meditate.*

पुनः वदतु ।

punaḥ vadatu!
*Say again!*

अहम् अद्यम् ... अद्य आरभ्यां ध्यानं करोमि।

aham **adyam** ... adya ārabhyāṁ dhyānaṁ karomi.
*I* ***today*** *... From today on I [will] meditate.* **(Mistake!)**

अहम् अद्य आरभ्य ध्यानं करोमि।

aham adya ārabhya dhyānaṁ karomi.
*From today on I [will] study.*

अहम् अद्य आरभ्य सत्यं वदामि।

aham adya ārabhya satyaṁ vadāmi.
*From today on I [will] speak the truth.*

अहम् अद्य आरभ्य आलस्यं त्यजामि।

aham adya ārabhya ālasyaṁ tyajāmi.
*From today on I [will] give up laziness.*

अहम् अद्य आरभ्य स्तोत्रं पठामि।

aham adya ārabhya stotraṁ paṭhāmi.
*From today on I [will] read a hymn.*

अहम् अद्य आरभ्य पाठं पठामि।

aham adya ārabhya pāṭhaṁ paṭhāmi.
*From today on I [will] learn the lesson.*

अहम् अद्य आरभ्य प्रार्थनां करोमि।

aham adya ārabhya prārthanāṁ karomi.
*From today on I [will] pray.*

अहम् अद्य आरभ्य प्रतिदिनम् अध्यायानं करोमि।

aham adya ārabhya pratidinam adhyayanaṁ karomi.
*From today on I [will] study everyday.*

अहम् अद्य आरभ्यां योगासनं करोमि।

aham adya **ārabhyāṁ** yogāsanaṁ karomi.
*From today on I [will] do yoga postures.* **(Mistake!)**

पुनः वदतु।

punaḥ vadatu!
*Say again!*

अहं अद्य आरभ्यां योगासनं करोमि।

aham adya **ārabhyāṁ** yogāsanaṁ karomi.
*From today on I [will] do yoga postures.* **(mistake!)**

अहम् अद्य आरभ्य योगासनं करोमि।

aham adya ārabhya yogāsanaṁ karomi.
*From today on I [will] do yoga postures.* **(Teacher corrects!)**

पाठयामि, भवन्तः वदन्तु।

pāṭhayāmi, bhavantaḥ vadantu.
*I teach, you say.*

अद्य आरभ्य।

adya ārabhya.
*From today on.*

श्वः आरभ्य।

śvaḥ ārabhya.
*From tomorrow on.*

परश्वः आरभ्य।

paraśvaḥ ārabhya.
*Beginning from the day after tomorrow.*

एकवरं वदन्तु।

ekavaraṁ vadantu!
*Say once!*

अद्य आरभ्य।

adya ārabhya.
*From today on.*

श्वः आरभ्य।

śvaḥ ārabhya.
*From tomorrow on.*

परश्वः आरभ्य।

paraśvaḥ ārabhya.
*Beginning from the day after tomorrow.*

*HINDI: About the meaning of:*

*SCREEN:*

अद्य आरभ्य   adya ārabhya *from today on*

श्वः आरभ्य   śvaḥ ārabhya *from tomorrow on*

चमसः। अहं चमसं ददामि। अहम् अर्जुनस्य कृते चमसं ददामि।

camasaḥ. ahaṁ camasaṁ dadāmi. aham arjunasya kṛte camasaṁ dadāmi.
*The spoon. I give the spoon. I give the spoon to Arjuna.*

सुधाखण्डः। सुधाखण्डं ददामि। अहं यतीन्द्रस्य कृते सुधाखण्डं ददामि।

sudhākhaṇḍaḥ. sudhākhaṇḍaṁ dadāmi. ahaṁ yatīndrasya kṛte sudhākhaṇḍaṁ dadāmi.
*The chalk. I give the chalk. I give the chalk to Yatindra.*

कार्यानम्। अहं कार्यानं ददामि। अहं जयन्तस्य कृते कार्यानं ददामि।

kār-yānam. ahaṁ kār-yānaṁ dadāmi. ahaṁ jayantasya kṛte kār-yānaṁ dadāmi.
*The car. I give the car. I give the car to Jayanta.*

दूरवाणी। अहं विदिशायाः कृते दूरवाणीं ददामि।

dūravāṇī. ahaṁ vidiśāyāḥ kṛte dūravāṇīṁ dadāmi.
*The phone. I give the phone to Vidisha.*

पत्रिका। अहं पत्रिकां ददामि। अहं शार्वर्याः कृते पत्रिकां ददामि।

patrikā. ahaṁ patrikāṁ dadāmi. ahaṁ śārvaryāḥ kṛte patrikāṁ dadāmi.
*The magazine. I give the magazine. I give the magazine to Sharvarya.*

भवन्तः मम कृते किं किं यच्छन्ति ? जयन्तः ददतु।

bhavantaḥ mama kṛte kiṁ kiṁ yacchanti? jayantaḥ dadatu!
*What [will] you give to me? Jayanta, give!*

अहं भवत्याः कृते ददामि।

ahaṁ bhavatyāḥ kṛte dadāmi.
*I give to you.*

अर्जुनः ददतु।

arjunaḥ dadatu!
*Arjuna, give!*

अहं शिक्षिकायाः कृते चमसं **ददातु**।

ahaṁ śikṣikāyāḥ kṛte camasaṁ **dadātu.**
*I **give** the spoon to the teacher.* **(Mistake!)**

पुनः वदतु।

punaḥ vadatu.
*Say again!*

अहं शिक्षिकायाः कृते चमसं ददामि।

ahaṁ śikṣikāyāḥ kṛte camasaṁ dadāmi.
*I give the spoon to the teacher.*

समीचीनम्। विदिशा ददातु।

samīcīnam. vidiśā dadātu!
*Good. Vidisha, give!*

अहं भवत्याः कृते दूरवाणीं ददामि।

ahaṁ bhavatyāḥ kṛte dūravāṇīṁ dadāmi.
*I give you the phone.*

अहं भवत्याः कृते पत्रिकां ददामि।

ahaṁ bhavatyāḥ kṛte patrikāṁ dadāmi.
*I give you the magazine.*

जयन्तः। जयन्तस्य कृते।

jayantaḥ. jayantasya kṛte.
*Jayanta. To Jayanta.*

विदिशा । विदिशायाः कृते ।

vidiśā. vidiśāyāḥ kṛte.
*Vidisha. To Vidisha.*

शार्वरी । शार्वर्याः कृते ।

śārvarī. śārvaryāḥ kṛte.
*Sharvari. To Sharvari.*

मित्रम् । मित्रस्य कृते ।

mitram. mitrasya kṛte.
*Friend. To the friend.*

एवम् अहं शब्दं वदामि भवन्तः "कृते" योजयन्तु ।

अस्तु वा ?

evam ahaṁ śabdaṁ vadāmi bhavantaḥ "kṛte" yojayantu. astu vā?
*Thus I say a word and you join it with* "kṛte". All right?

जयन्तः । जयन्तस्य कृते ।

jayantaḥ. jayantasya kṛte.
*Jayanta. To Jayanta.*

अर्जुनः । अर्जुनस्य कृते ।

arjunaḥ. arjunasya kṛte.
*Arjuna. To Arjuna.*

यतीन्द्रः । यतीन्द्रस्य कृते ।

yatīndraḥ. yatīndrasya kṛte.
*Yatindra. To Yatindra.*

लेखकः । लेखकस्य कृते ।

lekhakaḥ. lekhakasya kṛte.
*A writer. To the writer.*

विदिशा । विदिशायाः कृते ।

vidiśā. vidiśāyāḥ kṛte.
*Vidisha. To Vidisha.*

चैत्रा । चैत्रायाः कृते ।

caitrā. caitrāyāḥ kṛte.
*Chaitra. To Chaitra.*

शार्वरी । शार्वर्याः कृते ।

śārvarī. śārvaryāḥ kṛte.
*Sharvari. To Sharvari.*

पार्वती । पार्वत्याः कृते ।

pārvatī. pārvatyāḥ kṛte.
*Parvarti. To Parvati.*

हर्शिता । हर्शितायाः कृते ।

harśitā. harśitāyāḥ kṛte.
*Harshita. To Harshita.*

मालती । मालत्याः कृते ।

mālatī. mālatyāḥ kṛte.
*Malati. To Malati.*

शमन्तः । शमन्तस्य कृते ।

śamantaḥ. śamantasya kṛte.
*Shamanta. To Shamanta.*

मालती । मालत्याः कृते ।

mālatī. mālatyāḥ kṛte.
*Malati. To Malati.*

गौरी । गौर्याः कृते ।

gaurī. gauryāḥ kṛte.
*Gauri. To Gauri.*

शार्वरी । शार्वर्याः कृते ।

śārvarī. śārvaryāḥ kṛte.
*Sharvari. To Sharvari.*

शालिनी । शालिन्याः कृते ।

śālinī. śālinyāḥ kṛte.
*Shalini. To Shalini.*

भारती । भारत्याः कृते ।

bhāratī. bhāratyāḥ kṛte.
*Bharati. To Bharati.*

नदी । नद्याः कृते ।

nadī. nadyāḥ kṛte.
*River. To the river.*

घटी । घट्याः कृते ।

ghaṭī. ghaṭyāḥ kṛte.
*Watch. To the watch.*

---

इदानीम् एकम् अभ्यासं कुर्मः ।

idānīm ekam abhyāsaṁ kurmaḥ.
*Now we do one exercise.*

लता, गोपालः, मधुरं ददाति ।

latā, gopālaḥ, madhuraṁ dadāti.
*Lata, Gopala, gives a sweet.*

लता गोपालस्य कृते मधुरं ददाति ।

latā gopālasya kṛte madhuraṁ dadāti.
*Lata gives a sweet to Gopala.*

वदन्तु !

vadantu!
*Say (pl.)!*

लता गोपालस्य कृते मधुरं ददाति ।

latā gopālasya kṛte madhuraṁ dadāti.
*Lata gives a sweet to Gopala.*

लता शिक्षकस्य कृते पुस्तकं ददाति ।

latā śikṣakasya kṛte pustakaṁ dadāti.
*Lata gives a book to the teacher.*

लता ममतायाः कृते टिप्पणीं ददाति ।

latā mamatāyāḥ kṛte ṭippaṇīṁ dadāti.
*Lata gives a note to Mamata.*

लता पुष्पायाः कृते सूचनां ददाति ।

latā puṣpāyāḥ kṛte sūcanāṁ dadāti.
*Lata gives instruction to Pushpa.*

लता भगिन्याः कृते धनं ददाति ।

latā bhaginyāḥ kṛte dhanaṁ dadāti.
*Lata gives money to sister.*

लता श्रीमत्याः कृते उपायनं ददाति ।

latā śrīmatyāḥ kṛte upāyanaṁ dadāti.
*Lata gives a present to Shrimati.*

लता मित्रस्य कृते सन्देशं ददाति ।

latā mitrasya kṛte sandeśaṁ dadāti.
*Lata gives a message to [her] friend.*

माता पुत्रस्य कृते किं किं ददाति ? वदन्ति ? वदतु ।

mātā putrasya kṛte kiṁ kiṁ dadāti? vadanti? vadatu!
*What [various things] does mother give to the son? Would you (pl.) say? Say!*

माता पुत्रस्य कृते मोदकं ददाति ।

mātā putrasya kṛte modakaṁ dadāti.
*Mother gives a sweet to [her] son.*

माता पुत्रस्य कृते वात्सल्यं ददाति ।

mātā putrasya kṛte vātsalyaṁ dadāti.
*Mother gives tenderness to [her] son.*

माता पुत्रस्य कृते सुधाखण्डं ददाति ।

mātā putrasya kṛte sudhākhaṇḍaṁ dadāti.
*Mother gives a chalk to [her] son.*

माता पुत्रस्य कृते पुस्तकं ददाति ।

mātā putrasya kṛte pustakaṁ dadāti.
*Mother gives a book to [her] son.*

माता पुत्रस्य कृते क्षीरं ददाति ।

mātā putrasya kṛte kṣīraṁ dadāti.
*Mother gives milk to [her] son.*

माता पुत्रस्य कृते औषधं ददाति ।

mātā putrasya kṛte auṣadhaṁ dadāti.
*Mother gives medicine to [her] son.*

अत्र वदन्तु ।

atra vadantu!
*Say here!*

माता पुत्रस्य कृते नवनीतं ददाति ।

mātā putrasya kṛte navanītaṁ dadāti.
*Mother gives butter to [her] son.*

माता पुत्रस्य कृते तृतं ददाति ।

mātā putrasya kṛte **tṛtaṁ** dadāti.
*Mother gives ghee to [her] son.* **(Mistake!)**

घृतम् । पुनः वदतु ।

ghṛtaṁ. punaḥ vadatu!
*Ghee (clarified butter).* **(Teacher corrects!)** *Say again!*

माता पुत्रस्य कृते घृतं ददाति ।

mātā putrasya kṛte ghṛtaṁ dadāti.
*Mother gives ghee to [her] son.*

माता पुत्रस्य कृते स्नेहं ददाति ।

mātā putrasya kṛte snehaṁ dadāti.
*Mother gives love to [her] son.*

माता पुत्रस्य कृते क्रीडनकं ददाति ।

mātā putrasya kṛte krīḍanakaṁ dadāti.
*Mother gives a toy to [her] son.*

माता पुत्रस्य कृते प्रीतिं ददाति ।

mātā putrasya kṛte prītiṁ dadāti.
*Mother gives affection to [her] son.*

माता पुत्रस्य कृते क्षीरं ददाति ।

mātā putrasya kṛte kṣīraṁ dadāti.
*Mother gives milk to [her] son.*

देवः भक्तस्य कृते किं ददाति ?

devaḥ bhaktasya kṛte kiṁ dadāti?
*What does God give to the worshiper?*

देवः भक्तस्य कृते ??? ददाति ।

devaḥ bhaktasya kṛte ??? dadāti.
*God gives??? to the worshiper.*

एक-एकः वदति । देवः किं ददाति ?

eka-ekaḥ vadati. devaḥ kiṁ dadāti?
*Each of you say! What does God give?*

देवः भक्तस्य कृते आशीर्वादं ददाति ।

devaḥ bhaktasya kṛte āśīrvādaṁ dadāti.
*God gives blessing to the worshiper.*

देवः भक्तस्य कृते वरं ददाति ।

devaḥ bhaktasya kṛte varaṁ dadāti.
*God gives benediction to the worshiper.*

देवः भक्तस्य कृते इष्टार्थं ददाति ।

devaḥ bhaktasya kṛte iṣṭārthaṁ dadāti.
*God gives anything desired to the worshiper.*

देवः भक्तस्य कृते ज्ञानं ददाति ।

devaḥ bhaktasya kṛte jñānaṁ dadāti.
*God gives knowledge to the worshiper.*

देवः भक्तस्य कृते आशीर्वादं ददाति ।

devaḥ bhaktasya kṛte āśīrvādaṁ dadāti.
*God gives blessing to the worshiper.*

देवः भक्तस्य कृते कृपां ददाति ।

devaḥ bhaktasya kṛte kṛpāṁ dadāti.
*God gives grace to the worshiper.*

गुरुः शिष्यस्य कृते किं ददाति ?

guruḥ śiṣyasya kṛte kiṁ dadāti?
*What does teacher give to the disciple?*

गुरुः शिष्यस्य कृते विद्यां ददाति ।

guruḥ śiṣyasya kṛte vidyāṁ dadāti.
*Teacher gives knowledge to the disciple.*

इदानीं भवन्तः वदन्तु कस्य कृते किं यच्छन्ति ।

idānīṁ bhavantaḥ vadantu kasya kṛte kiṁ yacchanti.
*Now you say what do you give to whom.*

जयन्तस्य कृते फलं ददामि ।

jayantasya kṛte phalaṁ dadāmi.
*I give a fruit to Jayanta.*

अहं सिद्धर्तस्य कृते मधुरं ददामि ।

ahaṁ siddhartasya kṛte madhuraṁ dadāmi.
*I give a sweet to Siddharta.*

अहं कश्यपस्य कृते पात्रं ददामि ।

ahaṁ kaśyapasya kṛte pātraṁ dadāmi.
*I give a vessel to Kashyapa.*

अहं मित्रस्य कृते लेखनीं ददामि ।

ahaṁ mitrasya kṛte lekhanīṁ dadāmi.
*I give a pen to the friend.*

अहम् अजयस्य कृते अम्रफलं कदलीफलं च ददामि ।

aham ajayasya kṛte amra-phalaṁ kadalī-phalaṁ ca dadāmi.
*I give a mango and a banana to Ajaya.*

अहं तेजसस्य कृते फलं ददामि ।

ahaṁ tejasasya kṛte phalaṁ dadāmi.
*I give a fruit to Tejasa.*

अहं चैत्रायाः कृते करवस्त्रं ददामि ।

ahaṁ caitrāyāḥ kṛte karavastraṁ dadāmi.
*I give a handkerchief to Caitra.*

अहं सहोदरस्य कृते फलपुष्पं??? ददामि ।

ahaṁ sahodarasya kṛte phalapuṣpaṁ??? dadāmi.
*I give fruits and flowers??? to Sahodara.*

अहम् अग्रजायाः कृते कण्ठहारं ददामि ।

aham agrajāyāḥ kṛte kaṇṭhahāraṁ dadāmi.
*I give a necklace to [my] older sister.*

अहं **सख्यायाः** कृते पादकण्डूकं??? ददामि ।

ahaṁ **sakhyāyāḥ** kṛte pāda-kaṇḍukaṁ ??? dadāmi.
*I give football ??? to the friend.* **(Mistake!)**

अह ... सख्याः कृते ॥ ।

ahaṁ sakhyāḥ kṛte ...
*I ... to the friend.* **(Teacher corrects!)**

अहं सख्याः कृते पादकण्डूकं??? ददामि ।

ahaṁ sakhyāḥ kṛte pāda-kaṇḍukaṁ ??? dadāmi.
*I give football ??? to the friend.*

अहं मम सख्याः कृते पत्रिकां ददामि ।

ahaṁ mama sakhyāḥ kṛte patrikāṁ dadāmi.
*I give a magazine to my friend.*

---

*HINDI: In the sense of giving the word* **kṛte** *is used with the receiver in* **ṣaṣṭhī-vibhakti.** *Per example:*

रामः – रामस्य कृते rāmaḥ - rāmasya kṛte

मनोजकुमारः – मनोजकुमारस्य कृते

manojakumāraḥ - manojakumārasya kṛte

अनिता – अनितायाः कृते anitā - anitāyāḥ kṛte

चान्दिनी – चान्दिन्याः कृते cāndinī - cāndinyāḥ kṛte

---

भवतः नाम किम् ?

bhavataḥ nāma kim?
*What is your name?*

मम नाम सुशन्तः ।

mama nāma suśantaḥ.
*My name is Sushanta.*

सुशन्तः आगच्छतु ।

suśantaḥ āgacchatu!
*Sushanta come!*

अहं यथा करोमि भवान् तथा करोति ।

ahaṁ yathā karomi bhavān tathā karoti.
*You do as I do. (Lit.: As I do so you do.)*
***(All the following examples are literal translations.)***

सुशन्तः अहं यथा करोमि तथा करोति ।

suśantaḥ ahaṁ yathā karomi tathā karoti.
*As I do so Sushanta does.*

अहं लिखामि ।

ahaṁ likhāmi.
*I write.*

विदिशे ! आगच्छतु ।

vidiśe! āgacchatu!
*Vidisha! Come!*

अहं यथा लिखामि तथा लिखति वा ?

ahaṁ yathā likhāmi tathā likhati vā?
*As I write so you write, will you?*

आम् ।

ām.
*Yes.*

लिखतु ।

likhatu!
*Write!*

अहं यथा लिखामि तथा विदिशा लिखति ।

ahaṁ yathā likhāmi tathā vidiśā likhati.
*As I write so Vidisha writes.*

चैत्र उत्तिष्ठतु । अहं यथा वदामि तथा भवती करोति वा ?

caitra uttiṣṭhatu! ahaṁ yathā vadāmi tathā bhavatī karoti vā?
*Chaitra stand up! Will you do as I say?*

आम् ।

ām.
*Yes.*

शिरः स्पृशतु ।

śiraḥ spṛśatu!
*Touch the head!*

कण्डूयानं करोतु ।

kaṇḍūyānaṁ karotu!
*Scratch [yourself]!*

उपनेत्रं सम्यक् करोतु ।

upanetraṁ samyak karotu!
*Correct [your] eyeglasses!*

कर्णं स्पृशतु ।

karṇaṁ spṛśatu!
*Touch [your] ear!*

उपविशतु ।

upaviśatu!
*Sit down!*

अहं यथा वदामि तथा चैत्रा करोति ।

ahaṁ yathā vadāmi tathā caitrā karoti.
*As I say so Chaitra does.*

कालिदासः यथा काव्यं लिखति तथा कोऽपि न लिखति ।

kālidāsaḥ yathā kāvyaṁ likhati tathā ko 'pi na likhati.
*As Kalidasa writes poetry so nobody writes.*

यथा कालिदासः काव्यं लिखति तथा कोऽपि न लिखति ।

yathā kālidāsaḥ kāvyaṁ likhati tathā ko 'pi na likhati.
*As Kalidasa writes poetry so nobody writes.*

यथा चित्रकारः चित्रं लिखति तथा कः लिखति ।

yathā citrakāraḥ citraṁ likhati tathā kaḥ likhati?
*As the painter draws a picture who draws like that?*

यथा चैत्रा अभिनयं करोति तथा यतीन्द्रः न करोति ।

yathā caitrā abhinayaṁ karoti tathā yatīndraḥ na karoti.
*As Chaitra acts so Yatindra doesn't do [act].*

यथा - तथा।

yathā – tathā.
*As – so.*

अहं वाक्यद्वयं वदामि भवन्तः "यथा - तथा" योजयन्तु। अस्तु वा ?

ahaṁ vākya-dvayaṁ vadāmi bhavantaḥ "yathā – tathā" yojayantu! astu vā?
*I say two sentences, you join them together with "as – so". All right?*

रमा गीतां गायति। गीता अपि गायति।

ramā gītāṁ gāyati. gītā api gāyati.
*Rama sings a song. Gita also sings.*

यथा रमा गीतां गायति तथा गीता अपि गायति।

yathā ramā gītāṁ gāyati tathā gītā api gāyati.
*As Rama sings a song, so Gita also sings.*

भीमः खादति। कृष्णः न खादति।

bhīmaḥ khādati. kṛṣṇaḥ na khādati.
*Bhima eats. Krishna does not eat.*

यथा भीमः खादति तथा कृष्णः न खादति।

yathā bhīmaḥ khādati tathā kṛṣṇaḥ na khādati.
*As Bhima eats, so Krsna does not eat.*

सुरेशः चित्रं लिखति। रमेशः अपि चित्रं लिखति।

sureśaḥ citraṁ likhati. rameśaḥ api citraṁ likhati.
*Suresha draws a picture. Ramesha also draws a picture.*

यथा सुरेशः चित्रं लिखति तथा रमेशः अपि चित्रं लिखति।

yathā sureśaḥ citraṁ likhati tathā rameśaḥ api citraṁ likhati.
*As Suresha draws a picture so ramesha also draws a picture.*

नर्तकी नृत्यं करोति। भवती करोति।

nartakī nṛtyaṁ karoti. bhavatī karoti.
*A dancer dances. You (fem.) do.*

यथा नर्तकी नृत्यं करोति तथा भवती करोति।

yathā nartakī nṛtyaṁ karoti tathā bhavatī karoti.
*As dancer dances, so you also do [dance].*

---

*HINDI: The meaning of* **yatha – tatha** *is* ***"as – so".***

---

## सुभाषितम्

**subhāṣitam**
*verse*

यथा चित्तं तथा वाचो   यथा वाचस्तथा क्रिया ।
चित्ते वाचि क्रियायां च   महतामेकरूपता ॥

yathā cittaṁ tathā vāco   yathā vācas tathā kriyā
citte vāci kriyāyāṁ ca   mahatām eka-rūpatā

yathā – *as;* cittam – *thoughts;* tathā – *so;* vācaḥ – *speech;* yathā – *as;* vācaḥ – *speech;* tathā – *so;* kriyā – *action;* citte – *in thoughts;* vāci – *in speech;* kriyāyām – *in action;* ca – *and;* mahatām – *of the great;* eka-rūpatā – *uniformity.*

The speech of great people corresponds to their thoughts, and their actions correspond to their speech. There is uniformity in their thoughts, speech and action.
*(Lit.: As the thoughts, such the speech, as the speech, such the actions. In thoughts, speech and action of great people there is uniformity.)*

इदानीं श्रुतस्य सुभाषितस्य तात्पर्यम् एवम् अस्ति ।

idānīṁ śrutasya subhāṣitasya tātparyam evam asti.
*Now here is the meaning of the verse we heard.*

लोके द्विविधाः जनाः भवन्ति । सज्जनाः दुर्जनाः च ।
सज्जनानां विचारः यः भवति सा एव वाणी भवति ।
यथा विचारः भवति तथा वणी भवति ।

loke dvividhāḥ janāḥ bhavanti. sajjanāḥ durjanāḥ ca. sajjanānāṁ vicāraḥ yaḥ bhavati, sā eva vāṇī bhavati. yathā vicāraḥ bhavati tathā vaṇī bhavati.
*There are two kinds of people in the world. Good and bad people. Good people speak as they think. As the thoughts are such is also the speaking.*

यथा वाणी भवति तथा तेषां व्यवहारः भवति ।

yathā vāṇī bhavati tathā teṣāṁ vyavahāraḥ bhavati.
*As their speech is, such is also their conduct.*

ते यथा चिन्तयन्ति तथैव वदन्ति । यथा वदन्ति तथैव व्यवहारे आचरन्ति । अतः सज्जनानां विचारः वाणी अनन्तरं व्यवहारः च समानाः भवन्ति ।

te yathā cintayanti tathaiva vadanti. yathā vadanti tathaiva vyavahāre ācaranti. ataḥ sajjanānāṁ vicāraḥ vāṇī anantaraṁ vyavahāraḥ ca samānāḥ bhavanti.
*As they think so they also talk. As they talk so they also practice their conduct. Therefore the thinking and speaking of good people and then behaving are the same.*

एतदेव सज्जनानां लक्षनम् अस्ति ।

etad eva sajjanānāṁ lakṣanam asti.
*So this is the characteristic of great people.*

धन्यवादः । नमो नमः ।

dhanyavādaḥ. namo namaḥ.
*Thank you! Salutations!*

---

**Teacher:**

ममता

Mamatā

**Students:**

अजयः   सिद्धर्थः वाप्वे   जयंत् जे. एस्
Ajayaḥ   Siddharthaḥ Vāpve   Jayant J. S

सुशंत् के. वि.   कश्यप आर्. वि.   तेजस् बि. आर्.
Suśant K. V.   Kaśyapa R. V.   Tejas B. R.

अभिजित् एन्.   अर्जुन बि. एन्.   यतीन्द्र बि. एस्.
Abhijit N.   Arjuna B. N.   Yatīndra B. S.

चेतना कौशिक् ब्. एन्.   स्वाति एम्. एन्.
Cetanā Kauśik B. N.   Svāti M. N.

रश्मि एन्.   दीपिका के. सि.   चैत्रा एच्. एम्.
Raśmi N.   Dīpikā K. C.   Caitrā H. M.

सिंधु आर्   शार्वरी   हर्शिता एस्.   विदिशा एच् वि
Sindhu R.   Śārvarī   Harśitā S.   Vidiśā H. V.

# LESSON 14 – OVERVIEW

*In lesson fourteen you will do further practice of* **yathā – tathā** *(as – so) and of* **as dhātu** *(the root of the verb "to be") in connection with* **saptamī-vibhakti** *(locative case) and in plural. You will practice number one in masculine, feminine and neuter:* **ekaḥ, ekam, ekā**.

## PAST TENSE (AORIST) OF BHU-DHĀTU (VERB "TO BE")

| | | | |
|---|---|---|---|
| **prathama-puruṣa-bahuvācanam** *(3rd pers. pl.)* | आसन् | āsan | *(they) were* |
| **uttama-puruṣa-bahuvācanam** *(1st pers. pl.)* | आस्म | āsma | *(we) were* |

गृहे मम भ्रातरः आसन्। gṛhe mama bhrātaraḥ āsan. *In my home were my brothers.*

## SAṄKHYĀḤ (NUMBERS)

| | | | |
|---|---|---|---|
| *m.* | एकः बालकः | **ekaḥ** bālakaḥ | *one boy* |
| *f.* | एका बालिका | **ekā** bālikā | *one girl* |
| *n.* | एकम् उपनेत्रम् | **ekam** upanetram | *one eyeglases* |

***- numeral "one" takes the gender of the noun***

# Lecture 14

---

*HINDI: In the previous lecture we learned the meaning of* **caturthī–vibhakti** ***(dative case)*** *using the word* **kṛte.** *In this lesson we will practice past tense forms of* **as dhātu** ***(verb root "to be").***

---

नमो नमः ।

namo namaḥ.
*Salutations.*

पूर्वतनपाठे वयं "यथा – तथा" एतद् अवश्यं ज्ञातवन्तः । इदानीं तस्य पुनःस्मरणं कुर्मः ।

pūrvatana-pāṭhe vayaṁ "yathā – tathā" etad avaśyaṁ jñātavantaḥ. idānīṁ tasya punaḥ-smaraṇaṁ kurmaḥ.
*In the previous lesson we got to know "as … so …". Now we will remember that again. (Lit.: … we do re-rememberance of that.)*

बाणः यथा गद्यं लिखति तथा अन्यः न लिखति ।

bāṇaḥ yathā gadyaṁ likhati tathā anyaḥ na likhati.
*As Bana writes prose, so no other writes. (Lit.: … so other doesn't write; in English the order is usually reversed: "Nobody writes as Bana does.")*

यथा रविवर्मा चित्रं लिखति तथा अन्यः न लिखति ।

yathā ravivarmā citraṁ likhati tathā anyaḥ na likhati.
*As Ravivarma paints a picture, so no other paints.*

भवन्तः वाक्यं वदन्ति वा ? वदतु ।

bhavantaḥ vākyaṁ vadanti vā? vadatu!
*You (pl.) say a sentence? Say!*

यथा कुम्भकर्णः निद्रां करोति तथा विदिशा करोति ।

yathā kumbhakarṇaḥ nidrāṁ karoti tathā vidiśā karoti.
*As Kumbhakarna sleeps, so Vidisha does.*

यथा माता तथा पुत्री ।

yathā mātā tathā putrī.
*As [is] the mother, such [is] the daughter. (Similar to the saying: "Like father like son.")*

यथा वीणा पाठं पठति तथा सः न पठति ।

yathā vīṇā pāṭhaṁ paṭhati tathā saḥ na paṭhati.
*As Vina studies the lesson, so he doesn't study.*

यथा गीता गायति तथा रमा न गायति ।

yathā gītā gāyati tathā ramā na gāyati.
*As Gita sings, so Rama doesn't sing.*

यथा बीजः भवति तथा अङ्कुरः भवति ।

yathā bījaḥ bhavati tathā aṅkuraḥ bhavati.
*As the seed is, so the sprout is.*

यथा अनघा हसति तथा अन्यः न हसति ।

yathā anaghā hasati tathā anyaḥ na hasati.
*As inocent smiles, so no other smiles.*

यथा बकासुरः खादति तथा अन्यः न खादति ।

yathā bakāsuraḥ khādati tathā anyaḥ na khādati.
*As Bakasura eats, so no other eats.*

यथा नरेशः चित्रं लिखति तथा रामेशः न लिखति ।

yathā nareśaḥ citraṁ likhati tathā rāmeśaḥ na likhati.
*As Naresha draws a picture, so Ramesha doesn't draw.*

कूपी अस्ति । अस्ति वा कूपी ?

kūpī asti. asti vā kūpī?
*There is a bottle. Is there a bottle?*

कूपी अस्ति ।

kūpī asti.
*There is a bottle.*

जलम् अस्ति ?

jalam asti?
*Is there water?*

नास्ति। कूप्यां जलं नास्ति।

nāsti. kūpyāṁ jalaṁ nāsti.
*No, there isn't. There is no water in the bottle.*

प्रातःकाले कूप्यां जलम् आसीत्। प्रातःकाले जलम् आसीत्।

prātaḥ-kāle kūpyāṁ jalam āsīt. prātaḥ-kāle jalam āsīt.
*In the morning there was water in the bottle. In the morning there was water.*

प्रातःकाले वृष्ठिः आसीत्।

prātaḥ-kāle vṛṣṭhiḥ āsīt.
*In the morning there was rain.*

अद्य प्रातःकाले वृष्ठिः आसीत्।

adya prātaḥ-kāle vṛṣṭhiḥ āsīt.
*Today in the morning there was rain.*

प्रातःकाले मन्दिरे पूजा आसीत्।

prātaḥ-kāle mandire pūjā āsīt.
*In the morning there was puja in the temple.*

जवहर्लल् नेहेरु प्रधानमन्त्री आसीत्।

javaharlal neheru pradhāna-mantrī āsīt.
*Javaharlal Nehru was prime minister.*

आसीत्।

āsīt.
*[He, she, it] was.*

वाक्यं वदन्ति वा भवन्तः ?

vākyaṁ vadanti vā bhavantaḥ?
*Would you (pl.) say a sentence?*

स्वतन्त्रसङ्ग्रामकाले कः कः आसीत् ? वदन्तु।

svatantra-saṅgrāma-kāle kaḥ kaḥ āsīt? vadantu!
*Who was there in the time of the battle for independence? Say (pl.)!*

स्वतन्त्रसङ्ग्रामकाले गान्धीजि आसीत्।

svatantra-saṅgrāma-kāle gāndhīji āsīt.
*In the time of the battle for independence there was Gandhi.*

स्वतन्त्रसङ्ग्रामकाले सुभश्चन्द्रबोसे आसीत्।

svatantra-saṅgrāma-kāle subhaś-candra-bose āsīt.
*In the time of the battle for independence there was Subhash Chandra Bose.*

स्वतन्त्रसङ्ग्रामकाले भगत्सिङ्घः आसीत्।

svatantra-saṅgrāma-kāle bhagat-siṅghaḥ āsīt.
*In the time of the battle for independence there was Bhagat Singha.*

स्वतन्त्रसङ्ग्रामकाले झन्सीराणीलक्ष्मीभै आसीत्।

svatantra-saṅgrāma-kāle jhansīrāṇī-lakṣmī bhai āsīt.
*In the time of the battle for independence there was Jhansirani Lakshmi Bhai.*

स्वतन्त्रसङ्ग्रामकाले वलभभै पतेल् आसीत्।

svatantra-saṅgrāma-kāle valabhabhai patel āsīt.
*In the time of the battle for independence there was Valabha Bhai Patel.*

स्वतन्त्रसङ्ग्रामकाले तितुरणि चन्दम आसीत्।

svatantra-saṅgrāma-kāle tituraṇi candama??? āsīt.
*In the time of the battle for independence there was Titurani Candama ???.*

स्वतन्त्रसङ्ग्रामकाले लोकमण्यतिलक् आसीत्।

svatantra-saṅgrāma-kāle lokamaṇya-tilak āsīt.
*In the time of the battle for independence there was Lokamanya Tilak.*

स्वतन्त्रसङ्ग्रामकाले जवहर्लल् नेहेरु आसीत्।

svatantra-saṅgrāma-kāle javaharlal neheru āsīt.
*In the time of the battle for independence there was Javaharlal Nehru.*

स्वतन्त्रसङ्ग्रामकाले शिवजिनि??? आसीत्।

svatantra-saṅgrāma-kāle śivajini??? āsīt.
*In the time of the battle for independence there was Shivajini???.*

"आसीत्" उपजुज्य कनिचन वाक्यानि वदन्तु। वदतु।

"āsīt" upajujya kanicana vākyāni vadantu. vadatu!
*Using "was" say (pl.) some sentences! You (sing.) say!*

कण्यकुमारायां विवेकानन्दः आसीत्।

kaṇyakumārāyāṁ vivekānandaḥ āsīt.
*Vivekananda was in Kanyakumari.*

मथुरायां श्रीकृष्णः आसीत्।

mathurāyāṁ śrī-kṛṣṇaḥ āsīt.
*Shri Krishna was in Mathura.*

आयोध्यानगरे रामः आसीत्।

āyodhyā-nagare rāmaḥ āsīt.
*Rama was in the city of Ayodhya.*

धारानगरे भोजाराजः आसीत्।

dhārā-nagare bhojārājaḥ āsīt.
*The king of Bhoja was in the city of Dhara.*

उत्पीठिकायां पुस्तकम् आसीत्।

utpīṭhikāyāṁ pustakam āsīt.
*The book was on the table.*

मदते सः दयालुः आसीत्।

madate??? saḥ dayāluḥ āsīt.
*In Madata there was that merciful man.*

गतसप्ताहे मम भ्रातुः विवाहः आसीत्।

gata-saptāhe mama bhrātuḥ vivāhaḥ āsīt.
*Last week was my brother's wedding.*

ह्यः मम गृहे पूजा आसीत्।

hyaḥ mama gṛhe pūjā āsīt.
*Yesterday was puja in my house.*

विद्यालये वर्षिकोत्सवः आसीत्।

vidyālaye varṣikotsavaḥ āsīt.
*Aniversary celebration was in the school.*

उज्जैन्यां विक्रमः नाम राजा आसीत्।

ujjainyāṁ vikramaḥ nāma rājā āsīt.
*King named Vikrama was in Ujjaini.*

भोजराजः आसीत्। जवहर्लल् नेहेरु आसीत्।

सङ्ग्रमकाले महात्मा गान्धीजी आसीत्।

bhojarājaḥ āsīt. javaharlal neheru āsīt. saṅgrama-kāle mahātmā gāndhījī āsīt.
*King Bhoja was. Javaharlal Nehru was. Gandhi was in the time of the war.*

सङ्ग्रमकाले बहु जनाः सैनिकाः आसन्। सैनिकाः आसन्।

saṅgrama-kāle bahu janāḥ sainikāḥ āsan. sainikāḥ āsan.
*In the time of the war (for independence) many people were soldiers. [They] were soldiers.*

द्वापरयुगे कौरवाः आसन्।

dvāpara-yuge kauravāḥ āsan.
*Kauravas were in Dvapara-yuga.*

भारते ब्रितिश्जनाः आसन्।

bhārate britiś-janāḥ āsan.
*British people were in India.*

आसीत्। आसन्।

āsīt. āsan.
*Was. Were.*

अहम् एकवचनस्य वाक्यं वदामि, भवन्तः परिवर्तनं कुर्वन्तु।

aham ekavacanasya vākyaṁ vadāmi, bhavantaḥ parivartanaṁ kurvantu.
*I say sentence in singular, you make a change.*

| | |
|---|---|
| गायकः आसीत्। | गायकाः आसन्। |
| gāyakaḥ āsīt. | gāyakāḥ āsan. |
| *There was a singer.* | *There were singers.* |
| नायकः आसीत्। | नायकाः आसन्। |
| nāyakaḥ āsīt. | nāyakāḥ āsan. |
| *There was a leader.* | *There were leaders.* |
| कविः आसीत्। | कवयः आसन्। |
| kaviḥ āsīt. | kavayaḥ āsan. |
| *There was a poet.* | *There were poets.* |
| पण्डितः आसीत्। | पण्डिताः आसन्। |
| paṇḍitaḥ āsīt. | paṇḍitāḥ āsan. |
| *There was a scholar.* | *There were scholars.* |
| बालिका आसीत्। | बालिकाः आसन्। |
| bālikā āsīt. | bālikāḥ āsan. |
| *There was a girl.* | *There were girls.* |
| महिला आसीत्। | महिलाः आसन्। |
| mahilā āsīt. | mahilāḥ āsan. |
| *There was a lady.* | *There were ladies.* |
| बालकः आसीत्। | बालकाः आसन्। |
| bālakaḥ āsīt. | bālakāḥ āsan. |
| *There was a boy.* | *There were boys.* |
| चित्रकारः आसीत्। | चित्रकाराः आसन्। |
| citrakāraḥ āsīt. | citrakārāḥ āsan. |
| *There was a painter.* | *There were painters.* |
| नटः आसीत्। | नटाः आसन्। |
| naṭaḥ āsīt. | naṭāḥ āsan. |
| *There was a dancer.* | *There were dancers (masc.).* |
| नटी आसीत्। | नट्यःआसन्। |
| naṭī āsīt. | naṭyaḥ āsan. |
| *There was a dancer.* | *There were dancers (fem.).* |

---

इदानीं गणद्वयं कुर्मः। अत्र एकवचने वदन्ति, अत्र बहुवचने परिवर्तनं कुर्वन्ति। आरम्भं कुर्मः। अत्र वदन्तु।

idānīṁ gaṇa-dvayaṁ kurmaḥ. atra ekavacane vadanti, atra bahuvacane parivartanaṁ kurvanti. ārambhaṁ kurmaḥ. atra vadantu!
*Now we make two groups. Here you (pl.) say in singular, here make change into plural. We begin. [You] here say (pl.)!*

| | |
|---|---|
| मन्तकः??? आसीत्। | मन्तकाः??? आसन्। |
| mantakaḥ??? āsīt. | mantakāḥ??? āsan. |
| *There was ???* | *There were ???* |
| कविः आसीत्। | कवयः आसन्। |
| kaviḥ āsīt. | kavayaḥ āsan. |
| *There was a poet.* | *There were poets.* |
| मुर्खः आसीत्। | मुर्खाः आसन्। |
| murkhaḥ āsīt. | murkhāḥ āsan. |
| *There was a fool.* | *There were fools.* |
| घटी आसीत्। | घट्यःआसन्। |
| ghaṭī āsīt. | ghaṭyaḥ āsan. |
| *There was a watch.* | *There were watches.* |
| नर्तकः आसीत्। | नर्तकाः आसन्। |
| nartakaḥ āsīt. | nartakāḥ āsan. |
| *There was a dancer.* | *There were dancers.* |

इदानीम् आसन् उपयुज्य वाक्यं वदन्ति वा ? वदन्तु।

idānīm āsan upayujya vākyaṁ vadanti vā? vadantu!
*Would you (pl.) now say a sentence using "was"? Say (pl.)!*

फले कीताः आसन्।

phale kītāḥ āsan.
*Worms were in the fruit.*

ह्यः मम गृहे फलानि आसन्।

hyaḥ mama gṛhe phalāni āsan.
*There were fruits in my house yesterday.*

वृक्षे फलानि आसन्।

vṛkṣe phalāni āsan.
*Fruits were on the tree.*

ह्यः मम गृहे अतिथयः आसन्।

hyaḥ mama gṛhe atithayaḥ āsan.
*There were guests in my house yesterday.*

देवालये बहुजनाः आसन्।

devālaye bahujanāḥ āsan.
*There were many people in the temple.*

त्रेतयुगे बहु वानराः आसन्।

treta-yuge bahu vānarāḥ āsan.
*There were many monkeys in Treta-yuga.*

गृहे मम भ्रातरः आसन्।

gṛhe mama bhrātaraḥ āsan.
*In my home were my brothers.*

पूर्वं गुरुकुलाः आसन्।

pūrvaṁ gurukul**āḥ** (mistake!) āsan.
*Previously there used to be gurukul**as** (traditional schools for young boys).* **(Mistake!)**

गुरुकुलानि आसन्।

gurukul**āni** āsan.
*Gurukulas were.* **(Teacher corrects!)**

पूर्वं गुरुकुलानि आसन्।

pūrvaṁ gurukulāni āsan.
*Previously there used to be gurukulas.*

जलाशये मीनाः आसन्।

jalāśaye mīnāḥ āsan.
*In the ocean were fishes.*

वृक्षे वानराः आसन्।

vṛkṣe vānarāḥ āsan.
*Monkeys were on the tree.*

वने गृताः??? आसन्।

vane gṛtāḥ??? āsan.
*??? were in the forrest.*

---

इदानीम् एकम् अभ्यासं कुर्मः।

idānīm ekam abhyāsaṁ kurmaḥ.
*Now we do one exercise.*

गोविन्दः पूर्वं महाधनिकः आसीत्। तस्य गृहे किं किम् आसीत्, कानि कानि आसन् पश्यामः। अत्र लिखितम् अस्ति।

govindaḥ pūrvaṁ mahā-dhanikaḥ āsīt. tasya gṛhe kiṁ kim āsīt, kāni kāni āsan paśyāmaḥ. atra likhitam asti.
*Govinda was previously very rich man. We see what [all] was, what [various things] were in his house. [It] is writen here.*

गोविन्दस्य गृहे शुनकः आसीत्।

govindasya gṛhe śunakaḥ āsīt.
*In Govinda's house [there] was a dog.*

दूरदर्शनम् आसीत्।

dūradarśanam āsīt.
*A television was [there].*

कार्यानम् आसीत्।

kāryānam āsīt.
*A car was [there].*

विदेशीयघटी आसीत्।

videśīya-ghaṭī āsīt.
*[There] was a foreign watch.*

राजतपात्रम् आसीत्।

rājata-pātram āsīt.
*[There] was a silver vessel.*

सुवर्णहारः आसीत्।

suvarṇa-hāraḥ āsīt.
*[There] was a golden necklace.*

ग्रन्थालयः आसीत्।

granthālayaḥ āsīt.
*[There] was a library was.*

धेनुः आसीत्।

dhenuḥ āsīt.
*[There] was a cow was.*

पूजागृहम् आसीत्।

pūjā-gṛham āsīt.
*[There] was a prayerhall.*

गोविन्दस्य गृहे सेवकाः आसन्।

govindasya gṛhe sevakāḥ āsan.
*[There] were servants in Govinda's house.*

धेनवः आसन्।

dhenavaḥ āsan.
*[There] were cows.*

ग्रन्थाः आसन्।

granthāḥ āsan.
*[There] were books.*

कपाटिकाः आसन्।

kapāṭikāḥ āsan.
*[There] were wardrobes.*

यन्त्राणि आसन्।

yantrāṇi āsan.
*[There] were devices.*

पक्षिणः आसन्।

pakṣiṇaḥ āsan.
*[There] were birds.*

कम्बलाः आसन्।

kambalāḥ āsan.
*[There] were blankets.*

पात्राणि आसन्।

pātrāṇi āsan.
*[There] were vessels.*

सङ्गणकानि आसन्।

saṅgaṇakāni āsan.
*[There] were computers.*

गोविन्दस्य गृहे एतानि सर्वाणि आसन्। पूर्वम् आसन्, किम् अपि नास्ति। सः बहु निर्धनः।

govindasya gṛhe etāni sarvāni āsan. pūrvam āsan, kim api nāsti. saḥ bahu nirdhanaḥ.
*All these were in Govinda's house. [They] were [there] previously, [they] are not there [now]. He is very poor.*

---

सः बालकः आसीत्।

saḥ bālakaḥ āsīt.
*He was a boy.*

सः सैनिकः आसीत्।

saḥ sainikaḥ āsīt.
*He was a soldier.*

सा गायिका आसीत्।

sā gāyikā āsīt.
*She was a singer.*

अहं शिशुः आसम्।

ahaṁ śiśuḥ āsam.
*I was an infant.*

अहं मैसूरुनगरे आसम्।

ahaṁ maisūru-nagare āsam.
*I was in Misore.*

अहं गृहिणि अस्मि।

ahaṁ gṛhiṇi asmi.
*I am a housewife.*

अहं युवतिः आसम्।

ahaṁ yuvatiḥ āsam.
*I was a young woman.*

आसम्। वाक्यं वदन्ति वा ? वदन्तु।

āsam. vākyaṁ vadanti vā? vadantu!
*I was. Will you (pl.) say a sentence? Say (pl.)!*

अहं गतसप्ताहे मैसूरुनगरे आसम्।

ahaṁ gata-saptāhe maisūru-nagare āsam.
*I was in Mysore last week.*

ह्यः अहं देवालये आसम्।

hyaḥ ahaṁ devālaye āsam.
*Yesterday I was in the temple.*

ह्यः अहं ग्रन्थालये आसम्।

hyaḥ ahaṁ granthālaye āsam.
*Yesterday I was in the library.*

परह्यः अहं महराष्ट्रे आसम्।

parahyaḥ ahaṁ maharāṣṭre āsam.
*The day before yesterday I was in Maharashtra.*

प्रातःकाले अहं गृहे आसम्।

prātaḥ-kāle ahaṁ gṛhe āsam.
*In the morning I was at home.*

अहं प्रातःकाले शालायाम् आसम्।

ahaṁ prātaḥ-kāle śālāyām āsam.
*In the morning I was in school.*

प्रातःकाले अहं देवालये आसम्।

prātaḥ-kāle ahaṁ devālaye āsam.
*In the morning I was in the temple.*

गतवर्षे अहम् आपणिकः आसम्।

gata-varṣe aham āpaṇikaḥ āsam.
*Last year I was a shopkeeper.*

---

*HINDI: The meaning of past tense of the verb* **as** *in third person and first person is* ***"was"*** *in singular and* ***"were"*** *in plural.*

---

इदानीम् एकम् अभ्यासं कुर्मः। अहं वर्तमानकाले वाक्यं वदामि भवन्तः भूतकाले परिवर्तयन्तु।

idānīm ekam abhyāsaṁ kurmaḥ. ahaṁ vartamāna-kāle vākyaṁ vadāmi bhavantaḥ bhūta-kāle parivartayantu!
*Now we do one exercise. I say a sentence in present tense, you (pl.) change into past tense.*

| | |
|---|---|
| अहं गायिका अस्मि। | अहं गायिका आसम्। |
| ahaṁ gāyikā asmi.<br>*I am a singer.* | ahaṁ gāyikā āsam.<br>*I was a singer.* |
| अहं बालकः अस्मि। | अहं बालकः आसम्। |
| ahaṁ bālakaḥ asmi.<br>*I am a boy.* | ahaṁ bālakaḥ āsam.<br>*I was a boy.* |
| अहं चतुरः अस्मि। | अहं चतुरः आसम्। |
| ahaṁ caturaḥ asmi.<br>*I am smart.* | ahaṁ caturaḥ āsam.<br>*I was smart.* |
| अहं पण्डिता अस्मि। | अहं पण्डिता आसम्। |
| ahaṁ paṇḍitā asmi.<br>*I am a scholar (fem.).* | ahaṁ paṇḍitā āsam.<br>*I was a scholar (fem.).* |
| अहं लेखकः अस्मि। | अहं लेखकः आसम्। |
| ahaṁ lekhakaḥ asmi.<br>*I am a writer.* | ahaṁ lekhakaḥ āsam.<br>*I was a writer.* |
| अहं युवकः अस्मि। | अहं युवकः आसम्। |

aham yuvakaḥ asmi. aham yuvakaḥ āsam.
*I am a youth.* *I was a youth.*

अहं दुष्टः अस्मि । अहं दुष्टः आसम् ।

ahaṁ duṣṭaḥ asmi. ahaṁ duṣṭaḥ āsam.
*I am a miscreant.* *I was a miscreant.*

इदानीम् अन्यम् अभ्यासं कुर्मः ।

idānīm anyam abhyāsaṁ kurmaḥ.
*Now we do another exercise.*

अहम् एकैकम् उद्दिश्य “भवती आसीत्, भवान् आसीत्” वदामि, भवन्तः “अहम् आसं” वदन्तु ।

aham ekaikam uddiśya “bhavatī āsīt, bhavān āsīt” vadāmi, bhavantaḥ “aham āsaṁ” vadantu!
*After I say about each one of you “You (fem. sing.) were, you (masc. sing.) were”, you say “I was”.*

भवती चतुरा आसीत् । अहं चतुरा आसम् ।

bhavatī caturā āsīt. ahaṁ caturā āsam.
*You were smart (fem.).* *I was smart.*

भवती बुद्धिमती आसीत् । अहं बुद्धिमती आसम् ।

bhavatī buddhimatī āsīt. ahaṁ buddhimatī āsam.
*You were inteligent (fem.).* *I was inteligent.*

भवती सुन्दरी आसीत् । अहं सुन्दरी आसम् ।

bhavatī sundarī āsīt. ahaṁ sundarī āsam.
*You were beautiful (fem.).* *I was beautiful.*

भवती चटुला आसीत् । अहं चटुला आसम् ।

bhavatī caṭulā āsīt. ahaṁ caṭulā āsam.
*You (fem.) were kind.* *I was kind.*

भवान् शिशुः आसीत् । अहं शिशुः आसम् ।

bhavān śiśuḥ āsīt. ahaṁ śiśuḥ āsam.
*You were an infant.* *I was an infant.*

भवान् चञ्चलः आसीत् । अहं चञ्चलः आसम् ।

bhavān cañcalaḥ āsīt. ahaṁ cañcalaḥ āsam.
*You were restless.* *I was restless.*

भवान् स्थूलः आसीत् । अहं स्थूलः आसम् ।

bhavān sthūlaḥ āsīt. ahaṁ sthūlaḥ āsam.
*You were fat.* *I was fat.*

भवान् नायकः आसीत् । अहं नायकः आसम् ।

bhavān nāyakaḥ āsīt. ahaṁ nāyakaḥ āsam.
*You were a leader.* *I was a leader.*

---

अहं शिशुः आसम् ।

ahaṁ śiśuḥ āsam.
*I was an infant.*

वयं शिशवः आस्म । वदन्तु ।

vayaṁ śiśavaḥ āsma. vadantu!
*We were infants. Say (pl.)!*

वयं शिशवः आस्म ।

vayaṁ śiśavaḥ āsma.
*We were infants.*

अहं आसम् । वयम् आस्म ।

aham āsam. vayam āsma.
*I was. We were.*

अहं निर्धनः आसम् । वयं निर्धनाः आस्म ।

ahaṁ nirdhanaḥ āsam. vayaṁ nirdhanāḥ āsma.
*I was poor. We were poor.*

अहं पराधीना आसम् । वयं पराधीनाः आस्म ।

ahaṁ parādhīnā āsam. vayaṁ parādhīnāḥ āsma.
*I was subservient. We were subservient.*

अहं दुःखिता आसम् । वयं दुःखिताः आस्म ।

ahaṁ duḥkhitā āsam. vayaṁ duḥkhitāḥ āsma.
*I was sad. We were sad.*

अहं निःशक्तः आसम् । वयं निःशक्ताः आस्म ।

ahaṁ niḥśaktaḥ āsam. vayaṁ niḥśaktāḥ āsma.

*I was weak. We were weak.*

अहं दुर्बलः आसम्। वयं दुर्बलाः आस्म।

ahaṁ durbalaḥ āsam. vayaṁ durbalāḥ āsma.
*I was weak. We were weak.*

वयम् आस्म। एकैकः वाक्यं वदन्ति वा ? वदतु।

vayam āsma. ekaikaḥ vākyaṁ vadanti vā? vadatu!
*We were. Would each of you say (pl.) a sentence?*

वयं मुर्खाः आस्म।

vayaṁ murkhāḥ āsma.
*We were fulls.*

वयं वानराः आस्म।

vayaṁ vānarāḥ āsma.
*We were monkeys.*

वयं निःशक्ताः आस्म।

vayaṁ niḥśaktāḥ āsma.
*We were weak.*

वयं चटुलाः आस्म।

vayaṁ caṭulāḥ āsma.
*We were kind.*

वयं दुष्टाः आस्म।

vayaṁ duṣṭāḥ āsma.
*We were spoiled.*

वयं ??? आस्म।

vayaṁ ??? āsma.
*We were ???*

---

*HINDI: How the verb* ***as*** *(**to be**) is used in past tense.*

---

वैद्य-महोदय। महती उदरवेदना।

vaidya-mahodaya. mahatī udara-vedanā.

*Sir doctor. [I have] strong stomach pain.*

उदरवेदना वा ?

udara-vedanā vā?
*Stomach ache?*

शयनं करोतु। परीक्षां करोमि।

śayanaṁ karotu! parīkṣāṁ karomi.
*Lie down! I will check it out.*

अत्र वा ?

atra vā?
*[Is it] here?*

न।

na.
*No.*

अत्र वा ?

atra vā?
*Here?*

किञ्चिद् उपरि।

kiñcid upari.
*A little higher.*

आम्, तत्र।

ām, tatra.
*Yes, there.*

ज्ञातम्।

jñātam.
*I understand.*

उपविशतु।

upaviśatu!
*Sit!*

दीर्घं श्वसोच्छ्वासं करोतु।

dīrghaṁ śvasocchvāsaṁ karotu!

*Breathe deeply in and out!*

ह्यः उदरवेदना आसीत् वा ?

hyaḥ udara-vedanā āsīt vā?
*Did you have stomach ache yesterday?*

न ह्यः उदरवेदना नासीत्। अहं स्वस्थः एव आसम्।

na hyaḥ udara-vedanā nāsīt. ahaṁ svasthaḥ eva āsam.
*No, yesterday I had no stomach ache. I was healthy.*

अद्य प्रातः ?

adya prātaḥ?
*[And] today in the morning?*

अद्य प्रातः अपि नासीत्।

adya prātaḥ api nāsīt.
*Today in the morning [it was] also not [there].*

अपराह्णे प्रारब्धम्।

aparāhṇe prārabdham.
*It began in the afternoon.*

कदा किं कृतवान् भवान् ?

kadā kiṁ kṛtavān bhavān?
*At what times of the day have you done which activities? (Lit.: When have you done what?)*

मम समीपे कश्चन गुलिकाः आसन्। ताः सर्वाः खादितवान्।

mama samīpe kaścana gulikāḥ āsan. tāḥ sarvāḥ khāditavān.
*I had some pills. I ate all of them.*

कति गुलिकाः ?

kati gulikāḥ?
*How many pills?*

पञ्च गुलिकाः। ताः सर्वाः खादितवान्।

pañca gulikāḥ. tāḥ sarvāḥ khāditavān.
*Five pills. I ate them all.*

भवादृशाः मुर्खाः पूर्वम् अपि अत्र अगताः आसन्। जानतु वैद्यस्य परामर्शं विना औषधसेवनं अपाय करम्। पुनः कदापि एवं न करोतु। एतद् औषधं स्वीकरोतु।

bhavādṛśāḥ murkhāḥ pūrvam api atra agatāḥ āsan. jānatu vaidyasya parāmarśaṁ vinā auṣadha-sevanam apāya karam. punaḥ kadāpi evaṁ na karotu. etad auṣadhaṁ svīkarotu.
*Fools like you have come here earlier. Know that taking medicines without doctor's prescription leads to injury. Don't do it ever again. Take this medicine.*

तथैव भवतु।

tathaiva bhavatu.
*Let it be so.*

---

संस्कृतेन संख्याः कथं वक्तव्याः इति पूर्वतन पाठेषु वयं ज्ञातवन्तः स्मः। इदानीं तस्य अभ्यासं कुर्मः।

saṁskṛtena saṅkhyāḥ kathaṁ vaktavyāḥ iti pūrvatana pāṭheṣu vayaṁ jñātavantaḥ smaḥ. idānīṁ tasya abhyāsaṁ kurmaḥ.
*We learned in previous lectures how to say numbers in Sanskrit. Now we [will] do exercise of that.*

एवम् – एकं द्वे त्रीणि चत्वरि पञ्च षट् सप्त अष्ट नव दश।

evam – ekaṁ dve trīṇi catvari pañca ṣaṭ sapta aṣṭa nava daśa.
*Thus – one, two, three, four, five, six, seven, eight, nine, ten.*

यथा – एकं द्वे त्रीणि चत्वरि पञ्च षट् सप्त अष्ट नव दश।

yathā – ekaṁ dve trīṇi catvari pañca ṣaṭ sapta aṣṭa nava daśa.
*Thus – one, two, three, four, five, six, seven, eight, nine, ten.*

इदानीं सङ्ख्यायाः एकम् अभ्यासं कुर्मः।

idānīṁ saṅkhyāyāḥ ekam abhyāsaṁ kurmaḥ.

*Now we do one exercise with [of] the numbers.*

कङ्कतम् अस्ति । एकं कङ्कतं अस्ति ।

kaṅkatam asti. ekaṁ kaṅkatam asti.
*[There] is a comb. [There] is one comb.*

कार्यानम्। एकं कार्यानम् अस्ति ।

kār-yānam. ekaṁ kār-yānam asti.
*A car. [There] is one car.*

पुस्तकम्। एकं पुस्तकम् अस्ति ।

pustakam. ekaṁ pustakam asti.
*A book. [There] is one book.*

दन्तकूर्चः । एकः दन्तकूर्चः ।

dantakūrcaḥ. ekaḥ dantakūrcaḥ.
*A toothbrush. [There] is one toothbrush.*

सुधाखण्डः । एकः सुधाखण्डः अस्ति ।

sudhākhaṇḍaḥ. ekaḥ sudhākhaṇḍaḥ asti.
*A chalk. [There] is one chalk.*

दण्डः । एकः दण्डः ।

daṇḍaḥ. ekaḥ daṇḍaḥ.
*A stick. One stick.*

चमसः । एकः चमसः ।

camasaḥ. ekaḥ camasaḥ.
*A spoon. One spoon.*

पत्रिका । एका पत्रिका ।

patrikā. ekā patrikā.
*A magazine. One magazine.*

सञ्चिका । एका सञ्चिका ।

sañcikā. ekā sañcikā.
*A file. One file.*

दूरवाणी । एका दूरवाणी ।

dūravāṇī. ekā dūravāṇī.
*A telephone. One telephone.*

कर्तरी । एका कर्तरी ।

kartarī. ekā kartarī.
*Scissors. One scissors.*

अङ्कनी । एका अङ्कनी ।

aṅkanī. ekā aṅkanī.
*A pencil. One pencil.*

अहं भिन भिन शब्दान् वदामि । भवन्तः तत्र "एकः, एकम्, एका" योजयन्तु ।

ahaṁ bhina bhina śabdān vadāmi. bhavantaḥ tatra "ekaḥ, ekam, ekā" yojayantu.
*I [will] say different words. You use them with "one (in masc., fem., neut.)".*

बालकः । एकः बालकः ।

bālakaḥ. ekaḥ bālakaḥ.
*A boy. One boy.*

युवकः । एकः युवकः ।

yuvakaḥ. ekaḥ yuvakaḥ.
*Youth. One youth.*

दण्डदीपः । एकः दण्डदीपः ।

daṇḍadīpaḥ. ekaḥ daṇḍadīpaḥ.
*A tube bulb. One tube bulb.*

बालिका । एका बालिका ।

bālikā. ekā bālikā.
*A girl. One girl.*

मापिका । एका मापिका ।

māpikā. ekā māpikā.
*A liner. One liner.*

लेखनी । एका लेखनी ।

lekhanī. ekā lekhanī.
*A pen. One pen.*

उपनेत्रम् । एकम् उपनेत्रम् ।

upanetram. ekam upanetram.
*Eyeglasses. One eyeglasses. (not pl. in Sanskrit!)*

कङ्कणम् । एकं कङ्कणम् ।

kaṅkaṇam. ekaṁ kaṅkaṇam.
*A bracelet. One bracelet.*

मम गृहे एकः बिडालः अस्ति । भवतां गृहे “एकः, एका, एकं” किं किम् अस्ति वदन्तु । गणेशः वदतु ।

mama gṛhe ekaḥ biḍālaḥ asti. bhavatāṁ gṛhe “ekaḥ, ekā, ekaṁ” kiṁ kim asti vadantu! gaṇeśaḥ vadatu!
*One cat is in my house. Say what “one (in masc., fem., neut.)” (various things) are in your house! Ganesha say!*

मम गृहे एकं कार्यानम् अस्ति ।

mama gṛhe ekaṁ kāryānam asti.
*There is one car at my home.*

मम गृहे एकं दूरदर्शनम् अस्ति ।

mama gṛhe ekaṁ dūradarśanam asti.
*There is one television at my home.*

मम गृहे एकं गणकयन्त्रम् अस्ति ।

mama gṛhe ekaṁ gaṇaka-yantram asti.
*There is one computer at my home.*

मम गृहे एकः शुनकः अस्ति ।

mama gṛhe ekaḥ śunakaḥ asti.
*There is one dog at my home.*

मम गृहे एकः सुवर्णहारः अस्ति ।

mama gṛhe ekaḥ suvarṇa-hāraḥ asti.
*There is one golden necklace at my home.*

मम गृहे एकः स्यूतः अस्ति ।

mama gṛhe ekaḥ syūtaḥ asti.
*There is one bag at my home.*

मम गृहे एका उत्पीठिका अस्ति ।

mama gṛhe ekā utpīṭhikā asti.
*There is one table at my home.*

---

*HINDI: In neuter gender one is* ***ekam,*** *per example:*

एकं पुस्तकम् । एकं गृहम् ।

ekaṁ pustakam. ekaṁ gṛham.

*In masculine one is* ***ekaḥ****, per example:*

एकः दण्डः । एकः ग्रन्थः ।

ekaḥ daṇḍaḥ. ekaḥ granthaḥ.

*In feminine gender one is ekA, per example:*

एका महिला । एका कूपी ।

ekā mahilā. ekā kūpī.

---

## सुभाषितम्

**subhāṣitam**
***Verse.***

आचार्यात् पादमादत्ते   पादं शिष्यः स्वमेधया ।
पादं सब्रह्मचारिभ्यः   पादं कालक्रमेण च ।

ācāryāt pādamādatte   pādaṁ śiṣyaḥ svamedhayā
pādaṁ sabrahmacāribhyaḥ   pādaṁ kālakrameṇa ca

ācāryāt – *from the teacher;* pādam – *quarter;* ādatte – *receives;* pādam – *quarter;* śiṣyaḥ – *pupil;* svamedhayā – *by his inteligence;* pādam – *quarter;* sabrahmacāribhyaḥ – *from the practices of brahmacarya (celibacy and discipline);* pādam – *quarter;* kālakrameṇa – *by passing of time;* ca – *and.*

*A pupil attains a quarter of learning from the teacher, a quarter by his own intelligence, a quarter by discipline and a quarter by passing of time.*

इदानीं श्रुतस्य सुभाषितस्य तात्पर्यम् एवम् अस्ति ।

idānīṁ śrutasya subhāṣitasya tātparyam evam asti.
*Now here is the meaning of the verse we have heard.*

एकः छात्रः सम्पूर्णज्ञानप्राप्तिसमये प्रकारचतुष्टयेन ज्ञानं प्राप्नोति ।

ekaḥ chātraḥ sampūrṇa-jñāna-prāpti-samaye prakāra-catuṣṭayena jñānaṁ prāpnoti.
*A student during the time of attaining the perfect knowledge gets the knowledge in four ways.*

प्रथमपादभागम् आचार्यात् प्राप्नोति ।

prathama-pāda-bhāgam ācāryāt prāpnoti.
*The first part he gets from the teacher.*

पुनःपादभागं स्व अध्यायनेन प्राप्नोति ।

punaḥ-pāda-bhāgaṁ sva adhyāyanena prāpnoti.
*The next part he gets with his own study.*

पुनःपादभागं सती तैः सह विचारविनिमयेन चिन्तनेन च प्राप्नोति ।

punaḥ-pāda-bhāgaṁ satī taiḥ saha vicāra-vinimayena cintanena ca prāpnoti.
*The next part he gets with ?????? exchanging thoughts (ideas), thinking.*

पुनः पाद भागं कालक्रमेण प्राप्नोति ।

punaḥ-pāda-bhāgaṁ kālakrameṇa prāpnoti.
*The next part he gets by passing of time.*

एवं छात्रः सम्पूर्णं ज्ञानं प्राप्नोति ।

evaṁ chātraḥ sampūrṇaṁ jñānaṁ prāpnoti.
*Thus the student gets the full knowledge.*

---

## कथा

**kathā**
***Story***

पूर्वं रायगडदुर्गं आसीत् । शिवजी महाराजः तस्य पालनं करोति स्म ।

pūrvaṁ rāyagaḍa-durgam āsīt. śivajī mahārājaḥ tasya pālanaṁ karoti sma.
*Previously there was a fortress of Rayagada. It was ruled by King Shivaji.*

एका महिला आसीत् । सा प्रतिदिनं क्षीरविक्रयणं करोति स्म ।

ekā mahilā āsīt. sā pratidinaṁ kṣīra-vikrayaṇaṁ karoti sma.
*There was one lady. She used to sell milk every day.*

रायगडदुर्गस्य अन्तः आगत्य क्षीरविक्रयणं करोति स्म ।

rāyagaḍa-durgasya antaḥ āgatya kṣīra-vikrayaṇaṁ karoti sma.
*After going into the fortres of Raya Gada she was selling the milk.*

तस्याः लघु पुत्रः आसीत्। तं गृहे त्यक्त्वा दुर्गस्य अन्तः आगत्य क्षीरविक्रयणं करोति स्म।

tasyāḥ laghu putraḥ āsīt. taṁ gṛhe tyaktvā durgasya antaḥ āgatya kṣīra-vikrayaṇaṁ karoti sma.
*She had a small son. Leaving him at home and coming into the fortress she was selling the milk.*

प्रतिदिनम् अन्धकारात् पूर्वं क्षीरविक्रयणं समाप्य बहिः आगच्छति स्म।

pratidinam andhakārāt pūrvaṁ kṣīra-vikrayaṇaṁ samāpya bahiḥ āgacchati sma.
*Every day before dark after finishing the selling of milk she came out.*

एकस्मिन् दिने सा क्षीरविक्रयणं कुर्वती आसीत्, तदा विलम्बः जातः। अन्धकारः जातः।

ekasmin dine sā kṣīra-vikrayaṇaṁ kurvatī āsīt, tadā vilambaḥ jātaḥ. andhakāraḥ jātaḥ.
*One day she sold the milk and then was delayed. The night fell.*

यदा महिला क्षीरविक्रयणं समाप्य द्वारसमीपम् आगतवती तदा दुर्गस्य द्वारं पिहितम् आसीत्।

yadā mahilā kṣīra-vikrayaṇaṁ samāpya dvāra-samīpam āgatavatī tadā durgasya dvāraṁ pihitam āsīt.
*When the lady after finishing selling the milk came to the gate, then the gate of the fortress was closed.*

सा तद् दृष्ट्वा रक्षकाभटं उक्तवती "कृपया द्वारम् उद्घाटयतु। मम शिशुः गृहे अस्ति।"

sā tad dṛṣṭvā rakṣakābhaṭam uktavatī: "kṛpayā dvāram udghāṭayatu! mama śiśuḥ gṛhe asti."
*Seeing that she said to the watchman: please open the gate! My son is at home."*

रक्षकाभटः द्वारम् उद्घाटयितुं निराकृतवान्।

rakṣakābhaṭaḥ dvāram udghāṭayituṁ nirākṛtavān.
*The watchman denied opening the gate.*

पुनः सा महिला प्रार्थितवती। रक्षकाभटं सा प्रार्थितवती "कृपया उद्घाटयतु। अहं बहिः गच्छमि। गृहे मम लघु शिशुः अस्ति। तस्मै भोजनं दत्तव्यम् अस्ति। कृपया उद्घाटयतु। भवान् किमर्थं न उद्घाटयति ?" सा पृष्टवती।

punaḥ sā mahilā prārthitavatī. rakṣakābhaṭaṁ sā prārthitavatī "kṛpayā udghāṭayatu! ahaṁ bahiḥ gacchami. gṛhe mama laghu śiśuḥ asti. tasmai bhojanaṁ dattavyam asti. kṛpayā udghāṭayatu! bhavān kim arthaṁ na udghāṭayati." sā pṛṣṭavatī.
*Again the lady begged. She begged to the watchman: Please open! I go out. My small baby is at home. He needs to be given food. Please open. Why don't you open?" she asked.*

रक्षकाभटः उक्तवान् "शिवजी महाराजस्य सूचना अस्ति। अन्धकारस्य अनन्तरं द्वारस्य उद्घाटनं न करणीयम्" इति।

rakṣakābhaṭaḥ uktavān "śivajī mahārājasya sūcanā asti. andhakārasya anantaraṁ dvārasya udghāṭanaṁ na karaṇīyam iti.
*The watchman said: "It is King Shivaji's order. After the darkness the door should not be opened.*

तत् श्रुत्वा सा महिला दिग्भ्रान्ता जाता। "अहम् इदानीं गृहं कथं गच्छामि ?"

tat śrutvā sā mahilā digbhrāntā jātā. "aham idānīṁ gṛhaṁ kathaṁ gacchāmi?"
*Hearing that the lady started wandering around in perplexion. "How [will] I go home now?"*

सा तत्रैव मार्गस्य अन्वेषणं कृतवती। सर्वत्र अटितवती।

sā tatraiva mārgasya anveṣaṇaṁ kṛtavatī. sarvatra aṭitavatī.
*She searched the road. She roamed everywhere.*

एकत्र दुर्गस्य भित्तिः शितिला आसीत्। सा महिला भित्तिम् आरूढवती। पर्श्वे एकः वृक्षः आसीत्। वृक्षस्य शाखां गृहित्वा कुल्याम् उत्तिर्य सा कथम् अपि दुर्गात् बहिः आगतवती।

ekatra durgasya bhittiḥ śitilā āsīt. sā mahilā bhittim ārūḍhavatī. parśve ekaḥ vṛkṣaḥ āsīt. vṛkṣasya śākhāṁ gṛhitvā kulyām uttirya sā katham api durgāt bahiḥ āgatavatī.
*At one place the wall of the fortress was slack. That lady climbed up the wall. Near by there was a tree. Holding the tree's branch and crossing the canal she somehow came out of the fortress.*

अनन्तरदिने शिवजी महाराजः एतां वार्तां श्रुतवान्। सः तां महिलां आहुतवान्। तां सः पृष्टवान् "भवती कथं गतवती"।

anantara-dine śivajī mahārājaḥ etāṁ vārtāṁ śrutavān. saḥ tāṁ mahilām āhutavān. tāṁ saḥ pṛṣṭavān "bhavatī kathaṁ gatavatī."
*On the next day King Shivaji heard that news. He called that lady. He asked her: "How did you go [out]?"*

तदा सा उक्तवती। "अहं किमपि न जानामि। तदा मम कर्णयोः केवलं मम शिशोः क्रन्दनं श्रूयते स्म। अहं कथम् अपि दुर्गात् बहिः गतवती।"

tadā sā uktavatī "ahaṁ kim api na jānāmi. tadā mama karṇayoḥ kevalaṁ mama śiśoḥ krandanaṁ śrūyate sma. ahaṁ katham api durgāt bahiḥ gatavatī."
*Then she replied: "I don't know anything. Then the only thing I heard was my infant's crying in my ears. Somehow I went out of the fortress."*

तत् श्रुत्वा शिवजी महाराजः सन्तुष्तः अभवत्। तस्यै महिलायै सः पारितोषकं दत्तवान्।

tat śrutvā śivajī mahārājaḥ santuṣṭaḥ abhavat. tasyai mahilāyai saḥ pāritoṣakaṁ dattavān.
*Hearing that King Shivahi was very happy. He gave a gift to that lady.*

कथायाः अर्थः ज्ञातः ?

kathāyāḥ arthaḥ jñātaḥ?
*Did you understand the story?*

आम्।

ām.
Yes.

धन्यवादः।

dhanyavādaḥ.
*Thank you.*

नमो नमः।

namo namaḥ.
*Salutations.*

---

**Teacher:**

ममता

Mamatā

**Students:**

| | | |
|---|---|---|
| अजयः | सिद्धर्थः वाप्वे | जयंत् जे. एस् |
| Ajayaḥ | Siddharthaḥ Vāpve | Jayant J. S |
| सुशंत् के. वि. | कश्यप आर्. वि. | तेजस् बि. आर्. |
| Suśant K. V. | Kaśyapa R. V. | Tejas B. R. |
| अभिजित् एन्. | अर्जुन बि. एन्. | यतीन्द्र बि. एस्. |
| Abhijit N. | Arjuna B. N. | Yatīndra B. S. |
| चेतना कौशिक् बि. एन्. | स्वाति एम्. एन्. | |
| Cetanā Kauśik B. N. | Svāti M. N. | |
| रश्मि एन्. | दीपिका के. सि. | चैत्रा एच्. एम्. |
| Raśmi N. | Dīpikā K. C. | Caitrā H. M. |
| सिंधु आर् शार्वरी | हर्शिता एस् | विदिशा एच् वि |
| Sindhu R. Śārvarī | Harśitā S. | Vidiśā H. V. |

---

# LESSON 15 – OVERVIEW

*In lesson fifteen you will do further practice of* **as dhātu** *(the root of the verb "to be") and learn* **tritīyā-vibhakti** *(instrumental case).*

| | | | | | | |
|---|---|---|---|---|---|---|
| **त्रितीयाविभक्तिः** | **tritīyā-vibhaktiḥ** | | | ***instrumental*** | | |
| *m.* हस्तः | hastaḥ | *hand* | => | हस्तेन | hastena | *with, by the hand* |
| *n.* पुस्तकम् | pustakam | *book* | => | पुस्तकेन | pustakena | *with, by the book* |
| *f.* चुरिका | curikā | *knife* | => | चुरिकया | curikayā | *with, by the knife* |
| कर्तरी | kartarī | *scissors* | => | कर्तर्या | kartaryā | *with, by the scissors* |

**- tritīyā-vibhakti** ***is used when using a means or a vehicle to go somewhere:***

**उपनेत्रेण पश्यामि ।** upanetreṇa paśyāmi. *I see with the eyeglasses.*

**बालिका द्विचक्रिकया गच्छति ।** bālikā dvicakrikayā gacchati. *A girl goes by bicycle.*

# Lesson 15

*HINDI: In the previous lecture we practiced past tense forms of* **as dhātu (verb root "to be").** *In this lesson we will do further practice.*

नमो नमः।

namo namaḥ.
*Salutations.*

संस्कृतभाषाशिक्षणे भवतां सर्वेषां स्वागतम्।

saṁskṛta-bhāṣā-śikṣaṇe bhavatāṁ sarveṣāṁ svāgatam.
*Heartly welcome [to you all] to the study of Sanskrit language.*

इदानीं वयं पूर्वतनपाठस्य पुनः स्मारणं कुर्मः।

idānīṁ vayaṁ pūrvatana-pāṭhasya punaḥ smāraṇaṁ kurmaḥ.
*Now we [will] remember again the previous lesson.*

"आसीत्" एकवचनम्। "आसन्" बहुवचनम्।

"āsīt" ekavacanam. "āsan" bahuvacanam.
*"Was" is singular. "Were" is plural.*

अहम् एकवचने वदामि भवन्तः बहुवचने परिवर्तनं कुर्वन्तु।

aham ekavacane vadāmi bhavantaḥ bahuvacane parivartanaṁ kurvantu.
*I say in singular, you (pl.) make change to plural.*

बालकः विद्यालये आसीत्।

bālakaḥ vidyālaye āsīt.
*Boy was in school.*

बालकाः विद्यालये आसन्।

bālakāḥ vidyālaye āsan.
*Boys were in school.*

कर्मकरः वाटिकायाम् आसीत्।

karmakaraḥ vāṭikāyām āsīt.
*A worker was in the garden.*

कर्मकराः वाटिकायाम् आसन्।

karmakarāḥ vāṭikāyām āsan.
*Workers were in the garden.*

गृहिणी मन्दिरे आसीत्।

gṛhiṇī mandire āsīt.
*A houswife was in the temple.*

गृहिण्यः मन्दिरे आसन्।

gṛhiṇyaḥ mandire āsan.
*Housewifes were in the temple.*

बालिका क्रीडाङ्गणे आसीत्।

bālikā krīḍāṅgaṇe āsīt.
*A girl was on the playground.*

बालिकाः क्रीडाङ्गणे आसन्।

bālikāḥ krīḍāṅgaṇe āsan.
*Girls were on the playground.*

महिला गृहे आसीत्।

mahilā gṛhe āsīt.
*Woman was at home.*

महिलाः गृहे आसन्।

mahilāḥ gṛhe āsan.
*Women were at home.*

फलं वृक्षे आसीत्।

phalaṁ vṛkṣe āsīt.
*A fruit was on the tree.*

फलानि वृक्षे आसन्।

phalāni vṛkṣe āsan.
*Fruits were on the tree.*

मीनः नद्याम् आसीत्।

mīnaḥ nadyām āsīt.
*A fish was in the river.*

मीनाः नद्याम् आसन्।

mīnāḥ nadyām āsan.
*Fish were in the river.*

कर्मकरी मार्गे आसीत्।

karmakarī mārge āsīt.
*A worker (fem.) was on the street.*

कर्मकर्यः मार्गे आसन्।

karmakaryaḥ mārge āsan.
*Workers (fem.) were on the street.*

एवमेव "आसम्, आस्म"।

evameva "āsam, āsma".
*In this way "[I] was, [we] were".*

पुनः एकवचने अहं वदामि बहुवचने परिवर्तनं कुर्वन्तु।

punaḥ ekavacane ahaṁ vadāmi bahuvacane parivartanaṁ kurvantu.
*Again I say in singular, you make change to plural.*

अहं गृहे आसम्।

ahaṁ gṛhe āsam.
*I was at home.*

वयं गृहे आस्म।

vayaṁ gṛhe āsma.
*We were at home.*

अहं नगरे आसम्।

ahaṁ nagare āsam.
*I was in the city.*

वयं नगरे आस्म।

vayaṁ nagare āsma.
*We were in the city.*

अहं मन्दिरे आसम्।

ahaṁ mandire āsam.
*I was in the temple.*

वयं मन्दिरे आस्म।

vayaṁ mandire āsma.
*We were in the temple.*

अहं चित्रमन्दिरे आसम्।

ahaṁ citra-mandire āsam.
*I was in the cinema.*

वयं चित्रमन्दिरे आस्म।

vayaṁ citra-mandire āsma.
*We were in the cinema.*

अहं मार्गे आसम्।

ahaṁ mārge āsam.
*I was on the street.*

वयं मार्गे आस्म।

vayaṁ mārge āsma.
*We were on the street.*

अहं क्रीडाङ्गणे आसम्।

ahaṁ krīḍāṅgaṇe āsam.
*I was on the playground.*

वयं क्रीडाङ्गणे आस्म।

vayaṁ krīḍāṅgaṇe āsma.
*We were on the playground.*

अहं शालायाम् आसम्।

ahaṁ śālāyām āsam.
*I was in the school.*

वयं शालायाम् आस्म ।

vayaṁ śālāyām āsma.
*We were in the school.*

अहं नगर्याम् आसम् ।

ahaṁ nagaryām āsam.
*I was in the city (fem.).*

वयं नगर्याम् आस्म ।

vayaṁ nagaryām āsma.
*We were in the city (fem.).*

---

सुधाखण्डः । अहं सुधाखण्डेन लिखामि ।

sudhākhaṇḍaḥ. ahaṁ sudhākhaṇḍena likhāmi.
*A chalk. I write with the chalk.*

दन्तकूर्चः । दन्तकूर्चेन दन्तधावनं कुर्मः ।

dantakūrcaḥ. dantakūrcena dantadhāvanaṁ kurmaḥ.
*A toothbrush. I brush [my] teeth with the toothbrush.*

दण्डः । दण्डेन अहं न ताडयामि ।

daṇḍaḥ. daṇḍena ahaṁ na tāḍayāmi.
*A stick. I do not beat with the stick.*

चषकः । जलं पिबतु । चषकेण जलं पिबति ।

caṣakaḥ. jalaṁ pibatu! caṣakeṇa jalaṁ pibati.
*A cup. Drink water! [She] drinks water with the cup.*

शर्करां खादतु । चमसेन शर्करां खादति ।

śarkarāṁ khādatu! camasena śarkarāṁ khādati.
*Eat sugar! [He] eats sugar with the spoon.*

हस्तः । हस्तेन स्पर्शं करोमि ।

hastaḥ. hastena sparśaṁ karomi.
*A hand. I touch with the hand.*

चषकः, चषकेण । चमसः, चमसेन । हस्तः, हस्तेन ।

caṣakaḥ, caṣakeṇa. camasaḥ, camasena. hastaḥ, hastena.
*A cup, with the cup. A spoon, with the spoon.*
*A hand, with the hand.*

सुधाखण्डः, सुधाखण्डेन । दण्डः, दण्डेन । दन्तकूर्चः, दन्तकूर्चेन ।

sudhākhaṇḍaḥ, sudhākhaṇḍena. daṇḍaḥ, daṇḍena. dantakūrcaḥ, dantakūrcena.
*A chalk, with the chalk. A stick, with the stick. A tootbrush, with the toothbrush.*

---

*HINDI: We have just learned* **tṛtīyā-vibhaktiḥ,** *instrumental case. Per example:*

---

हस्तेन स्पर्शं करोमि ।

hastena sparśaṁ karomi.
*I touch with the hand.*

चमसेन शर्करां खादति ।

camasena śarkarāṁ khādati.
*He eats sugar with the spoon.*

---

**SCREEN:**

**तृतीयाविभक्तिः**

**tṛtīyāvibhaktiḥ**

**हस्तः – हस्तेन** **मुखम् – मुखेन**

**hastaḥ – hastena** **mukham - mukhena**

---

*In* **akārānta-puṁliṅga-śabdāḥ** *(masculine nouns ending in* **-a**) the ending changes to **-ena.**

---

कङ्कटम् । अहं कङ्कटेन केशप्रसाधनं करोमि ।

kaṅkaṭam. ahaṁ kaṅkaṭena keśa-prasādhanaṁ karomi.
*A comb. I comb the hair with the comb.*

करवस्त्रम् । करवस्त्रेण मर्जनं करोमि ।

karavastram. karavastreṇa marjanaṁ karomi.
*A handkerchief. I wipe with the handkerchief.*

कण्डुकम् । बालाः कण्डुकेन क्रीडन्ति ।

kaṇḍukam. bālāḥ kaṇḍukena krīḍanti.
*A ball. Children play with the ball.*

उपनेत्रम्। उपनेत्रेण पश्यामि।

upanetram. upanetreṇa paśyāmi.
*Eyeglasses. I see with the eyeglasses.*

कण्डुकम्, कण्डुकेन। पुस्तकम्, पुस्तकेन। उपनेत्रम्, उपनेत्रेण।

kaṇḍukam, kaṇḍukena. pustakam, pustakena. upanetram, upanetreṇa.
*A ball, with the ball. A book, with the book. Eyeglasses, with the eyeglasses.*

---

*HINDI: all these are* **akarānta-napuṁsaka-liṅga-śabdāḥ** *(neuter words ending in* **-a***).* **Kaṅkaṭena, pustakena, mastakena** *are in instrumental.*

---

चुरिका। अहं चुरिकया फलं कर्तयामि।

curikā. ahaṁ curikayā phalaṁ kartayāmi.
*A knife. I cut the fruit with the knife.*

मापिका। वयं मापिकया मापनं कुर्मः।

māpikā. vayaṁ māpikayā māpanaṁ kurmaḥ.
*A scale. We make measurment with the scale.*

कुञ्चिका। तालः। अहं कुञ्चिकया तालम् उद्घाटयामि।

kuñcikā. tālaḥ. ahaṁ kuñcikayā tālam udghāṭayāmi.
*A key. A lock. I unlock the lock with the key.*

माला। मालया अलङ्कारं कुर्मः।

mālā. mālayā alaṅkāraṁ kurmaḥ.
*A garland. We decorate with the garland.*

कुञ्चिका, कुञ्चिकया। माला, मालया। मापिका, मापिकया। पत्रिका, पत्रिकया।

kuñcikā, kuñcikayā. mālā, mālayā. māpikā, māpikayā. patrikā, patrikayā.
*A key, with the key. A garland, with the garland. A scale, with the scale. A magazine, with the magazine.*

---

*HINDI: all these are* **ākarānta-striliṅga-śabdāḥ,** *feminine words ending* **–ā.** *In n instrumental they become:* **mapikayā, sañcikayā, mālayā.**

---

कर्तरी। अहं कर्तर्या कर्तयामि।

kartarī. ahaṁ kartaryā kartayāmi.
*Scissors. I cut with the scissors.*

अङ्कनी। अङ्कन्या चित्रं लिखामः।

aṅkanī. aṅkanyā citraṁ likhāmaḥ.
*A pencil. We draw a picture with the pencil.*

दर्वी। दर्व्या परिवेषणं करोति।

darvī. darvyā pariveṣaṇaṁ karoti.
*A ladle. He (she) serves [the food] with the ladle.*

लेखनी। लेखन्या लिखामः।

lekhanī. lekhanyā likhāmaḥ.
*A pen. We write with the pen.*

मार्जनी। मार्जन्या मार्जयामः।

mārjanī. mārjanyā mārjayāmaḥ.
*A duster. We wipe (clean) with the duster.*

द्रोणी। द्रोण्या जलं नयामः।

droṇī. droṇyā jalaṁ nayāmaḥ.
*A bucket. We cary water with the bucket.*

कर्तरी, कर्तर्या।

kartarī, kartaryā.
*Scissors, with the scissors.*

अङ्कनी, अङ्कन्या।

aṅkanī, aṅkanyā.
*A pencil, with the pencil.*

लेखनी, लेखन्या।

lekhanī, lekhanyā.
*A pen, with the pen.*

घटी, घट्या।

ghaṭī, ghaṭyā.
*A watch, with the watch.*

मार्जनी, मार्जन्या।

mārjanī, mārjanyā.
*A duster, with the duster.*

दर्वी, दर्व्या।

darvī, darvyā.
*A ladle, with the ladle.*

द्रोणी, द्रोण्या।

droṇī, droṇyā.
*A bucket, with the bucket.*

---

*HINDI: All these are* **īkārānta-strīliṅga-śabdāḥ.** *feminine words ending in* **–ī.** *In* **tritīya-vibhakti** *they become:***lekhanyā, aṅkanyā, droṇyā.**

---

अहं पत्रं दर्शयामि। कृष्णः, कृष्णेन। रामः, रामेण। गोविन्दः, गोविन्देन। भवन्तः दृष्ट्वा वदन्तु।

ahaṁ patraṁ darśayāmi. kṛṣṇaḥ, kṛṣṇena. rāmaḥ, rāmeṇa. govindaḥ, govindena. bhavantaḥ dṛṣṭvā vadantu.
*I show you a sheet. Krishna, with Krishna. Rama, with Rama. Govinda, with Govinda. After you (pl.) see, say!*

कृष्णः, कृष्णेन।

kṛṣṇaḥ, kṛṣṇena.
*Krishna, with Krishna.*

लेखकः, लेखकेन।

lekhakaḥ, lekhakena.
*A writer, with the writer.*

चषकः, चषकेण।

caṣakaḥ caṣakeṇa.
*A cup, with the cup.*

पाठः, पाठेन।

pāṭhaḥ, pāṭhena.
*A lesson, with the lesson.*

कलशः, कलशेन।

kalaśaḥ, kalaśena.
*A water pot, with the water pot.*

दन्तकूर्चः, दन्तकूर्चेन।

dantakūrcaḥ, dantakūrcena.
*A toothbrush, with the toothbrush.*

चमसः, चमसेन।

camasaḥ, camasena.
*A spoon, with the spoon.*

स्यूतः, स्यूतेन।

syūtaḥ, syūtena.
*A bag, with the bag.*

फलम्, फलेन।

phalam, phalena.
*A fruit, with the fruit.*

मस्तकम्, मस्तकेन।

mastakam, mastakena.
*A head, with the head.*

रमा, रमया।

ramā, ramayā.
*Rama (fem.), with Rama.*

राधा, राधया।

rādhā, rādhayā.
*Radha, with Radha.*

सीता, सीतया।

sītā, sītayā.
*Sita, with Sita.*

## मापिका, मापिकया ।

māpikā, māpikayā.
*A scale, with the scale.*

## पत्रिका, पत्रिकया ।

patrikā, patrikayā.
*A magazine, with the magazine.*

## सञ्चिका, सञ्चिकया (संचिका)

sañcikā, sañcikayā
*A file, with the file.* ***(Saṁcikā is wrong!)***

## माला, मालया ।

mālā, mālayā.
*A garland, with the garland.*

## चुरिका, चुरिकया ।

curikā, curikayā.
*A knife, with the knife.*

## पार्वती, पार्वत्या ।

pārvatī, pārvatyā.
*Parvati, with Parvati.*

## रमा, रमया ।

ramā, ramayā.
*Rama (fem.), with Rama.*

## राधा, राधया ।

rādhā, rādhayā.
*Radha, with Radha.*

## सीता, सीतया ।

sītā, sītayā.
*Sita, with Sita.*

## मापिका, मापिकया ।

māpikā, māpikayā.
*A scale, with the scale.*

## पत्रिका, पत्रिकया ।

patrikā, patrikayā.
*A magazine, with the magazine.*

## पेटिका, पेटिकया ।

peṭikā, peṭikayā.
*A box, with the box.*

## सञ्चिका, सञ्चिकया ।

sañcikā, sañcikayā.
*A file, with the file.*

## माला, मालया ।

mālā mālayā.
*A garland, with the garland.*

## भगिनी, भगिन्या ।

bhaginī, bhaginyā.
*A sister, with the sister.*

## द्रोणी, द्रोण्या ।

droṇī, droṇyā.
*A bucket, with the bucket.*

## अङ्कनी, अङ्कन्या ।

aṅkanī, aṅkanyā.
*A pencil, with the pencil.*

## लेखनी, लेखन्या ।

lekhanī, lekhanyā.
*A pen, with the pen.*

## घटी, घट्या ।

ghaṭī, ghaṭyā.
*A watch, with the watch.*

## कूपी, कूप्या ।

kūpī, kūpyā.
*A cup, with the cup.*

इदानीं वयम् एतेषां शब्दानाम् उपयोगं कृत्वा वाक्यं रचयामः। भवान् वदतु।

idānīṁ vayam eteṣāṁ śabdānām upayogaṁ kṛtvā vākyaṁ racayāmaḥ. bhavān vadatu.
*Now we do an exercise making sentence using this words. You say!*

सः लेखन्या लिखति।

saḥ lekhanyā likhati.
*He writes with the pen.*

अहं चमसेन शर्करां खादामि।

ahaṁ camasena śarkarāṁ khādāmi.
*I eat sugar with the spoon.*

सः दन्तकूर्चेन दन्तधवनं करोति।

saḥ dantakūrcena dantadhavanaṁ karoti.
*He brushes [his] teeth with the toothbrush.*

सा कण्डुकेन क्रीडति।

sā kaṇḍukena krīḍati.
*She plays with the ball.*

अहं दण्डेन न ताडयामि।

ahaṁ daṇḍena na tāḍayāmi.
*I do not beat with the stick.*

सीता उपनेत्रेण पश्यति।

sītā upanetreṇa paśyati.
*Sita sees with the eyeglasses.*

अहं हस्तेन कार्यं करोमि।

ahaṁ hastena kāryaṁ karomi.
*I do work with the hand.*

शिक्षिका मार्जन्या मार्जयति।

śikṣikā mārjanyā mārjayati.
*A student cleans with a duster.*

अहं चषकेण जलं पिबामि।

ahaṁ caṣakeṇa jalaṁ pibāmi.
*I drink water with the cup.*

अर्चकः मालया देवम् अलङ्करोति।

arcakaḥ mālayā devam alaṅkaroti.
*A priest decorates god with the garland.*

वयं सुधाखण्डेन लिखामः।

vayaṁ sudhākhaṇḍena likhāmaḥ.
*We write with the chalk.*

एषा लेखन्या पत्रं लिखति।

eṣā lekhanyā patraṁ likhati.
*She writes a letter with the pen.*

जनाः घट्या समयं जानन्ति।

janāḥ ghaṭyā samayaṁ jānanti.
*People know the time with the watch.*

अहं लोकयानेन नगरं गच्छामि।

ahaṁ lokayānena nagaraṁ gacchāmi.
*I go to the city with bus.*

बालिका द्विचक्रिकया विद्यालयं गच्छति।

bālikā dvicakrikayā vidyālayaṁ gacchati.
*A girl goes to school by bicycle.*

जनाः त्रिचक्रिकया सञ्चारं कुर्वन्ति।

janāḥ tricakrikayā sañcāraṁ kurvanti.
*People travel by autoriksha. (Lit.: People do the traveling by autoriksha.)*

सचिवाः विमानेन विदेशं गच्छन्ति।

sacivāḥ vimānena videśaṁ gacchanti.
*Ministers go abroad by airplane.*

बालकः नौकया गच्छति।

bālakaḥ naukayā gacchati.
*A boy goes by boat.*

लोकयानम्, लोकयानेन।

lokayānam, lokayānena.
*A bus, by  bus.*

द्विचक्रिका, द्विचक्रिकया।

dvicakrikā, dvicakrikayā.
*A bicycle, by bicycle.*

त्रिचक्रिका, त्रिचक्रिकया।

tricakrikā, tricakrikayā.
*An autiriksha, by autoriksha.*

विमानम्, विमानेन।

vimānam, vimānena.
*An airplane, by airplane.*

नौका, नौकया।

naukā, naukayā.
*A boat, by boat.*

---

इदानीं भवन्तः कथं गच्छन्ति। वदतु।

idānīṁ bhavantaḥ kathaṁ gacchanti. vadatu!
*Now how you (pl.) go. Say!*

अहं लोकयानेन गच्छामि।

ahaṁ lokayānena gacchāmi.
*I go by bus.*

अहं लोकयानेन विद्यालयं गच्छामि।

ahaṁ lokayānena vidyālayaṁ gacchāmi.
*I go to school by bus.*

अहं त्रिचक्रया गच्छामि।

ahaṁ **tricakrayā** gacchāmi.
*I go by riksha.* **(Mistake!)**

त्रिचक्रिकया गच्छामि।

**tricakrikayā** gacchāmi.
*I go by autoriksha.* **(Teacher corrects!)**

त्रिचक्रिकया गच्छामि।

tricakrikayā gacchāmi.
*I go by autoriksha.*

अहं द्विचक्रिकया क्रीडाङ्गणं गच्छामि।

ahaṁ dvicakrikayā krīḍāṅgaṇaṁ gacchāmi.
*I go to the playground by bicycle.*

अहं विमानेन दिल्लिनगरं गच्छामि।

ahaṁ vimānena dilli-nagaraṁ gacchāmi.
*I go to Delhi by airplane.*

अहं नौकया देशान्तरं गच्छामि।

ahaṁ naukayā deśāntaraṁ gacchāmi.
*I go abroad by boat.*

अहं द्विचक्रयानेण शालां गच्छामि।

ahaṁ dvicakra**yāneṇa** śālāṁ gacchāmi.
*I go to school by bicycle.* **(Mistake!)**

द्विचक्रिकया।

dvicakrik**ayā.**
*By bicycle.* **(Teacher corrects!)**

अहं द्विचक्रिकया शालां गच्छामि।

ahaṁ dvicakrikayā śālāṁ gacchāmi.
*I go to school by bicycle.*

---

*HINDI: When using a means or a vehicle to go somewhere* ***tritīyā-vibhakti*** *is used.*

---

इदानीं वयम् अन्यम् एकम् अभ्यासं कुर्मः।

idānīṁ vayam anyam ekam abhyāsaṁ kurmaḥ.
*Now we do another exercise.*

कूर्चः। कूर्चेन अहं चित्राणि लिखामि।

kūrcaḥ. kūrcena ahaṁ citrāṇi likhāmi.
*A brush. I paint pictures with the brush.*

कूर्चः, कूर्चेन । वदन्ति वा इदानीम् ?

kūrcaḥ, kūrcena. vadanti vā idānīm?
*A brush, with the brush. Would you now say?*

कूर्चः । कूर्चेन अहं चित्राणि लिखामि ।

kūrcaḥ. kūrcena ahaṁ citrāṇi likhāmi.
*A brush. I paint pictures with the brush.*

कुञ्चिका । कुञ्चिकया अहं तालम् उद्घाटयामि ।

kuñcikā. kuñcikayā ahaṁ tālam udghāṭayāmi.
*A key. I open the lock with the key.*

उट्टङ्कनयन्त्रम् । उट्टङ्कनयन्त्रेन अहम् उट्टङ्कणं करोमि ।

uṭṭaṅkana-yantram. uṭṭaṅkana-yantreṇa aham uṭṭaṅkanaṁ karomi.
*A typewriter. I type with the typewriter.*

कर्तरी । कर्तर्या अहं कागदं कर्तयामि ।

kartarī. kartaryā ahaṁ kāgadaṁ kartayāmi.
*Scissors. I cut paper with scissors.*

विमानम् । विमानेन अहं सञ्चारं करोमि ।

vimānam. vimānena ahaṁ sañcāraṁ karomi.
*An airplane. I travel with the airplane.*

स्यूतः । स्यूतेन अहं वस्तूनि आनयामि ।

syūtaḥ. syūtena ahaṁ vastūni ānayāmi.
*A bag. I bring the clothes with the bag.*

लेखनी । लेखन्या अहम् अक्षराणि लिखामि ।

lekhanī. lekhanyā aham akṣarāṇi likhāmi.
*A pen. I write letters with the pen.*

द्विचक्रिका । द्विचक्रिकया अहं विद्यालयं गच्छामि ।

dvicakrikā. dvicakrikayā ahaṁ vidyālayaṁ gacchāmi.
*A bicycle. I go to school by bicycle.*

लोकयानम् । लोकयानेन अहं प्रयाणं करोमि ।

lokayānam. lokayānena ahaṁ prayāṇaṁ karomi.
*A bus. I travel by bus. (Lit: I do the traveling …)*

दण्डः । दण्डेन अहं शुनकं ताडयामि ।

daṇḍaḥ. daṇḍena ahaṁ śunakaṁ tāḍayāmi.
*A stick. I beat the dog with the stick.*

तूला । तूलया अहं वस्तूनि तोलयामि ।

tūlā. tūlayā ahaṁ vastūni tolayāmi.
*A scale. I weigh the things with the scale.*

दूरवाणी । दूरवाण्या अहं सम्भाषणं करोमि ।

dūravāṇī. dūravāṇyā ahaṁ sambhāṣaṇaṁ karomi.
*A telephone. I do conversation with the phone.*

---

अहं शब्दद्वयं वदामि भवन्तः वाक्यं रचयन्तु ।

ahaṁ śabda-dvayaṁ vadāmi bhavantaḥ vākyaṁ racayantu.
*I say two words, you (pl.) make a sentence.*

व्याधः – बाणः । भवान् वदतु ।

vyādhaḥ – bāṇaḥ. bhavān vadatu!
*A hunter – an arrow. You say!*

व्याधः बाणेन व्याघ्रं मारयति ।

vyādhaḥ bāṇena vyāghraṁ mārayati.
*A hunter kills the tiger with the arrow.*

शिक्षकः – सुधाखण्डः ।

śikṣakaḥ – sudhākhaṇḍaḥ.
*A teacher – a chalk.*

शिक्षकः सुधाखण्डेन लिखति ।

śikṣakaḥ sudhākhaṇḍena likhati.
*Teacher writes with the chalk.*

लोहकारः – मुद्गरः ।

lohakāraḥ – mudgaraḥ.
*Blacksmith – hammer.*

लोहकारः मुद्गरेण ताडयति ।

lohakāraḥ mudgareṇa tāḍayati.
*Blacksmith strikes with the hammer.*

अर्चकः – माला ।

arcakaḥ – mālā.
*Priest – garland.*

अर्चकः मालया देवम् अलङ्करोति ।

arcakaḥ mālayā devam alaṅkaroti.
*Priest decorates the deity.*

सुरेशः – कुञ्चिका ।

sureśaḥ – kuñcikā.
*Suresha – key.*

सुरेशः कुञ्चिकया तालम् उद्घाटयति ।

sureśaḥ kuñcikayā tālam udghāṭayati.
*Suresha opens the lock with the key.*

जनाः – वाहनम् ।

janāḥ – vāhanam.
*People – vehicle.*

जनाः वाहनेन सञ्चरन्ति ।

janāḥ vāhanena sañcaranti.
*People travel with the vehicle.*

सौचिकः – कर्तरी ।

saucikaḥ – kartarī.
*Tailor – scissors.*

सौचिकः कर्तर्या कागदं कर्तयति ।

saucikaḥ kartaryā kāgadaṁ kartayati.
*Tailor cuts paper with scissors.*

माता – वेलनी ।

mātā – velanī.
*Mother – rolling pin.*

माता वेलन्या रोटिकं करोति ।

mātā velanyā roṭikaṁ karoti.
*Mother makes chapati with the rolling pin.*

सैनिकः – गदा ।

sainikaḥ – gadā.
*Soldier – club.*

सैनिकः गदया शत्रुं मारयति ।

sainikaḥ gadayā śatruṁ mārayati.
*Soldier kills the enemy with the club.*

पिता – स्यूतः ।

pitā – syūtaḥ.
*Father – bag.*

पिता स्यूतेन वस्तूनि आनयति ।

pitā syūtena vastūni ānayati.
*Father brings things with the bag.*

वर्णकारः – कूर्चः ।

varṇakāraḥ – kūrcaḥ.
*Painter – brush.*

वर्णकारः कूर्चेन चित्रं लिखति ।

varṇakāraḥ kūrcena citraṁ likhati.
*Painter paints a picture with the brush.*

सर्वे – जिह्वा ।

sarve – jihvā.
*All – tounge.*

सर्वे जिह्वया रुचिम् आस्वादयन्ति ।

sarve jihvayā rucim āsvādayanti.
*All relish the taste with the tounge.*

---

*HINDI: Now we will see how* ***tritīyā-vibhakti*** *is used in everyday conversation:*

---

परलक्ष्मीः ! परलक्ष्मीः ! परलक्ष्मीः !

paralakṣmīḥ! paralakṣmīḥ! paralakṣmīḥ!
*Paralakshmi! Paralakshmi! Paralakshmi!*

ओ, अहो, इन्दिरक्षे ! आगच्छतु ।

o, aho, indirakṣe! āgacchatu!
*Oh, hey, Indiraksha! Come!*

उपविशतु ।

upaviśatu.
*Sit down!*

सर्वं कुशलं क्य ?

sarvaṁ kuśalaṁ kya?
*How are you? (Lit.: Is everything fine?)*

सर्वं कुशलम् ।

sarvaṁ kuśalam.
*Everything is fine.*

किं करोति भवती ?

kiṁ karoti bhavatī?
*What are you (fem.) doing?*

अहं पाकं करोमि ।

ahaṁ pākaṁ karomi.
*I am cooking.*

कः विशेषः ?

kaḥ viśeṣaḥ?
*Any news?*

अद्य बन्धवाः आगच्छन्ति अतः विशेषः पाकः ।

adya bandhavāḥ āgacchanti ataḥ viśeṣaḥ pākaḥ.
*Today friends are coming therefore the cooking is special.*

एवं वा ? भवती किं किं करोति ?

evaṁ vā? bhavatī kiṁ kiṁ karoti?
*Is it so? What [various dishes] are you making?*

अहम् आलुकेन व्यञ्जनं करोमि, कुष्माण्डेन क्वथितं करोमि ।

aham ālukena vyañjanaṁ karomi, kuṣmāṇḍena kvathitaṁ karomi.
*I am making the side dish (curry) with potato, I am making the sauce (sambar) with pumpkin.*

बहु मरीचिकाः सन्ति खलु ? मरीचिकया किं करोति भवती ?

bahu marīcikāḥ santi khalu? marīcikayā kiṁ karoti bhavatī?
*There is a lot of peppers, isn't it? What do you make with bell-pepper?*

एषा महामरीचिकाः । एषा कटुः नास्ति । एतया भर्जनं करोमि ।

eṣā mahā-marīcikā. eṣā kaṭuḥ nāsti. etayā bharjanaṁ karomi.
*This is big peper. This one is not pungent. With it I make a fried dish.*

भवती रोटिकां न करोति वा ?

bhavatī roṭikāṁ na karoti vā?
*You are not making [unleavened] bread?*

करोमि । रोटिकया सह दालम् अपि करोमि ।

karomi. roṭikayā saha dālam api karomi.
*I am making. With the bread I am also making dhal soup.*

किम् अपि मधुरम् ?

kim api madhuram?
*Something sweet as well?*

करोमि । पायसं करोमि ।

karomi. pāyasaṁ karomi.
*I am making. I am making a milk sweet.*

पायसं वा ? घृतेन पायसस्य रुचिः अधिका भवति ।

इदानीं वदतु अहं किं सहाय्यं करोमि ?

pāyasaṁ vā? ghṛtena pāyasasya ruciḥ adhikā bhavati.
idānīṁ vadatu ahaṁ kiṁ sahāyyaṁ karomi?
*Milk sweet? With ghee the taste of the the milk sweet is improved. Now tell [me], how can I help you?*

सहाय्यं किम् अपि मास्तु, भोः । मया सह सम्भाषणं करोतु । पर्याप्तम् ।

sahāyyaṁ kim api māstu, bhoḥ. mayā saha sambhāṣaṇaṁ karotu. paryāptam.
*No need for halp. [Just] talk with me. [That is] enough.*

तर्हि भवती एव सर्वं करोतु । अहं सर्वेषां रुचिं पश्यामि ।

tarhi bhavatī eva sarvaṁ karotu. ahaṁ sarveṣāṁ ruciṁ paśyāmi.
*[All right] then, you do everything alone. I [will] try the taste of all [dishes]. (Lit: I will see …)*

---

## सुभाषितम्

**subhāṣitam**
***Verse***

इदानीम् एकं सुभाषितं शृण्मः ।

idānīm ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now we [will] listen to one verse.*

अकृत्वा परसन्तापम् अगत्वा खलनम्रताम् ।
अनुत्सृज्य सतां वर्त्म यत् स्वल्पमपि तद् बहु ॥

akṛtvā parasantāpam   agatvā khala-namratām
anutsṛjya satāṁ vartma   yat svalpam api tad bahu

akṛtvā – *without doing;* parasantāpam – *hurting, tormenting others;* agatvā – *without going;* khala-namratām – *to submission to the wicked;* anutsṛjya – *without giving up;* satām – *of the good (people);* vartma – *path, way;* yat – *which;* svalpam – *very little;* api – *also;* tad – *that;* bahu – *a lot.*

*If you restrain from hurting others, avoid bad association, don't give up the good association, then whatever little you do on that path (of dharma) that is a lot.*

इदानीं यत् सुभाषितं श्रुतवन्तः तस्य सुभाषितस्य अर्थः एवम् अस्ति ।

idānīṁ yat subhāṣitaṁ śrutavantaḥ tasya subhāṣitasya arthaḥ evam asti.
*Now that we have heard this verse, here is it's meaning.*

जीवने सज्जनैः कथं व्यवहार्तव्यम् इति एतस्मिन् सुभाषिते उक्तम् अस्ति ।

jīvane sajjanaiḥ kathaṁ vyavahārtavyam iti etasmin subhāṣite uktam asti.
*In this verse it is explained how are good people to behave in life. (Lit.: How behaving is to be done by the good people.)*

यदि एतद् सर्वम् अपि अकृत्वा जीवने अत्यधिकं सम्पादयति चेद् अपि तस्य मूल्यम् एव न भवति ।

yadi etad sarvam api akṛtvā jīvane atyadhikaṁ sampādayati ced api, tasya mūlyam eva na bhavati.
*Even if one not doing all of these [listed in the verse] acomplishes very much in life, there is no worth in it.*

## कथा

**kathā**
*Story*

अहम् इदानीम् एकं कथां वदामि । भवन्तः सर्वे सावधनेन शृण्वन्तु ।

aham idānīm ekaṁ kathāṁ vadāmi. bhavantaḥ sarve sāvadhanena śṛṇvantu.
*Now I [will] tell a story. You all listen attentively.*

पूर्वं कलिङ्गदेशम् अशोकमहाराजः पालयति स्म ।

pūrvaṁ kaliṅga-deśaṁ aśoka-mahārājaḥ pālayati sma.
*Previously king Ashoka ruled the land Kalinga.*

एकदा सः मन्त्रिणा सह विहारार्थं बहिर् गतवान् आसीत् । तत्र मार्गे कञ्चित् बौद्धभिक्षं सः दृष्टवान् ।

ekadā saḥ mantriṇā saha vihārārthaṁ bahir gatavān āsīt. tatra mārge kañcid baudha-bhikṣuṁ saḥ dṛṣṭavān.
*Once he went outside together with the minister for relaxation. There on the road he saw some Budist beggar.*

सः भिक्षोः समीपं गतवान् भक्त्या तस्य पादारविन्दयोः शिरः स्थापयित्वा नमस्कारं कृतवान् ।

saḥ bhikṣoḥ samīpaṁ gatavān bhaktyā tasya pādāravindayoḥ śiraḥ sthāpayitvā namaskāraṁ kṛtavān.
*He went to the beggar and putting the head to his lotus feet he paid obeisances to him.*

भिक्षुः अशिर्वादं कृतवान् । परन्तु एतत् सर्वम् अपि तस्य मन्त्रि आश्चर्येन पश्यन् आसीत् । एतत् तस्मै न आरोचत । सः महाराजं पृष्टवान् ।

bhikṣuḥ aśirvādaṁ kṛtavān. parantu etat sarvam api tasya mantrī āścaryena paśyan āsīt. etat tasmai na ārocata. saḥ mahārājaṁ pṛṣṭavān.
*The beggar blessed him. But his minster was observing all this with wonder. This didn't appeal him. He asked the king:*

"भोः, महाराज ! भवान् एतस्य राज्यस्य चक्रवर्ती अस्ति । भवान् किमर्थं तस्य पदारविन्दयोः शिरः स्थापितवान्" इति ।

"bhoḥ, mahārāja! bhavān etasya rājyasya cakravartī asti. bhavān kim arthaṁ tasya padāravindayoḥ śiraḥ sthāpitavān" iti.
*"Oh, king! You are the emperor of this kingdom. Why did you put your head to his lotus feet?"*

तदा महाराजः किम् अपि न उक्तवान् । मौनं हसितवान् ।

tadā mahārājaḥ kim api na uktavān. maunaṁ hasitavān.
*Then the king didn't say anything. He silently smiled.*

कानिचन दिनानि अतीतानि । एकदा अशोकः मन्त्रिणम् उक्तवान् "भोः मन्त्रिन् ! भवान् इदानीम् एव गत्वा एकस्य अजस्य, एकस्य व्यघ्रस्य, एकस्य मनुष्यस्य शिरः आनयतु ।"

kānicana dināni atītāni. ekadā aśokaḥ mantriṇam uktavān "bhoḥ, mantrin! bhavān idānīm eva gatvā ekasya ajasya, ekasya vyaghrasya, ekasya manuṣyasya śiraḥ ānayatu.
*Some days have passed. Once Ashoka said to the minister: "Oh, minister! Go imediately and bring one goat's, one tiger's and one human head."*

तदा मन्त्री अरण्यं गतवान् एकस्य व्यघ्रस्य शिरः आनितवान् ।

tadā mantrī araṇyaṁ gatavān ekasya vyaghrasya śiraḥ ānitavān.
*The minister went to the forrest and brought one tiger's head.*

मंसापणं गतवान् तत्र एकस्य अजस्य शिरः आनितवान् ।

maṁsāpaṇaṁ gatavān tatra ekasya ajasya śiraḥ ānitavān.
*He wen to the meat store and [from] there brought one goat's head.*

तथा एव श्मशानं गतवान् तत्र एकः मनुष्यः मृतः आसीत्, तस्य शिरः अपि आनितवान्। महाराजाय दत्तवान्।

tathā eva śmaśānaṁ gatavān tatra ekaḥ manuṣyaḥ mṛtaḥ āsīt, tasya śiraḥ api ānitavān. mahārājāya dattavān.
*He also went to the cemetary and there one man was dead so he brought his head as well. He gave [them] to the king.*

महाराजः उक्तवान् "भोः, एतत् सर्वम् अपि भवान् नीत्वा विक्रीय आगच्छतु।"

mahārājaḥ uktavān "bhoḥ, etat sarvam api bhavān nītvā vikrīya āgacchatu."
*The king said: "Take all this and after selling it come back."*

मन्त्री विपणिं गतवान् तत्र कश्चन मंसभक्षकः अजस्य शिरः क्रीतवान्। अन्यः कश्चन अलङ्कारप्रियः व्याघ्रस्यशिरः क्रीतवान् परन्तु मनुष्यस्य शिरः कोऽपि न क्रीतवान्।

mantrī vipaṇiṁ gatavān tatra kaścana maṁsa-bhakṣakaḥ ajasya śiraḥ krītavān. anyaḥ kaścana alaṅkāra-priyaḥ vyāghrasya śiraḥ krītavān parantu manuṣyasya śiraḥ ko 'pi na krītavān.
*The minster went to the market and there some meateater bought the goat's head. Some other person, who liked such decorations, bought the tiger's head, but nobody bought the human head.*

अनन्तरं मन्त्री निराशया महाराजस्य समीपम् आगत्य निवेदितवान्। महाराजः उक्तवान् "भवतु भवान् एतद् शिरः दानरूपेण ददतु" इति।

anantaraṁ mantrī nirāśayā mahārājasya samīpam āgatya niveditavān. mahārājaḥ uktavān: "bhavatu bhavān, etad śiraḥ dāna-rūpeṇa dadatu" iti.
*Then the minister came to the king with hopelessness and reported. The king said: "Let it be, mister, give this head as a gift."*

पुनः मन्त्री विपणिं गतवान् तत्र सर्वान् उक्तवान् "भोः, एतद् शिरः दानरूपेण ददामि स्वीकुर्वन्तु स्वीकुर्वन्तु !" इति। परन्तु कोऽपि न स्वीकृतवान्।

punaḥ mantrī vipaṇiṁ gatavān tatra sarvān uktavān "bhoḥ, etad śiraḥ dāna-rūpeṇa dadāmi. svīkurvantu, svīkurvantu!" iti. parantu ko 'pi na svīkṛtavān.
*The minister again went to the market and said to everyobody there: "Oh, I am giving away this head as a gift. Take [it], please! Take [it], please!" But nobody took [it].*

मन्त्री आगत्य महाराजं सर्वं निवेदितवान्।

mantrī āgatya mahārājaṁ sarvaṁ niveditavān.
*Coming [back] the minister reported [about] everything.*

महाराजः उक्तवान् "इदानीं ज्ञातवान् खलु ? यावद् जीवामः तावद् एव मनुष्यस्य शरीरस्य महत्वं भवति। जीवभावे मनुष्यशरीरं व्यर्थं भवति।"

mahārājaḥ uktavān "idānīṁ jñātavān khalu? yāvad jīvāmaḥ tāvad eva manuṣyasya śarīrasya mahatvaṁ bhavati. jīva-bhāve manuṣya-śarīraṁ vyarthaṁ bhavati."
*The king said: "Now you understand, don't you? For as long as we live, so long the greatness of human body remains. As the life unfolds (lit: in continuity of life) human body becomes useless."*

"तदा शिरसः अपि महत्वं न भवति। अतः जीवितकाले एव वयं यदि सज्जनानां श्रेष्ठानां

पादारविन्दयोः शिरः संस्थाप्य आशिर्वादं स्वीकुर्मः तर्हि जीवनं सार्थकं भवति।"

"tadā śirasaḥ api mahatvaṁ na bhavati. ataḥ jīvita-kāle eva vayaṁ yadi sajjanānāṁ śreṣṭhānāṁ pādāravindayoḥ śiraḥ saṁsthāpya āśirvādaṁ svīkurmaḥ tarhi jīvanaṁ sārthakaṁ bhavati."
*"Then even the greateness of the head isn't there. Therefore in the lifetime if we place our head at the lotus feet of great saintly men and take their blessing then the life becomes meaningful."*

एतद् श्रुत्वा मन्त्री समाहितः अभवत्।

etad śrutvā mantrī samāhitaḥ abhavat.
*Hearing this convinced the minister.*

कथायाः अर्थं ज्ञातवन्तः खलु ?

kathāyāḥ arthaṁ jñātavantaḥ khalu?
*You have understood the story, haven't you?*

आम्, ज्ञातवन्तः।

ām, jñātavantaḥ.
*Yes, we understood.*

धन्यवादः।

dhanyavādaḥ.
*Thank you.*

नमो नमः।

namo namaḥ.
*Salutations.*

---

**Teacher:**

प्रेमा

Premā

**Students:**

श्रीकांतः वि. परिमेलः उल्लासः चैतन्यः

Śrīkāntaḥ V. Parimelaḥ Ullāsaḥ Caitanyaḥ

जयशंकरः एम्. सञ्जयः प्रधानः

Jayaśaṅkaraḥ M. Sañjayaḥ Pradhānaḥ

अभिलाषः

Abhilāṣaḥ

प्रतिमा वि.एन्. शीला अमरजा जे. श्वेता बि.

Pratimā V. N. Śīlā Amarajā J. Śvetā B.

चैतन्या सत्यन्. सूर्या एस्.राजू श्वेता जे.प्रेभु

Caitanyā Satyan. Sūryā S. Rājū Śvetā J. Prebhu

प्रतीक्षा आर् भारद्वाज्

Pratīkṣā R. Bhāradvāj

# LESSON 16 – OVERVIEW

*In lesson sixteen you will do further practice of* **tritīyā-vibhakti** *(instrumental case) and learn two new* **avyayas** *that are used with instrumental:* **saha** *(with) and* **vinā** *(without) and* **avyaya yadā – tadā**.*(when – then). You will use a few dual forms for the fist time.*

**त्रितीयाविभक्तिः** **tritīyā-vibhaktiḥ** ***instrumental***

अहं नेत्राभ्यां पश्यामि । ahaṁ netr**ābhyāṁ** paśyāmi. *I look* ***with [two] eyes (dual).***

वयं सन्तोषेण पाठं पठामः । vayaṁ santoṣeṇa pāṭhaṁ paṭhāmaḥ. *We study the lesson with pleasure.*

अहं भयेन वनं गच्छामि । ahaṁ bhayena vanaṁ gacchāmi. *I go to the forest with fear.*

## AVYAYAS

| | | |
|---|---|---|
| सह | saha | *with* |
| विना | vinā | *without* |

| | | |
|---|---|---|
| केन सह ? | kena saha? | *With whom?* |

| | | | | | | |
|---|---|---|---|---|---|---|
| गोविन्दः | govindaḥ | *Govinda* | => | गोविन्देन सह | govind**ena saha** | ***with*** *Govinda* |
| रमा | ramā | *Rama* | => | रमया सह | ram**ayā saha** | ***with*** *Rama* |

| | | |
|---|---|---|
| उपनेत्रेण विना | upanetreṇa vinā | *without eyeglasses* |

उपनेत्रेण विना न पश्यामि । upanetreṇa **vinā** na paśyāmi. *I don't (can't) see* ***without*** *eyeglasses.*

| | | |
|---|---|---|
| यदा - तदा । | yadā – tadā | *when – then* |

यदा पिपासा भवति तदा जलं पिबतु । **yadā** pipāsā bhavati **tadā** jalaṁ pibatu. ***When*** *[there] is thirst,* ***then*** *drink water!*

# Lesson 16

*HINDI: In the previous lecture we learned* ***tritīyā-vibhakti (instrumental case).*** *In this lesson we will do further practice.*

नमो नमः ।

namo namaḥ.
*Salutations.*

संस्कृतभाषाशिक्षणे भवतां सर्वेषां स्वागतम् ।

saṁskṛta-bhāṣā-śikṣaṇe bhavatāṁ sarveṣāṁ svāgatam.
*Welcome to you all to the study of Sanskrit language.*

वयं त्रितीयाविभक्तेः अभ्यासं कृतवन्तः । इदानीं कानिचन वाक्यानि वदामः ।

vayaṁ tritīyā-vibhakteḥ abhyāsaṁ kṛtavantaḥ. idānīṁ kānicana vākyāni vadāmaḥ.
*We did exercises of instrumental. Now we [will] say some sentences.*

अहं वाक्यं वदामि भवन्तः तत्र त्रितीयाविभक्तिं योजयन्तु ।

ahaṁ vākyaṁ vadāmi bhavantaḥ tatra tritīyā-vibhaktiṁ yojayantu.
*I say a sentence, you (pl.) there join in genetiv.*

रामः, सुधाखण्डः, लिखति । रामः सुधाखण्डेन लिखति । एवं तत्र त्रितीयविभक्तिं योजयन्तु ।

rāmaḥ, sudhākhaṇḍaḥ, likhati. rāmaḥ sudhākhaṇḍena likhati. evaṁ tatra tritīyā-vibhaktiṁ yojayantu.
*Rama writes chalk. Rama writes with the chalk.*
*In this way use genetive there.*

सः, बाणः, ताडयति ।

saḥ, bāṇaḥ, tāḍayati.
*He, arrow, strikes.*

सः बाणेन ताडयति ।

saḥ bāṇena tāḍayati.
*He hits with the arrow.*

वर्णकारः, कूर्चः, लिखति ।

varṇakāraḥ, kūrcaḥ, likhati.
*Painter, paints, brush.*

वर्णकारः कूर्चेन लिखति ।

varṇakāraḥ kūrcena likhati.
*A painter paints with the brush.*

सुरेशः, कुञ्चिका, उद्घाटयति ।

sureśaḥ, kuñcikā, udghāṭayati.
*Suresha, key, opens.*

सुरेशः कुञ्चिकेन उद्घाटयति ।

sureśaḥ kuñcik**ena** udghāṭayati.
*Suresha opens with the key.* **(Mistake!)**

न । न । सः कुञ्चिकया उद्घाटयति । वदन्तु ।

na. na. saḥ kuñcik**ayā** udghāṭayati. vadantu.
*No, no. He opens with the key. Say (pl.)!*

सः कुञ्चिकया उद्घाटयति ।

saḥ kuñcikayā udghāṭayati.
*He opens with the key.*

माता, कलशः, आनयति ।

mātā, kalaśaḥ, ānayati.
*Mother, water pitcher, brings.*

माता कलशेन आनयति ।

mātā kalaśena ānayati.
*Mother brings with the water pitcher.*

जनाः, वाहनम्, गच्छन्ति ।

janāḥ, vāhanaṁ, gacchanti.
*People, vehicle, go (pl.).*

जनाः वाहनेन गच्छन्ति ।

janāḥ vāhanena gacchanti.
*People go with the vehicle.*

एषः, अङ्कनी, लिखति ।

eṣaḥ, aṅkanī, likhati.
*He pen writes.*

एषः अङ्कन्या लिखति ।

eṣaḥ aṅkanyā likhati.
*He writes with the pen.*

---

भवन्तः चमसेन किं किं कुर्वन्ति ? भवती वदतु ।

bhavantaḥ camasena kiṁ kiṁ kurvanti? bhavatī vadatu.
*What [various things] do you (pl.) do with the spoon? You (fem.) say!*

अहं चमसेन अन्नं खादामि ।

ahaṁ camasena annaṁ khādāmi.
*I eat rice with the spoon.*

अहं चमसेन शर्करां खादामि ।

ahaṁ camasena śarkarāṁ khādāmi.
*I eat sugar with the spoon.*

अहं चमसेन मधुरं खादामि ।

ahaṁ camasena madhuraṁ khādāmi.
*I eat sweet with the spoon.*

अहं चमसेन औषधं पिबामि ।

ahaṁ camasena auṣadhaṁ pibāmi.
*I drink medicine with the spoon.*

चुरिकया किं किं कुर्वन्ति ?

curikayā kiṁ kiṁ kurvanti?
*What [various things] do you (pl.) do with the knife?*

अहं चुरिकया फलं कर्तयामि ।

ahaṁ curikayā phalaṁ kartayāmi.
*I cut the fruit with the knife.*

अहं चुरिकया मालां कर्तयामि ।

ahaṁ curikayā mālāṁ kartayāmi.
*I cut the garland with the knife.*

अहं चुरिकया शाकां कर्तयामि ।

ahaṁ curikayā śākāṁ kartayāmi.
*I cut vegetable with the knife.*

अहं चुरिकया खादनं कर्तयामि ।

ahaṁ curikayā khādanaṁ kartayāmi.
*I cut food with the knife.*

अहं चुरिकया सस्यं कर्तयामि ।

ahaṁ curikayā sasyaṁ kartayāmi.
*I cut the plant with the knife.*

गुडेन किं किं कुर्वन्ति ?

guḍena kiṁ kiṁ kurvanti?
*What [various things] do you do with sugar candy?*

गुडेन पायसं कुर्वन्ति ।

guḍena pāyasaṁ kurvanti.
*They make sweet milk dish with sugar candy.*

अहं गुडेन मिष्टान्नम्...

ahaṁ guḍena miṣṭhānnam ...
*I ... sweet with the sugar candy.*

... करोमि । पुनः वदतु ।

… karomi. punaḥ vadatu.
*... I do. Say again!*

अहं गुडेन मिष्टान्नं करोमि ।

ahaṁ guḍena miṣṭhānnaṁ karomi.
*I make a sweet with sugar candy.*

गुडेन औषधं कुर्वन्ति ।

guḍena auṣadhaṁ kurvanti.
*They make a medicine with sugar candy.*

---

भवान् कथं विद्यालयं गच्छति ?

bhavān kathaṁ vidyālayaṁ gacchati?
*How do you go to school?*

अहं द्विचक्रिकया विद्यालयं गच्छामि ।

ahaṁ dvicakrikayā vidyālayaṁ gacchāmi.
*I go to the school by bicycle.*

अहं त्रिचक्रिकया विद्यालयं गच्छामि ।

ahaṁ tricakrikayā vidyālayaṁ gacchāmi.
*I go to the school by autoriksha.*

अहं नौकया गच्छामि ।

ahaṁ naukayā gacchāmi.
*I go by boat.*

अहं विमानया गच्छामि ।

ahaṁ vimāna**yā** gacchāmi.
*I go by plane.* ***(Mistake!)***

पुनः वदतु ।

punaḥ vadatu.
*Say again.*

अहं विमानया शालाम् ...

ahaṁ vimāna**yā** śālām ...
*I .... to the school by plane.* ***(Mistake again!)***

विमानेन ।

vimān**ena**.
*By plane.* ***(Teacher corrects!)***

विमानेन शालां गच्छामि ।

vimānena śālāṁ gacchāmi.
*I go to school by plane.*

अहं कर्णाभ्यां शृणोमि ।

ahaṁ karṇābhyāṁ śṛṇomi.
*I listen with [two] ears (dual).*

अहं नेत्राभ्यां पश्यामि ।

ahaṁ netrābhyāṁ paśyāmi.
*I look with [two] eyes (dual).*

अहं पादाभ्यां चलामि ।

ahaṁ pādābhyāṁ calāmi.
*I walk on [two] feet (dual).*

अहं हस्ताभ्यां कार्यं करोमि ।

ahaṁ hastābhyāṁ kāryaṁ karomi.
*I do work with [two] hands (dual).*

भवान् कर्णाभ्यां किं करोति ?

bhavān karṇābhyāṁ kiṁ karoti?
*What you do with [two] ears (dual)?*

अहं कर्णाभ्यां सङ्गीतां शृणोमि ।

ahaṁ karṇābhyāṁ saṅgītāṁ śṛṇomi.
*I listen to the music with [two] ears (dual).*

भवान् किं करोति ?

bhavān kiṁ karoti?
*What do you do?*

अहं कर्णाभ्यां वेदं शृणोमि ।

ahaṁ karṇābhyāṁ vedaṁ śṛṇomi.
*I listen Vedas with [two] ears (dual).*

भवान् किं करोति ?

bhavān kiṁ karoti?
*What do you do?*

अहं कर्णाभ्यां वेदघोषं शृणोमि ।

ahaṁ karṇābhyāṁ vedaghoṣaṁ śṛṇomi.
*I listen to the recitation of the Vedas with [two] ears (dual).*

भवान् नेत्राभ्यां किं पश्यति ?

bhavān netrābhyāṁ kiṁ paśyati?
*What do you see with [two] eyes?*

अहं नेत्राभ्यां फलं पश्यामि ।

ahaṁ netrābhyāṁ phalaṁ paśyāmi.
*I see the fruit with [two] eyes.*

अहं नेत्राभ्यां वृक्षं पश्यामि ।

ahaṁ netrābhyāṁ vṛkṣaṁ paśyāmi.
*I see the tree with [two] eyes.*

अहं नेत्राभ्यां चित्रं पश्यामि ।

ahaṁ netrābhyāṁ citraṁ paśyāmi.
*I look at the picture with [two] eyes.*

अहं हस्ताभ्यां कार्यं करोमि ।

ahaṁ hastābhyāṁ kāryaṁ karomi.
*I work with [two] hands.*

---

मान्ये ! अहम् अन्तः अगच्छामि वा ?

mānye! aham antaḥ agacchāmi vā?
*Lady! May I come in?*

किमर्थं विलम्बेन अगतवान् ?

kim arthaṁ vilambena agatavān?
*Why did you come late? (Lit: … with delay.)*

पादाभ्याम् आगतवान् अतः विलम्बः जातः ।

pādābhyām āgatavān ataḥ vilambaḥ jātaḥ.
*I came by [two] feet, therefore I was delayed. (Lit: … the delay occurred.)*

अस्तु । उपविशतु ।

astu. upaviśatu.
*All right. Sit down!*

अहं सन्तोषेण पाठं पठामि । भवन्तः सन्तोषेण पाठं पठन्ति वा ?

ahaṁ santoṣeṇa pāṭhaṁ paṭhāmi. bhavantaḥ santoṣeṇa pāṭhaṁ paṭhanti vā?
*I study the lesson with pleasure. Do you (pl.) study the lesson with pleasure?*

अस्तु । वयं सन्तोषेण पाठं पठामः ।

astu. vayaṁ santoṣeṇa pāṭhaṁ paṭhāmaḥ.
*Yes. We study the lesson with pleasure.*

अहम् आनन्देन सम्भाषनं करोमि । भवन्तः आनन्देन सम्भाषनं कुर्वन्ति वा ?

aham ānandena sambhāṣanaṁ karomi. bhavantaḥ ānandena sambhāṣanaṁ kurvanti vā?
*I do conversation with joy. Do you (pl.) do conversation with joy?*

अस्तु । वयम् आनन्देन सम्भाषनं कुर्मः ।

astu. vayam ānandena sambhāṣanaṁ kurmaḥ.
*Yes. We do conversation with joy.*

पिता प्रीत्या पुत्रीं पालयति ।

pitā prītyā putrīṁ pālayati.
*Father defends [his] daughter with affection.*

माता सहनया पुत्रं पोषयति ।

mātā sahanayā putraṁ poṣayati.
*Mother rears, raises [her] son with patience.*

भक्तः भत्या देवं नमति ।

bhaktaḥ bhatyā devaṁ namati.
*Devotee pays respect to God with devotion.*

कृषकः कष्टेण कार्यं करोति ।

kṛṣakaḥ kaṣṭeṇa kāryaṁ karoti.
*Farmer works with difficulty.*

एवं - सन्तोषः, सन्तोषेण । आनन्दः, आनन्देन । कष्टम्, कष्टेन । सुखम्, सुखेन । प्रीतिः, प्रीत्या । दया, दयया । करुणा, करुणया । सन्तोषः, सन्तोषेण ।

evaṁ – santoṣaḥ, santoṣeṇa. ānandaḥ, ānandena. kaṣṭam, kaṣṭena. sukham, sukhena. prītiḥ, prītyā. dayā, dayayā. karuṇā, karuṇayā. santoṣaḥ, santoṣeṇa.
*In this way – pleasure, with pleasure. Joy, with joy. Difficulty, with difficulty. Happiness, with happiness. Afffection, with Affection. Compassion, with compassion. Mercy, with mercy. Pleasure, with pleasure.*

इदानीम् एतेषां शब्दानाम् उपयोगं कृत्वा वाक्यं रचयन्तु । भवती वदतु ।

idānīm eteṣāṁ śabdānām upayogaṁ kṛtvā vākyaṁ racayantu. bhavatī vadatu!
*Now make a sentence using these words. You (fem.) say!*

अहं सन्तोषेन गृहं गच्छामि ।

ahaṁ santoṣ**ena** gṛhaṁ gacchāmi.
*I go home with pleasure.* **(Mistake!)**

सन्तोषेण ।

santoṣ**eṇa**.
*With pleasure.* **(Teacher corrects!)**

अहं सन्तोषेण गृहं गच्छामि ।

ahaṁ santoṣeṇa gṛhaṁ gacchāmi.
*I go home with pleasure.*

अहम् आनन्देन निद्रां करोमि ।

aham ānandena nidrāṁ karomi.
*I sleep with joy.*

अहं भयेन वनं गच्छामि ।

ahaṁ bhayena vanaṁ gacchāmi.
*I go to the forest with fear.*

अहम् उत्सहेन गीतां गायामि ।

aham utsahena gītāṁ gāyāmi.
*I sing the song with enthusiasm.*

अहं क्लेशेन गदितं??? करोमि ।

ahaṁ kleśena gaditaṁ??? karomi.
*I do the speech??? with trouble.*

अहं कष्टेन पाठं पठामि ।

ahaṁ kaṣṭena pāṭhaṁ paṭhāmi.
*I study the lesson with difficulty.*

अहं दुःखेन वैद्यालयं गच्छामि ।

ahaṁ duḥkhena vaidyālayaṁ gacchāmi.
*I go to hospital with distress.*

अहं सन्तोषेन क्रीडामि ।

ahaṁ santoṣ**ena** krīḍāmi.
*I play with pleasure.* **(Mistake!)**

सन्तोषेण क्रीडामि ।

santoṣeṇa krīḍāmi.
*I play with pleasure.* **(Teacher corrects!)**

अहं सन्तोषेण क्रीडामि ।

ahaṁ santoṣeṇa krīḍāmi.
*I play with pleasure.*

अहं भक्त्या प्रार्थयामि ।

ahaṁ bhaktyā prārthayāmi.
*I pray with devotion.*

अहम् उत्साहेन वयनं करोमि ।

aham utsāhena vayanaṁ karomi.
*I weave with enthusiasm.*

अहं श्रद्धया सङ्गीताभ्यासं करोमि ।

ahaṁ śraddhayā saṅgītābhyāsaṁ karomi.
*I practice music with confidence.*

अहं सुखेन दुरदर्शनं पश्यामि ।

ahaṁ sukhena duradarśanaṁ paśyāmi.
*I watch television with happiness (happily).*

अहम् उत्सहेन कलहं करोमि ।

aham utsahena kalahaṁ karomi.
*I quarrel with enthusiasm.*

अहं भक्त्या देवं नमामि ।

ahaṁ bhaktyā devaṁ namāmi.
*I pay obeisances to God with devotion.*

---

*HINDI: These words are used with* **tritīyā-vibhakti: harṣeṇa, santoṣeṇa, duḥkhena, dainyena, lajjayā, śraddhayā, bhaktyā,** *etc.*

---

मञ्जुनाथ ! उत्तिष्ठतु । गच्छतु । अनन्त ! उत्तिष्ठतु ।

भवान् मञ्जुनाथेन सह गच्छतु ।

mañjunātha! uttiṣṭhatu! gacchatu! ananta! uttiṣṭhatu! bhavān mañjunāthena saha gacchatu!
*Manjunatha stand up! Come! Ananta stand up! You go with Manjunatha!*

अनन्तः केन सह गतवान् ?

anantaḥ kena saha gatavān?
*With whom did Ananta go?*

अनन्तः मञ्जुनाथेन सह गतवान् ।

anantaḥ mañjunāthena saha gatavān.
*Ananta went with Manjunatha.*

आगच्छतु । अनन्तः मञ्जुनाथेन सह आगतवान् ।

āgacchatu. anantaḥ mañjunāthena saha āgatavān.
*Come! Ananta came with Manjunatha.*

अनन्तः केन सह आगतवान् ?

anantaḥ kena saha āgatavān?
*With whom did Ananta come?*

अनन्तः मञ्जुनाथेन सह आगतवान् ।

anantaḥ mañjunāthena saha āgatavān.
*Ananta came with Manjunatha.*

नित्यानन्दः जीवोत्तमेन सह सम्भाषणं करोति ।

nityānandaḥ jīvottamena saha sambhāṣaṇaṁ karoti.
*Nityananda talks with Jivottama.*

नित्यानन्दः केन सह सम्भाषणं करोति ?

nityānandaḥ kena saha sambhāṣaṇaṁ karoti?
*With whom does Nityananda talk?*

नित्यानन्दः जीवोत्तमेन सह सम्भाषणं करोति ।

nityānandaḥ jīvottamena saha sambhāṣaṇaṁ karoti.
*Nityananda talks with Jivottama.*

भवान् केन सह सम्भाषणं करोति ?

bhavān kena saha sambhāṣaṇaṁ karoti?
*With whom do you talk?*

अहं श्रीकण्ठेन सह सम्भाषणं करोमि ।

ahaṁ śrīkaṇṭhena saha sambhāṣaṇaṁ karomi.
*I talk with Shrikantha.*

भवान् केन सह आगतवान् ?

bhavān kena saha āgatavān?
*With who you came?*

अहं मञ्जुनाथेन सह आगतवान् ।

ahaṁ mañjunāthena saha āgatavān.
*I came with Manjunatha.*

अश्विनी शिल्पया सह सम्भाषणं करोति ।

aśvinī śilpayā saha sambhāṣaṇaṁ karoti.
*Ashvini talks with Shilpaya.*

आप्ता अंशया सह नृत्याभ्यासं करोति ।

āptā aṁśayā saha nṛtyābhyāsaṁ karoti.
*Apta practices dancing with Amsha.*

उत्तिष्ठतु ।

uttiṣṭhatu!

*Stand up!*

अहल्या दीपिकया सह चित्रमन्दिरं गच्छति ।

ahalyā dīpikayā saha citra-mandiraṁ gacchati.
*Ahalya goes to the cinema with Dipika.*

उत्तिष्ठतु ।

uttiṣṭhatu!
*Stand up!*

मिथिला अश्विन्या सह क्रीडति ।

mithilā aśvinyā saha krīḍati.
*Mithila plays with Ashvini.*

उत्तिष्ठतु ।

uttiṣṭhatu!
*Stand up!*

अंशा दीप्त्या सह नगरं गच्छति ।

aṁśā dīptyā saha nagaraṁ gacchati.
*Amsha goes to the town with Dipti.*

मञ्जुनाथः - मञ्जुनाथेन सह ।

mañjunāthaḥ – mañjunāthena saha.
*Manjunantha – with Manjunatha.*

गोविन्दः - गोविन्देन सह ।

govindaḥ – govindena saha.
*Govinda – with Govinda.*

अनन्तः - अनन्तेन सह ।

anantaḥ – anantena saha.
*Ananta – with Ananta.*

सागरः - सागरेन सह ।

sāgaraḥ – sāgarena saha.
*Sagara – with Sagara.*

आकशः - आकशेन सह ।

ākaśaḥ – ākaśena saha.
*Akasha – with Akasha.*

अङ्कितः - अङ्कितेन सह ।

aṅkitaḥ – aṅkitena saha.
*Ankita – with Ankita.*

नित्यानन्दः - नित्यानन्देन सह ।

nityānandaḥ – nityānandena saha.
*Nityananda – with Nityananda.*

रमेशः - रमेशेन सह ।

rameśaḥ – rameśena saha.
*Ramesha – with Ramesha.*

दिनेशः - दिनेशेन सह ।

dineśaḥ – dineśena saha.
*Dinesha – with Dinesha.*

बालकः - बालकेन सह ।

bālakaḥ – bālakena saha.
*Boy – with the boy.*

शिल्पा - शिल्पया सह ।

śilpā – śilpayā saha.
*Shilpa – with Shilpa.*

मिथिला - मिथिलया सह ।

mithilā – mithilayā saha.
*Mithila – with Mithila.*

मधुरा - मधुरया सह ।

madhurā – madhurayā saha.
*Madhura – with Madhura.*

माला - मालया सह ।

mālā – mālayā saha.
*Mala – with Mala.*

शन्तला - शन्तलया सह ।

śantalā – śantalayā saha.

*Shantala – with Shantala.*

रमा - रमया सह ।

ramā – ramayā saha.
*Rama – with Rama.*

मिथिला - मिथिलया सह ।

mithilā – mithilayā saha.
*Mithila – with Mithila.*

आप्ता - आप्तया सह ।

āptā – āptayā saha.
*Apta – with Apta.*

नन्दिनी - नन्दिन्या सह ।

nandinī – nandinyā saha.
*Nandini – with Nandini.*

अश्विनी - अश्विन्या सह ।

aśvinī – aśvinyā saha.
*Ashvini – with Ashvini.*

भास्करी - भास्कर्या सह ।

bhāskarī – bhāskaryā saha.
*Bhaskari – with Bhakari.*

पार्वती - पार्वत्या सह ।

pārvatī – pārvatyā saha.
*Parvati – with Parvati.*

---

इदानीं वयम् एकम् अभ्यासं कुर्मः ।

idānīṁ vayam ekam abhyāsaṁ kurmaḥ.
*Now we do one exercise.*

फलके शब्दत्रयं लिखितम् अस्ति । एतेषां शब्दानाम् उपयोगं कृत्व वाक्यं रचयामः ।

phalake śabda-trayaṁ likhitam asti. eteṣāṁ śabdānām upayogaṁ kṛtva vākyaṁ racayāmaḥ.
*Three words are written on the board. Using these words we [will] compose a sentence.*

यथा - लक्ष्मणः, रामः, वनम् । लक्ष्मणः रामेण सह वनम् गतवान् ।

yathā – lakṣmaṇaḥ, rāmaḥ, vanam. lakṣmaṇaḥ rāmeṇa saha vanam gatavān.
*Per example – Lakshmana, Rama, forest. Lakshmana went to the forest with Rama.*

तथैव - रविः, मित्रम्, नगरम् ।

tathaiva – raviḥ, mitram, nagaram.
*Similarly – Ravi, friend, city.*

रविः मित्रेण सह नगरं गतवान् ।

raviḥ mitreṇa saha nagaraṁ gatavān.
*Ravi went to the city with a friend.*

गोपालः, शिवः, सम्भाषणम् ।

gopālaḥ, śivaḥ, sambhāṣaṇam.
*Gopala, Shiva, conversation.*

गोपालः शिवेन सह सम्भाषणं कृतवान् ।

gopālaḥ śivena saha sambhāṣaṇaṁ kṛtavān.
*Gopala had a conversation with Shiva.*

गोविन्दः, सखी, चर्चा ।

govindaḥ, sakhī, carcā.
*Govinda, friend (fem.), concern.*

गोविन्दः सख्या सह चर्चां कृतवान् ।

govindaḥ sakhyā saha carcāṁ kṛtavān.
*Govinda was concerned with the friend (fem.).*

माता, पुत्री, बन्धुगृहम् ।

mātā, putrī, bandhu-gṛham.
*Mother, daugter, the relatives' house.*

माता पुत्र्या सह बन्धुगृहं गतवती।

mātā putryā saha bandhu-gṛhaṁ gatavatī.
*Mother went to the relatives' house with [her] daughter.*

सः, रमेशः, कलहः।

saḥ, rameśaḥ, kalahaḥ.
*He, Ramesha, quarrel.*

सः रमेशेन सह कलहं कृतवान्।

saḥ rameśena saha kalahaṁ kṛtavān.
*He quarrelled with Ramesha.*

लता, सुमा, कार्यम्।

latā, sumā, kāryam.
*Lata, Suma, work.*

लता सुमया सह कार्यं कृतवती।

latā sumayā saha kāryaṁ kṛtavatī.
*Lata did the work with Suma.*

केशवः, सुरेशः, भोजनम्।

keśavaḥ, sureśaḥ, bhojanam.
*Keshava, Suresha, eating.*

केशवः सुरेशेन सह भोजनं कृतवान्।

keśavaḥ sureśena saha bhojanaṁ kṛtavān.
*Keshava had a meal with Suresha.*

रोगी, वैद्यः, चिकित्सालयः।

rogī, vaidyaḥ, cikitsālayaḥ.
*Patient, doctor, hospital.*

रोगी वैद्येन सह चिकित्सालयं गतवान्।

rogī vaidyena saha cikitsālayaṁ gatavān.
*Patient went to hospital with the doctor.*

मालिनी, शारदा, शाला।

mālinī, śāradā, śālā.
*Malini, Sharada, school.*

मालिनी शारदया सह शालां गतवती।

mālinī śāradayā saha śālāṁ gatavatī.
*Malini went to school with Sharada.*

हेमा, पार्वती, पाठः।

hemā, pārvatī, pāṭhaḥ.
*Hema, Parvati, lesson.*

हेमा पार्वत्या सह पाठं पाठितवती।

hemā pārvatyā saha pāṭhaṁ pāṭhitavatī.
*Hema studied a lesson with Parvati.*

अहम् इदानीं शब्दं वदामि भवन्तः "सह" इति उपयुज्य वाक्यानि रचयन्तु।

aham idānīṁ śabdaṁ vadāmi bhavantaḥ "saha" iti upayujya vākyāni racayantu.
*Now I say a word, you (pl.) compose sentences using "saha".*

गोविन्दः, माधवः, अभ्यासं करोति।

govindaḥ, mādhavaḥ, abhyāsaṁ karoti.
*Govinda, Madhava, does exercise.*

गोविन्दः माधवेन सह अभ्यासं करोति।

govindaḥ mādhavena saha abhyāsaṁ karoti.
*Govinda does exercise with Madhava.*

अहं, मित्रं, सम्भाषणं करोमि।

ahaṁ, mitraṁ, sambhāṣaṇaṁ karomi.
*I, friend, talk.*

अहं मित्रेण सह सम्भाषणं करोमि।

ahaṁ mitreṇa saha sambhāṣaṇaṁ karomi.
*I talk to a friend.*

केशवः, अरुणः, कलहं करोति।

keśavaḥ, aruṇaḥ, kalahaṁ karoti.
*Keshava, Aruna, quarrels.*

केशवः अरुणेन सह कलहं करोति।

keśavaḥ aruṇena saha kalahaṁ karoti.
*Keshava quarrels with Aruna.*

शेकरः, सुदर्शनः, क्रीडति।

śekaraḥ, sudarśanaḥ, krīḍati.
*Shekara, Sudarshana, plays.*

शेकरः सुदर्शनेन सह क्रीडति।

śekaraḥ sudarśanena saha krīḍati.
*Shekara plays with Sudarshana.*

सौरभा, सुमना, विहारं करोति।

saurabhā, sumanā, vihāraṁ karoti.
*Saurabha, Sumana, have recreation, amusement.*

सौरभा **सुमनेन** सह विहारं करोति।

saurabhā suman**ena** saha vihāraṁ karoti.
*Saurabha has recreation with Sumana. (Mistake!)*

सौरभा सुमनया सह विहारं करोति।

saurabhā suman**ayā** saha vihāraṁ karoti.
*Saurabha has recreation with Sumana.*

मधुरा, शोभा, पाठं पठति।

madhurā, śobhā, pāṭhaṁ paṭhati.
*Madhura, Shobha, studies a lesson.*

मधुरा शोभया सह पाठं पठति।

madhurā śobhayā saha pāṭhaṁ paṭhati.
*Madhura studies a lesson with Shobha.*

गीता, सीमा, श्लोकं वदति।

gītā, sīmā, ślokaṁ vadati.
*Gita, Sima, recites a verse.*

गीता सीमया सह श्लोकं वदति।

gītā sīmayā saha ślokaṁ vadati.
*Gita recites a verse with Sima.*

निरुपमा, पूर्णिमा, पाकं करोति।

nirupamā, pūrṇimā, pākaṁ karoti.
*Nirupama, Purnima, cooks.*

निरुपमा पूर्णिमया सह पाकं करोति।

nirupamā pūrṇimayā saha pākaṁ karoti.
*Nirupama cooks with Purnima.*

राधिका, सरोजा, गीतां गायति।

rādhikā, sarojā, gītāṁ gāyati.
*Radhika, Saroja, sings a song.*

राधिका सरोजया सह गीतां गायति।

rādhikā sarojayā saha gītāṁ gāyati.
*Radhika sings a song with Saroja.*

माला, अनुजा, आपणं गच्छति।

mālā, anujā, āpaṇaṁ gacchati.
*Mala, younger sister, goes to the shop.*

माला अनुजया सह आपणं गच्छति।

mālā anujayā saha āpaṇaṁ gacchati.
*Mala goes to the shop with younger sister.*

---

*HINDI:* **saha** *is* **avyaya**, *meaning* ***with***. *It is used with* **tritīyā-vibhakti** *(instrumental case).*

---

तैलेन विना दीपः न ज्वलति।

tailena vinā dīpaḥ na jvalati.
*Lamp does not shine without oil.*

आहरेण विना जीवनं कष्टम्।

āhareṇa vinā jīvanaṁ kaṣṭham.
*Life without food is difficult.*

जलेन विना मीनाः न जीवन्ति।

jalena vinā mīnāḥ na jīvanti.
*Fish don't live without water.*

इदानीं “विना” इति शब्दप्रयोगं कृत्वा एकैकं वाक्यं वदन्ति वा ? भवती वदतु ।

idānīṁ "vinā" iti śabda-prayogaṁ kṛtvā ekaikaṁ vākyaṁ vadanti vā? bhavatī vadatu!
*Now after doing exercise with " vinā", would you one by one say (pl.) a sentence? You (fem.) say!*

जलेन विना जीवनम् अशक्यम् ।

jalena vinā jīvanam aśakyam.
*Life without water is impossible.*

जलेन विना जीवनं कष्ठम् ।

jalena vinā jīvanaṁ kaṣṭham.
*Life without water is difficult.*

मित्रेण विना अहं जीवितुं न इच्छामि ।

mitreṇa vinā ahaṁ jīvituṁ na icchāmi.
*I don't want to live without a friend.*

धनेन विना जीवनं कष्ठम् ।

dhanena vinā jīvanaṁ kaṣṭham.
*Life without money is difficult.*

सङ्गीतेन विना अहं न जीवामि ।

saṅgītena vinā ahaṁ na jīvāmi.
*I don't (can't) live without music.*

अहम् उपनेत्रेण विना न पश्यामि ।

aham upanetreṇa vinā na paśyāmi.
*I don't (can't) see without eyeglasses.*

---

*HINDI: The meaning of* **vinā** *is* ***"without"***. *It is used with* **tritīya-vibhakti** *(instrumental case).*

---

यदा अन्धकारः भवति तदा दीपं ज्वालयामः ।

yadā andhakāraḥ bhavati tadā dīpaṁ jvālayāmaḥ.
*When [there] is darkness, then we light the lamp.*

यदा - तदा ।

yadā – tadā.
*When – then.*

यदा अन्धकारः भवति तदा दीपं ज्वालयामः ।

yadā andhakāraḥ bhavati tadā dīpaṁ jvālayāmaḥ.
*When [there] is darkness, then we light the lamp.*

यदा बुभुक्षा भवति तदा भोजनं कुर्मः ।

yadā bubhukṣā bhavati tadā bhojanaṁ kurmaḥ.
*When [there] is hunger, then we eat.*

यदा अनारोग्यं भवति तदा चिकित्सालयं गच्छामः ।

yadā anārogyaṁ bhavati tadā cikitsālayaṁ gacchāmaḥ.
*When [there] is sickness, then we go to the hospital.*

यदा परीक्षा अस्ति तदा पठन्ति ।

yadā parīkṣā asti tadā paṭhanti.
*When [there] is exam, then they study.*

यदा विरामः भवति तदा प्रवासं गच्छन्ति ।

yadā virāmaḥ bhavati tadā pravāsaṁ gacchanti.
*When [there] is holiday, then they go to a journey.*

यदा - तदा । अहं वाक्यद्वयं वदामि भवन्तः “यदा - तदा” योजयित्वा वदन्तु ।

yadā – tadā. ahaṁ vākya-dvayaṁ vadāmi bhavantaḥ "yadā – tadā" yojayitvā vadantu.
*When – then. I say two sentences, you say after joining them with "when – then".*

विद्युत् गच्छति, सिक्थवर्तिकां ज्वालयन्ति ।

vidyut gacchati, sikthavartikāṁ jvālayanti.
*Electricity goes (is out), they light a candle.*

यदा विद्युत् गच्छति तदा सिक्थवर्तिकां ज्वालयन्ति ।

yadā vidyut gacchati tadā sikthavartikāṁ jvālayanti.
*When electricity is out, then they light a candle.*

सूर्योदयः भवति, कमलं विकसति।

sūryodayaḥ bhavati, kamalaṁ vikasati.
*Sunrise is, the lotus flowers.*

यदा सूर्योदयः भवति तदा कमलं विकसति।

yadā sūryodayaḥ bhavati tadā kamalaṁ vikasati.
*When [there] is sunrise, then the lotus flowers.*

पिपासा भवति, जलं पिबतु।

pipāsā bhavati, jalaṁ pibatu.
*Thirst is, drink water!*

यदा पिपासा भवति तदा जलं पिबतु।

yadā pipāsā bhavati tadā jalaṁ pibatu.
*When [there] is thirst, then drink water!*

पूजा भवति, घण्टानादं कुर्वन्ति।

pūjā bhavati, ghaṇṭānādaṁ kurvanti.
*Puja is, they sound the bell.*

यदा पूजा भवति तदा घण्टानादं कुर्वन्ति।

yadā pūjā bhavati tadā ghaṇṭānādaṁ kurvanti.
*When [there] is puja, then sound the bell.*

वृष्टिः भवति, बीजं वपन्ति।

vṛṣṭiḥ bhavati, bījaṁ vapanti.
*Rain is, they sow seed.*

यदा वृष्टिः भवति तदा बीजं वपन्ति।

yadā vṛṣṭiḥ bhavati tadā bījaṁ vapanti.
*When [there] is rain, then they sow seed.*

सखी मिलति, सम्भाषणं करोमि।

sakhī milati, sambhāṣaṇaṁ karomi.
*Friend (fem.) meets, I talk.*

यदा सखी मिलति तदा सम्भाषणं करोमि।

yadā sakhī milati tadā sambhāṣaṇaṁ karomi.
*When friend meets [me], then I talk.*

परीक्षा समाप्यते, सन्तोषः भवति।

parīkṣā samāpyate, santoṣaḥ bhavati.
*The exam ends, [there] is satisfaction.*

यदा परीक्षा समाप्यते तदा सन्तोषः भवति।

yadā parīkṣā samāpyate tadā santoṣaḥ bhavati.
*When the exam ends, then [there] is satisfaction.*

इदानीं "यदा - तदा" उपयुज्य वाक्यानि रचयन्तु।

भवति वदतु।

idānīṁ "yadā – tadā" upayujya vākyāni racayantu. bhavati vadatu!
*Now make sentences using "when – then". You (fem.) say!*

यदा वृष्टिः भवति तदा सस्यानि वर्धन्ते।

yadā vṛṣṭiḥ bhavati tadā sasyāni vardhante.
*When [there] is rain, then the crops grow.*

यदा रत्रिः भवति तदा अहं निद्रां करोमि।

yadā ratriḥ bhavati tadā ahaṁ nidrāṁ karomi.
*When the night comes (is), then I sleep.*

यदा इच्छा भवति तदा अहं खादामि।

yadā icchā bhavati tadā ahaṁ khādāmi.
*When [there] is desire, then I eat.*

यदा कार्यक्रमः भवति तदा नाट्यं करोमि।

yadā kāryakramaḥ bhavati tadā nāṭyaṁ karomi.
*When [there] is a festival, then I dance.*

यदा संस्कृतं शृणोमि तदा आनन्दः भवति।

yadā saṁskṛtaṁ śṛṇomi tadā ānandaḥ bhavati.
*When I listen to the Sanskrit, then [there] is joy.*

यदा मम सखी पाठं पठति तदा अहम् अपि पठामि।

yadā mama sakhī pāṭhaṁ paṭhati tadā aham api paṭhāmi.
*When my friend studies a lesson, then I also study.*

यदा साहिकालः??? भवति तदा अहं पूजां करोमि।

yadā sāhikālaḥ??? bhavati tadā ahaṁ pūjāṁ karomi.
*When [there] is ???, then I do puja.*

यदा दुःखं भवति तदा अहं निद्रां करोमि।

yadā duḥkhaṁ bhavati tadā ahaṁ nidrāṁ karomi.
*When [there] is distress, then I sleep.*

यदा खेदः भवति तदा नृत्यं करोमि।

yadā khedaḥ bhavati tadā nṛtyaṁ karomi.
*When [there] is saddness, then I dance.*

यदा सूर्योदयः भवति तदा अहम् उत्तिष्ठामि।

yadā sūryodayaḥ bhavati tadā aham uttiṣṭhāmi.
*When [there] is sunrise, then I get up.*

यदा शनिवासरः भवति तदा अहं देवालयं गच्छामि।

yadā śani-vāsaraḥ bhavati tadā ahaṁ devālayaṁ gacchāmi.
*When Saturday comes (is), then I go to the temple.*

यदा धनं न भवति तदा जीवनं कष्टम्।

yadā dhanaṁ na bhavati tadā jīvanaṁ kaṣṭam.
*When [there] is no money, then life is difficult.*

यदा मनुष्यं कष्टम् आप्नोति तदा सः दैवं??? स्मरति।

yadā manuṣ**yaṁ** kaṣṭam āpnoti tadā saḥ daivaṁ smarati???.
*When man gets [in] difficulty, then he remembers God???.* **(Mistake!)**

यदा मनुष्यस्य कष्टम् भवति तदा सः दैवं स्मरति।

yadā manuṣ**yasya** kaṣṭam bhavati tadā saḥ daivaṁ smarati.
*When man gets [in] difficulty, then he remembers God.* **(Teacher corrects!)**

यदा कार्यक्रमः भवति तदा अहं गायामि।

yadā kāryakramaḥ bhavati tadā ahaṁ gāyāmi.
*When [there] is a festival, then I sing.*

यदा सूर्यस्तं भवति तदा दीपं ज्वालयन्ति।

yadā sūryas**taṁ** bhavati tadā dīpaṁ jvālayanti.
*When [there] is sunset, then they light a lamp.* **(Mistake!)**

यदा सूर्यस्तः भवति तदा दीपं ज्वालयन्ति।

yadā sūryas**taḥ** bhavati tadā dīpaṁ jvālayanti.
*When [there] is sunset, then they light a lamp.* **(Teacher corrects!)**

यदा दुःखः भवति तदा रोदनं करोमि।

yadā duḥ**khaḥ** bhavati tadā rodanaṁ karomi.
*When [there] is distress, then I cry.* **(Mistake!)**

यदा दुःखं भवति तदा रोदनं करोमि।

yadā duḥ**khaṁ** bhavati tadā rodanaṁ karomi.
*When [there] is distress, then I cry.* **(Teacher corrects!)**

यदा सायङ्काले भवति तदा अहं क्रीडामि।

yadā sāyaṅ-kā**le** bhavati tadā ahaṁ krīḍāmi.
*When [there] is evening, then I play.* **(Mistake!)**

यदा सयङ्कालः भवति तदा अहं क्रीडामि।

yadā sayaṅkā**laḥ** bhavati tadā ahaṁ krīḍāmi.
*When [there] is evening, then I play.* **(Teacher corrects!)**

---

**SCREEN:**

| यदा तदा | **yadā tadā** | **when then** |
|---|---|---|

---

*HINDI: this is a famous verse from the Bhagavad-gita:*

---

यदा यदा हि धर्मस्य ग्लानिर् भवति भारत

अभ्युत्थानाम् अधर्मस्य तदात्मानं सृजाम्यहम्

yadā yadā hi dharmasya glānir bhavati bhārata
abhyutthānām adharmasya tadātmānaṁ sṛjāmyaham
*O scion of Bharata, wherever there is a decay of religion and an ascendency of irreligion, then I manifest Myself.*

सुभाषितम्।

**subhāṣitam.**
***Verse.***

इदानीम् एकं सुभाषितं शृण्मः ।

idānīm ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now we [will] listen to one verse.*

अपारभूमिविस्तारम्  अगण्यजनसंकुलम् ।

राष्ट्रं संघटनाहीनं  प्रभवेन्नात्मरक्षणे ।

apāra-bhūmi-vistāram   agaṇya-jana-saṅkulam
rāṣṭraṁ saṅghaṭanāhīnaṁ  prabhaven nātma-rakṣaṇe

apāra-bhūmi-vistāram – *having boundless land;* agaṇya-jana-saṅkulam – *inumerable crowd of people;* rāṣṭram – *country;* saṅghaṭanā-hīnam – *without organization;* prabhavet – *would flourish;* na – *not;* ātma-rakṣaṇe – *for self-protection.*

*Even a country with boundless land and inumerable crowd of citizens would not flourish without organization for self-protection.*

इदानीं श्रुतस्य सुभाषितस्य अर्थः एवम् अस्ति ।

idānīṁ śrutasya subhāṣitasya arthaḥ evam asti.
*Now after hearing the verse, here is it's meaning.*

एतस्मिन् सुभाषिते संघटनस्य महत्वम् उक्त्वम् अस्ति ।

etasmin subhāṣite saṅghaṭanasya mahatvam uktvam asti.
*In this vese the importance of organization is described.*

यद्यपि कस्मिंश्चिद् राष्ट्रे विशालभूमिः अस्ति, अपारा-जनसङ्ख्या अस्ति, तथापि तस्मिन् राष्ट्रे यदि सांघटनं न भवति, तर्हि तद् राष्ट्रम् आत्मरक्षणे समर्थं न भवति ।

yadyapi kasmiṁścid rāṣṭre viśāla-bhūmiḥ asti, apāra-jana-saṅkhyā asti, tathāpi tasmin rāṣṭre yadi sāṅghaṭanaṁ na bhavati, tarhi tad rāṣṭram ātmarakṣaṇe samarthaṁ na bhavati.
*Even though there is huge land in some country and there is inumerable population of people, still if there is no organization in this country, then that country has no ability for self-protection.*

एवं सांघटनस्य महत्त्वम् एतदृशं अस्ति ।

evaṁ sāṅghaṭanasya mahattvam etadṛśam asti.
*So, such is the importance of organization.*

---

**कथा**

**kathā**
***Story***

अहम् इदानीम् एकं कथां वदामि । सर्वे सावधानेन शृण्वन्तु ।

aham idānīm ekaṁ kathāṁ vadāmi. sarve sāvadhānena śṛṇvantu.
*Now I [will] tell one story. You all listen with attention.*

रामपुरे सुब्रह्मण्यशास्त्री इति कश्चन गृहस्थः आसीत् । तस्य पत्नी शान्ता ।

rāmapure subrahmaṇya-śāstrī iti kaścana gṛhasthaḥ āsīt. tasya patnī śāntā.
*In Ramapura thee lived some householder named Subrahmanya Shastri. His wife was Shanta.*

तौ द्वौ अपि सर्वदा गृहे कलहं कुरुतः स्म ।

tau dvau api sarvadā gṛhe kalahaṁ kurutaḥ sma.
*The two of them constantly quarrelled at home.*

एतेन पर्श्वगृहस्थाः सर्वे बहु कष्टम् अनुभवन्ति स्म ।

etena parśva-gṛhasthāḥ sarve bahu kaṣṭam anubhavanti sma.
*All of the nearby housholders were experiencing (perceiving) this with great difficulty.*

एकदा तं ग्रामं कश्चन योगीश्वरः आगतवान् । "सः सिद्धिं प्राप्तवान्" इति वार्ता सर्वत्र प्रसृता ।

ekadā taṁ grāmaṁ kaścana yogīśvaraḥ āgatavān. „saḥ siddhiṁ prāptavān" iti vārtā sarvatra prasṛtā.
*Once some yogic master came to the village. The news spread everywhere: "He has attained perfection.".*

तदा शान्ता तत्र गत्वा योगीश्वरं दृष्टवती । सा वदति "भोः महात्मन् ! अस्माकां गृहे सर्वदा कोलाहलः भवति । एतेन अहं बहु कष्टम् अनुभवामि । पर्श्वे सर्वे जनाः माम् उपहसन्ति । अतः एतस्य निवारणं कृपया वदतु" इति ।

tadā śāntā tatra gatvā yogīśvaraṁ dṛṣṭavatī. sā vadati: "bhoḥ mahātman! asmākāṁ gṛhe sarvadā kolāhalaḥ bhavati. etena ahaṁ bahu kaṣṭam anubhavāmi. parśve sarve janāḥ mām upahasanti. ataḥ etasya nivāraṇaṁ kṛpayā vadatu" iti.
*Then Shanta after going there saw the master of yoga. She says: "Oh, great soul! In our home there is always quarrel. Due to this I experience great difficulty. All the nearby people ridicule me, so please tell me how to stop this."*

तदा योगीश्वरः नेत्रे निमील्य किञ्चित् कालम् उपविष्टवान् । अनन्तरम् उक्तवान् "भद्रे ! चिन्तां न करोतु । एतस्य परिहारम् अहं वदामि ।"

tadā yogīśvaraḥ netre nimīlya kiñcit kālam upaviṣṭavān. anantaram uktavān: bhadre! cintāṁ na karotu. etasya parihāram ahaṁ vadāmi.
*Then the master of yoga closing his eyes sat for some time. Then he sad: "Gentle lady! Don't worry! I [will] tell you how to avoid this."*

"अहं भवत्यै दिव्यं जलं ददामि । भवती गृहं गत्वा एतद् जलं पत्युः आगमनात् पूर्वं मुखे स्थापयित्वा उपविशतु ।"

"ahaṁ bhavatyai divyaṁ jalaṁ dadāmi. bhavatī gṛhaṁ gatvā etad jalaṁ patyuḥ āgamanāt pūrvaṁ mukhe sthāpayitvā upaviśatu."
*"I [will] give you divine water. After going home put this water in your mouth before [your] husband comes and sit down."*

अनन्तरं योगीश्वरः जलं दत्तवान् ।

anantaraṁ yogīśvaraḥ jalaṁ dattavān.
*Then the master of yoga gave [her] the water.*

शान्ता गृहं गतवती पत्युः आगमनात् पूर्वं जलं मुखे स्थापयित्वा उपविष्टवती ।

śāntā gṛhaṁ gatavatī patyuḥ āgamanāt pūrvaṁ jalaṁ mukhe sthāpayitvā upaviṣṭavatī.
*Shanta went home and before [her] husband came, she put water in her mouth and sat down.*

सायंकाले सुब्रह्मण्यः सर्वाणि कार्यानि समाप्य गृहम् आगतवान् ।

sāyaṅ-kāle subrahmaṇyaḥ sarvāṇi kāryāni samāpya gṛham āgatavān.
*In the evening after finishing all the activities Subrahmanya came home.*

यदा गृहम् आगतवान् तदा शान्ता तस्मै पानीयं दत्तवती । पानीयं पीत्वा सः कोऽपि न उक्तवान् । "एतत् किं पानीयं वा ? एतत् पातुम् एव न शक्यते ।"

yadā gṛham āgatavān tadā śāntā tasmai pānīyaṁ dattavatī. pānīyaṁ pītvā saḥ ko 'pi na uktavān. "etat kiṁ pānīyaṁ vā? etat pātum eva na śakyate."
*When he came home then Shanta gave him a drink. After drinking the drink he didn't say anything. "What is this drink? This certainly can't be drank."*

अनन्तरम् सः बहिः गतवान् उपविष्टवान् । यद्यपि शान्तायाः कोपः आगतः तथापि सा मौनम् उपविष्टवती, अतः तस्याः मुखे योगीश्वरेण दत्तं दिव्यं जलम् आसीत् ।

anantaram saḥ bahiḥ gatavān upaviṣṭavān. yadyapi śāntāyāḥ kopaḥ āgataḥ tathāpi sā maunam upaviṣṭavatī. ataḥ tasyāḥ mukhe yogīśvareṇa dattaṁ divyaṁ jalam āsīt.

*Then he went out and sat down. Even though Shanta was angry, she still sat quietly, because in her mouth there was divine water given by the master of yoga.*

एवमेव कानिचन दिनानि अतीतानि । तेषां गृहे कोलहलः एव न श्रूयते स्म । एतेन पर्श्वगृहस्थाः सर्वे सन्तोषम् अनुभवन्ति स्म ।

evam eva kānicana dināni atītāni. teṣāṁ gṛhe kolahalaḥ eva na śrūyate sma. etena parśva-gṛhasthāḥ sarve santoṣam anubhavanti sma.
*In this way some days passed. In their home the quarrel hasn't been heard any more. All of the nearby householders were pleased with this.*

एकमासानन्तरं योगीश्वरेण दत्तं जलं समाप्तम् । अनन्तरं शान्ता योगीश्वरस्य समिपं गतवती उक्तवति "भोः स्वामिन् ! जलं सर्वं समाप्तम् अस्ति अतः पुनः दिव्यं जलं ददतु" इति ।

eka-māsānantaraṁ yogīśvareṇa dattaṁ jalaṁ samāptam. anantaraṁ śāntā yogīśvarasya samipaṁ gatavatī uktavati "bhoḥ svāmin! jalaṁ sarvaṁ samāptam asti ataḥ punaḥ divyaṁ jalaṁ dadatu" iti.
*One month later the water given by the master of yoga ran out. After that Shanta went to the master of yoga and said: "Oh, lord! All of the water is finished, therefore give me the divine water again."*

तदा योगीश्वरः मन्दहासपूर्वकम् उक्तवान् "भद्रे ! मया दत्तं जलं सामन्यजलं एव । भवती यदा जलं पूरयित्वा उपविशति स्म तदा किम् अपि वक्तुं न शक्नोति स्म । एतेन भवत्याः पतिः किम् अपि वक्तुं न शक्नोति स्म ।

tadā yogīśvaraḥ manda-hāsa-pūrvakam uktavān: "bhadre mayā dattaṁ jalaṁ sāmānya-jalam eva. bhavatī yadā jalaṁ pūrayitvā upaviśati sma tadā kim api vaktuṁ na śaknoti sma. etena bhavatyāḥ patiḥ kim api vaktuṁ na śaknoti sma.

*Then the master of yoga said mildly smiling at first: "Gentle lady! The water I gave you is just ordinary water. When filling [your mouth with] water you sat down, then you were not able to say anything. Due to this your husband couldn't say anything."*

"यथा एकेन हस्तेन करताडनं न भवति तथा एकेन अपि कलहं कर्तुं न शक्यते । तथा एव 'अहं श्रेष्ठः, अहं श्रेयान्' इत्यपि स्पर्धा अपि न भवति । एतेन गृहे शन्तिः भवति ।"

"yathā ekena hastena kara-tāḍanaṁ na bhavati tathā ekena api kalahaṁ kartuṁ na śakyate. tathā eva 'ahaṁ śreṣṭhaḥ, ahaṁ śreyān' ity api spardhā api na bhavati. etena gṛhe śantiḥ bhavati."
*"Just as there can't be clapping with one hand, so only one [person] can't quarrel. There is also no competition of 'I am the best, I am superior.' By this there is peace."*

योगीश्वरस्य एतद् वचनं श्रुत्वा सन्तुष्टा शान्ता गृहं प्रत्यागतवती ।

yogīśvarasya etad vacanaṁ śrutvā santuṣṭā śāntā gṛhaṁ praty āgatavatī.
*After hearing this speech of the master of yoga, Shanta came towards home.*

कथायाः अर्थः ज्ञातवन्तः किल ?

kathāyāḥ arthaḥ jñātavantaḥ kila?
*You have understood the story, haven't you?*

आम् । ज्ञातवन्तः ।

ām. jñātavantaḥ.
*Yes, we have understood.*

धन्यवादः । नमो नमः ।

dhanyavādaḥ. namo namaḥ.
*Thank you. Respects.*

नमो नमः ।

namo namaḥ.
*Respects.*

**Teacher:**

प्रेमा

Premā

**Students:**

श्रीश कुमार् उपाध्यायः जीवोत्तम शानभाग

Śrīśa Kumār Upādhyāyaḥ Jīvottama Śānabhāga

सागर एस्. अनन्त् साई सि. एम्.

Sāgara S. Anant Sāī S. M.

नित्यानंद् जि. एस्. श्रीकण्ठः अरुणः

Nityānand J. S. Śrīkaṇṭhaḥ Aruṇaḥ

भास्करी दीप्ती दीपिका मिथिला

Bhāskarī Dīptī Dīpikā Mithilā

अश्वनी एस्. अंशा शिल्पा अहल्या डि.

Aśvanī S. Aṁśā Śilpā Ahalyā Ḍ.

परिमल

Parimala

# LESSON 17 – OVERVIEW

*In lesson seventeen you will do further practice of* **yadā – tadā** *(when – then) and learn* **tana-pratyāya** *(ending* **-tana***), which alters the* **avyayas** *that express time. You will also learn two new* **avyayas** *expressing relation to the past and future with past tense and future tense verb forms. You will learn how to form past (continuous) tense with present tense verb forms +* **avyaya sma**.

## AVYAYAS

| | | |
|---|---|---|
| अद्यतन | adyatana | *today's* |
| **अद्यतन** पत्रिकाम् | **adyatana** patrikām | ***today's*** *magazine* |
| श्वस्तन | śvastana | *tomorrow's* |
| **श्वस्तन** गृहपाठम् | **śvastana** gṛhapāṭham | ***tomorrow's*** *homework* |
| ह्यस्तन | hyastana | *yesterday's* |
| **ह्यस्तन** पाठम् | **hyastana** pāṭham | ***yesterday's*** *lesson* |
| इदानीन्तन | idānīntana | *present (now's)* |
| **इदानीन्तन** काले | **idānīntana** kāle | *in the* ***present*** *time* |
| पूर्वतन | pūrvatana | *previous'* |
| **पूर्वतन** पाठः | **pūrvatana** pāṭhaḥ | ***previous*** *lesson* |
| गत | gata | *last, past* |
| **गत** मासे | **gata** māse | *(in the)* ***last, past*** *month* |
| आगामि | āgāmi | *next, upcoming, following* |
| **आगामि** सप्ताहे | **āgāmi** saptāhe | *(in the)* ***upcoming*** *week* |

## SMA – AVYAYA EXPRESSING PAST (CONTINUOUS)

| | | |
|---|---|---|
| बालिकाः गायन्ति **स्म** । | bālikāḥ gāyanti **sma.** | *Girls* ***were*** *singing.* |

# Lesson 17

*HINDI: In the previous lesson we learned the use of* **tritīyā-vibhakti**, *and of* **avyayas "yadā – tadā"**. *In this lesson we will do further practice of* **"yadā – tadā"** *and practice of the ending* **-tana**.

नमो नमः।

namo namaḥ.
*Salutations.*

संस्कृतभाषाशिक्षणे सर्वेषां स्वागतम्।

saṁskṛta-bhāṣā-śikṣaṇe sarveṣām svāgatam.
*Welcome to all to the study of Sanskrit language.*

पूर्वतनपाठे वयं "यदा – तदा" इत्यस्मिन् विषये अभ्यासं कृतवन्तः। इदानीं पुनः किञ्चिद् अभ्यासं कुर्मः।

pūrvatana-pāṭhe vayaṁ "yadā – tadā" ity asmin viṣaye abhyāsaṁ kṛtavantaḥ. idānīṁ punaḥ kiñcid abhyāsaṁ kurmaḥ.
*In the previous lession we did practice on the subject of "when – then". Now we do some practice again.*

यदा – तदा।

yadā – tadā.
*When – then.*

यदा सूर्योदयः भवति तदा कमलं विकसति।

yadā sūryodayaḥ bhavati tadā kamalaṁ vikasati.
*When [there] is sunrise, then lotus blossoms.*

यदा अहम् अमेरिकदेशं गतवती तदा नयागर्जनपाथं??? दृष्टवती।

yadā aham amerikadeśaṁ gatavatī tadā nayāgarjana-pāthaṁ??? dṛṣṭavatī.
*When I (fem.) went to Amerika, then I saw ???.*

यदा अहं छात्रा आसं तदा संस्कृतं पठितवती।

yadā ahaṁ chātrā āsaṁ tadā saṁskṛtaṁ paṭhitavatī.
*When I was a student, then I studied Sanskrit.*

अह वाक्यं वदामि, भवन्तः "यदा – तदा" इति योजयित्वा वदन्तु।

ahaṁ vākyaṁ vadāmi, bhavantaḥ "yadā – tadā" iti yojayitvā vadantu.
*I say a sentence, you (pl.) say using "when, then"!*

मेघाः भवन्ति, मयूराः नृत्यं कुर्वन्ति।

meghāḥ bhavanti, mayūrāḥ nṛtyaṁ kurvanti.
*[There] are clouds, peacocks dance.*

यदा मेघाः भवन्ति तदा मयूराः नृत्यं कुर्वन्ति।

yadā meghāḥ bhavanti tadā mayūrāḥ nṛtyaṁ kurvanti.
*When [there] are clouds, then peacocks dance.*

कोलाहलः भवति, आरक्षकाः आगच्छन्ति।

kolāhalaḥ bhavati, ārakṣakāḥ āgacchanti.
*[There] is disorder, policemen come.*

यदा कोलाहलः भवति तदा आरक्षकाः आगच्छन्ति।

yadā kolāhalaḥ bhavati tadā ārakṣakāḥ āgacchanti.
*When [there] is disorder, then policemen come.*

आरक्षकः आगच्छति, चोरः धावति।

ārakṣakaḥ āgacchati, coraḥ dhāvati.
*Policeman comes, thief runs.*

यदा आरक्षकः आगच्छति तदा चोरः धावति।

yadā ārakṣakaḥ āgacchati tadā coraḥ dhāvati.
*When the policeman comes, then the thief runs.*

वसन्तकालः भवति, कोकिलः गायति।

vasanta-kālaḥ bhavati, kokilaḥ gāyati.
*[It] is spring time, cuckoo bird sings.*

यदा वसन्तकालः भवति तदा कोकिलः गायति ।

yadā vasanta-kālaḥ bhavati tadā kokilaḥ gāyati.
*When [it] is spring time, then cuckoo bird sings.*

सूर्योदयः भवति, अन्धकारः नश्यति ।

sūryodayaḥ bhavati, andhakāraḥ naśyati.
*[There] is sunrise, darknes disappears.*

यदा सूर्योदयः भवति तदा अन्धकारः नश्यति ।

yadā sūryodayaḥ bhavati tadā andhakāraḥ naśyati.
*When [there] is sunrise, then darkness disappears.*

परीक्षा भवति, छात्रः मन्दिरं गच्छति ।

parīkṣā bhavati, chātraḥ mandiraṁ gacchati.
*[There] is exam, student goes to the temple.*

यदा परीक्षा भवति तदा छात्रः मन्दिरं गच्छति ।

yadā parīkṣā bhavati tadā chātraḥ mandiraṁ gacchati.
*When [there] is exam, then the student goes to the temple.*

जन्मदिनम् अस्ति, नूतनवस्त्रं धरति ।

janmadinam asti, nūtana-vastraṁ dharati.
*[There] is birthday, [he, she] wears new dress.*

यदा जन्मदिनम् अस्ति तदा नूतनवस्त्रं धरति ।

yadā janmadinam asti tadā nūtanavastraṁ dharati.
*When [there] is birthday, then [he, she] wears new dress.*

विद्युत् गच्छति तैलदीपं ज्वालयति ।

vidyut gacchati tailadīpaṁ jvālayati.
*Electrcity goes [off], [he, she] lights the oil lamp.*

यदा विद्युत् गच्छति तदा तैलदीपं ज्वालयति ।

yadā vidyut gacchati tadā tailadīpaṁ jvālayati.
*When electricity goes [off], then [he] lights the oil lamp.*

अतिथिः आगच्छति, माता मधुरं करोति ।

atithiḥ āgacchati, mātā madhuraṁ karoti.
*Guest comes, mother makes sweet.*

यदा अतिथिः आगच्छति तदा माता मधुरं करोति ।

yadā atithiḥ āgacchati tadā mātā madhuraṁ karoti.
*When a guest comes, then mother makes a sweet.*

शुनकः भषति, चोरः धावति ।

śunakaḥ bhaṣati, coraḥ dhāvati.
*Dog barks, thief runs.*

यदा शुनकः भषति तदा चोरः धावति ।

yadā śunakaḥ bhaṣati tadā coraḥ dhāvati.
*When the dog barks, then the thief runs.*

---

इदानीं 'यदा - तदा" इति उपयुज्य वाक्यानि वदन्ति वा ? भवती वदति वा ?

idānīṁ "yadā – tadā" iti upayujya vākyāni vadanti vā? bhavatī vadati vā?
*Now would you (pl.) say sentences using "when, then"? Would you (fem.) say?*

यदा प्रतःकालः भवति तदा अहं पूजां करोमि ।

yadā prataḥ-kālaḥ bhavati tadā ahaṁ pūjāṁ karomi.
*When [it] is morning time, then I do puja.*

अन्यः कः वदति । भवती वदति वा ?

anyaḥ kaḥ vadati? bhavatī vadati vā?
*Who else would say? Would you (fem.) say?*

यदा शिरोवेदना भवति तदा अहं शयनं करोमि ।

yadā śirovedanā bhavati tadā ahaṁ śayanaṁ karomi.
*When [there] is headache, then I sleep.*

यदा विरामः अस्ति अहं सखीगृहं गच्छामि ।

yadā virāmaḥ asti ahaṁ sakhī-gṛhaṁ gacchāmi.
*When [there] is holiday, then I go to [my] friend's house.*

यदा उत्सवः भवति तदा अहं मधुरं खादामि ।

yadā utsavaḥ bhavati tadā ahaṁ madhuraṁ khādāmi.
*When [there] is celebration, then I eat sweet.*

यदा अहं शालां गच्छामि तदा पाठं पठामि ।

yadā ahaṁ śālāṁ gacchāmi tadā pāṭhaṁ paṭhāmi.
*When I go to the school, then I study a lesson.*

---

अद्य कः वासरः ?

adya kaḥ vāsaraḥ.
*What day is today?*

अद्य सोमवासरः ।

adya somavāsaraḥ.
*Today is Monday.*

एषा अद्यतन पत्रिका । अद्यतन पत्रिकं पठितवती वा ?

eṣā adyatana patrikā. adyatana patrikaṁ paṭhitavatī vā?
*This is today's magazine. Did you (fem.) read today's magazine?*

आम् । पठितवती ।

ām. paṭhitavatī.
*Yes. I read (fem.) [it].*

अद्यतन पत्रिकायां कः विशेषः अस्ति ?

adyatana patrikāyāṁ kaḥ viśeṣaḥ asti?
*What are the news in today's magazine?*

प्रधानमन्त्री विदेशं गतवान् ।

pradhāna-mantrī videśaṁ gatavān.
*The prime minister went abroad.*

अद्यतन गृहपाठं लिखितवान् वा ?

adyatana gṛhapāṭhaṁ likhitavān vā?
*Did you write today's homework?*

आम् । लिखितवान् ।

ām. likhitavān.
*Yes. I wrote [it].*

अद्य - अद्यतन ।

adya – adyatana.
*Today – today's.*

अद्यतन बालकाः श्वस्तन पौराः ।

adyatana bālakāḥ śvastana paurāḥ.
*Today's boys are tomorrow's citizens.*

श्वस्तन कार्यम् अद्य एव चिन्तयतु ।

śvastana kāryam adya eva cintayatu.
*Think about tomorrow's work already today!*

श्वस्तन गृहपाठम् अद्य एव लिखतु ।

śvastana gṛhapāṭham adya eva likhatu!
*Write tomorrow's homework already today!*

अद्य - अद्यतन ।

adya – adyatana.
*Today – today's.*

श्वः - श्वस्तन । श्वस्तन कार्यम् । श्वस्तन गृहपाठः ।

śvaḥ – śvastana. śvastana kāryam. śvastana gṛhapāṭhaḥ.
*Tomorrow – tomorrow's. Tomorow's work.*
*Tomorrow's homework.*

ह्यस्तन पत्रिकायां संस्कृतकथा आसीत् । ह्यस्तन पत्रिकां पठितवान् वा ?

hyastana patrikāyāṁ saṁskṛta-kathā āsīt.
hyastana patrikāṁ paṭhitavān vā?
*In the yesterday's magazine there was a Sanskrit story.*
*Did you read yesterday's magazine?*

आम् । पठितवान् ।

ām. paṭhitavān.
*Yes. I read [it].*

ह्यस्तन - ह्यः । ह्यस्तन ।

hyastana – hyaḥ. hyastana.
*Yesterday's – yesterday. Yesterday's.*

अद्य - अद्यतन ।

adya – adyatana.
*Today – today's.*

ह्यस्तन गृहपाठं लिखितवती वा ?

hyastana gṛhapāṭhaṁ likhitavatī vā?
*Did you write (fem.) yesterday's homework?*

आम्। लिखितवती।

ām. likhitavatī.
*Yes. I wrote (fem.) [it].*

ह्यस्तन।

hyastana.
*Yesterday's.*

वदन्तु। अद्यतन। श्वस्तन। ह्यस्तन।

vadantu. adyatana. śvastana. hyastana.
*Say (pl.)! Today's. Tomorrow's. Yesterday's.*

---

*HINDI: "Today's, tomorrow's, yesterday's" is the meaning of* **"adyatana śvastana** *and* **hyastana"**. *They are formed by adding* **-tana** *to the words you already know:* **adya, śvaḥ** *and* **hyaḥ.**

---

इदानीं "ह्यस्तन, अद्यतन, श्वस्तन" इति उपयुज्य वाक्यानि वदन्ति वा ? भवती वदतु।

idānīṁ "hyastana, adyatana, śvastana" iti upayujya vākyāni vadanti vā? bhavatī vadatu!
*Now you (pl.) say sentences using "yesterday's, today's, tomorrow's"? You (fem.) say!*

अद्यतन अल्पाहारे मिष्टान्नम् आसीत्।

adyatana alpāhāre miṣṭānnam āsīt.
*For today's breakfast [there] was a sweet dish.*

भवती वदतु।

bhavatī vadatu!
*You (fem.) say!*

पत्रिकायां ह्यस्तन कथाम् अहं न पठितवती।

patrikāyāṁ hyastana kathām ahaṁ na paṭhitavatī.
*I haven't read (fem.) yesterday's story in the magazine.*

ह्यस्तन पाठम् अहं न पठितवती।

hyastana pāṭham ahaṁ na paṭhitavatī.
*I haven't studied (fem.) yesterday's lesson.*

ह्यस्तन पाठः उत्तमः आसीत्।

hyastana pāṭhaḥ uttamaḥ āsīt.
*Yesterday's lesson was great.*

अहम् अद्यतन पत्रिकां पठितवान्।

aham adyatana patrikāṁ paṭhitavān.
*I read today's magazine.*

भारतदेशस्य पूर्वतन नाम अर्यवर्तः।

bhārata-deśasya pūrvatana nāma aryavartaḥ.
*India's previous name was Aryavarta.*

लल् बहदूर् शास्त्री भरतस्य पूर्वतन प्रधनमन्त्री।

lal-bahadūr-śastrī bharatasya pūrvatana pradhana-mantrī.
*Lal Bahadur Shastri was India's previous prime minister.*

विवेकानन्दस्य पूर्वतन नाम नरेन्द्रः।

vivekānandasya pūrvatana nāma narendraḥ.
*Vivekananda's previous name was Narendra.*

भवान् वदतु।

bhavān vadatu!
*You say!*

गौतम बुद्धस्य पूर्वतन नाम सिद्धर्तः।

gautama buddhasya pūrvatana nāma siddhartaḥ.
*Gautama Buddha's previous name was Siddharta.*

मुम्बैनगरस्य पूर्वतन नाम बोम्बै।

mumbai-nagarasya pūrvatana nāma bombai.
*Mumbai's previous name [was] Bombay.*

चेन्नैनगरस्य पूर्वतन नाम मद्रस्।

cennai-nagarasya pūrvatana nāma madras.
*Chennai's previous name [was] Madras.*

इदानीन्तन बालाः बहु चतुराः भवन्ति ।

idānīntana bālāḥ bahu caturāḥ bhavanti.
*Present boys are very smart.*

इदानीन्तन युवकाः परिश्रमं न कुर्वन्ति ।

idānīntana yuvakāḥ pariśramaṁ na kurvanti.
*Present youth does not endeavor hard.*

इदानीन्तन महिलाः सर्वक्षेत्रेषु कार्यं कुर्वन्ति ।

idānīntana mahilāḥ sarva-kṣetreṣu kāryaṁ kurvanti.
*Present women work in all fields.*

इदानीम् "इदानीन्तन" इति उपयुज्य वाक्यानि वदन्ति वा ?

idānīm "idānīntana" iti upayujya vākyāni vadanti vā?
*Now will you (pl.) say sentences using "present"?*

इदानीन्तन काले राजशासनं नास्ति ।

idānīntana kāle rājaśāsanaṁ nāsti.
*In the present time [there] is no kingdom.*

इदानीन्तन काले शिक्षणार्थं बहु व्ययीकुर्वन्ति ।

idānīntana kāle śikṣaṇārthaṁ bahu vyayīkurvanti.
*In the present era [they] spend a lot for education.*

इदानीन्तन कार्यालये सङ्गणकानि भवन्ति ।

idānīntana kāryālaye saṅgaṇakāni bhavanti.
*In the present office [there] are computers.*

इदानीन्तन काले आरण्यनाशः अधिकः भवति ।

idānīntana kāle āraṇyanāśaḥ adhikaḥ bhavati.
*In the present time [there] is a lot of deforrestation.*

इदानीन्तन काले जनाः गोपालनम् अधिकं न कुर्वन्ति ।

idānīntana kāle janāḥ gopālanam adhikaṁ na kurvanti.
*In the present time people do not do a lot of cow herding.*

पूर्वतन । इदानीन्तन ।

pūrvatana. idānīntana.
*Previous. Present.*

पूर्वतन काले पत्रिकाः न आसन् ।

pūrvatana kāle patrikāḥ na āsan.
*In the previous time [there] were no magazines.*

इदानीन्तन काले सर्वत्र पत्रिकाः सन्ति ।

idānīntana kāle sarvatra patrikāḥ santi.
*In the present era magazines are everywhere.*

पूर्वतन । इदानीन्तन ।

pūrvatana. idānīntana.
*Previous. Present.*

पूर्वतन काले यन्त्रस्य उपयोगः अधिकः न आसीत् ।

pūrvatana kāle yantrasya upayogaḥ adhikaḥ na āsīt.
*In the previous time [there] was not much use of mechanical device.*

इदानीन्तन काले सर्वे यन्त्रस्य उपयोगं कुर्वन्ति ।

idānīntana kāle sarve yantrasya upayogaṁ kurvanti.
*In the present time everybody uses mechanical device.*

इदानीं "पूर्वतन, इदानीन्तन" इति उपयुज्य वाक्यानि वदन्तु । भवन्तः वदन्ति वा ?

idānīṁ "pūrvatana, idānīntana" iti upayujya vākyāni vadantu! bhavantaḥ vadanti vā?
*Now you (pl.) say sentences using "previous, present"! Will you (pl.) say?*

पूर्वतन काले शुद्धवायुः आसीत् ।

pūrvatana kāle śuddha-vāyuḥ āsīt.
*In the previous time the air was clean.*

इदानीन्तन काले संस्कृतशिक्षणपठति??? उत्तमा अस्ति ।

idānīntana kāle saṁskṛta-śikṣaṇa-**paṭhati**??? uttamā asti.
*In the present times Sanskrit lessons are very good.*

पूर्वतन काले राजशासनम् आसीत् ।

pūrvatana kāle rājaśāsanam āsīt.
*In the previous times [there] was kingdom.*

इदानीन्तन काले आधुनिकशिक्षणम् अस्ति ।

idānīntana kāle ādhunika-śikṣaṇam asti.
*In the present time [there] is modern teaching.*

पूर्वतन काले संस्कृतस्य उपयोगः अधिकः आसीत् ।

pūrvatana kāle saṁskṛtasya upayogaḥ adhikaḥ āsīt.
*In the previous era [there] was much use of Sanskrit.*

---

अद्य अहम् अत्र अस्मि ।

adya aham atra asmi.
*Today I am here.*

गत दिने अहं मैसूरुनगरे आसम् ।

gata dine ahaṁ maisūru-nagare āsam.
*Last day I was in Mysore.*

गत सप्ताहे मम परीक्षा आसीत् ।

gata saptāhe mama parīkṣā āsīt.
*Last week I had exam.*

गत मासे मम सख्याः विवाहः आसीत् ।

gata māse mama sakhyāḥ vivāhaḥ āsīt.
*Last month was my friend's (fem.) wedding.*

गत वर्षे मम सहोदरः विदेशं गतवान् ।

gata varṣe mama sahodaraḥ videśaṁ gatavān.
*Last year my brother went abroad.*

गत वर्षे । गत मासे । गत सप्ताहे । गत दिने । "गत" इति उपयुज्य वाक्यानि वदन्ति वा ? भवान् वदति ।

gata varṣe. gata māse. gata saptāhe. gata dine. "gata" iti upayujya vākyāni vadanti vā? bhavān vadati?
*Last year. Last month. Last week. Last day. Would you say (pl.) sentences using "previous (last)"? [Will] you say?*

गत दिने अहं चलनचित्रं दृष्टवान् ।

gata dine ahaṁ calana-citraṁ dṛṣṭavān.
*Last day I saw a movie.*

गत सप्ताहे मम गृहे पूजा आसीत् ।

gata saptāhe mama gṛhe pūjā āsīt.
*Last week [there] was puja in my house.*

गत वर्षे वर्ल्ड्-कप् आसीत् ।

gata varṣe "varld-kap" āsīt.
*Last year [there] was worlcup.*

गत सप्ताहे यक्षगनम् आसीत् ।

gata saptāhe yakṣaganam āsīt.
*Last week [there] was yakshagana (classical folk art from Karnataka, a kind of opera).*

हिद्रबद्-नगरम् ।

hidrabad-nagaram.
*Hyderabad city.*

गत मासे मम विद्यालये स्पर्धा आसीत् ।

gata māse mama vidyālaye spardhā āsīt.
*Last month [there] was competition in my school.*

गत दिने मम ज्वरः आसीत् ।

gata dine mama jvaraḥ āsīt.
*Last day I had fever.*

गत सप्ताहे अहं देवालयं गतवती ।

gata saptāhe ahaṁ devālayaṁ gatavatī.
*Last week I went to the temple.*

गत सप्ताहे मम विद्यालये परीक्षा आसीत् ।

gata saptāhe mama vidyālaye parīkṣā āsīt.
*Last week [there] was exam in my school.*

गत दिने अहं ग्रन्थालयं गतवती ।

gata dine ahaṁ granthālayaṁ gatavatī.
*Last day I went to the library.*

गत सप्ताहे मम माता स्वस्था आसीत् ।

gata saptāhe mama mātā svasthā āsīt.
*Previous week my mother was healed.*

*HINDI: To express previous (last) day, week, month, year etc. the word* **gata** *is used:* **gata saptāhaḥ, gata māsaḥ, gata varṣam.**

गत सप्ताहे मम सख्याः जन्मदिनम् आसीत्।

gata saptāhe mama sakhyāḥ janma-dinam āsīt.
*Last week was my friend's birthday.*

आगामि सप्ताहे मम जन्मदिनं भविष्यति।

āgāmi saptāhe mama janma-dinaṁ bhaviṣyati.
*Next week will be my birthday.*

आगामि मासे दीपवलि भविष्यति।

āgāmi māse dīpavali bhaviṣyati.
*Next month will be Dipavali (one of the few New Year's celebrations).*

आगामि वर्षे नागेशः चन्द्रलोकं गमिष्यति।

āgāmi varṣe nāgeśaḥ candralokaṁ gamiṣyati.
*Next year Nagesha will go to the the moon planet.*

आगामि वर्षे। आगामि सप्ताहे। आगामि मासे।

āgāmi varṣe. āgāmi saptāhe. āgāmi māse.
*Next year. next week. Next month.*

आगामि।

āgāmi.
*Next, upcoming.*

अहं शब्दद्वयं वदामि, उपयुज्य … "आगामि" योजयित्वा वाक्यं वदन्तु।

ahaṁ śabda-dvayaṁ vadāmi, upayujya … "āgāmi" yojayitvā vākyaṁ vadantu.
*I say two words, you (pl.) say a sentence using "next".*

आगामि सप्ताहः, दुर्गापूजा।

āgāmi saptāhaḥ, durgāpūjā.
*Next week, Durgapuja.*

आगामि सप्ताहे दुर्गापूजा भविष्यति।

āgāmi saptāhe durgāpūjā bhaviṣyati.
*Next week will be Durgapuja.*

आगामि मासः, परीक्षा।

āgāmi māsaḥ, parīkṣā.
*Next month, exam.*

आगामि मासे परीक्षा भविष्यति।

āgāmi māse parīkṣā bhaviṣyati.
*Next month [there] will be exam.*

वर्षं, निर्वाचनम्।

varṣaṁ, nirvācanam.
*Year, election.*

आगामि वर्षे निर्वाचनं भविष्यति।

āgāmi varṣe nirvācanaṁ bhaviṣyati.
*Next year [there] will be election.*

मासः, गृहे विवाहः।

māsaḥ, gṛhe vivāhaḥ.
*Month, in the house, wedding.*

आगामि मासे गृहे विवाहः भविष्यति।

āgāmi māse gṛhe vivāhaḥ bhaviṣyati.
*Next month [there] will be wedding in the house.*

सप्ताहः, महती वृष्टिः।

saptāhaḥ, mahatī vṛṣṭiḥ.
*Week, great rain.*

आगामि सप्ताहे महती वृष्टिः भविष्यति।

āgāmi saptāhe mahatī vṛṣṭiḥ bhaviṣyati.
*Next week [there] will be great rain.*

मासः, वृष्टिः न भवति।

māsaḥ, vṛṣṭiḥ na bhavati.
*Month, doesn't rain.*

आगामि मासे वृष्टिः न भविष्यति ।

āgāmi māse vṛṣṭiḥ na bhaviṣyati.
*Next month [there] will be no rain.*

इदानीम् "आगामि" इति शब्दस्य उपयोगं कृत्वा वाक्यानि वक्तव्यानि । वदन्ति वा ?

idānīm "āgāmi" iti śabdasya upayogaṁ kṛtvā vākyāni vaktavyāni. vadanti vā?
*Now you should say sentences using the word "upcoming". Would you say?*

आम् । वदामः ।

ām. vadāmaḥ.
*Yes. We [will] say.*

के वदन्ति ? के के वदन्ति ? ओ ! सर्वे सिद्धाः । भवती वदतु ।

ke vadanti? ke ke vadanti? o! sarve siddhāḥ. bhavatī vadatu!
*Who [will] say (pl.)? Who [among you will] say? Oh! Everybody [is] ready. You (fem.) say!*

आगामि मासे मम विद्यालये उत्सवः भविष्यति ।

āgāmi māse mama vidyālaye utsavaḥ bhaviṣyati.
*Next month [there] will be a festival in my school.*

आगामि मासे मम जन्मदिनं भविष्यति ।

āgāmi māse mama janmadinaṁ bhaviṣyati.
*Next month [there] will be my birthday.*

आगामि वर्षे निर्वाचनं भविष्यति ।

āgāmi varṣe nirvācanaṁ bhaviṣyati.
*Next year [there] will be election.*

आगामि जन्मनि अहं संस्कृतपण्डिता भविष्यामि ।

āgāmi janmani ahaṁ saṁskṛta-paṇḍitā bhaviṣyāmi.
*In next life I will be a Sanskrit scholar (fem.).*

अस्मिन् जन्मनि अपि भविष्यति ।

asmin janmani api bhaviṣyati.
*You will be even in this life.*

आगामि सप्ताहे अहं प्रवासार्थं विदेशं गमिष्यामि ।

āgāmi saptāhe ahaṁ pravāsārthaṁ videśaṁ gamiṣyāmi.
*Next week I go abroad for the sake of traveling.*

आगामि मासे मम सख्याः जन्मदिनम् अस्ति ।

āgāmi māse mama sakhyāḥ janmadinam asti.
*My friend (fem.) has birthday next month.*

आगामि मासे मम भ्राता विदेशं गमिष्यति ।

āgāmi māse mama bhrātā videśaṁ gamiṣyati.
*Next month my brother will go abroad.*

आगामि मासे मम परीक्षा भविष्यति ।

āgāmi māse mama parīkṣā bhaviṣyati.
*I will have exam next month.*

आगामि मासे मम गृहे कार्यक्रमः भविष्यति ।

āgāmi māse mama gṛhe kāryakramaḥ bhaviṣyati.
*Next month [there] will be a program in my house.*

आगामि जन्मम् अस्ति वा अहं न जनामि ।

āgāmi janmam asti vā ahaṁ na janāmi.
*I don't know whether there is next life.*

आगामि सप्ताहे मम गृहे पूजा भविष्यति ।

āgāmi saptāhe mama gṛhe pūjā bhaviṣyati.
*In the next week [there] will be puja in my house.*

---

*HINDI: For the upcoming day, week, month, year, the word* **āgāmi** *is used. Per example:* **āgāmi saptāhaḥ, āgāmi māsaḥ, āgāmi varṣam.**

---

अद्य अहं मन्दिरं गतवती। तत्र पूजा प्रचलति स्म।

अनन्तरम् उद्यानं गतवती। तत्र बालकाः क्रीडन्ति स्म।

adya ahaṁ mandiraṁ gatavatī. tatra pūjā pracalati sma. anantaram udyānaṁ gatavatī. tatra bālakāḥ krīḍanti sma.
*Today I went (fem.) to the temple. Puja was going on there. After I went to the park. Boys were playing there.*

बालिकाः गायन्ति स्म।

bālikāḥ gāyanti sma.
*Girls were singing.*

ज्येष्ठाः सम्भाषणं कुर्वन्ति स्म।

jyeṣṭhāḥ sambhāṣaṇaṁ kurvanti sma.
*Elders were talking.*

एकः युवकः लिखति स्म।

ekaḥ yuvakaḥ likhati sma.
*One youth was writing.*

केचन पठन्ति स्म।

kecana paṭhanti sma.
*Some were reading.*

गच्छति। गच्छति स्म।

gacchati. gacchati sma.
*Goes. Was going.*

पठति। पठति स्म।

paṭhati. paṭhati sma.
*Reads. Was reading.*

लिखति। लिखति स्म।

likhati. likhati sma.
*Writes. Was writing.*

खादति। खादति स्म।

khādati. khādati sma.
*Eats. Was eating.*

उत्तिष्ठति। उत्तिष्ठति स्म।

uttiṣṭhati. uttiṣṭhati sma.
*Stands up. Was standing up.*

उपविशति। उपविशति स्म।

upaviśati. upaviśati sma.
*Sits down. Was sitting down.*

हसति। हसति स्म।

hasati. hasati sma.
*Smiles. Was smiling.*

गच्छति। गच्छति स्म।

gacchati. gacchati sma.
*Goes. Was going.*

करोमि। करोमि स्म।

karomi. karomi sma.
*I do. I do. I was doing.*

पठामि। पठामि स्म।

paṭhāmi. paṭhāmi sma.
*I read. I was reading.*

अहम् अद्य पठामि स्म तदा विद्युत् गता।

aham adya paṭhāmi sma tadā vidyut gatā.
*Today I was reading [and] then electricity went [off].*

अहं पठामि स्म विद्युत् गता।

ahaṁ paṭhāmi sma vidyut gatā.
*I was reading [and] electricity went out.*

अहं मार्गे गच्छामि स्म एक-सर्पं दृष्टवती।

ahaṁ mārge gacchāmi sma eka-sarpaṁ dṛṣṭavatī.
*I was walking on the street [and] I saw one snake.*

गच्छामि स्म। पठामि स्म।

gacchāmi sma. paṭhāmi sma.
*I was going. I was reading.*

लिखामि । लिखामि स्म ।

likhāmi. likhāmi sma.
*I write. I was writing.*

वदामि । वदामि स्म ।

vadāmi. vadāmi sma.
*I say. I was saying.*

हसामि । हसामि स्म ।

hasāmi. hasāmi sma.
*I smile. I was smiling.*

गच्छति । गच्छति स्म ।

gacchati. gacchati sma.
*Goes. Was going.*

"गच्छति" इति वर्तमानकालस्य क्रियापदम् अस्ति ।

"gacchati" iti vartamāna-kālasya kriyāpadam asti.
*"Goes" is present tense verb.*

अत्र "स्म" इति शब्दस्य योजनेन भूतकालस्य अर्थः भवति ।

atra "sma" iti śabdasya yojanena bhūta-kālasya arthaḥ bhavati.
*Be using the word "sma" here the meaning becomes past tense.*

गच्छति । गच्छति स्म ।

gacchati. gacchati sma.
*Goes. Was going.*

पालयति । पालयति स्म ।

pālayati. pālayati sma.
*Protects. Was protecting.*

रामः राज्यं सम्यक् पालयति स्म ।

rāmaḥ rājyaṁ samyak pālayati sma.
*Rama was protecting kingdom well.*

अनुश्री बाल्ये बहु रोदनं करोति स्म ।

anuśrī bālye bahu rodanaṁ karoti sma.
*Anushri was crying a lot in childhood.*

नागेशः बाल्ये बहु क्रीडति स्म ।

nāgeśaḥ bālye bahu krīḍati sma.
*Nagesha was playing a lot in childhood.*

तालसेनः सम्यग् गायति स्म ।

tālasenaḥ samyag gāyati sma.
*Talesena was singing well.*

गायति स्म । पठति स्म । लिखति स्म ।

gāyati sma. paṭhati sma. likhati sma.
*Was singing. Was reading. Was writing.*

"स्म" इति शब्दस्य योजनेन भूतकालस्य अर्थः भवति ।

"sma" iti śabdasya yojanena bhūta-kālasya arthaḥ bhavati.
Using the word "sma" the meaning changes to past tense.

करोमि स्म । लिखामि स्म । गच्छन्ति स्म । सर्वम् ।

karomi sma. likhāmi sma. gacchanti sma. sarvam.
*I was doing. I was writing. They were going. All.*

अहम् इदानीं वाक्यं वदामि, तत्र "स्म" इति योजयित्व पुनः तद् वाक्यं वदन्तु ।

aham idānīṁ vākyaṁ vadāmi, tatra "sma" iti yojayitva punaḥ tad vākyaṁ vadantu.
*Now I [will] say a sentence, you apply "sma" there and say that sentence again.*

भोजः धारनगरं पालयति ।

bhojaḥ dhāra-nagaraṁ pālayati.
*Bhoja protects the city of Dhara.*

भोजः धारनगरं पालयति स्म ।

bhojaḥ dhāra-nagaraṁ pālayati sma.
*Bhoja was protecting the city of Dhara.*

ब्रितिश्जनाः भरते शासनं कुर्वन्ति।

britiś-janāḥ bharate śāsanaṁ kurvanti.
*British people rule in India.*

ब्रितिश्जनाः भरते शासनं कुर्वन्ति स्म।

britiś-janāḥ bharate śāsanaṁ kurvanti sma.
*British people were ruling in India.*

हरिश्चन्द्रः सर्वदा सत्यं वदति।

hariścandraḥ sarvadā satyaṁ vadati.
*Harishchandra always speaks truth.*

हरिश्चन्द्रः सर्वदा सत्यं वदति स्म।

hariścandraḥ sarvadā satyaṁ vadati sma.
*Harishchandra was always speaking truth.*

माता उपदेशं करोति।

mātā upadeśaṁ karoti.
*Mother advises.*

माता उपदेशं करोति स्म।

mātā upadeśaṁ karoti sma.
*Mother was advising.*

पिता पूजां करोति।

pitā pūjāṁ karoti.
*Father does puja.*

पिता पूजां करोति स्म।

pitā pūjāṁ karoti sma.
*Father was doing puja.*

बाल्ये वयं क्रीडामः।

bālye vayaṁ krīḍāmaḥ.
*We play in childhood.*

बाल्ये वयं क्रीडामः स्म।

bālye vayaṁ krīḍāmaḥ sma.
*We were playing in childhood.*

सैनिकाः युद्धं कुर्वन्ति।

sainikāḥ yuddhaṁ kurvanti.
*Soldiers fight.*

सैनिकाः युद्धं कुर्वन्ति स्म।

sainikāḥ yuddhaṁ kurvanti sma.
*Soldiers were fighting.*

वयं सर्वदा क्रीडामः।

vayaṁ sarvadā krīḍāmaḥ.
*We always play.*

वयं सर्वदा क्रीडामः स्म।

vayaṁ sarvadā krīḍāmaḥ sma.
*We were always playing.*

वयं सर्वदा निद्रां कुर्मः।

vayaṁ sarvadā nidrāṁ kurmaḥ.
*We always sleep.*

वयं सर्वदा निद्रां कुर्मः स्म।

vayaṁ sarvadā nidrāṁ kurmaḥ sma.
*We were always sleeping.*

---

*HINDI: If after the forms of* **kriyāpada** *(verb) in* **laṭ-lakara** *(present tense) the word* **sma** *is added, the verb gets the meaning of past tense.*

---

## सुभाषितम्।

**subhāṣitam.**
***Verse.***

दानेन पाणिः न तु कङ्कणेन

स्नानेन शुद्धिः न तु चन्दनेन।

मानेन तृप्तिः न तु भोजनेन

ज्ञानेन मुक्तिः न तु मुण्डनेन॥

dānena pāṇiḥ na tu kaṅkaṇena
snānena śuddhiḥ na tu candanena
mānena tṛptiḥ na tu bhojanena
jñānena muktiḥ na tu muṇḍanena

dānena – *by giving, donating;* pāṇiḥ – *hand;* na – *not;* tu – *but;* kaṅkaṇena – *with bracelet;* snānena – *by bathing;* śuddhiḥ – *cleanliness;* na – *not;* tu – *but;* candanena – *by sandalwood balm;* mānena – *with measure;* tṛptiḥ – *satisfaction;* na – *not;* tu – *but;* bhojanena – *with meal;* jñānena – *by knowledge;* muktiḥ – *liberation;* na – *not;* tu – *but;* muṇḍanena – *by being boldheaded.*

*Hand is decorated by giving, not by a bracelet. Body is cleansed by bathing, not by applying sandalwood paste. Measure brings satisfaction, not the meal alone. To attain liberation knowledge is necessary, it is not enough to just have a bold head.*

अस्माभिः श्रुतस्य सुभाषितस्य अर्थः एवम् अस्ति।

asmābhiḥ śrutasya subhāṣitasya arthaḥ evam asti.
*Here is the meaning of the story we heard.*

पाणिः। पाणिः हस्तः। पाणिः दानेन शोभते कङ्कणेन न। केवलं कङ्कणेन पाणिः न शोभते। दानेन शोभते।

pāṇiḥ. pāṇiḥ hastaḥ. pāṇiḥ dānena śobhate kaṅkaṇena na. kevalaṁ kaṅkaṇena pāṇiḥ na śobhate. dānena śobhate.
*Hand. Hand, hand. The hand is decorated by giving, not by a bracelet. Only by bracelet the hand is not decorated. [It is] decorated by giving.*

शरीरस्य शुद्धिः चन्दनलेपनेन केवलं न भवति, अपि तु स्नानेन भवति।

śarīrasya śuddhiḥ candana-lepanena kevalaṁ na bhavati, api tu snānena bhavati.
*Body's cleanliness is not attained only with sandalwood ointment, it also comes with bathing.*

केवलं भोजनकरणेन तृप्तिः न भवति। मानेन अभिमानेन??? तृप्तिः भवति।

kevalaṁ bhojana-karaṇena tṛptiḥ na bhavati. mānena, abhimānena??? tṛptiḥ bhavati.
*Contentment doesn't come with food alone. It comes with measure, good measure???.*

मुण्डनेन मुक्तिः न प्राप्यते। केवलं मुण्डनेन मुक्तिः न प्राप्यते। ज्ञानेन एव मुक्तिः प्राप्यते।

muṇḍanena muktiḥ na prāpyate. kevalaṁ muṇḍanena muktiḥ na prāpyate. jñānena eva muktiḥ prāpyate.
*Liberation is not attained by boldness. Liberation is not attained by merely having a bold head. It is attained only by knowledge.*

---

## कथा

**kathā**
***Story***

अहम् इदानीम् एकं कथां वदामि। सावाधनेन शृण्वन्तु।

aham idānīm ekaṁ kathāṁ vadāmi. sāvādhanena śṛṇvantu!
*Now I [will] tell [you] one story. Listen attentively.*

पूर्वं कलिङ्गदेशे सत्यगुप्तः नाम एकः महाराजः आसीत्।

pūrvaṁ kaliṅga-deśe satyaguptaḥ nāma ekaḥ mahārājaḥ āsīt.
*Previously in the land of Kalinga there was a king named Satyagupta.*

तस्य पुत्रः कमलापिडः। कमलापिडः अतीव बुद्धिमान्, चतुरः। किन्तु सः बहु अहङ्कारी आसीत्। सः महाराजम् अपि उपहसति स्म, "अहम् एव पण्डितः" इति।

tasya putraḥ kamalāpiḍaḥ. kamalāpiḍaḥ atīva buddhimān. caturaḥ. kintu saḥ bahu ahaṅkārī āsīt. saḥ mahārājam api upahasati sma, "aham eva paṇḍitaḥ" iti.
*His son [was] Kamalapida. Kamalapida was very smart. Clever. But he was very egocentric. He mocked even the king, [thinking] "I am the only scholar."*

पुत्रस्य स्वभावं दृष्ट्वा महाराजः बहु दुःखितः आसीत्। महाराजस्य बहु दुःखम् अस्ति। "किमर्थं मम पुत्रः बहु अहङ्कारी अस्ति ?" इति महाराजस्य दुःखम् आसीत्।

putrasya svabhāvaṁ dṛṣṭvā mahārājaḥ bahu duḥkhitaḥ āsīt. mahārājasya bahu duḥkham asti. "kim arthaṁ mama putraḥ bahu ahaṅkārī asti?" iti mahārājasya duḥkham āsīt.
*Seeing [his] son's nature, the king was very sad. The king was very sad. "Why is my son so egocentric?" that was the [cause of] kings sadness.*

कदाचिद् राजकुमारः महाराजसमीपम् आगत्य पृष्टवान् "अस्माकं समीपे महत् सैन्यम् अस्ति। सैन्यस्य का आवश्यकता ? वृथा धनव्ययः भवति" इति।

kadācid rāja-kumāraḥ mahārāja-samīpam āgatya pṛṣṭavān "asmākaṁ samīpe mahat sainyam asti. sainyasya kā āvaśyakatā? vṛthā dhanavyayaḥ bhavati" iti.
*Once king's son came to the king and asked: "We have a great army. What is the army needed for? [Such] expenditure is futile."*

तदा महाराजः वदति "पुत्रं वदति युद्धकाले सैन्यस्य बहु आवश्यकता अस्ति। सैन्यस्य पोषनार्थं धनव्ययं कुर्मः चेत् हानिः नास्ति। युद्धकाले सैन्यस्य आवश्यकता अस्ति" इति।

tadā mahārājaḥ vadati, putraṁ vadati "yuddha-kāle sainyasya bahu āvaśyakatā asti. sainyasya poṣanārthaṁ dhanavyayaṁ kurmaḥ cet hāniḥ nāsti. yuddha-kāle sainyasya āvaśyakatā asti" iti.
*Then the king says, he say to his son: "The army is very much needed in the time of war. If we make expenditure for maintaining the army there is no waste. The army is needed in the time of war."*

अनन्तरं राजकुमरः वदति "युद्धकाले यदि धनं दध्मः बहवः सैनिकाः लभ्यन्ते। इदानीं सैन्यपोषनस्य आवश्यकता नास्ति" इति।

anantaraṁ rāja-kumaraḥ vadati "yuddha-kāle yadi dhanaṁ dadhmaḥ, bahavaḥ sainikāḥ labhyante. idānīṁ sainya-poṣanasya āvaśyakatā nāsti" iti.
*Then the king's son says: "If we give money in the time of war, [then] many soldiers are available. Now there is no need to maintain the army."*

तदा महाराजः किम् अपि न वदति।

tadā mahārājaḥ kim api na vadati.
*Then the king doesn't say anything.*

तस्मिन् दिने रात्रौ महाराजः पुत्रम् आह्वयति, किञ्चित् आहारं स्वीकरोति, एकत्र स्थापयति।

tasmin dine rātrau mahārājaḥ putram āhvayati, kiñcit āhāraṁ svīkaroti, ekatra sthāpayati.
*On that day in the evening the king calls the son, takes some food, [and] puts it at one place.*

महाराजः पुत्रं वदति "काकान् आह्वयतु।"

mahārājaḥ putraṁ vadati "kākān āhvayatu."
*The king says to his son: "Call the crows."*

तदा राजकुमारः वदति "किं भवान् मुर्खः वा ?

रात्रिसमये काकाः आगच्छन्ति वा" इति पृच्छति ?

tadā rāja-kumāraḥ vadati "kiṁ bhavān murkhaḥ vā? rātri-samaye kākāḥ āgacchanti vā?" iti pṛcchati?
*Then the king's son says: "Are you a fool? Are the crows coming at night?" he asks.*

तदा महाराजः वदति "अन्नं दत्तं चेत् अपि, यथा रात्रिसमये काकाः न आगच्छन्ति, तथा युद्धकाले दध्मः चेत् अपि, सैनिकाः न लभ्यन्ते । सैन्यस्य पोषणार्थं धनं व्यर्थं न भवति" इति वदति ।

tadā mahārājaḥ vadati "annaṁ dattaṁ cet api, yathā rātri-samaye kākāḥ na āgacchanti, tathā yuddha-kāle dadhmaḥ cet api sainikāḥ na labhyante. sainyasya poṣaṇārthaṁ dhanaṁ vyarthaṁ na bhavati" iti vadati.
*Then the king says: "Just as if the rice is given in the night [then] crows don't come, so if we give in the time of war soldiers aren't available. The money is not wasted for maintaining the army," he says.*

तदा राजकुमारस्य दुःखं भवति । राजकुमारः स्वस्य अविवेकं ज्ञातवान्, पितुः समीपे क्षमां प्रार्थितवान् ।

tadā rāja-kumārasya duḥkhaṁ bhavati. rāja-kumāraḥ svasya avivekaṁ jñātavān, pituḥ samīpe kṣamāṁ prārthitavān.
*Then the king's son became sad. The king's son became aware of his imprudence, and begged for his father's pardon.*

सर्वे कथायाः अर्थं ज्ञातवन्तः वा ?

sarve kathāyāḥ arthaṁ jñātavantaḥ vā?
*Have you all understood the story?*

आम् । ज्ञातवन्तः ।

ām. jñātavantaḥ.
*Yes. We have understood.*

धन्यवादः ।

dhanyavādaḥ.
*Thank you.*

नमो नमः ।

namo namaḥ.
*Salutations.*

---

**Teacher:**

सुचेता

Sucetā

**Students:**

नागेश शर्मा नवनीत् जि. सन्तोश् एम्.

Nāgeśa Śarmā Navanīt G. Santoś M.

श्रवण ए. कुलकर्णि अचिन् कुमार् आर्.

Śravaṇa A. Kulakarṇi Acin Kumār R.

जयतीर्थ एस्. एस्. कृष्ण टि. वि. विष्णुदेव आर्.

Jayatīrtha S. S. Kṛṣṇa Ṭ. V. Viṣṇudeva R.

वारुणी स्नेहा सहना धन्या अक्षता

Vāruṇī Snehā Sahanā Dhanyā Akṣatā

श्रीविद्या श्रीप्रदा श्राव्या अनुश्री

Śrīvidyā Śrīpradā Śrāvyā Anuśrī

# LESSON 18 – OVERVIEW

*In lesson eighteen you will do further practice of past (continuous) tense with present tense verb forms +* **avyaya sma**. *You will learn past tense form of of the verb* **bhū** *(to be) and* **ktvā-pratyāya** *(ending* **-tvā,** *forming indeclinable participle) used to express activity that preceeds the activity expressed with the verb in the same sentence.*

## PAST TENSE (AORIST) OF BHU-DHĀTU (VERB "TO BE")

**prathama-puruṣa-ekavācanam** *(3rd pers. sing.)* अभवत् abhavat *(he, she, it) was*

मम भोजनम् **अभवत्** । mama bhojanam **abhavat.** *I had a meal. (Lit.: My meal **was.**)*

## KTVĀ-PRATYĀYA (ENDING "-TVĀ"):

| | | | | | |
|---|---|---|---|---|---|
| पठति | paṭha**ti** | *(he, she) reads* | पठितवान् | paṭhi**tvā** | *after reading* |
| गच्छति | gaccha**ti** | *(he, she) goes* | गतवती | ga**tvā** | *after going* |

पुस्तकं **पठित्वा** गृहपाठं लिखति । pustakaṁ **paṭhitvā** gṛhapāṭhaṁ likhati. ***After reading*** *a book he writes homework.*

# Lesson 18

*HINDI: In the previous lesson we learned the use of* **sma,** *that changes the meaning of present tense to past tense. In this lesson we will do further exercise.*

नमो नमः ।

namo namaḥ.
*Salutations.*

संस्कृतभाषाशिक्षणे सर्वेषां स्वागतम् ।

saṁskṛta-bhāṣā-śikṣaṇe sarveṣāṁ svāgatam.
*Welcome to you all to the study of Sanskrit language.*

पूर्वतनपाठे वयं "स्म" इत्यस्य विषये अभ्यासं कृतवन्तः ।

pūrvatana-pāṭhe vayaṁ "sma" ity asya viṣaye abhyāsaṁ kṛtavantaḥ.
*In the previous lesson we did exercise on the subject matter of "sma".*

गच्छति स्म, पठति स्म, लिखति स्म ।

gacchati sma, paṭhati sma, likhati sma.
*[He, she, it] was going, was reading, was writing.*

अहं मार्गे गच्छामि स्म एकः सर्पः आगतः ।

ahaṁ mārge gacchāmi sma ekaḥ sarpaḥ āgataḥ.
*I was walking on the street [and] one snake came.*

अहं लिखामि स्म मम सखी आगतवती ।

ahaṁ likhāmi sma mama sakhī āgatavatī.
*I was writing [and] my friend (fem.) came.*

एतद्दृश-अनय-उदहराणि वदन्ति वा ?

etadṛśa-anya-udaharāṇi vadanti vā?
*Would you say other such examples?*

के के वदन्ति ? हस्तम् उपरि कुर्वन्तु । भवती वदतु ।

ke ke vadanti? hastam upari kurvantu. bhavatī vadatu!
*Who [would] say (pl.)? Rise hand! You (fem.) say!*

मन्दिरे पूजा प्रचलति स्म ।

mandire pūjā pracalati sma.
*Puja was going on in the temple.*

बकासुरः सम्यक् खादति स्म ।

bakāsuraḥ samyak khādati sma.
*Bakasura was eating good.*

ह्यः अहं चित्रमन्दिरे चित्रं पश्यामि स्म ।

hyaḥ ahaṁ citra-mandire citraṁ paśyāmi sma.
*Yesterday I was watching a movie in the cinema.*

क्रीडाङ्गने बालाः सर्वे क्रीडन्ति स्म ।

krīḍāṅgane bālāḥ sarve krīḍanti sma.
*All children were playing on the playground.*

गतदिने अहं ग्रन्थालये पठामि स्म ।

gata-dine ahaṁ granthālaye paṭhāmi sma.
*Last day I was reading in the library.*

ह्यः अहम् उपाहारगृहे भोजनं करोमि स्म ।

hyaḥ aham upāhāra-gṛhe bhojanaṁ karomi sma.
*Yesterday I was eating in the restaurant.*

कुम्भकर्णः सम्यक् निद्रां करोति स्म ।

kumbhakarṇaḥ samyak nidrāṁ karoti sma.
*Kumbhakarna was sleeping well.*

मम पिता वित्तकोषे कार्यं करोति स्म ।

mama pitā vittakoṣe kāryaṁ karoti sma.
*My father was working in a bank.*

विवेकानन्दः सम्यक् भाषनं करोति स्म ।

vivekānandaḥ samyak bhāṣanaṁ karoti sma.
*Vivekananda was speaking well (was a good speaker).*

बाल्ये अहम् अधिकं क्रीडामि स्म ।

bālye aham adhikaṁ krīḍāmi sma.
*I was playing a lot in childhood.*

बाल्ये मम अनुजा अधिकं रोदनं करोति स्म ।

bālye mama anujā adhikaṁ rodanaṁ karoti sma.
*My younger sister was crying a lot in childhood.*

रावणः अधिकं युद्धं करोति स्म ।

rāvaṇaḥ adhikaṁ yuddhaṁ karoti sma.
*Ravana was fighting a lot.*

शकुनी वञ्चनं करोति स्म ।

śakunī vañcanaṁ karoti sma.
*Shakuni was cheating.*

---

अहम् एकवचने वाक्यं वदामि, भवन्तः बहुवचने परिवर्तयन्तु । यथा – बालकः गच्छति स्म । बालकाः गच्छन्ति स्म ।

aham ekavacane vākyaṁ vadāmi, bhavantaḥ bahuvacane parivartayantu. yathā – bālakaḥ gacchati sma. bālakāḥ gacchanti sma.
*I [will] say a sentence in singular, you change it to plural. Per example: Boy was coming. Boys were coming.*

छात्रः पठति स्म । छात्राः पठन्ति स्म ।

chātraḥ paṭhati sma. chātrāḥ paṭhanti sma.
*Student was studying. Students were studying.*

गायकः गायति स्म । गायकाः गायन्ति स्म ।

gāyakaḥ gāyati sma. gāyakāḥ gāyanti sma.
*Singer was singing. Singers were singing.*

सेवकः कार्यं करोति स्म ।

sevakaḥ kāryaṁ karoti sma.
*Servant was doing the work.*

सेवकाः कार्यं कुर्वन्ति स्म ।

sevakāḥ kāryaṁ kurvanti sma.
*Servants were doing the work.*

शिक्षकः पाठयति स्म । शिक्षकाः पाठयन्ति स्म ।

śikṣakaḥ pāṭhayati sma. śikṣakāḥ pāṭhayanti sma.
*Teacher was teaching. Teachers were teaching.*

अहं लिखामि स्म । वयं लिखामः स्म ।

ahaṁ likhāmi sma. vayaṁ likhāmaḥ sma.
*I was writing. We were writing.*

अहं श्लोकं वदामि स्म ।

ahaṁ ślokaṁ vadāmi sma.
*I was reciting the verse.*

वयं श्लोकं वदामः स्म ।

vayaṁ ślokaṁ vadāmaḥ sma.
*We were reciting the verse.*

अहं हसामि स्म । वयं हसामः स्म ।

ahaṁ hasāmi sma. vayaṁ hasāmaḥ sma.
*I was smiling. We were smiling.*

अहम् उपविषामि स्म । वयम् उपविषामः स्म ।

aham upaviṣāmi sma. vayam upaviṣāmaḥ sma.
*I was sitting down. We were sitting down.*

अहं खादामि स्म । वयं खादामः स्म ।

ahaṁ khādāmi sma. vayaṁ khādāmaḥ sma.
*I was eating. We were eating.*

अहं पश्यामि स्म । वयं पश्यामः स्म ।

ahaṁ paśyāmi sma. vayaṁ paśyāmaḥ sma.
*I was looking. We were looking.*

---

सुधाखण्डः अस्ति ।

sudhākhaṇḍaḥ asti.
*[There] is a chalk.*

सुधाखण्डः भग्नः भवति ।

sudhākhaṇḍaḥ bhagnaḥ bhavati.
*The chalk is broken.*

सुधाखण्डः भग्नः अभवत्।

sudhākhaṇḍaḥ bhagnaḥ abhavat.
*Chalk was broken.*

हस्ते किम् अभवत्?

haste kim abhavat?
*What was in the hand?*

क्षतः अभवत्।

kṣataḥ abhavat.
*[There] was a scar.*

श्रीविद्यायाः हस्ते क्षतः अभवत्।

śrī-vidyāyāḥ haste kṣataḥ abhavat.
*On Shrividya's hand [there] was a scar.*

भवत्याः स्नानम् अभवत् वा ?

bhavatyāḥ snānam abhavat vā?
*Did you (fem.) take a bath? (Lit.: Has your bathing been?)*

आम्। मम स्नानम् अभवत्?

ām. mama snānam abhavat?
*Yes. I took a bath.*

भवत्याः भोजनम् अभवत् वा ?

bhavatyāḥ bhojanam abhavat vā?
*Did you (fem.) have a meal?*

आम्। मम भोजनम् अभवत्।

ām. mama bhojanam abhavat.
*Yes. I had a meal.*

भवत्याः पूजा अभवत् वा ?

bhavatyāḥ pūjā abhavat vā.
*Did you (fem.) have a puja?*

आम्। मम पूजा अभवत्।

ām. mama pūjā abhavat.
*Yes. I had a puja.*

भवत्याः जन्मदिनम् अभवत् वा ?

bhavatyāḥ janma-dinam abhavat vā?
*Did you have your birthday?*

मम जन्मदिनं न अभवत्।

mama janma-dinaṁ na abhavat.
*I did not have my birthday.*

भवतः परीक्षा अभवत् वा ?

bhavataḥ parīkṣā abhavat vā?
*Did you have your exam?*

न। मम परीक्षा न अभवत्।

na. mama parīkṣā na abhavat.
*No. I did not have my exam.*

भवतः पठनम् अभवत् वा ?

bhavataḥ paṭhanam abhavat vā?
*Did you do your study?*

आम्। मम पठनम् अभवत्।

ām. mama paṭhanam abhavat.
*Yes. I did my study.*

भवतः लेखनम् अभवत् वा ?

bhavataḥ lekhanam abhavat vā?
*Did you do your writing?*

आम्। मम लेखनम् अभवत्।

ām. mama lekhanam abhavat.
*Yes. I did my writing.*

भवतः विवाहः अभवत् वा ?

bhavataḥ vivāhaḥ abhavat vā?
*Did your have your wedding?*

न। विवाहः न अभवत्।

na. vivāhaḥ na abhavat.
*No. I didn't have the wedding.*

भवतः निद्रा अभवत् वा ?

bhavataḥ nidrā abhavat vā?
*Did you sleep?*

आम्। मम निद्रा अभवत्।

ām. mama nidrā abhavat.
*Yes. I slept.*

---

इदानीम् "अभवत्" इति शब्दम् उपयुज्य वाक्यानि वदन्तु। वदन्ति वा ?

idānīm "abhavat" iti śabdam upayujya vākyāni vadantu. vadanti vā?
*Now say sentences using the word "was". Would you say?*

राज्योत्सवः न अभवत्।

rājyotsavaḥ na abhavat.
*[There] was no state formation aniversary festival.*

स्वातन्त्र्यदिनचरणम् अभवत्।

svātantrya-dina-caraṇam abhavat.
*[There] was independence day celebration.*

भारतदेशः स्वतन्त्र**म्** अभवत्।

bhārata-deśaḥ svata**ntram** abhavat.
*India became independent.* ***(Mistake!)***

स्वतन्त्रः अभवत्। पुनः वदतु।

svata**ntraḥ** abhavat. punaḥ vadatu.
*Became independent.* ***(Teacher corrects!)*** *Say again!*

भारतदेशः स्वतन्त्रः अभवत्।

bhāratadeśaḥ svatantraḥ abhavat.
*India became independent.*

मम अनुजस्य जन्मदिनं न अभवत्।

mama anujasya janma-dinaṁ na abhavat.
*My younger sister didn't have her birthday.*

दशधा??? उत्सवः अभवत्।

daśadhā??? utsavaḥ abhavat.
*[There] was tenfold??? celebration.*

मम विद्यालये वर्षिकोत्सवः अभवत्।

mama vidyālaye varṣikotsavaḥ abhavat.
*In my school [there] was aniversary celebration.*

ह्यः मार्गे अपघात**म्** अभवत्।

hyaḥ mārge apaghā**tam** abhavat.
*Yesterday [there] was an accident on the road.* ***(Mistake!)***

अपघातः अभवत्। पुनः वदतु।

apaghātaḥ abhavat. punaḥ vadatu!
*[There] was an accident.* ***(Teacher corrects!)*** *Say again!*

ह्यः मार्गे अपघातः अभवत्।

hyaḥ mārge apaghātaḥ abhavat.
*Yesterday [there] was an accident on the street.*

भारते प्लतिकदनः ??? अभवत्।

bhārate platikadanaḥ ??? abhavat.
*In india [there] was ???*

उत्सवः अभवत्।

utsavaḥ abhavat.
*[There] was a program.*

---

इदानीम् अहं वर्तमानकाले वाक्यं वदामि, भूतकाले परिवर्तनं कुर्वन्तु।

idānīm ahaṁ vartamāna-kāle vākyaṁ vadāmi, bhūta-kāle parivartanaṁ kurvantu.
*Now I [will] say a sentence in the present [tense], you change [it] to past [tense].*

यथा – कार्यक्रमः भवति। कार्यक्रमः अभवत्।

yathā – kāryakramaḥ bhavati. kāryakramaḥ abhavat.
*Like – [there] is a festive program. [There] was a festive program.*

शिरोवेदना भवति ।

śirovedanā bhavati.
*[There] is a headache.*

शिरोवेदना अभवत् ।

śirovedanā abhavat.
*[There] was a headache.*

तस्य ज्ञानोदयः भवति ।

tasya jñānodayaḥ bhavati.
*He becomes more knowledgable.*

तस्य ज्ञानोदयः अभवत् ।

tasya jñānodayaḥ abhavat.
*He became more knowledgable.*

मम आनन्दः भवति ।

mama ānandaḥ bhavati.
*I am joyous. (Lit: My joy is.)*

मम आनन्दः अभवत् ।

mama ānandaḥ abhavat.
*I was joyous. (Lit: My joy was.)*

तस्याः दुःखं भवति ।

tasyāḥ duḥkhaṁ bhavati.
*She was sad, miserable. (Lit.: Her misery is.)*

तस्याः दुःखम् अभवत् ।

tasyāḥ duḥkham abhavat.
*She was sad, miserable. (Lit.: Her misery was.)*

तस्य पश्चात्तापः भवति ।

tasya paścāttāpaḥ bhavati.
*He has regret. (Lit: His regret is.)*

तस्य पश्चात्तापः भवति ।

tasya paścāttāpaḥ abhavat.
*He had regret.*

---

*HINDI: The meaning of the verb* ***abhavat*** *is "was". The verb root* ***bhu*** *takes that form in past tense first person singular* **(laṅ-lakara prathama-puruṣa-ekavacanam).**

---

वयम् इदानीम् एकं नूतनशब्दयोजनम् अभ्यासं कुर्मः ।

vayam idānīm ekaṁ nūtana-śabda-yojanam abhyāsaṁ kurmaḥ.
*Now we [will] do an exercise using one new word.*

विष्णुदेव उत्तिष्ठतु ! कृपया आगच्छतु । किञ्चिद् गृह्णातु ।

viṣṇudeva uttiṣṭhatu! kṛpayā āgacchatu! kiñcid gṛhṇātu!
*Vishnudeva stand up! Please, come! Hold a bit!*

सः मम पुस्तकं पठितवान् । वदन्तु ।

saḥ mama pustakaṁ paṭhitavān. vadantu!
*He read my book. Say!*

सः मम पुस्तकं पठितवान् ।

saḥ mama pustakaṁ paṭhitavān.
*He read my book.*

अर्थः अभवत् वा ?

arthaḥ abhavat vā?
*Have you understood the meaning? (Lit.: Was [there] the meaning?)*

इदानीं "सः" इति शब्दस्य स्थानि, एतत्स्थाने अन्य शब्दस्य प्रयोगः करणीयः ।

idānīṁ "saḥ" iti śabdasya sthāni, etat-sthāne anya śabdasya prayogaḥ karaṇīyaḥ.
*Now in the place of the word "he", in this place use other words.*

उदाहरणार्थम् – गणेशः मम पुस्तकं पठितवान् ।

udāharaṇārtham – gaṇeśaḥ mama pustakaṁ paṭhitavān.
*For ilustration - Ganesha read my book.*

"सः" स्थाने अन्यशब्दस्य प्रयोगः करणीयः। वदन्ति वा?

"saḥ" sthāne anya-śabdasya prayogaḥ karaṇīyaḥ. vadanti vā?
*In the place of "he" use other words. Would you (pl.) say?*

गणेशः मम पुस्तकं पठितवान्। अनय-उदाहरणं वदतु।

gaṇeśaḥ mama pustakaṁ paṭhitavān. anya-udāharaṇaṁ vadatu!
*Ganesha read my book. Say another example!*

नरेन्द्रः मम पुस्तकं पठितवान्।

narendraḥ mama pustakaṁ paṭhitavān.
*Narendra read my book.*

शन्करः मम पुस्तकं पठितवान्।

śankaraḥ mama pustakaṁ paṭhitavān.
*Shankara read my book.*

विनोदः मम पुस्तकं पठितवान्।

vinodaḥ mama pustakaṁ paṭhitavān.
*Vinoda read my book.*

गोपलः मम पुस्तकं पठितवान्।

gopalaḥ mama pustakaṁ paṭhitavān.
*Gopala read my book.*

गिरीशः मम पुस्तकं पठितवान्।

girīśaḥ mama pustakaṁ paṭhitavān.
*Girisha read my book.*

महेशः मम पुस्तकं पठितवान्।

maheśaḥ mama pustakaṁ paṭhitavān.
*Mahesha read my book.*

रामः मम पुस्तकं पठितवान्।

rāmaḥ mama pustakaṁ paṭhitavān.
*Rama read my book.*

कृष्णः मम पुस्तकं पठितवान्।

kṛṣṇaḥ mama pustakaṁ paṭhitavān.
*Krshna read my book.*

रामेशः मम पुस्तकं पठितवान्।

rāmeśaḥ mama pustakaṁ paṭhitavān.
*Ramesha read my book.*

गिरीशः मम पुस्तकं पठितवान्।

girīśaḥ mama pustakaṁ paṭhitavān.
*Girisha read my book.*

श्री कृष्णः मम पुस्तकं पठितवान्।

śrī kṛṣṇaḥ mama pustakaṁ paṭhitavān.
*Shri Krshna read my book.*

---

इदानीं "मम" इति शब्दस्य स्थाने अन्यशब्दः योजनीयः। उदाहरणार्थम् - सः भवतः पुस्तकं पठितवान्। सः गिरीशस्य पुस्तकं पठितवान्। वदन्ति वा ? वदतु।

idānīṁ "mama" iti śabdasya sthāne anya-śabdaḥ yojanīyaḥ. udāharaṇārthaṁ – saḥ bhavataḥ pustakaṁ paṭhitavān. saḥ girīśasya pustakaṁ paṭhitavān. vadanti vā? vadatu!
*Now in the place of the word "my" use other words. For example – He read your book. He read Girisha's book. Would you say (pl.)? [You] Say!*

सः अक्षयस्य पुस्तकं पठितवान्।

saḥ akṣayasya pustakaṁ paṭhitavān.
*He read Akshaya's book.*

सः श्राव्यस्य पुस्तकं पठितवान्।

saḥ śrāvya**sya** pustakaṁ paṭhitavān.
*He read Shravya's book.* **(Mistake!)**

श्राव्यायाः।

śrāvyāyāḥ.
*Shravya's.* **(Teacher corrects!)**

सः श्राव्यायाः पुस्तकं पठितवान्।

saḥ śrāvyāyāḥ pustakaṁ paṭhitavān.
*He read Shravya's book.*

सः गिरीशस्य पुस्तकं पठितवान्।

saḥ girīśasya pustakaṁ paṭhitavān.
*He read Girisha's book.*

सः कस्य पुस्तकं पठितवान्?

saḥ kasya pustakaṁ paṭhitavān?
*Whose book did he read?*

सः तव पुस्तकं पठितवान्।

saḥ tava pustakaṁ paṭhitavān.
*He read your book.*

सः धन्यायाः पुस्तकं पठितवान्।

saḥ dhanyāyāḥ pustakaṁ paṭhitavān.
*He read Dhanya's book.*

सः सहनायाः पुस्तकं पठितवान्।

saḥ sahanāyāḥ pustakaṁ paṭhitavān.
*He read Sahana's book.*

सः रामस्य पुस्तकं पठितवान्।

saḥ rāmasya pustakaṁ paṭhitavān.
*He read Rama's book.*

सः विवेकस्य पुस्तकं पठितवान्।

saḥ vivekasya pustakaṁ paṭhitavān.
*He read Viveka's book.*

सः कृष्णस्य पुस्तकं पठितवान्।

saḥ kṛṣṇasya pustakaṁ paṭhitavān.
*He read Krshna's book.*

सः अच्युतस्य पुस्तकं पठितवान्।

saḥ acyutasya pustakaṁ paṭhitavān.
*He read Achyuta's book.*

सः एतस्य पुस्तकं पठितवान्।

saḥ etasya pustakaṁ paṭhitavān.
*He his (this one's) book.*

सः अध्यापकस्य पुस्तकं पठितवान्।

saḥ adhyāpakasya pustakaṁ paṭhitavān.
*He read teacher's book.*

सः कृष्णस्य पुस्तकं पठितवान्।

saḥ kṛṣṇasya pustakaṁ paṭhitavān.
*He read Krshna's book.*

---

इदानीं पुस्तक-स्थाने अन्यशब्दं वदन्तु।

उदाहरणार्थम् - सः मम कथां पठितवान्।

idānīṁ pustaka-sthāne anyaśabdaṁ vadantu.
udāharaṇārthaṁ – saḥ mama kathāṁ paṭhitavān.
*Now you (pl.) say another word instead of "book". For example – He read my story.*

पुस्तकस्थाने अन्यशब्दः योजनीयः। वदन्ति वा ?

भवान् वदतु।

pustaka-sthāne anya-śabdaḥ yojanīyaḥ. vadanti vā? bhavān vadatu!
*In the place of "book" use another word. Would you (pl.) say? You say!*

सः मम ग्रन्थं पठितवान्।

saḥ mama granthaṁ paṭhitavān.
*He read my book.*

सः मम उत्तरं पठितवान्।

saḥ mama uttaraṁ paṭhitavān.
*He read my answer.*

सः मम पद्यं पठितवान्।

saḥ mama padyaṁ paṭhitavān.
*He read my poetry.*

सः मम कादम्बरीं पठितवान्।

saḥ mama kādambarīṁ paṭhitavān.
*He read my Kadambari.*

सः मम उपन्यासं पठितवान्।

saḥ mama upanyāsaṁ paṭhitavān.
*He read my novel.*

सः मम टिप्पणीं पठितवान्।

saḥ mama ṭippaṇīṁ paṭhitavān.
*He read my note.*

सः मम प्रश्नं पठितवान्।

saḥ mama praśnaṁ paṭhitavān.
*He read my question.*

सः मम गद्यं पठितवान्।

saḥ mama gadyaṁ paṭhitavān.
*He read my prose.*

सः मम कथां पठितवान्।

saḥ mama kathāṁ paṭhitavān.
*He read my story.*

सः मम काव्यं पठितवान्।

saḥ mama kāvyaṁ paṭhitavān.
*He read my poem.*

सः मम ग्रन्थं पठितवान्।

saḥ mama granthaṁ paṭhitavān.
*He read my book.*

सः मम लेखं पठितवान्।

saḥ mama lekhaṁ paṭhitavān.
*He read my article.*

सः मम गद्यं पठितवान्।

saḥ mama gadyaṁ paṭhitavān.
*He read my prose.*

गद्यम्, पत्रिकां पठितवान् इत्यादि।

gadyam, patrikāṁ paṭhitavān ityādi.
*He read prose, magazine etc.*

सः मम कवलं ??? पठितवान्।

saḥ mama kavalaṁ *???* paṭhitavān.
*He read my ???*

सः मम दिनचरीं पठितवान्।

saḥ mama dina-carīṁ paṭhitavān.
*He read my daily schedule.*

सः मम कवितां पठितवान्।

saḥ mama kavitāṁ paṭhitavān.
*He read my poem.*

---

इदानीं "पठितवान्" इति स्थाने अन्य शब्दं वदन्तु।

सः मम पुस्तकं लिखितवान्।

idānīṁ "paṭhitavān" iti sthāne anya śabdaṁ vadantu. saḥ mama pustakaṁ likhitavān.
*Now say (pl.) another word in the place of "read".*
*He wrote my book.*

सः मम पुस्तकं दत्तवान्।

saḥ mama pustakaṁ dattavān.
*He gave my book.*

सः मम पुस्तकं चोरितवान्।

saḥ mama pustakaṁ coritavān.
*He stole my book.*

सः मम पुस्तकं नीतवान्।

saḥ mama pustakaṁ nītavān.
*He took my book.*

सः मम पुस्तकं दृष्यवान्।

saḥ mama pustakaṁ dṛ**ṣya**vān.
*He saw my book.* ***(Mistake!)***

दृष्टवान्।

dṛ**ṣṭa**vān.
*He saw.* ***(Teacher corrects!)***

सः मम पुस्तकं दृष्टवान् ।

saḥ mama pustakaṁ dṛṣṭavān.
*He saw my book.*

सः मम पुस्तकं लेखितवान् ।

saḥ mama pustakaṁ **le**khitavān.
*He wrote my book.* **(Mistake!)**

लिखितवान् ।

**li**khitavān.
*He wrote.* **(Teacher corrects!)**

सः मम पुस्तकं लिखितवान् ।

saḥ mama pustakaṁ likhitavān.
*He wrote my book.*

सः मम पुस्तकं स्थापितवान् ।

saḥ mama pustakaṁ sthāpitavān.
*He placed my book.*

सः मम पुस्तकं भृतवान् ।

saḥ mama pustakaṁ bhṛtavān.
*He carried my book.*

सः मम पुस्तकं पाठितवान् ।

saḥ mama pustakaṁ pāṭhitavān.
*He tought my book.*

सः मम पुस्तकं प्रेषितवान् ।

saḥ mama pustakaṁ preṣitavān.
*He sent my book.*

सः मम पुस्तकं नाशितवान् ।

saḥ mama pustakaṁ nāśitavān.
*He lost my book.*

सः मम पुस्तकं खादितवान् ।

saḥ mama pustakaṁ khāditavān.
*He ate my book.*

छात्रः ग्रन्थालयं गच्छति । पुस्तकं पठति ।

chātraḥ granthālayaṁ gacchati. pustakaṁ paṭhati.
*Student goes to the library. He reads a book.*

छात्रः ग्रन्थालयं गत्वा पुस्तकं पठति ।

chātraḥ granthālayaṁ gatvā pustakaṁ paṭhati.
*After going to the library student reads a book.*

पुस्तकं पठति । निद्रां करोति ।

pustakaṁ paṭhati. nidrāṁ karoti.
*He reads a book. He sleeps.*

पुस्तकं पठित्वा निद्रां करोति ।

pustakaṁ paṭhitvā nidrāṁ karoti.
*After reading a book he sleeps.*

स्नानं करोति । पूजां करोति ।

snānaṁ karoti. pūjāṁ karoti.
*He baths. He does puja.*

स्नानं कृत्वा पूजां करोति ।

snānaṁ kṛtvā pūjāṁ karoti.
*After bathing he does puja.*

श्लोकं वदति । क्षीरं पिबति ।

ślokaṁ vadati. kṣīraṁ pibati.
*He recites a verse. He drinks milk.*

श्लोकम् उक्त्वा क्षीरं पिबति ।

ślokam uktvā kṣīraṁ pibati.
*After reciting a verse he drinks milk.*

गच्छति । गत्वा ।

gacchati. gatvā.
*Goes. After going.*

पठति । पठित्वा ।

paṭhati. paṭhitvā.
*Reads. After reading.*

लिखति । लिखित्वा ।

likhati. likhitvā.
*Writes. After writing.*

छात्रः विद्यालयं गच्छति । अनन्तरं पाठं पठति ।

chātraḥ vidyālayaṁ gacchati. anantaraṁ pāṭhaṁ paṭhati.
*Student goes to school. Afterwards he studies a lesson.*

अत्र वाक्यद्वयं अस्ति । छात्रः विद्यालयं गच्छति अनन्तरं पाठं पठति ।

atra vākya-dvayam asti. chātraḥ vidyālayaṁ gacchati. anantaraṁ pāṭhaṁ paṭhati.
*Here are two sentences. Student goes to school. Afterwards he studies a lesson.*

एकवाक्यं कुर्मः । छात्रः विद्यालयं गच्छति - गत्वा - छात्रः विद्यालयं गत्वा पाठं पठति ।

eka-vākyaṁ kurmaḥ. chātraḥ vidyālayaṁ gacchati – gatvā – chātraḥ vidyālayaṁ gatvā pāṭhaṁ paṭhati.
*We [will] make one sentence. Student goes to school – after going – After going to school student studies a lesson.*

पुस्तकं पठति । गृहपाठं लिखति ।

pustakaṁ paṭhati. gṛhapāṭhaṁ likhati.
*Reads a book. Writes homework.*

पुस्तकं पठित्वा गृहपाठं लिखति ।

pustakaṁ paṭhitvā gṛhapāṭhaṁ likhati.
*After reading a book he writes homework.*

गच्छति । गत्वा ।

gacchati. gatvā.
*Goes. After going.*

पठति । पठित्वा ।

paṭhati. paṭhitvā.
*Reads. After reading.*

लिखति । लिखित्वा ।

likhati. likhitvā.
*Writes. After writing.*

खादति । खादित्वा ।

khādati. khāditvā.
*Eats. After eating.*

क्रीडति । क्रीडित्वा ।

krīḍati. krīḍitvā.
*Plays. After playing.*

पतति । पतित्वा ।

patati. patitvā.
*Falls. After falling.*

वदति । उक्त्वा ।

vadati. uktvā.
*Says. After saying.*

करोति । कृत्वा ।

karoti. kṛtvā.
*Does. After doing.*

शृनोति । श्रुत्वा ।

śṛnoti. śrutvā.
*Listens. After listening.*

---

अहम् इदानीं वाक्यद्वयं वदामि, योजयित्वा एकवाक्यं वदन्तु । उदाहरणार्थं - बालकः गृहपाठं लिखति, निद्रां करोति । गृहपाठां लिखित्वा निद्रां करोति । वदन्तु ।

aham idānīṁ vākya-dvayaṁ vadāmi, yojayitvā eka-vākyaṁ vadantu. udāharaṇārthaṁ – bālakaḥ gṛhapāṭhaṁ likhati, nidrāṁ karoti. gṛhapāṭhāṁ likhitvā nidrāṁ karoti. vadantu!
*Now I say two sentences, you say (pl.) one sentence after joining them. For example – boy writes homework, he sleeps. After writing homework he sleeps. Say (pl.)!*

बालकः गृहपाठां लिखित्वा निद्रां करोति ।

bālakaḥ gṛhapāṭhāṁ likhitvā nidrāṁ karoti.
*After writing homework boy sleeps.*

सत्यं वदति। महापुरुषः भवति।

satyaṁ vadati. mahāpuruṣaḥ bhavati.
*[He] speaks the truth. He is a great man.*

सत्यम् उक्त्वा महापुरुषः भवति।

satyam uktvā mahāpuruṣaḥ bhavati.
*[After] speaking the truth he is a great man.*

मन्दिरं गच्छति। देवं नमति।

mandiraṁ gacchati. devaṁ namati.
*[He] goes to the temple. [He] pays respect to God.*

मन्दिरं गत्वा देवं नमति।

mandiraṁ gatvā devaṁ namati.
*[After] going to the temple he pays respect to God.*

स्नानं करोति। पूजां करोति।

snānaṁ karoti. pūjāṁ karoti.
*Baths. Does puja.*

स्नानं कृत्वा पूजां करोति।

snānaṁ kṛtvā pūjāṁ karoti.
*After bathing he does puja.*

दुर्गुणं त्यजति। सज्जनः भवति।

durguṇaṁ tyajati. sajjanaḥ bhavati.
*[He] gives up bad qualities. [He] becomes a good man.*

दुर्गुणं त्यक्त्वा ...

durguṇaṁ tyaktvā ...
*After giving up bad qualities ...*

त्यजति। त्यक्त्वा।

tyajati. tyaktvā.
*Gives up. After giving up.*

दुर्गुणं त्यक्त्वा सज्जनः भवति।

durguṇaṁ tyaktvā sajjanaḥ bhavati.
*[After] giving up bad qualities he becomes a good man.*

---

इदानीं "गत्वा, पठित्वा, लिखित्वा" एतादृशशब्दान् उपयुज्य वाक्यानि वदन्तु।

idānīṁ "gatvā, paṭhitvā, likhitvā" etādṛśa-śabdān upayujya vākyāni vadantu.
*Now using such words as "after going, after reading, after writing", say (pl.) sentences.*

अहं दूरदर्शनं दृष्ट्वा क्षीरं पिबामि।

ahaṁ dūradarśanaṁ dṛṣṭvā kṣīraṁ pibāmi.
*After watching television I drink milk.*

अहं चलनचित्रं दृष्ट्वा नृत्यामि।

ahaṁ calanacitraṁ dṛṣṭvā nṛtyāmi.
*After watching a movie I dance.*

काकः नदीं गत्वा जलं पिबति।

kākaḥ nadīṁ gatvā jalaṁ pibati.
*After going to the river a crow drinks water.*

अहं विद्यालयं गत्वा पाठं पठामि।

ahaṁ vidyālayaṁ gatvā pāṭhaṁ paṭhāmi.
*After going to the school I study a lesson.*

---

*HINDI:* **Gatvā, paṭhitvā, likhitvā ...** *these words use the ending* **-ktvā**. *It is used when one action is followed by another.*

---

***SCREEN:***

**चन्द्रभुषणः कार्यलयं गत्वा कार्यं करोति।**

**candrabhuṣaṇaḥ kāryālayaṁ gatvā kāryaṁ karoti.**
***After going to the office Chandrabhushana works.***

---

सुभाषितम्

**subhāṣitam**
*Verse*

वयम् इदानीम् एकं सुभाषितं शृण्मः।

vayam idānīm ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now we [will] listen to one verse.*

सदयं हृदयं यस्य भाषितं सत्यभूषितम्।
कायः परहिते यस्य कलिस्तस्य करोति किम्।

sadayaṁ hṛdayaṁ yasya bhāṣitaṁ satya-bhūṣitam.
kāyaḥ parahite yasya kalis tasya karoti kim.

sadayam – *merciful;* hṛdayam – *heart;* yasya – *of whom;* bhāṣitam – *speech;* satya-bhūṣitam – *endowed with truth;* kāyaḥ – *body;* parahite – *for the benefit of others;* yasya – *whose;* kaliḥ – *the age of Kali;* tasya – *his;* karoti – *does;* kim– *what.*

What can the age of Kali do to the person whose heart is compassionate, whose speech is endowed with truth, whose body is used for the benefit of others?

अस्मभिः श्रुतस्य सुभाषितस्य अर्थः एवम् अस्ति।

asmabhiḥ śrutasya subhāṣitasya arthaḥ evam asti.
*Here is the meaning of the vese heard by us.*

यस्य हृदयं सदयम् अस्ति। सदयं दयापूर्णम् अस्ति।

yasya hṛdayaṁ sadayam asti. sadayaṁ dayā-pūrṇam asti.
*The person whose heart is merciful. Merciful means full of mercy.*

यस्य भाषितम् - भाषितं, वचनम् - सत्यभूषितम् अस्ति, सत्यपूर्णम् अस्ति।

yasya bhāṣitam – bhāṣitaṁ, vacanam – satya-bhūṣitam asti, satya-pūrṇam asti.
*Whose talking – talking, speaking – is endowed with truth, is ful of truth.*

यस्य शरीरं परहिते निरतम् अस्ति। कायः शरीरम्। यस्य शरीरं सर्वदा परहिते, अन्यस्य हिते निरतम् अस्ति, तादृशस्य पुरुषस्य कलिः किं करोति ? किमपि कर्तुं न शक्नोति।

yasya śarīraṁ parahite niratam asti. kāyaḥ śarīram. yasya śarīraṁ sarvadā parahite, anyasya hite niratam asti, tādṛśasya puruṣasya kaliḥ kiṁ karoti? kim api kartuṁ na śaknoti.
*The one whose body is engaged for the benefit of others. Body, body. The one whose body is always engaged for others benefit, what can Kali do to such a person? He can't do anything.*

तादृशस्य पुरुषस्य उपरि कलेः प्रभावः न भवति।

tādṛśasya puruṣasya upari kaleḥ prabhāvaḥ na bhavati.
*Kali doesn't have influence on such a person.*

---

कथा

**kathā**
*Story*

अहम् इदानीम् एकं कथां वदामि। श्रद्धपूर्वकं शृण्वन्तु।

aham idānīm ekaṁ kathāṁ vadāmi. śraddha-pūrvakaṁ śṛṇvantu.
*Now I [will] tell you one story. Listen faithfully!*

एकः भिक्षुकः अस्ति। भिक्षुकः प्रतिदिनं भिक्षटनं करोति। प्रतिगृहं गच्छति "भवती भिक्षां देहि" इति वदति।

ekaḥ bhikṣukaḥ asti. bhikṣukaḥ pratidinaṁ bhikṣaṭanaṁ karoti. pratigṛhaṁ gacchati "bhavatī bhikṣāṁ dehi" iti vadati.
*[There] is one beggar. Every day the beggar wanders around begging. He goes to each home [and] says: "Lady, give [me some] alms."*

गृहिणी भिक्षां ददाति। भिक्षारूपेण किं किं ददाति ?

अन्नं ददाति, धनं ददाति, पुरातनवस्त्रं ददाति।

भिक्षुकः भिक्षां स्वीकरोति।

gṛhiṇī bhikṣām dadāti. bhikṣā-rūpeṇa kiṁ kiṁ dadāti? annaṁ dadāti, dhanaṁ dadāti, purātana-vastraṁ dadāti. bhikṣukaḥ bhikṣām svīkaroti.
*The housewife gives the alms. What [various things] does she give as alms? She gives rice, money, old clothes. The beggar takes the alms.*

आहारः अस्ति अन्नम् अस्ति। भिक्षुकः खादति।

āhāraḥ asti annam asti. bhikṣukaḥ khādati.
*The food is, the rice is. The beggar eats [it].*

वस्त्रम् अस्ति। धरति।

vastram asti. dharati.
*[There] are clothes. [He] wears [them].*

भिक्षुकस्य गृहं नास्ति। भिक्षुकः धर्मशालायां वासनं करोति।

bhikṣukasya gṛhaṁ nāsti. bhikṣukaḥ dharma-śālāyāṁ vāsanaṁ karoti.
*The beggar has no home. The beggar lives in the home for mendicants.*

भिक्षाटन-अनन्तरं भिक्षुकः धर्मशालां गच्छति।

bhikṣāṭana-anantaraṁ bhikṣukaḥ dharma-śālāṁ gacchati.
*After wandering and begging for alms the beggar goes to the home for mendicants.*

भिक्षुकस्य समीपे एकं ताम्रपात्रम् अस्ति।

bhikṣukasya samīpe ekaṁ tāmra-pātram asti.
*Beggar has a copper pot.*

भिक्षाटन अनन्तरं धनम् अस्ति। भिक्षुकः किं करोति ?

ताम्रपात्रे स्थापयति।

bhikñāṭana anantaraṁ dhanam asti. bhikṣukaḥ kiṁ karoti? tāmra-pātre sthāpayati.
*After wondering and begging for alms he gets money. What does the beggar do? He puts [it] in the copper pot.*

आहारं खादति, धनं ताम्रपात्रे स्थापयति।

āhāraṁ khādati dhanaṁ tāmra-pātre sthāpayati.
*He eats the food, [and] he puts the money in the copper pot.*

किञ्चित् कालानन्तरम् एतत् ताम्रपात्रं पूर्णं भवति।

तदा भिक्षुकः विचारं करोति "बहु धनम् अस्ति। किं

करोमि ?" इति।

kiñcit kālānantaram etat tāmra-pātraṁ pūrṇaṁ bhavati. tadā bhikṣukaḥ vicāraṁ karoti "bahu dhanam asti. kiṁ karomi?" iti.
*A bit later this copper pot gets full. Then the beggar thinks: "[There] is a lot of money. What do I do?"*

सः चिन्तयति "अहं काशीनगरं गच्छामि,

विश्वनाथस्य दर्शनं करोमि। काशीनगरे विश्वनाथः

अस्ति। विश्वनाथस्य दर्शनं करोमि। पुण्यं

सम्पादयामि" इति भिक्षुकः चिन्तयति।

saḥ cintayati "ahaṁ kāśī-nagaraṁ gacchāmi, viśvanāthasya darśanaṁ karomi. kāśī-nagare viśvanāthaḥ asti. viśvanāthasya darśanaṁ karomi. puṇyaṁ sampādayāmi" iti bhikṣukaḥ cintayati.
*He thinks: "I [will] go to the city of Kashi, I will get Vishvanatha's (Shiva's) darshana. Shiva is in Kashi. I will get Shiva's darshana and earn piety," thus the beggar thinks.*

भिक्षुकः ताम्रपात्रं स्वीकृत्य काशीनगरं गच्छति।

bhikṣukaḥ tāmra-pātraṁ svīkṛtya kāśī-nagaraṁ gacchati.
*After wandering and begging for alms the beggar goes to the city of Kashi.*

ताम्रपात्रम् अस्ति। स्यूते ताम्रपात्रम् अस्ति।

tāmra-pātram asti. syūte tāmra-pātram asti.
*[There] is the copper pot. The copper pot is in the bag.*

ताम्रपात्रं स्वीकृत्य भिक्षुकः काशीनगरं गच्छति।

tāmra-pātraṁ svīkṛtya bhikṣukaḥ kāśī-nagaraṁ gacchati.
*Taking the copper pot the beggar goes to Kashi.*

काशीनगरे एका नदी अस्ति। का नदी जानन्ति ?

काशीनगरे गङ्गानदी अस्ति।

kāśī-nagare ekā nadī asti. kā nadī jānanti? kāśī-nagare gaṅgā-nadī asti.
*In Kashi [there] is one river. Do you know which river? River Ganga is in Kashi.*

प्रवासकरणतः भिक्षुकस्य शरीरं मलिनम् अस्ति।

भिक्षुकः चिन्तयति "अहं प्रथमं स्नानं करोमि,

अनन्तरं देवदर्शनं करोमि" इति भिक्षुकः चिन्तयति।

pravāsa-karaṇataḥ bhikṣukasya śarīraṁ malinam asti. bhikṣukaḥ cintayati "ahaṁ prathamaṁ snānaṁ karomi, anantaraṁ deva-darśanaṁ karomi" iti bhikṣukaḥ cintayati.
*Beggar's body is dirty due to traveling. The beggar thinks. "I [will] take a bath first and then go to take the audience with God," so the beggar thinks.*

किन्तु स्यूते ताम्रपात्रम् अस्ति। स्नानसमये भिक्षुकः

ताम्रपात्रं कुत्र स्थापयति ?

kintu syūte tāmra-pātram asti. snāna-samaye bhikṣukaḥ tāmra-pātraṁ kutra sthāpayati?
*But in the bag is the copper pot. Where should the beggar put the copper pot in the time of bathing?*

नदीतीरे स्थापयति चोराः नयन्ति।

nadī-tīre sthāpayati corāḥ nayanti.
*[If] he puts [it] on the river bank, the thiefs [will] take it.*

अन्यस्य हस्ते ददाति परिचयः नास्ति, विश्वासः नास्ति।

anyasya haste dadāti paricayaḥ nāsti, viśvāsaḥ nāsti.
*He [could] give it to some other hand, [but] there is no acquaintance, no reliance.*

भिक्षुकः बहु विचारं करोति, नदीतीरे सर्वत्र सिकताः

सन्ति। सिकताः। भिक्षकः सिकतासु एकं गर्तं करोति,

तत्र ताम्रपात्रं स्थापयति। उपरि सिकतां प्रसारयति।

bhikṣukaḥ bahu vicāraṁ karoti, nadī-tīre sarvatra sikatāḥ santi. sikatāḥ. bhikṣakaḥ sikatāsu ekaṁ gartaṁ karoti, tatra tāmra-pātraṁ sthāpayati. upari sikatāṁ prasārayati.
*The beggar thinks a lot, on the river bank [there] is sand everywhere. Sand. The beggar makes one hole in the sand, there he puts the copper pot. He spreads the sand on top.*

पुनः चिन्तयति "स्नानानन्तरं अहं कथं जानामि

ताम्रपात्रं कुत्र अस्ति ?" इति।

punaḥ cintayati "snānānantaram ahaṁ kathaṁ jānāmi tāmra-pātraṁ kutra asti?" iti.
*He thinks again: "After the bathing how [will] I know, where is the copper pot?"*

सिकतानां वर्णः सर्वत्र समानवर्णः। पुनः चिन्तयति,

एकम् उपायं करोति।

sikatānāṁ varṇaḥ sarvatra samāna-varṇaḥ. punaḥ cintayati, ekam upāyaṁ karoti.
*The colour of the sand is the same everywhere. He thinks again, [and] he finds a remedy.*

सिकताभिः सः एकं शिवलिङ्गं करोति। नमस्कारं

करोति, पूजां करोति, नमस्कारं करोति।

sikatābhiḥ saḥ ekaṁ śiva-liṅgaṁ karoti. namaskāraṁ karoti, pūjāṁ karoti, namaskāraṁ karoti.
*He makes Shiva lingam with the sand. He pays respects, does puja, pays respects.*

निश्चिन्ततया स्नानार्थं गच्छति। "चिन्ता नास्ति।

शिवलिङ्गम् अस्ति, अधः ताम्रपात्रम् अस्ति" इति

भिक्षुकः चिन्तयति।

niścintatayā snānārthaṁ gacchati. "cintā nāsti! śiva-liṅgam asti, adhaḥ tāmra-pātram asti" iti bhikṣukaḥ cintayati.
*By so deciding he goes bathing. "Nothing to worry about! [There] is Shiva-lingam, the cooper pot is underneath," thus thinks the beggar.*

किञ्चित् कालानन्तरं तत्र अन्य-एक-यात्रिकः आगच्छति। सः पश्यति। नदीतीरे एकं शिवलिङ्गम् अस्ति। नद्याम् एकः स्नानं करोति।

kiñcit kālānantaraṁ tatra anya-eka-yātrikaḥ āgacchati. saḥ paśyati. nadī-tīre ekaṁ śiva-liṅgam asti. nadyām ekaḥ snānaṁ karoti.
*A little later one other pilgrim comes. He looks. On the river bank [there] is one Shiva-lingam. One [person] is taking a bath in the river.*

सः यात्रिकः चिन्तयति "अहो, काशीनगरे एका पधती अस्ति। प्रथमं शिवलिङ्गनिर्माणम्, अनन्तरं गण्गास्नानम्" इति यात्रिकः चिन्तयति।

saḥ yātrikaḥ cintayati "aho, kāśī-nagare ekā padhatī asti. prathamaṁ śiva-liṅga-nirmāṇam, anantaraṁ gaṅgā-snānam" iti yātrikaḥ cintayati.
*That pilgrim thinks. "Oh, there is a custom in Kashi. First forming a Shiva-lingam, then bathing in Ganga," the pilgrim thinks.*

सः अपि एकं शिवलिङ्गं करोति, स्नानार्थं गच्छति। बहु जनाः आगच्छन्ति, सर्वे अपि एकं शिवलिङ्गं कुर्वन्ति, स्नानार्थं गच्छन्ति।

saḥ api ekaṁ śiva-liṅgaṁ karoti, snānārthaṁ gacchati. bahu janāḥ āgacchanti, sarve api ekaṁ śiva-liṅgaṁ kurvanti, snānārthaṁ gacchanti.
*He makes one Shiva-lingam as well, [and] goes for bathing. Many people come, all of them also make one Shiva lingam [and] go for bathing.*

पश्यन्तु - जनाः अत्र शिवलिङ्गं कुर्वन्ति स्नानार्थं गच्छन्ति।

paśyantu – janāḥ atra śiva-liṅgaṁ kurvanti, snānārthaṁ gacchanti.
*Look – people here make Shivalingam [and] go for a bath.*

किञ्चित् कालानन्तरं भिक्षुकस्य स्नानं समाप्तं भवति। भिक्षुकः नदीतीरम् आगच्छति, पश्यति सर्वत्र शिवलिङ्गानि। अत्र पश्यति शिवलिङ्गं, तत्र पश्यति शिवलिङ्गम्। सर्वत्र शिवलिङ्गानि सन्ति।

kiñcit kālānantaraṁ bhikṣukasya snānaṁ samāptaṁ bhavati. bhikṣukaḥ nadī-tīram āgacchati, paśyati, sarvatra śiva-liṅgāni. atra paśyati śiva-liṅgaṁ, tatra paśyati śiva-liṅgam. sarvatra śiva-liṅgāni santi.
*A little later the beggar's bathing is over. The beggar comes to the river bank [and] sees Shiva-lingam everywhere. Here he sees Shiva-lingam, there he sees Shiva-lingam. Everywhere are Shiva-lingams.*

भिक्षुकः स्वेन कृतं शिवलिङ्गं ज्ञातुं न शक्नोति। तस्य ताम्रपात्रं नष्टं भवति।

bhikṣukaḥ svena kṛtaṁ śiva-liṅgaṁ jñātuṁ na śaknoti. tasya tāmra-pātraṁ naṣṭaṁ bhavati.
*The beggar does not recognize the Shiva-lingam made by himself. His copper pot is lost.*

तदा भिक्षुकः कारणं चिन्तयति। बिक्षुकः बहु बुद्धिमान् अस्ति। सः कारणं चिन्तयति।

tadā bhikṣukaḥ kāraṇaṁ cintayati. bikṣukaḥ bahu buddhimān asti. saḥ kāraṇaṁ cintayati.
*Then the beggar thinks about the reason. The beggar is very smart. He thinks about the reason.*

लोकः गतानुगतिकः अस्ति। एकः गच्छति, अन्यः अनुसरणं करोति। कारणं न चिन्तयति। तद् कारणतः मम ताम्रपात्रं नष्टम् अभवत्" इति भिक्षुकः चिन्तयति, एकं श्लोकं वदति।

"lokaḥ gatānugatikaḥ asti. ekaḥ gacchati, anyaḥ anusaraṇaṁ karoti. kāraṇaṁ na cintayati. tad kāraṇataḥ mama tāmra-pātraṁ naṣṭam abhavat" iti bhikṣukaḥ cintayati, ekaṁ ślokaṁ vadati.
*"The public goes and follows. One goes, another follows. He does not think about the reason. That is why my copper pot was lost," the beggar thinks [and] recites one verse.*

गतानुगतिको लोकः    न लोकः पारमार्थिकः।

गङ्गासैकतलिङ्गेन    नष्टं मे ताम्रभाजनम्।

gatānugatiko lokaḥ   na lokaḥ pāramārthikaḥ
gaṅgā-saikata-liṅgena   naṣṭaṁ me tāmra-bhājanam
*The public goes and follows. The public is not after the ultimate reality. By the lingam from the dunes of Ganga my copper vessel was lost.*

इति वदति।

iti vadati.
*Thus he says.*

कथायाः अर्थः ज्ञातवन्तः वा ?

kathāyāḥ arthaḥ jñātavantaḥ vā?
*Have you understood the story?*

आम्। ज्ञातवन्तः।

ām. jñātavantaḥ.
*Yes, we understood.*

धन्यवादः।

dhanyavādaḥ.
*Thank you.*

नमो नमः।

namo namaḥ.
*Respects.*

# LESSON 19 – OVERVIEW

*In lesson nineteen you will do further practice of* **ktvā-pratyāya** *(ending* **-tvā,** *forming indeclinable participle). You will learn some* **bandhu-vācaka-śabdān** *(words expressing family ties), most of which were used already in previous lessons (check the glossary for the meanings of new words). You will learn some new adjectives for opposites:*

| | | |
|---|---|---|
| पुरातन | purātanam | *old* |
| नूतन | nūtanam | *new* |
| किञ्चित् | kiñcit | *a little* |
| बहु | bahu | *a lot* |
| ह्रस्वः | hrasvaḥ | *short* |
| दीर्घः | dīrghaḥ | *long* |
| स्थूलः | sthūlaḥ | *stout* |
| कृशः | kṛśaḥ | *lean* |

# Lesson 19

---

*HINDI: In the previous lesson we learned about* **ktvā-pratyaya**. *In this lesson we will do some further practice.*

---

नमो नमः।

namo namaḥ.
*Salutations.*

संस्कृतभाषाशिक्षणे भवतां हार्दं स्वागतम्।

saṁskṛta-bhāṣā-śikṣaṇe bhavatāṁ hārdaṁ svāgatam.
*Heartly welcome to the study of Sanskrit language.*

वयं सम्भाषणस्य अभ्यासं कुर्मः।

vayaṁ sambhāṣaṇasya abhyāsaṁ kurmaḥ.
*We make conversation exercise.*

पूर्वतनपाथे "त्तवा" इत्यस्य अभ्यसं कृतवन्तः। तस्य पुनः स्मरणं कुर्मः।

pūrvatana-pāthe "ktvā" ityasya abhyasaṁ kṛtavantaḥ. tasya punaḥ smaraṇaṁ kurmaḥ.
*In the previous lesson we did practice of the ending "ktvā" in this lesson we will remember it again.*

अहं वाक्यद्वयं वदामि भवन्तः एकं वाक्यं कुर्वन्तु।
उदाहरणार्थं बालकः शालां गच्छति। पुस्तकं पठति।
बालकः शालां गत्वा पुस्तकं पठति। ज्ञातं वा ?

ahaṁ vākyadvayaṁ vadāmi bhavantaḥ ekaṁ vākyaṁ kurvantu. udāharaṇārthaṁ bālakaḥ śālāṁ gacchati. pustakaṁ paṭhati. bālakaḥ śālāṁ gatvā pustakaṁ paṭhati. jñātaṁ vā?
*I say two sentences, you make one sentence. For example: boy goes to the school. He reads a book. After boy goes to the scholl, he reads a book. You (pl.) understood?*

ज्ञातम्।

jñātam.
*We understood.*

सः भजनं करोति, भोजनं करोति।

saḥ bhajanaṁ karoti, bhojanaṁ karoti.
*He worships, he eats.*

सः भजनं कृत्वा भोजनं करोति।

saḥ bhajanaṁ kṛtvā bhojanaṁ karoti.
*After worshiping he eats.*

सज्जनः श्लोकं पठति, आहारं स्वीकरोति।

sajjanaḥ ślokaṁ paṭhati, āhāraṁ svīkaroti.
*Saintly man reads a verse, he takes food.*

सज्जनः श्लोकं पठित्वा आहारं स्वीकरोति।

sajjanaḥ ślokaṁ paṭhitvā āhāraṁ svīkaroti.
*After saintly man reads a verse, he takes food.*

अहं फलं खादितवान्, जलं पीतवान्।

ahaṁ phalaṁ khāditavān, jalaṁ pītavān.
*I ate a fruit, I drank water.*

अहं फलं खादित्वा जलं पीतवान्।

ahaṁ phalaṁ khāditvā jalaṁ pītavān.
*After eating a fruit I drank water.*

सा पत्रं लिखितवती, प्रेषितवती।

sā patraṁ likhitavatī, preṣitavatī.
*She wrote a letter, she sent [it].*

सा पत्रं लिखित्वा प्रेषितवती।

sā patraṁ likhitvā preṣitavatī.
*After she wrote a letter she sent [it].*

भवान् धनं ददातु, पुस्तकं नयतु।

bhavān dhanaṁ dadātu, pustakaṁ nayatu.
*You give money, take away the book.*

भवान् धनं दत्त्वा पुस्तकं नयतु।

bhavān dhanaṁ dattvā pustakaṁ nayatu.
*After giving the money, take away the book.*

वयं पठामः, लिखामः।

vayaṁ paṭhāmaḥ, likhāmaḥ.
*We read, we write.*

वयं पठित्वा लिखामः।

vayaṁ paṭhitvā likhāmaḥ.
*After reading we write.*

सः स्नानं करोति, भोजनं करोति।

saḥ snānaṁ karoti, bhojanaṁ karoti.
*He baths, he eats.*

सः स्नानं कृत्वा भोजनं करोति।

saḥ snānaṁ kṛtvā bhojanaṁ karoti.
*After bathing, he eats.*

सः धनं ददाति, पुस्तकं स्वीकरोति।

saḥ dhanaṁ dadāti, pustakaṁ svīkaroti.
*He gives money, receives a book.*

सः धनं दत्त्वा पुस्तकं स्वीकरोति।

saḥ dhanaṁ dattvā pustakaṁ svīkaroti.
*After giving money he receives a book.*

सः क्रीडति, पठति।

saḥ krīḍati, paṭhati.
*He plays, studies.*

सः क्रीडित्वा पठति।

saḥ krīḍitvā paṭhati.
*After playing he studies.*

सः श्लोकं वदति, उपविशति।

saḥ ślokaṁ vadati, upaviśati.
*He recites a verse, sits down.*

सः श्लोकम् उक्त्वा उपविशति।

saḥ ślokam uktvā upaviśati.
*After reciting a verse he sits down.*

सः चित्रं पश्यति, सन्तुष्टः भवति।

saḥ citraṁ paśyati, santuṣṭaḥ bhavati.
*He looks at a picture, he is satisfied.*

सः चित्रं दृष्ट्वा सन्तुष्टः भवति।

saḥ citraṁ dṛṣṭvā santuṣṭaḥ bhavati.
*After looking at picture, he is satisfied.*

---

इदानीं ईदृश वाक्यानाम् अभ्यासं कुर्मः। यथा – बालकः विद्यालयं गत्वा पुस्तकं पठित्वा गृहम् आगच्छति। वाक्ये क्त्वाद्वयम् अस्ति। तदृश वाक्यं वदन्ति वा ? भवान् वदतु।

idānīm īdṛśa vākyānām abhyāsaṁ kurmaḥ. yathā – bālakaḥ vidyālayaṁ gatvā pustakaṁ paṭhitvā gṛham āgacchati. vākye ktvā-dvayam asti. tadṛśa vākyaṁ vadanti vā? bhavān vadatu!
*Now we make exercise with such sentences. Like – after going to school and reading a book the boy comes home. There are two* ktvā *in the sentence. Would you (pl.) say that kind of sentences? You say!*

अहं स्नानं कृत्वा पूजां कृत्वा विद्यालयं गच्छामि।

ahaṁ snānaṁ kṛtvā pūjāṁ kṛtvā vidyālayaṁ gacchāmi.
*After bathing and doing puja I go to school.*

अहं मन्दिरं गत्वा नमस्कारं कृत्वा गृहम् आगच्छामि।

ahaṁ mandiraṁ gatvā namaskāraṁ kṛtvā gṛham āgacchāmi.
*After going to the temple and paying obeisances I come home.*

अहं क्रीडित्वा गृहं गत्वा मन्दिरं गच्छामि।

ahaṁ krīḍitvā gṛhaṁ gatvā mandiraṁ gacchāmi.
*After playing and going home I go to the temple.*

शिशुः पतित्वा रोदनं कृत्वा गृहम् आगच्छति।

śiśuḥ patitvā rodanaṁ kṛtvā gṛham āgacchati.
*After falling and crying the child comes home.*

अहं फलं **खात्वा** जलं पीत्वा ...

ahaṁ phalaṁ **khātvā** jalaṁ pītvā ...
*After eating a fruit, drinking water, I ...* **(Mistake!)**

फलं खादित्वा ...

phalaṁ khāditvā ...
*After eating a fruit ...* **(Teacher corrects!)**

फलं खादित्वा जलं पीत्वा शालां गच्छामि ।

phalaṁ khāditvā jalaṁ pītvā śālāṁ gacchāmi.
*After eating a fruit and drinking water I go to school.*

अहम् आपणं गत्वा धनं दत्त्वा पुस्तकं स्वीकरोमि ।

aham āpaṇaṁ gatvā dhanaṁ dattvā pustakaṁ svīkaromi.
*After going to the shop and giving the money I take a book.*

माता स्नानं कृत्वा पूजां कृत्वा आहारं स्वीकरोति ।

mātā snānaṁ kṛtvā pūjāṁ kṛtvā āhāraṁ svīkaroti.
*After bathing and doing puja mother takes food.*

सः पठित्वा लिखित्वा शालां गच्छति ।

saḥ paṭhitvā likhitvā śālāṁ gacchati.
*After reding and writing he goes to school.*

अहं चित्रमन्दिरं गत्वा चित्रं दृष्ट्वा गृहम् आगच्छामि ।

ahaṁ citramandiraṁ gatvā citraṁ dṛṣṭvā gṛham āgacchāmi.
*After going to the cinema and watching a movie I go home.*

अहं सङ्गीतं श्रुत्वा ज्ञात्वा सन्तोषम् अनुभवामि ।

ahaṁ saṅgītaṁ śrutvā jñātvā santoṣam anubhavāmi.
*After listening to a song and knowing it I feel satisfied.*

अहं प्रश्नं पृष्ट्वा उत्तरं ज्ञात्वा लिखामि ।

ahaṁ praśnaṁ pṛṣṭvā uttaraṁ jñātvā likhāmi.
*After asking the question and getting to know the answer I write.*

इदानीं वयं मिलित्वा एकैकं वाक्यं दीर्घं वदामः ।

idānīṁ vayaṁ militvā ekaikaṁ vākyaṁ dīrghaṁ vadāmaḥ.
*Now after joining together we say a long sentence.*

भवान् आरम्भं करोतु । एकं "क्त्वा" भवति ।

bhavān ārambhaṁ karotu. ekaṁ "ktvā" bhavati.
*You begin. There is one "ktvā".*

अहं गृहं गत्वा स्यूतं स्थापयित्वा क्षीरं पीत्वा गृहपाठं लिखित्वा क्रीडित्वा ??? कृत्वा भोजनं करोमि ।

ahaṁ gṛhaṁ gatvā syūtaṁ sthāpayitvā kṣīraṁ pītvā gṛhapāthaṁ likhitvā krīḍitvā ??? kṛtvā bhojanaṁ karomi.
*After going home and putting down the bag and drinking milk and writting homework and playing and doing ??? I eat.*

इदानीम् एकं वाक्यं समाप्तम् । पुनः अन्यस्य वाक्यस्य आरम्भं करोति वा ?

idānīm ekaṁ vākyaṁ samāptam. punaḥ anyasya vākyasya ārambhaṁ karoti vā?
*Now one sentence is finished. Would you begin again with another sentence?*

अहम् उद्यानं गत्वा विहारं कृत्वा चलनचित्रं दृष्ट्वा भोजनालयं गत्वा चायं पीत्वा धनं दत्त्वा गृहं गच्छामि ।

aham udyānaṁ gatvā vihāraṁ kṛtvā calanacitraṁ dṛṣṭvā bhojanālayaṁ gatvā cāyaṁ pītvā dhanaṁ dattvā gṛhaṁ gacchāmi.
*After going to the park and having leisure and seeing a movie and going to the restaurant and drinking tea and giving money I go home.*

उत्तमम् । उत्तमवाक्यम् ।

uttamam. uttama-vākyam.
*Very good. Very good sentence.*

भवान् आरम्भं करोतु अन्यस्य वाक्यस्य ।

bhavān ārambhaṁ karotu anyasya vākyasya.
*You begin another sentence.*

अहं देवालयं गत्वा पुष्पम् आपयित्वा पूजां कृत्वा नीलजनं??? कृत्वा देवं नत्वा प्रसादं खादित्वा गृहम् आगच्छामि ।

ahaṁ devālayaṁ gatvā puṣpam āpayitvā pūjāṁ kṛtvā nīlajanaṁ??? kṛtvā devaṁ natvā prasādaṁ khāditvā gṛham āgacchāmi.
*After going to temple and obtaining flowers and doing puja and ??? bowing to God and eating prasadam I come home.*

---

इदानीं बन्धुवाचकशब्दान् जानीमः ।

idānīṁ bandhu-vācaka-śabdān jānīmaḥ.
*Now we will learn words expressing family ties.*

रामस्य पिता दशरथः ।

rāmasya pitā daśarathaḥ.
*Rama'a father is Dasharatha.*

रामस्य माता कौशल्या ।

rāmasya mātā kauśalyā.
*Rama's mother is Kaushalya.*

मम पिता गणपतिः ।

mama pitā gaṇapatiḥ.
*My father is Ganapati.*

भवतः पिता कः ?

bhavataḥ pitā kaḥ?
*Who is your father?*

मम पिता श्री राम् रेडी ।

mama pitā śrī rām reḍī.
*My father is Shri Ram Redi.*

भवतः पिता कः ?

bhavataḥ pitā kaḥ?
*Who is your father?*

मम पिता अनिल् कुमारः ।

mama pitā anil kumāraḥ.
*My father Anil Kumara.*

भवत्याः पिता कः ?

bhavatyāḥ pitā kaḥ?
*Who is your father?*

मम पिता शङ्करः ।

mama pitā śaṅkaraḥ.
*My father is Shankara.*

भवत्याः पिता कः ?

bhavatyāḥ pitā kaḥ?
*Who is your father?*

मम पिता चेनगङ्गय । ???

mama pitā cenagaṅgaya???.
*My father is Cenagangaya???*

भवत्याः माता का ?

bhavatyāḥ mātā kā?
*Who is your mother?*

मम माता निर्मला ।

mama mātā nirmalā.
*My mother is Nirmala.*

भवत्याः माता का ?

bhavatyāḥ mātā kā?
*Who is your mother?*

मम माता उषा ।

mama mātā uṣā.
*My mother is Usha.*

भवतः माता का ?

bhavataḥ mātā kā?
*Who is your mother?*

मम माता मङ्गला ।

mama mātā maṅgalā.
*My mother is Mangala.*

भवतः माता का ?

bhavataḥ mātā kā?
*Who is your mother?*

मम माता मञ्जुरा ।

mama mātā mañjurā.
*My mother is Manjura.*

मम माता पार्वती ।

mama mātā pārvatī.
*My mother is Parvati.*

भवतः माता का ?

bhavataḥ mātā kā?
*Who is your mother?*

मम माता कलवणी ।

mama mātā kalavaṇī.
*My mother is Kalavani.*

द्रौपदी द्रुपदराजस्य पुत्री ।

draupadī drupada-rājasya putrī.
*Draupadi is daughter of king Drupada.*

इदानीं का कस्य पुत्री इति वदन्ति वा ? वदतु ।

idānīṁ kā kasya putrī iti vadanti vā? vadatu!
*Now would you say who is whose daughter? Say!*

सीता जनकस्य पुत्री ।

sītā janakasya putrī.
*Sita is Janaka's daughter.*

दाक्षायनि दक्षस्य पुत्री ।

dākṣāyani dakṣasya putrī.
*Dakshayani is Daksha's daughter.*

पार्वती पर्वतराजस्य पुत्री ।

pārvatī parvata-rājasya putrī.
*Parvati is king Parvata's daughter.*

लक्ष्मिः समुद्रराजस्य पुत्री ।

lakṣmiḥ samudra-rājasya putrī.
*Lakshmi is king Samudra's daughter.*

इन्दिरा गान्धी नेहेरुमहोदयस्य पुत्री ।

indirā gāndhī neheru-mahodayasya putrī.
*Indira is sir Gandhi Nehru's daughter.*

लवस्य पिता रामः ।

lavasya pitā rāmaḥ.
*Rama is Lava's father.*

लवस्य पितामहः दशरथः ।

lavasya pitāmahaḥ daśarathaḥ.
*Lava's grandfather is Dasharatha.*

लवस्य पितामही कौशल्या ।

lavasya pitāmahī kauśalyā.
*Lava's grandmother is Kaushalya.*

भवतः पितामहः अस्ति वा ?

bhavataḥ pitāmahaḥ asti vā?
*Do you have grandfather?*

मम पितामहः नास्ति ।

mama pitāmahaḥ nāsti.
*I don't have grandfather.*

भवत्याः पितामही अस्ति वा ?

bhavatyāḥ pitāmahī asti vā?
*Do you have grandmother?*

मम पितामही अस्ति ।

mama pitāmahī asti.
*I have grandmother.*

पाण्डुमहाराजस्य पुत्रः अर्जुनः । अर्जुनस्य पुत्रः अभिमन्युः । पाण्डुराजस्य पौत्रः अभिमन्युः । ज्ञातं वा ?

pāṇḍu-mahārājasya putraḥ arjunaḥ. arjunasya putraḥ abhimanyuḥ. pāṇḍu-rājasya pautraḥ abhimanyuḥ. jñātaṁ vā?
*Arjuna is king Pandu's son. Abhimanyu is Arjuna's son. Abhimanyu is king Pandu's grandson. You (pl.) understand?*

पाण्डुमहाराजस्य पुत्रः भीमः । भीमस्य पुत्रः घटोत्कचः । पाण्डुराजस्य पौत्रः घटोत्कचः ।

pāṇḍu-mahārājasya putraḥ bhīmaḥ. bhīmasya putraḥ ghaṭotkacaḥ. pāṇḍu-rājasya pautraḥ ghaṭotkacaḥ.
*Bhima is king Pandu's son. Ghatotkaca is Bhima's son. Ghatotkaca is king Pandura's grandson.*

पुत्रस्य पुत्रः पौत्रः ।

putrasya putraḥ pautraḥ.
*Son's son is grandson.*

पुत्रस्य पुत्री पौत्री ।

putrasya putrī pautrī.
*Son's daughter is granddaughter.*

लक्ष्मणस्य अग्रजः रामः । भरतस्य अग्रजः लक्ष्मणः ।

lakṣmaṇasya agrajaḥ rāmaḥ. bharatasya agrajaḥ lakṣmaṇaḥ.
*Rama is Lakshmana's elder brother. Lakshmana is Bharata's elder brother.*

अर्जुनस्य अग्रजः भीमः । भीमस्य अग्रजः युधिष्ठिरः ।

arjunasya agrajaḥ bhīmaḥ. bhīmasya agrajaḥ yudhiṣṭhiraḥ.
*Bhima is Arjuna's elder brother. Yudhishthira is Bhima's elder brother.*

रामस्य अनुजः लक्ष्मणः ।

rāmasya anujaḥ lakṣmaṇaḥ.
*Lakshmana is Rama's younger brother.*

रावणस्य अनुजा शूर्पनखा ।

rāvaṇasya anujā śūrpanakhā.
*Shurpanakha is Ravana's younger sister.*

दुर्योधनस्य अनुजा दुःशला ।

duryodhanasya anujā duḥśalā.
*Duhshala is Duryodhana's younger sister.*

भवतः अग्रजः अस्ति वा ?

bhavataḥ agrajaḥ asti vā?
*Do you have elder brother?*

मम अग्रजः अस्ति ।

mama agrajaḥ asti.
*I have elder brother.*

अग्रजस्य नाम किम् ?

agrajasya nāma kim?
*What is elder brother's name?*

मम अग्रजस्य नाम अजयः ।

mama agrajasya nāma ajayaḥ.
*Ajaya is my elder brother's name.*

भवतः अग्रजः अस्ति वा ?

bhavataḥ agrajaḥ asti vā?
*Do you have elder brother?*

मम अग्रजः नास्ति ।

mama agrajaḥ nāsti.
*I don't have elder brother.*

भवतः अग्रजः अस्ति वा ?

bhavataḥ agrajaḥ asti vā?
*Do you have elder brother?*

मम अग्रजः नास्ति ।

mama agrajaḥ nāsti.
*I don't have elder brother.*

भवत्याः अग्रजः अस्ति वा ?

bhavatyāḥ agrajaḥ asti vā?
*Do you have elder brother?*

मम अग्रजः अस्ति ।

mama agrajaḥ asti.
*I have elder brother.*

अग्रजस्य नाम किम् ?

agrajasya nāma kim?
*What is elder brother's name?*

मम अग्रजस्य **नामः** गुरुप्रसादः ।

mama agrajasya **nāmaḥ** guruprasādaḥ.
*My elder brother's name is Guruprasada.* **(Mistake!)**

अग्रजस्य **नाम** गुरुप्रसादः ।

agrajasya **nāma** guruprasādaḥ.
*Elder brother's name is Guruprasada.* **(Teacher corrects!)**

मम अग्रजस्य नाम गुरुप्रसादः ।

mama agrajasya nāma guruprasādaḥ.
*My elder brother's name is Guruprasada.*

भव्त्याः अग्रजस्य नाम किम् ?

bhavtyāḥ agrajasya nāma kim?
*What is your elder brother's name?*

मम अग्रजस्य नाम तेजसः ।

mama agrajasya nāma tejasaḥ.
*My elder brother's name is Tejasa.*

---

*HINDI: About the words used for the relatives.*

---

युतकम् । पुरातनयुतकम् । नूतनयुतकम् ।

yutakam. purātana-yutakam. nūtana-yutakam.
*Shirt. Old shirt. New shirt.*

पुरातनपुस्तकम् । नूतनपुस्तकम् ।

purātana-pustakam. nūtana-pustakam.
*Old book. New book.*

पुरातनघटी । नूतनघटी ।

purātana-ghaṭī. nūtana-ghaṭī.
*Old watch. New watch.*

मम गृहे नूतनकर्यानम् अस्ति ।

mama gṛhe nūtana-karyānam asti.
*In my house [there] is new car.*

भवतः गृहे किं नूतनम् अस्ति ?

bhavataḥ gṛhe kiṁ nūtanam asti?
*What is new in your house?*

मम गृहे नूतनं दूरदर्शनम् अस्ति ।

mama gṛhe nūtanaṁ dūradarśanam asti.
*In my house [there] is new television.*

मम गृहे नूतना दूरवाणी अस्ति ।

mama gṛhe nūtanā dūravāṇī asti.
*In my house [there] is new telephone.*

मम गृहे नूतनं सङ्गणकम् अस्ति ।

mama gṛhe nūtanaṁ saṅgaṇakam asti.
*In my house [there] is new computer.*

मम गृहं नूतनम् ।

mama gṛhaṁ nūtanam.
*My house is new.*

मम कङ्कणं नूतनम् अस्ति ।

mama kaṅkaṇaṁ nūtanam asti.
*My bracelet is new.*

मम घटी नूतना अस्ति ।

mama ghaṭī nūtanā asti.
*My watch is new.*

एषा मम नूतना सखी ।

eṣā mama nūtanā sakhī.
*She is my new girlfriend.*

मम घटी पुरातनघटी ।

mama ghaṭī purātana-ghaṭī.
*My watch is old.*

मम घटी अपि पुरातनघटी ।

mama ghaṭī api purātana-ghaṭī.
*My watch is also old.*

भवत्याः घटी अपि पुरातनघटी ।

bhavatyāḥ ghaṭī api purātana-ghaṭī.
*Your watch is also old.*

मम गृहं पुरातनगृहम् ।

mama gṛhaṁ purātana-gṛham.
*My house is old.*

एतद् पुरातनकरवस्त्रम् ।

etad purātana-karavastram.
*This is an old handkercief.*

एषा पुरातनलेखनी ।

eṣā purātana-lekhanī.
*This is an old pen.*

भवतः लेखनी नूतनलेखनी वा पुरातनलेखनी वा ?

bhavataḥ lekhanī nūtana-lekhanī vā purātana-lekhanī vā?
*Is your pen new or old?*

मम लेखनी नूतनलेखनी ।

mama lekhanī nūtana-lekhanī.
*My pen is new.*

भवत्याः हारः नूतनहारः वा ?

bhavatyāḥ hāraḥ nūtana-hāraḥ vā?
*Is your necklace new?*

आम् । मम हारः नूतनहारः ।

ām. mama hāraḥ nūtana-hāraḥ.
*Yes. My necklace is new.*

भवत्याः वस्त्रं नूतनवस्त्रं वा ?

bhavatyāḥ vastraṁ nūtana-vastraṁ vā?
*Is your dress new?*

आम् । मम वस्त्रं नूतनवस्त्रम् ।

ām. mama vastraṁ nūtana-vastraṁ.
*Yes. My dress is new.*

भवत्याः घटी नूतनघटी वा पुरातनघटी वा ।

bhavatyāḥ ghaṭī nūtana-ghaṭī vā purātana-ghaṭī vā?
*Is your watch new or old?*

मम घटी नूतनघटी ।

mama ghaṭī nūtana-ghaṭī.
*My watch is new.*

---

***SCREEN:***

पुरातनम् – नूतनम् **purātanam – nūtanam** ***Old - new***

---

*HINDI: These two words have oposite meanings, which we already know.*

---

चषके किञ्चिद् जलम् अस्ति ।

caṣake kiñcid jalam asti.
*In the cup [there] is a little water.*

कूप्यां बहु जलम् अस्ति ।

kūpyāṁ bahu jalam asti.
*In the cup [there] is a lot of water.*

अहं किञ्चिद् जलं पिबामि ।

ahaṁ kiñcid jalaṁ pibāmi.
*I drink a little water.*

जलम् इच्छति वा ?

jalam icchati vā?
*Do you want water?*

न इच्छति ।

na **icchati**.
*I don't want.* ***(Mistake!)***

किञ्चिद् ।

kiñcid.
*A little.*

भवती किञ्चिद् जलं पिबति वा, बहु जलं पिबति वा ?

bhavatī kiñcid jalaṁ pibati vā, bahu jalaṁ pibati vā?
*Do you [want to] drink a little or a lot of water?*

किञ्चिद् जलं पिबामि ।

kiñcid jalaṁ pibāmi.
*I drink a little water.*

सः किञ्चिद् जलं पिबति वा, बहु जलं पिबति वा ?

saḥ kiñcid jalaṁ pibati vā, bahu jalaṁ pibati vā?
*Does he [want to] drink a little water or a lot of water?*

किञ्चिद् जलम् ।

kiñcid jalam.
*A little.*

अहं बहु अन्नं खादामि ।

ahaṁ bahu annaṁ khādāmi.
*I eat a lot of rice.*

एषा बहु क्रीडति ।

eṣā bahu krīḍati.
*She plays a lot.*

अद्य बहु गृहपाठः अस्ति ।

adya bahu gr̥hapāṭhaḥ asti.
*Today [there] is a lot of homework.*

अहं बहु वदामि ।

ahaṁ bahu vadāmi.
*I speak a lot.*

अहं बहु खादामि, किञ्चित् कार्यं करोमि ।

ahaṁ bahu khādāmi, kiñcit kāryaṁ karomi.
*I eat a lot, [and] work little.*

अहं बहु लिखामि, किञ्चित् खादामि ।

ahaṁ bahu likhāmi, kiñcit khādāmi.
*I write a lot, [and] eat little.*

अहं बहु लिखामि, किञ्चिद् वदामि ।

ahaṁ bahu likhāmi, kiñcid vadāmi.
*I write a lot, I say a little.*

समुद्रे बहु जलम् अस्ति । नद्यां बहु जलम् अस्ति ।

samudre bahu jalam asti. nadyāṁ bahu jalam asti.
*In the sea [there] is a lot of water. In the river [there] is a lot of water.*

नगरे बहु जनाः सन्ति ।

nagare bahu janāḥ santi.
*In the city are many people.*

मम गृहे बहु जनाः सन्ति ।

mama gr̥he bahu janāḥ santi.
*In my house [there] are many people.*

मम कोषे बहु धनम् अस्ति ।

mama koṣe bahu dhanam asti.
*In my pocket [there] is a lot of money.*

---

***SCREEN:***

**बहु – किञ्चित् bahu kiñcit *a lot - a little***

---

*HINDI: A lot and little is the meaning of these two words.*

---

एषः दण्डः ह्रस्वः अस्ति। एषः दण्डः दीर्घः अस्ति।

eṣaḥ daṇḍaḥ hrasvaḥ asti. eṣaḥ daṇḍaḥ dīrghaḥ asti.
*This stick is short. This stick is long.*

ह्रस्वः अस्ति। दीर्घः अस्ति।

hrasvaḥ asti. dīrghaḥ asti.
*[It] is short. [It] is long.*

रज्जुः ह्रस्वा अस्ति।

rajjuḥ hrasvā asti.
*The rope is short.*

रज्जुः दीर्घा अस्ति।

rajjuḥ dīrghā asti.
*The rope is long.*

एषा रज्जुः ह्रस्वा अस्ति।

eṣā rajjuḥ hrasvā asti.
*This rope is short.*

एषा रज्जुः दीर्घा अस्ति।

eṣā rajjuḥ dīrghā asti.
*This rope is long.*

एतस्याः वेणी दीर्घा अस्ति। एतस्याह् वेणी ह्रस्वा अस्ति।

etasyāḥ veṇī dīrghā asti. etasyāh veṇī hrasvā asti.
*Her braid of hair is long. Her braid of hair is short.*

कस्याः वेणी दीर्घा अस्ति ?

kasyāḥ veṇī dīrghā asti?
*Who's braid of hair is long?*

मम वेणी दीर्घा अस्ति।

mama veṇī dīrghā asti.
*My braid of hair is long.*

कस्याः नासिका दीर्घा अस्ति ?

kasyāḥ nāsikā dīrghā asti?
*Who's nose is long?*

एतस्याः नासिका दीर्घा अस्ति।

etasyāḥ nāsikā dīrghā asti.
*Her nose is long.*

किं किं दीर्घम् अस्ति ?

kiṁ kiṁ dīrgham asti.
*What (various things) are long?*

गङ्गानदी दीर्घा अस्ति।

gaṅgā-nadī dīrghā asti.
*River Ganga is long.*

महात्मागान्धीजीमार्गः दीर्घः अस्ति।

mahātmā-gāndhījī-mārgaḥ dīrghaḥ asti.
*Mahatma Gandhi Road is long.*

दण्डदीपं दीर्घा अस्ति।

daṇḍadī**paṁ** dīrghā asti.
*Tube bulb is long.* ***(Mistake!)***

दण्डदीपः दीर्घः अस्ति।

daṇḍadī**paḥ** dīrghaḥ asti.
*Tube bulb is long.* ***(Teacher corrects!)***

दण्डदीपः दीर्घः अस्ति।

daṇḍadīpaḥ dīrghaḥ asti.
*Tube bulb is long.*

सर्प दीर्घः अस्ति।

**sarpa** dīrghaḥ asti.
*Snake is long.* ***(Mistake!)***

सर्पः दीर्घः अस्ति।

sarpaḥ **dīrghaḥ** asti.
*Snake is long.* ***(Teacher corrects!)***

सर्पः दीर्घः अस्ति।

sarpaḥ dīrghaḥ asti.
*Snake is long.*

गजस्य शुण्डा दीर्घः अस्ति ।

gajasya śuṇḍā **dīrghaḥ** asti.
*Elephant's trunk is long.* **(Mistake!)**

गजस्य शुण्डा दीर्घा अस्ति ।

gajasya śuṇḍā **dīrghā** asti.
*Elephant's trunk is long.* **(Teacher corrects!)**

गजस्य शुण्डा दीर्घा अस्ति ।

gajasya śuṇḍā dīrghā asti.
*Elephant's trunk is long.*

शारदायाः शाटिका दीर्घा अस्ति ।

śāradāyāḥ śāṭikā dīrghā asti.
*Sharada's sari is long.*

रामायणकथा दीर्घा अस्ति ।

rāmāyaṇa-kathā dīrghā asti.
*The story of Ramayana is long.*

अहं दीर्घं वाक्यं वदामि ।

ahaṁ dīrghaṁ vākyaṁ vadāmi.
*I say a long sentence.*

---

स्थूलः अस्ति । कृशः अस्ति ।

sthūlaḥ asti. kṛśaḥ asti.
*[It] is stout. [It] is lean.*

अत्र कः स्थूलः अस्ति ?

atra kaḥ sthūlaḥ asti?
*Who is stout here?*

कोपि स्थूलः नास्ति ।

kopi sthūlaḥ nāsti.
*Nobody is stout here.*

भवान् स्थूलः अस्ति ।

bhavān sthūlaḥ asti.
*You are stout.*

गजः स्थूलः अस्ति ।

gajaḥ sthūlaḥ asti.
*The elephant is stout.*

मम सखी स्थूला अस्ति ।

mama sakhī sthūlā asti.
*My friend is stout.*

मम पिता कृशः अस्ति ।

mama pitā kṛśaḥ asti.
*My father is thin.*

मम अनुजा कृशा अस्ति ।

mama anujā kṛśā asti.
*My younger sister is thin.*

गणेशस्य उदरं स्थूलम् अस्ति ।

gaṇeśasya udaraṁ sthūlam asti.
*Ganesha's stomach is fat.*

भीमः कथम् अस्ति ?

bhīmaḥ katham asti?
*What is Bhima like?*

भीमः स्थूलः अस्ति ।

bhīmaḥ sthūlaḥ asti.
*Bhima is stout.*

बकासुरः ।

bakāsuraḥ.
*Bakasura.*

बकासुरः स्थूलः अस्ति ।

bakāsuraḥ sthūlaḥ asti.
*Bakasura is stout.*

घटोत्कचः ।

ghaṭotkacaḥ.
*Ghatotkaca.*

घटोत्कचः स्थूलः अस्ति ।

ghaṭotkacaḥ sthūlaḥ asti.
*Ghatotkaca is stout.*

कुम्भकर्णः ।

kumbhakarṇaḥ.
*Kumbhakarna.*

कुम्भकर्णः स्थूलः अस्ति ।

kumbhakarṇaḥ sthūlaḥ asti.
*Kumbhakarna is stout.*

उत्तिष्ठतु ।

uttiṣṭhatu.
*Stand up.*

भवतः नाम किम् ?

bhavataḥ nāma kim?
*What is your name?*

मम नाम अरुणः ।

mama nāma aruṇaḥ.
*My name is Aruna.*

हस्तम् उपरि करोतु ।

hastam upari karotu.
*Rise your hand.*

अरुणस्य हस्तः कृशः अस्ति ।

aruṇasya hastaḥ kṛśaḥ asti.
*Aruna's hand is thin.*

अरुणस्य हस्तः कथम् अस्ति ।

aruṇasya hastaḥ katham asti.
*What is Aruna's hand like?*

अरुणस्य हस्तः कृशः अस्ति ।

aruṇasya hastaḥ kṛśaḥ asti.
*Aruna's hand is thin.*

मम हस्तः स्थूलः अस्ति ।

mama hastaḥ sthūlaḥ asti.
*My hand is thick.*

---

***SCREEN:***

**ह्रस्व - दीर्घ hrasva – dīrgha** ***Short – long.***

**स्थूल - कृश sthūla – kṛśa**

***Stout (thick, fat) – lean (thin).***

---

*HINDI: About the meanings of these words.*

---

## सुभाषितम्

**subhāṣitam**
***Verse***

इदानीम् एकं सुभाषितं शृण्मः ।

idānīm ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now we [will] listen to one verse.*

यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे ।
कृतमेवास्य जानन्ति स वै पण्डित उच्यते ।

yasya kṛtyaṁ na jānanti mantraṁ vā mantritaṁ pare
kṛtam evāsya jānanti sa vai paṇḍita ucyate

yasya – *of whom;* kṛtyam – *act;* na – *not;* jānanti – *they know;* mantram – *speech;* vā – *or;* mantritam – *deliberation;* pare – *others;* kṛtam – *what is done;* eva – *certainly;* asya – *his;* jānanti – *they know;* saḥ – *he;* vai – *certainly;* paṇḍitaḥ – *learned;* ucyate – *is said.*
*The person whose acts, speech or deliberation are not known by others, but the results of whose acts is known, such a person is said to be truly learned.*

सुभषितस्य अर्थः एवम् अस्ति ।

subhaṣitasya arthaḥ evam asti.

*Here is the meaning of the verse.*

महापुरुषः किं कुर्वन्ति इति न वदन्ति। ते किं कार्यं कुर्वन्ति इति न वदन्ति।

mahāpuruṣaḥ kiṁ kurvanti iti na vadanti. te kiṁ kāryaṁ kurvanti iti na vadanti.
*Great persons don't say what they do. They don't say what work they do.*

तेषां चिन्तनधिक्??? का इति न ज्ञायते। तेषां चिन्तनक्रमः अपि न ज्ञायते। परन्तु कार्यस्य अनन्तरं महत् फलं भवति।

teṣāṁ cintana-dhik??? kā iti na jñāyate. teṣāṁ cintana-kramaḥ api na jñāyate. parantu kāryasya anantaraṁ mahat phalaṁ bhavati.
*It is not known that is their thinking. Their manner of thinking is also not known. But after the work there is a great fruit.*

तद् दृष्ट्वा तेषां कृतं ज्ञायते। ते किं कृतवन्तः इति फलस्य दर्शन-अनन्तरं ज्ञायते।

tad dṛṣṭvā teṣāṁ kṛtaṁ jñāyate. te kiṁ kṛtavantaḥ iti phalasya darśana-anantaraṁ jñāyate.
*From seeing this their work is known. What they did is known after observing the result.*

## कथा

**kathā**
***Story***

अहम् इदानीम् एकं कथां वदामि।

aham idānīm ekaṁ kathāṁ vadāmi.
*Now I [will] tell one story.*

पुरातनकाले एकः महाराजः आसीत्। सः चित्रकलां बहु पृनाति स्म। विशेषतः प्राकृत्तिकचित्रं तस्य बहु इष्टम्।

purātana-kāle ekaḥ mahārājaḥ āsīt. saḥ citra-kalāṁ bahu pṛnāti sma. viśeṣataḥ prākṛttika-citraṁ tasya bahu iṣṭam.
*In a previous era there was a king. He was very fond of painting. He liked very much painting especially the images of nature.*

एकदा सः चित्रं लेखितुं पर्वतस्य आरोहणं करोति। पर्वतस्य उपरि उपविशति, परितः सुन्दरा प्रकृत्तिकदृश्यम्। तस्य सन्तोषः भवति।

ekadā saḥ citraṁ lekhituṁ parvatasya ārohaṇaṁ karoti. parvatasya upari upaviśati, paritaḥ sundarā prakṛttika-dṛśyam. tasya santoṣaḥ bhavati.
*Once he climbed a mountain to paint a painting. He sits on the top of the mountain and there is a beautiful view of the nature on all sides. He is satisfied.*

सः लेखनसामग्रीः स्वीकरोति। सर्वं सम्यक् स्थापयति। चित्रलेखनस्य आरम्भं करोति।

saḥ lekhana-sāmagrīḥ svīkaroti. sarvaṁ samyak sthāpayati. citra-lekhanasya ārambhaṁ karoti.
*He takes the painting equipment. He sets everything well. He begins to paint a painting.*

बहु सुन्दरतिया चित्रं भवति। इतोऽपि वर्णः यत्र अवश्यकः तत्र सर्वत्र वर्णं लेपयति।

bahu sundaratiyā citraṁ bhavati. ito 'pi varṇaḥ yatra āvaśyakaḥ tatra sarvatra varṇaṁ lepayati.
*The painting is very beautiful. Wherever a colour is necessary, he pastes the colour everywhere.*

महाराजस्य सन्तोषः भवति। परन्तु दूरतः कथं दृश्यते चित्रम् इति द्रष्टुं पृष्ठतः गच्छति।

mahārājasya santoṣaḥ bhavati. parantu dūrataḥ kathaṁ dṛśyate citram iti draṣṭuṁ pṛṣṭhataḥ gacchati.
*The king is satisfied. But to see how the painting looks from far away he walks back.*

महाराजः एकं पदं, पदद्वयं, त्रीणि पदानि इति पृष्ठतः पृष्ठतः गच्छति।

mahārājaḥ ekaṁ padaṁ, pada-dvayaṁ, trīṇi padāni iti pṛṣṭhataḥ pṛṣṭhataḥ gacchati.
*The king goes back and back one step, two steps, three steps.*

महाराजः चित्रम् एव पश्यन् अस्ति। बहु सुन्दरदृश्यम् आनन्दः भवति। "इतोऽपि पृष्ठतः गच्छामि" इति चिन्तयति। इतोऽपि पदद्वयं गच्छति, पश्यति। सुन्दरं दृश्यते।

mahārājaḥ citram eva paśyan asti. bahu sundara-dṛśyam ānandaḥ bhavati. "ito 'pi pṛṣṭhataḥ gacchāmi" iti cintayati. ito 'pi pada-dvayaṁ gacchati, paśyati. sundaraṁ dṛśyate.
*The king was looking only at the painting. Seeing the very beautiful view he was joyful. He thought: "I go still further back from here." He goes two steps further back from here and looks. It looks wonderful.*

इतोऽपि पृष्ठतः गच्छति, परन्तु पृष्ठतः किञ्चिद् दूरे एव एकः महान् खातः अस्ति। महान् खातः।

ito 'pi pṛṣṭhataḥ gacchati, parantu pṛṣṭhataḥ kiñcid dūre eva ekaḥ mahān khātaḥ asti. mahān khātaḥ.
*He goes still further back, but only a little further behind there is a big ditch. Big ditch.*

यदि महाराजः पदद्वयं स्थापयति, महाराजः पतति।

yadi mahārājaḥ pada-dvayaṁ sthāpayati, mahārājaḥ patati.
*If the king takes two steps, he falls.*

परन्तु तत्र एकः मेषपालः आगच्छति। सः पश्यति महाराजः पृष्ठतः, पृष्ठतः गच्छति। तत्र महान् खातः अस्ति। इतः परं महाराजः पतिष्यति। "अहं किम् अपि करोमि" इति मेषपालकः चिन्तयति। "किं करोमि ?"

parantu tatra ekaḥ meṣapālaḥ āgacchati. saḥ paśyati mahārājaḥ pṛṣṭhataḥ, pṛṣṭhataḥ gacchati. tatra mahān khātaḥ asti. itaḥ paraṁ mahārājaḥ patiṣyati. "ahaṁ kim api karomi" iti meṣapālakaḥ cintayati. "kiṁ karomi?"
*But there comes one shepherd. He looks at the king going back, back. There is a big ditch. After that the king will fall. "I do something," the shepherd thinks. "What do I do?"*

तदा तस्य प्रत्युत्पन्नमतित्वं कार्यं करोति। तस्य हस्ते दण्डः अस्ति। सः मेषपालकः। दण्डं गृहित्वा सम्यक् क्षिपति। चित्रस्य उपरि एव क्षिपति। चित्रं भग्नं भवति।

tadā tasya pratyutpannamatitvaṁ kāryaṁ karoti. tasya haste daṇḍaḥ asti. saḥ meṣapālakaḥ. daṇḍaṁ gṛhitvā samyak kṣipati. citrasya upari eva kṣipati. citraṁ bhagnaṁ bhavati.
*Then he does his quick witted action. There is a stick in his hand. That is the shepherd. After grabbing the stick he throws it good. He throws it directly on the painting. The painting breaks.*

महाराजस्य कोपः आगच्छति। "मया बहु सुन्दरचित्रं लिखितं, बहु प्रयत्नं कृत्वा लिखितवान्, परन्तु एषः दुष्टः मेषपालः मम सुन्दरचित्रं नाशितवान्। तं मारयामि" इति कोपेन मेषपालं पश्यति।

mahārājasya kopaḥ āgacchati. mayā bahu sundara-citraṁ likhitaṁ, bahu prayatnaṁ kṛtvā likhitavān, parantu eṣaḥ duṣṭaḥ meṣapālaḥ mama sundara-citraṁ nāśitavān. taṁ mārayāmi" iti kopena meṣapālaṁ paśyati.

*The king gets angry. I painted  a beautiful painting, I painted it after a lot of endeavour, but this wretched shepherd destroyed my beautiful painting. I [will] kill him," thus he looked at the shepherd with rage.*

मेषपालः भीत भीत एव समीपे आगच्छति। तस्य भयं महाराजस्य कोपः। "इदानीं मं मारयति" इति चिन्तयति।

meṣapālaḥ bhīta bhīta eva samīpe āgacchati. tasya bhayaṁ mahārājasya kopaḥ. "idānīṁ maṁ mārayati" iti cintayati.
*The shepherd comes close with a lot of fear. He is afraid of the kings anger. "He [will] now kill me," he thinks.*

परन्तु तस्य अन्तरङ्गे एकं धैर्यम् अस्ति। "महाराज ! भवान् सुन्दरचित्रं लिखितवान्, परन्तु भवतः पृष्ठतः एव महान् खातः अस्ति, परन्तु भवान् न दृष्टवान्।"

parantu tasya antaraṅge ekaṁ dhairyam asti: "mahārāja! bhavān sundara-citraṁ likhitavān, parantu bhavataḥ pṛṣṭhataḥ eva mahān khātaḥ asti, parantu bhavān na dṛṣṭavān."
*But he has a firm resolution within: "O, king! You painted a beautiful painting but just behind you there is a big ditch but you didn't see."*

"यदि एकं पदं पृष्ठतः स्थापयति, भवान् महति खाते पतति। भवान् मृतः भविष्यति।"

"yadi ekaṁ padaṁ pṛṣṭhataḥ sthāpayati, bhavān mahati khāte patati. bhavān mṛtaḥ bhaviṣyati."
*If you stepped one step back, you would fall in the big ditch. You would (lit.: will) be dead."*

"तादृशप्रसङ्गे मया किं करणीयम्? अहं चिन्तितवान्। दण्डं स्वीकृत्य चित्रं ताडितवान्।"

"tādṛśa prasaṅge mayā kiṁ karaṇīyam? ahaṁ cintitavān. daṇḍaṁ svīkṛtya citraṁ tāḍitavān."
*"What was I to do in that occasion? I was thinking. After taking up the stick I hit the painting."*

"चित्रं नष्टं भवतु नाम, परन्तु अस्माकं महाराजः जीवतु। यदि महाराजः जीवति, सुन्दरचित्राणि बहुनि लेखितुं शक्नोति। यदि महाराजः न भवति, अस्माकं सर्वेषां महादुःखं भवति।"

citraṁ naṣṭaṁ bhavatu nāma, parantu asmākaṁ mahārājaḥ jīvatu. yadi mahārājaḥ jīvati, sundara-citrāṇi bahuni lekhituṁ śaknoti. yadi mahārājaḥ na bhavati, asmākaṁ sarveṣāṁ mahā-duḥkhaṁ bhavati."
*"Let the painting be destroyed but let our king live. If the king lives he can paint many beautiful paintings. If there is no king, we all are very sad."*

"महाराजस्य जीवरक्षणम् अस्माकं महत् कर्तव्यम्। तदर्थम् अहं दण्डेन चित्रं ताडितवान्। यदि दोषः अस्ति क्षाम्यतु, भोः।"

"mahārājasya jīva-rakṣaṇam asmākaṁ mahat kartavyam. tad artham ahaṁ daṇḍena citraṁ tāḍitavān. yadi doṣaḥ asti kṣāmyatu, bhoḥ."
*We should do our best to protect the king's life. For that reason I hit the painting with the stick. If there is a mistake, excuse me, sir."*

मेषपालस्य वचनं श्रुत्वा महाराजस्य महान् सन्तोषः भवति। सः चिन्तयति "भगवान् एव एतं मेषपालं प्रेषितवान्। मम जीवरक्षणार्थं मेषपालं भगवान् एव प्रेषितवान्" इति सन्तोषम् अनुभवति। मेषपालं गृह्णाति।

meṣapālasya vacanaṁ śrutvā mahārājasya mahān santoṣaḥ bhavati. saḥ cintayati "bhagavān eva etaṁ meṣapālaṁ preṣitavān. mama jīva-rakṣaṇārthaṁ meṣapālaṁ bhagavān eva preṣitavān" iti santoṣam anubhavati. meṣapālaṁ gṛhṇāti.
*After hearing the shepherds talk the king was very satisfied. He thinks: "God himself sent this shepherd. To save my life God himself sent the shepherd," thus he experienced satisfaction. He embraces the shepherd.*

"मेषपाल ! सामान्यः न। अद्भुतकार्यं कृतवान्। मम जीवरक्षणं कृतवान्। मम महान् आनन्दः जातः। भवते अहं पुरस्कारं ददामि" इति तस्य पुरस्कारं करोति।

"meṣapāla! sāmānyaḥ na. adbhuta-kāryaṁ kṛtavān. mama jīva-rakṣaṇaṁ kṛtavān. mama mahān ānandaḥ jātaḥ. bhavate ahaṁ puraskāraṁ dadāmi" iti tasya puraskāraṁ karoti.
*O shepherd. You are not ordinary. You did an extraordinary deed. You saved my life. I am very happy. I give you an award," thus he awards him.*

मेषपालस्य वचनं श्रुत्वा महाराजस्य महान् आनन्दः भवति। सः मेषपालम् अभिनन्दितवान्। स्व आस्थानं नीतवान्।

meṣapālasya vacanaṁ śrutvā mahārājasya mahān ānandaḥ bhavati. saḥ meṣapālam abhinanditavān. sva āsthānaṁ nītavān.
*After hearing the shepherd's talk the king was very happy. He congratulated the shepherd. He took him to his assembly room.*

बालकस्य पितरम् अपि आहुतवान्। बालकं पितरं च सत्कृतवान्। तयोः प्रोत्साहनं दत्तवान्।

bālakasya pitaram api āhutavān. bālakaṁ pitaraṁ ca sat-kṛtavān. tayoḥ protsāhanaṁ dattavān.
*He also called the boy's father. He hosted the boy and the father. He gave them encouragement.*

बालकं विद्याभ्यासार्थं प्रेरितवान्। अग्रे बालकः उत्तमविद्वान् भवति। सः एव बालकः अग्रे महाराजस्य आस्थाने सचिवः अपि भविष्यति।

bālakaṁ vidyābhyāsārthaṁ preritavān. agre bālakaḥ uttama-vidvān bhavati. saḥ eva bālakaḥ agre mahārājasya āsthāne sacivaḥ api bhaviṣyati.
*He urged the boy for the sake of studying. Later on the boy became greately learned. This very boy will be counsellor in the king's assembly room.*

कथायः अर्थं ज्ञातवन्तः वा ?

kathāyaḥ arthaṁ jñātavantaḥ vā?
*Have you understood the meaning of the story?*

आम्। ज्ञातवन्तः।

ām. jñātavantaḥ.
*Yes. We have understood.*

धन्यवादः।

dhanyavādaḥ.
*Thank you.*

नमो नमः।

namo namaḥ.
*Respects.*

---

**Teacher:**

रामकृष्णः

Rāmakṛṣṇaḥ

**Students:**

मोहनः एम्. निखिल् सि. अभिजित् एस्.

Mohanaḥ M. Nikhil C. Abhijit S.

नागर्जुनः बि. यतीन्द्रः डि. अरुण एन्.

Nāgarjunaḥ B. Yatīndraḥ Ḍ. Aruṇa N.

विनय् आर्. योगेश् एस्. अक्षय एम्.

Vinay R. Yogeś S. Akṣaya M.

प्रीति के. एस्. रम्या पि. इंदिरा आर्. राव्.

Prīti K. S. Ramyā P. Indirā R. Rāv.

निखिला उत्तर्कर रुपा एस्. राव्.

Nikhilā Uttarkara Rupā S. Rāv.

अपर्णा एस्. अडिगा लक्ष्मी एम्. आर्.

Aparṇā S. Aḍigā Lakṣmī M. R.

हेमलता बि. सि. सुरभि अनंत

Hemalatā B. C. Surabhi Ananta

# LESSON 20 – OVERVIEW

*In lesson twenty you will do further practice of some new words you learned in the previous lesson and learn some new similar words (this kind, that kind, what kind and names of colours). You will learn how to use* **ktumum-pratyāya** *(infinitive ending* **-tum***).*

## KTUMUM-PRATYĀYA *(INFINITIVE ENDING* -TUM*)*

क्रीडति krīḍati *plays* क्रीडितुम् krīḍi**tum** *to play*

पठति paṭhati *reads* पठितुम् paṭhi**tum** *to study*

## ADJECTIVES

| | | |
|---|---|---|
| उन्नतः | unnataḥ | *tall* |
| वामनः | vāmanaḥ | *small* |
| ईदृश | īdṛśa | *this kind* |
| तादृश | tādṛśa | *that kind* |
| कीदृश ? | kīdṛśa? | *what kind?* |

# Lesson 20

*HINDI: In the previous lesson we practiced some new words. In the beginning of this lesson we will do some further practice and learn some new words.*

नमो नमः ।

namo namaḥ.
*Salutations.*

संस्कृतभाषाशिक्षणे भवतां हार्दं स्वागतम् ।

saṁskṛta-bhāṣā-śikṣaṇe bhavatāṁ hārdaṁ svāgatam.
*Heartly welcome to the study of Sanskrit language.*

पूर्वतनपाठे "पुरातनं नूतनं बहु किञ्चित् दीर्घः ह्रस्वः" इत्यादि शब्दानि ज्ञातवन्तः ।

pūrvatana-pāṭhe "purātanaṁ, nūtanaṁ, bahu, kiñcit, dīrghaḥ, hrasvaḥ" ityādi śabdāni jñātavantaḥ.
*In the previous lesson we learned the words "old, new, a lot, a little, long, short."*

तेषां बिन्दूनां पुनः स्मरणं किञ्चित् कुर्मः ।

teṣāṁ bindūnāṁ punaḥ smaraṇaṁ kiñcit kurmaḥ.
*We will remember again these points a little.*

भीमः बहु खादति ।

bhīmaḥ bahu khādati.
*Bhima eats a lot.*

अहं किञ्चित् कार्यं करोमि । बहु खादामि, किञ्चित् कार्यं करोमि ।

ahaṁ kiñcit kāryaṁ karomi. bahu khādāmi, kiñcit kāryaṁ karomi.
*I do a little of work. I eat a lot, I do a little of work.*

गङ्गानदी दीर्घा अस्ति । रन्ध्रौ??? मार्गः ह्रस्वः अस्ति ।

gaṅgā-nadī dīrghā asti. **randhrau**??? mārgaḥ hrasvaḥ asti.
*The river Ganga is long. The ??? road is long.*

मम घटी पुरातना अस्ति ।

mama ghaṭī purātanā asti.
*My watch is old.*

मम युतकं नूतनयुतकम् ।

mama yutakaṁ nūtana-yutakam.
*My shirt is new.*

भवन्तः वदन्ति वा ? भवती वदतु ।

bhavantaḥ vadanti vā? bhavatī vadatu!
*Would you say? You (fem.) say!*

मम वस्त्रं नूतनवस्त्रम् ।

mama vastraṁ nūtana-vastram.
*My dress is new.*

मम घटी नूतनघटी ।

mama ghaṭī nūtana-ghaṭī.
*My watch is new.*

मम वेणी ह्रस्ववेणी ।

mama veṇī hrasva-veṇī.
*My braid of hair is short.*

मम उपनेत्रं पुरातन-उपनेत्रम् ।

mama upanetraṁ purātana-upanetram.
*Mu eyeglasses are old.*

अहं बहु कोलाहालं करोमि ।

ahaṁ bahu kolāhālaṁ karomi.
*I do a lot of noise.*

मम गृहं नूतनगृहम् ।

mama gṛhaṁ nūtana-gṛham.
*My house is new.*

अहं बहु चाकलेहं खादामि।

ahaṁ bahu cākalehaṁ khādāmi.
*I eat a lot of chocolate.*

नवदिल्लि??? मर्गे दीर्घः अस्ति।

**navadilli**??? marge dīrghaḥ asti.
*New Delhi street is long.* **(Mistake!)**

नवदिल्ल्यां मार्गः दीर्घः अस्ति।

navadillyāṁ mārgaḥ dīrghaḥ asti.
*In New Delhi there is a long road.* **(Teacher corrects!)**

नवदिल्ल्यां मार्गः दीर्घः अस्ति।

navadillyāṁ mārgaḥ dīrghaḥ asti.
*In New Delhi there is a long road.*

मम लेखनी पुरातनलेखनी।

mama lekhanī purātana-lekhanī.
*My pen is old.*

मम वेणी दीर्घः अस्ति।

mama veṇī **dīrghaḥ** asti.
*My braid of hair is long.* **(Mistake!)**

मम वेणी दीर्घा अस्ति।

mama veṇī dīrghā asti.
*My braid of hair is long.* **(Teacher corrects!)**

मम उत्तरीयं दीर्घः अस्ति।

mama uttarīyaṁ **dīrghaḥ** asti.
*My scarf is long.* **(Mistake!)**

मम उत्तरीयं दीर्घम् अस्ति।

mama uttarīyaṁ **dīrgham** asti.
*My scarf is long.* **(Teacher corrects!).**

मम उत्तरीयं दीर्घम् अस्ति।

mama uttarīyaṁ dīrgham asti.
*My scarf is long.*

मम स्यूतः पुरातनस्यूतः।

mama syūtaḥ purātana-syūtaḥ.
*My bag is old.*

सः बहु खादति।

saḥ bahu khādati.
*He eats a lot.*

अहं किञ्चिद् जनामि।

ahaṁ kiñcid janāmi.
*I know a little.*

अहं बहु जनामि, किञ्चिद् वदामि।

ahaṁ bahu janāmi, kiñcid vadāmi.
*I know a lot, I say a little.*

अहं बहु मोदकं खादामि।

ahaṁ bahu modakaṁ khādāmi.
*I eat a lot of sweets.*

दिल्लिनगरे पुरातनभवनम् अस्ति।

dilli-nagare purātana-bhavanam asti.
*In the city of Delhi [there] is an old building.*

मम पाठशालां नूतनपाठशालाम्।

mama **pāṭhaśālāṁ** nūtana-pāṭhaśālām.
*My classroom is new.* **(Mistake!)**

मम पाठशाला नूतनपाठशाला।

mama pāṭhaśālā nūtana-pāṭhaśālā.
*My classroom is new.* **(Teacher corrects!)**

मम पाठशाला नूतनपाठशाला।

mama pāṭhaśālā nūtana-pāṭhaśālā.
*My classroom is new.*

---

एषः वृक्षः उन्नतः अस्ति।

eṣaḥ vṛkṣaḥ unnataḥ asti.
*This tree is tall.*

एषः वृक्षः वामनः अस्ति ।

eṣaḥ vṛkṣaḥ vāmanaḥ asti.
*This tree is small.*

वृक्षः कथम् अस्ति ?

vṛkṣaḥ katham asti?
*What is the tree like?*

वृक्षः उन्नतः अस्ति ।

vṛkṣaḥ unnataḥ asti.
*The tree is tall.*

वृक्षः कथम् अस्ति ?

vṛkṣaḥ katham asti?
*What is the tree like?*

वृक्षः वामनः अस्ति ।

vṛkṣaḥ vāmanaḥ asti.
*The tree is small.*

पुरुषः कथम् अस्ति ?

puruṣaḥ katham asti?
*What is the man like?*

पुरुषः उन्नतः अस्ति ।

puruṣaḥ unnataḥ asti.
*The man is tall.*

पुरुषः कथम् अस्ति ?

puruṣaḥ katham asti?
*What is the man like?*

पुरुषः वामनः अस्ति ।

puruṣaḥ vāmanaḥ asti.
*The man is small.*

अभीजितः उन्नतः अस्ति ।

abhījitaḥ unnataḥ asti.
*Abhijita is tall.*

सुरजः वामनः अस्ति ।

surajaḥ vāmanaḥ asti.
*Suraja is small.*

कः उन्नतः अस्ति ?

kaḥ unnataḥ asti?
*Who is tall?*

अभीजितः उन्नतः अस्ति ।

abhījitaḥ unnataḥ asti.
*Abhijita is tall.*

कः वामनः अस्ति ?

kaḥ vāmanaḥ asti?
*Who is small?*

सुरजः वामनः अस्ति ।

surajaḥ vāmanaḥ asti.
*Suraja is small.*

---

*HINDI: Something about the meaning of the words.*

---

इदानीं वर्णवाचकानां परिचयं सम्पादयामः ।

idānīṁ varṇa-vācakānāṁ paricayaṁ sampādayāmaḥ.
*Now we will get to know the words for the colours.*

शुकः । शुकस्य वर्णः हरितः । शुकस्य वर्णः कः ?

śukaḥ. śukasya varṇaḥ haritaḥ. śukasya varṇaḥ kaḥ?
*Parrot. Parrot's colour is green. What is the parrot's colour?*

शुकस्य वर्णः हरितः ।

śukasya varṇaḥ haritaḥ.
*Parrot's colour is green.*

पर्णम् । पर्णस्य वर्णः कः ?

parṇam. parṇasya varṇaḥ kaḥ?
*Leaf. What is the leaf's colour?*

पर्णस्य वर्णः हरितः ।

parṇasya varṇaḥ haritaḥ.
*The leaf's colour is green.*

पुष्पस्य वर्णः पीतः । पुष्पस्य वर्णः कः ?

puṣpasya varṇaḥ pītaḥ. puṣpasya varṇaḥ kaḥ?
*Flower's colour is yellow. What's the flower's colour?*

पुष्पस्य वर्णः पीतः ।

puṣpasya varṇaḥ pītaḥ.
*Flower's colour is yellow.*

सेमन्तीपुष्पम् । सेमन्तीपुष्पस्य वर्णः कः ?

semantī-puṣpam. semantī-puṣpasya varṇaḥ kaḥ?
*White rose. What is the white rose's colour?*

सेमन्तीपुष्पस्य वर्णः पीतः ।

semantī-puṣpasya varṇaḥ pītaḥ.
*White rose's colour is yellow.*

काकस्य वर्णः कृष्णः । काकस्य वर्णः कः ?

kākasya varṇaḥ kṛṣṇaḥ. kākasya varṇaḥ kaḥ?
*Crow's colour is black. What is the crow's colour?*

काकस्य वर्णः कृष्णः ।

kākasya varṇaḥ kṛṣṇaḥ.
*Crow's colour is black.*

कृष्णफलकस्य वर्णः कः ?

kṛṣṇaphalakasya varṇaḥ kaḥ?
*What is the blackboard's colour?*

कृष्णफलकस्य वर्णः कृष्णः ।

kṛṣṇaphalakasya varṇaḥ kṛṣṇaḥ.
*Blackboard's colour is black.*

पत्रस्य वर्णः श्वेतः । पत्रस्य वर्णः कः ?

patrasya varṇaḥ śvetaḥ. patrasya varṇaḥ kaḥ?
*The sheet's colour is white.What is the sheet's colour?*

पत्रस्य वर्णः श्वेतः ।

patrasya varṇaḥ śvetaḥ.
*The [paper] sheet's colour is white.*

दन्तस्य वर्णः कः ?

dantasya varṇaḥ kaḥ?
*What is the tooth's colour?*

दन्तस्य वर्णः श्वेतः ।

dantasya varṇaḥ śvetaḥ.
*Tooth's colour is white.*

क्षीरस्य वर्णः कः ?

kṣīrasya varṇaḥ kaḥ?
*What is the milk's colour?*

क्षीरस्य वर्णः श्वेतः ।

kṣīrasya varṇaḥ śvetaḥ.
*Milk's colour is white.*

आसन्दस्य वर्णः रक्तः । आसन्दस्य वर्णः कः ?

āsandasya varṇaḥ raktaḥ. āsandasya varṇaḥ kaḥ?
*The chair's colour is red. What is the chair's colour?*

आसन्दस्य वर्णः रक्तः ।

āsandasya varṇaḥ raktaḥ.
*The chair's colour is red.*

स्वादुफलम् । स्वादुफलस्य वर्णः कः ?

svādu-phalam. svādu-phalasya varṇaḥ kaḥ?
*Apple. What is the apple's colour?*

स्वादुफलस्य वर्णः रक्तः ।

svādu-phalasya varṇaḥ raktaḥ.
*The apple's colour is red.*

अन्तः रक्तम् अस्ति । रक्तस्य वर्णः कः ?

antaḥ raktam asti. raktasya varṇaḥ kaḥ?
*Inside is blood. What is the blood's colour?*

रक्तस्य वर्णः रक्तः।

raktasya varṇaḥ raktaḥ.
*The colour of blood is red.*

उत्तिष्ठतु। वस्त्रस्य वर्णः नीलः। वस्त्रस्य वर्णः कः ?

uttiṣṭhatu. vastrasya varṇaḥ nīlaḥ. vastrasya varṇaḥ kaḥ?
*Stand up. The colour of the shirt is blue. What is the colour of the shirt?*

वस्त्रस्य वर्णः नीलः।

vastrasya varṇaḥ nīlaḥ.
*The colour of the shirt is blue.*

भित्तेः वर्णः कः ?

bhitteḥ varṇaḥ kaḥ?
*What is the colour of the wall?*

भित्तेः वर्णः नीलः।

bhitteḥ varṇaḥ nīlaḥ.
*The colour of the wall is blue.*

आकाशस्य वर्णः कः ?

ākāśasya varṇaḥ kaḥ?
*What is the colour of the sky?*

आकाशस्य वर्णः नीलः।

ākāśasya varṇaḥ nīlaḥ.
*The colour of the sky is blue.*

राष्ट्रध्वजः। राष्ट्रध्वजे त्रयः वर्णाः सन्ति। कः वर्णः ?

rāṣṭra-dhvajaḥ. rāṣṭra-dhvaje trayaḥ varṇāḥ santi. kaḥ varṇaḥ?
*National flag. [There] are three colours on the national flag. Which colours?*

हरितः वर्णः।

haritaḥ varṇaḥ.
*Green colour.*

कः वर्णः ?

kaḥ varṇaḥ?
*Which colour?*

श्वेतः वर्णः।

śvetaḥ varṇaḥ.
*White colour.*

काशायः वर्णः। कः वर्णः ?

kāśāyaḥ varṇaḥ. kaḥ varṇaḥ?
*Brownish red. Which colour?*

काशायः वर्णः।

kāśāyaḥ varṇaḥ.
*Brownish red.*

चक्रम् अस्ति। चक्रस्य वर्णः कः ?

cakram asti. cakrasya varṇaḥ kaḥ?
*[There] is a wheel. What is the wheel's colour?*

चक्रस्य वर्णः नीलः।

cakrasya varṇaḥ nīlaḥ.
*Colour of the wheel is blue.*

कः कः वर्णः अस्ति ?

kaḥ kaḥ varṇaḥ asti?
*What are [the various] colours?*

हरितः, श्वेतः, काशायः, नीलः।

haritaḥ, śvetaḥ, kāśāyaḥ, nīlaḥ.
*Green, white, brownish red, blue.*

चक्रस्य वर्णः कः ?

cakrasya varṇaḥ kaḥ?
*What is the wheel's colour?*

चक्रस्य वर्णः नीलः।

cakrasya varṇaḥ nīlaḥ.
*The wheel's colour is blue.*

राष्ट्रध्वजे कः कः वर्णः अस्ति ?

rāṣṭra-dhvaje kaḥ kaḥ varṇaḥ asti?
*Which are the [various] colours on the national flag?*

राष्ट्रध्वजे हरितः श्वेतः काशायः नीलः वर्णः अस्ति।

rāṣṭra-dhvaje haritaḥ, śvetaḥ, kāśāyaḥ, nīlaḥ varṇaḥ asti.
*On the national flag there are green, white, brownish red and blue colour.*

कस्य कः वर्णः इति इदानीं वदन्तु।

kasya kaḥ varṇaḥ iti idānīṁ vadantu.
*Now say (pl.) which is the colour of what (things).*

लेखस्य वर्णः नीलः।

lekhasya varṇaḥ nīlaḥ.
*The pen's colour is blue.*

पर्णस्य वर्णः हरितः।

parṇasya varṇaḥ haritaḥ.
*The leaf's colour is green.*

केशस्य वर्णः कृष्णः।

keśasya varṇaḥ kṛṣṇaḥ.
*The hair's colour is black.*

हंसस्य वर्णः श्वेतः।

haṁsasya varṇaḥ śvetaḥ.
*The swan's colour is white.*

नीलकण्ठस्य वर्णः नीलः।

nīlakaṇṭhasya varṇaḥ nīlaḥ.
*Nilakantha's (Shiva's) colour is blue.*

शीलस्य वर्णः श्वेतः।

śīlasya varṇaḥ śvetaḥ.
*The stone's colour is white.*

श्रीकृष्णस्य वर्णः नीलः।

śrīkṛṣṇasya varṇaḥ nīlaḥ.
*Shri Krshna's colour is blue.*

---

*HINDI: The colour is an adjective matching in gender the noun it qualifies.*

---

अहम् ईदृश फलम् इच्छामि।

aham īdṛśa phalam icchāmi.
*I want this kind of fruit.*

तादृशफलं न इच्छामि।

tādṛśa phalaṁ na icchāmi.
*I don't want that kind of fruit.*

मम समीपे ईदृश घटी अस्ति।

mama samīpe īdṛśa ghaṭī asti.
*Next to me is this kind of watch.*

हस्तम् उपरि करोतु।

hastam upari karotu!
*Rise your hand!*

तादृश घटी नास्ति। मम समीपे तादृश घटी नास्ति।

tādṛśa ghaṭī nāsti. mama samīpe tādṛśa ghaṭī nāsti.
*That kind of watch isn't there. I don't have that kind of watch.*

भवत्याः समीपे कीदृश घटी अस्ति ?

bhavatyāḥ samīpe kīdṛśa ghaṭī asti?
*What kind of watch do you have?*

मम समीपे ईदृश घटी अस्ति।

mama samīpe īdṛśa ghaṭī asti.
*I have this kind of watch.*

भवतः समीपे ईदृश घटी अस्ति वा ?

bhavataḥ samīpe īdṛśa ghaṭī asti vā?
*Do you have this kind of watch?*

नास्ति। समीपे तादृश घटी नास्ति।

nāsti. samīpe tādṛśa ghaṭī nāsti.
*No. I don't have that kind of watch.*

मम गृहे ईदृश कपिः अस्ति ।

mama gṛhe īdṛśa kapiḥ asti.
*At my home [there] is this kind of monkey.*

कस्यापि गृहे ईदृश कपिः अस्ति वा ?

kasyāpi gṛhe īdṛśa kapiḥ asti vā?
*Is [there] this kind of monkey in somebody's home?*

मम गृहे अपि तादृश कपिः अस्ति ।

mama gṛhe api tādṛśa kapiḥ asti.
*At my home [there] is also that kind of monkey.*

भवत्याः गृहस्य कपिः ईदृश शब्दं करोति वा ?

bhavatyāḥ gṛhasya kapiḥ īdṛśa śabdaṁ karoti vā?
*Does the monkey at your home make this kind of sound?*

तादृश शब्दं करोति ।

tādṛśa śabdaṁ karoti.
*[It] makes that kind of sound.*

अहो, महामर्कटः ।

aho, mahā-markaṭaḥ.
*Oh, a big monkey.*

---

इदानीम् अहं वस्तु प्रदर्श्य भिन भिन नाम वदामि ।

तादृशवस्तु भवतां गृहे अस्ति वा नास्ति वा इति वदन्तु ।

idānīm ahaṁ vastu pradarśya bhina bhina nāma vadāmi. tādṛśa vastu bhavatāṁ gṛhe asti vā nāsti vā iti vadantu.
*Now after I show an object I [will] say different names. Say whether that kind of object is present at your home or not.*

दण्डः । मम गृहे तादृश दण्डः नास्ति ।

daṇḍaḥ. mama gṛhe tādṛśa daṇḍaḥ nāsti.
*A stick. That kind of stick is not at my home.*

अस्ति वा नास्ति वा ?

asti vā nāsti vā?
*It is or it's not?*

नास्ति ।

nāsti.
*It's not.*

पुनः वदतु ।

punaḥ vadatu!
*Say again!*

मम गृहे तादृश दण्डः नास्ति ।

mama gṛhe tādṛśa daṇḍaḥ nāsti.
*That kind of stick is not at my home.*

घटी । मम गृहे अपि तादृश घटी अस्ति ।

ghaṭī. mama gṛhe api tādṛśa ghaṭī asti.
*Watch. That kind of watch is at my home as well.*

चषकः । मम गृहे अपि तादृश चषकः अस्ति ।

caṣakaḥ. mama gṛhe api tādṛśa caṣakaḥ asti.
*Cup. That kind of cup is at my home as well.*

लेखनी । मम गृहे तादृश लेखनी अस्ति ।

lekhanī. mama gṛhe tādṛśa lekhanī asti.
*Pen. I have that kind of pen at my home.*

पञ्चालिका । मम गृहे तादृश पञ्चालिका नास्ति ।

pañcālikā.mama gṛhe tādṛśa pañcālikā nāsti.
*Doll. I don't have that kind of doll at my home.*

आसन्दः । मम गृहे तादृश आसन्दः अस्ति ।

āsandaḥ. mama gṛhe tādṛśa āsandaḥ asti.
*Chair. [There] is that kind of chair at my home.*

कपिः । मम गृहे तादृश कपिः नास्ति ।

kapiḥ. mama gṛhe tādṛśa kapiḥ nāsti.
*Monkey. I don't have that kind of monkey at my home.*

कृष्णफलकम् । मम गृहे तादृश कृष्णफलकम् नास्ति ।

kṛṣṇaphalakam. mama gṛhe tādṛśa kṛṣṇaphalakam nāsti.
*Blackboard. I don't have that kind of blackboard at my home.*

युतकम्। मम समीपे तादृश युतकं नास्ति।

yutakam. mama samīpe tādṛśa yutakaṁ nāsti.
*Shirt. I don't have that kind of shirt.*

करवस्त्रम्। मम समीपे तस्य करवस्त्रं नास्ति।

karavastram. mama samīpe tasya karavastraṁ nāsti.
*Handkercief. I don't have his handkerchief.*

ईदृश करवस्त्रम् अस्ति वा ?

īdṛśa karavastram asti vā?
*Is [there] this kind of handkerchief?*

मम समीपे तादृश करवस्त्रं नास्ति।

mama samīpe tādṛśa karavastraṁ nāsti.
*I don't have that kind of handkerchief. (Lit.: Close to me [there] is not that kind of handkerchief.)*

भवतः समीपे कीदृश वस्त्रम् अस्ति ?

bhavataḥ samīpe kīdṛśa vastram asti?
*What kind of dress do you have?*

मम समीपे कीदृश वस्त्रम् अस्ति ?

mama samīpe kīdṛśa vastram asti?
*What kind of dress do I have?*

कीदृश वस्त्रम् अस्ति ? ईदृश वस्त्रम् अस्ति।

kīdṛśa vastram asti? īdṛśa vastram asti.
*[There] is what kind of dress? [There] is this kind of dress.*

मम समीपे ईदृश वस्त्रम् अस्ति।

mama samīpe īdṛśa vastram asti.
*I have this kind of dress.*

दर्शयतु।

darśayatu!
*Show!*

मम समीपे ईदृश वस्त्रम् अस्ति।

mama samīpe īdṛśa vastram asti.
*I have this kind of dress.*

मम समीपे ईदृश घटी अस्ति।

mama samīpe īdṛśa ghaṭī asti.
*I have this kind of watch.*

मम समीपे ईदृश युतकम् अस्ति।

mama samīpe īdṛśa yutakam asti.
*I have this kind of shirt.*

मम समीपे ईदृश उत्तरियम् अस्ति।

mama samīpe īdṛśa uttariyam asti.
*I have this kind of scarf.*

मम समीपे ईदृश वस्त्रम् अस्ति।

mama samīpe īdṛśa vastram asti.
*I have this kind of dress.*

मम समीपे ईदृश उपनेत्रम् अस्ति।

mama samīpe īdṛśa upanetram asti.
*I have this kind of eyeglasses.*

ईदृश कङ्कणं कस्यापि समीपे नास्ति ?

īdṛśa kaṅkaṇaṁ kasyāpi samīpe nāsti?
*Who doesn't have this kind of bracelet?*

मम समीपे ईदृश कङ्कणं अस्ति।

mama samīpe īdṛśa kaṅkaṇam asti.
*I don't have this kind of bracelet.*

ईदृश पत्रं कुत्र लभ्यते ?

īdṛśa patraṁ kutra labhyate?
*Where can you get this kind of sheet?*

तादृश पत्रं अक्षरे लभ्यते।

tādṛśa patram akṣare labhyate.
*You can get that kind of sheet in Aksharam.*

मम समीपे ईदृश करवस्त्रम् अस्ति।

mama samīpe īdṛśa karavastram asti.
*I have this kind of dress.*

ईदृश वस्त्रं कस्यापि समीपं नास्ति ।

īdṛśa vastraṁ kasyāpi samīpaṁ nāsti.
*Nobody has this kind of dress.*

ईदृश कर्णकुण्डलं **अस्याः** समीपे नास्ति ।

īdṛśa karṇakuṇḍalam **asyāḥ** samīpe nāsti.
*She doesn't have this kind of earring.* **(Mistake!)**

कस्यापि समीपे नास्ति । पुनः वदतु ।

kasyāpi samīpe nāsti. punaḥ vadatu!
*Nobody has it. Say again!* ***(Teacher corrects!)***

ईदृश कर्णकुण्डलं कस्याः समीपे नास्ति ।

īdṛśa karṇakuṇḍalaṁ kasyāḥ samīpe nāsti.
*Nobody doesn't have this kind of earing.* **(Mistake again!)**

ईदृश कर्णकुण्डलं कस्याः अपि समीपे नास्ति । पुनः वदतु ।

īdṛśa karṇakuṇḍalaṁ kasyāḥ api samīpe nāsti. punaḥ vadatu.
*Nobody (fem.) has this kind of earing. Say again!*
***(Teacher corrects!)***

ईदृश कर्णकुण्डलं कस्याः अपि नास्ति ।

īdṛśa karṇakuṇḍalaṁ kasyāḥ api nāsti.
*Nobody (fem.) has this kind of earing.*

कस्यापि समीपे नास्ति ।

kasyāpi samīpe nāsti.
*Nobody has.*

मम समीपे ईदृश युतकम् अस्ति ।

mama samīpe īdṛśa yutakam asti.
*I have this kind of shirt.*

---

*SCREEN:*

| ईदृश | तादृश | कीदृश ? |
|---|---|---|
| **īdṛśa** | **tādṛśa** | **kīdṛśa?** |
| **this kind** | **that kind** | **what kind?** |

---

*HINDI: **"This kind, that kind, what kind"** is the meaning of these three words.*

---

इदानीम् एकं नूतनम् अंशं जनीमः ।

idānīm ekaṁ nūtanam aṁśaṁ janīmaḥ.
*Now we learn one new part (chapter).*

सन्दीपः क्रीडाङ्गणं गच्छति । क्रीडति ।

sandīpaḥ krīḍāṅgaṇaṁ gacchati. krīḍati.
*Sandipa goes to the plauground. He plays.*

सन्दीपः क्रीडितुं क्रीडाङ्गणं गच्छति ।

sandīpaḥ krīḍituṁ krīḍāṅgaṇaṁ gacchati.
*Sandipa goes to the playground to play.*

सन्दीपः किमर्थं क्रीडाङ्गणं गच्छति ।

sandīpaḥ kimarthaṁ krīḍāṅgaṇaṁ gacchati.
*What for does Sandipa go to the playground?*

सन्दीपः क्रीडितुं क्रीडाङ्गणं गच्छति ।

sandīpaḥ krīḍituṁ krīḍāṅgaṇaṁ gacchati.
*Sandipa goes to the playground to play.*

बालकः विद्यालयं गच्छति । पठति ।

bālakaḥ vidyālayaṁ gacchati. paṭhati.
*Boy goes to the school. He studies.*

बालकः पठितुं विद्यालयं गच्छति ।

bālakaḥ paṭhituṁ vidyālayaṁ gacchati.
*Boy goes to school to study.*

बालकः किमर्थं विद्यालयं गच्छति ।

bālakaḥ kimarthaṁ vidyālayaṁ gacchati.
*What for does the boy go to school?*

बालकः पठितुं विद्यालयं गच्छति ।

bālakaḥ paṭhituṁ vidyālayaṁ gacchati.
*Boy goes to school to study.*

पठति । पठितुम् ।

paṭhati. paṭhitum.
*[He, she] studies. To study.*

क्रीडति । क्रीडितुम् ।

krīḍati. krīḍitum.
*Plays. To play.*

खादति । खादितुम् ।

khādati. khāditum.
*Eats. To eat.*

जानाति । ज्ञातुम् ।

jānāti. jñātum.
*Knows. To know.*

वदति । वक्तुम् ।

vadati. vaktum.
*Says. To say.*

पिबति । पातुम् ।

pibati. pātum.
*Drinks. To drink.*

गच्छति । गन्तुम् ।

gacchati. gantum.
*Goes. To go.*

आगच्छति । आगन्तुम् ।

āgacchati. āgantum.
*Comes. To come.*

उत्तिष्ठति । उत्थातुम् ।

uttiṣṭhati. utthātum.
*Stands up. To stand up.*

उपविशति । उपवेष्टुम् ।

upaviśati. upaveṣṭum.
*Sits down. To sit down.*

जानाति । ज्ञातुम् ।

jānāti. jñātum.
*Knows. To know.*

करोति । कर्तुम् ।

karoti. kartum.
*Does. To do.*

शृणोति । श्रोतुम् ।

śṛṇoti. śrotum.
*Listens. To listen.*

वदति । वक्तुम् ।

vadati. vaktum.
*Says. To say.*

शृणोति । श्रोतुम् ।

śṛṇoti. śrotum.
*Listens. To listen.*

खादति । खादितुम् ।

khādati. khāditum.
*Eats. To eat.*

ददाति । दातुम् ।

dadāti. dātum.
*Gives. To give.*

पश्यति । द्रष्टुम् ।

paśyati. draṣṭum.
*Looks, To look.*

---

इदानीम् अन्यविधाभ्यासं कुर्मः । अहम् एकं वाक्यं वदामि ।

idānīm anya-vidhābhyāsaṁ kurmaḥ. aham ekaṁ vākyaṁ vadāmi.
*Now we do another kind of practice. I say one sentence.*

यथा - बालकः विद्यालयं गच्छति । भवन्तः बालकः विद्यालयं गन्तुम् इच्छति । ज्ञातं वा ?

yathā – bālakaḥ vidyālayaṁ gacchati. bhavantaḥ "bālakaḥ vidyālayaṁ gantum icchati." jñātaṁ vā?
*Per example – boy goes to the school. You: "Boy wants to go to the school." You understood?*

ज्ञातम् ।

jñātam.
*We understood.*

रमेशः क्रिकेट् क्रीडति ।

rameśaḥ kriket krīḍati.
*Ramesha plays cricket.*

रमेशः क्रिकेट् क्रीडितुम् इच्छति ।

rameśaḥ kriket krīḍitum icchati.
*Ramesha wishes to play cricket.*

राघवः पठति ।

rāghavaḥ paṭhati.
*Raghava studies.*

राघवः पठितुम् इच्छति ।

rāghavaḥ paṭhitum icchati.
*Raghava wants to study.*

मुखेशः वदति ।

mukheśaḥ vadati.
*Mukhesha speaks.*

मुखेशः वक्तुम् इच्छति ।

mukheśaḥ vaktum icchati.
*Mukhesha wants to speak.*

लता क्रीडति ।

latā krīḍati.
*Lata plays.*

लता क्रीडितुम् इच्छति ।

latā krīḍitum icchati.
*Lata wants to play.*

वेङ्कटेशः चालयति ।

veṅkaṭeśaḥ cālayati.
*Venkatesha drives.*

वेङ्कटेशः चालयितुम् इच्छति ।

veṅkaṭeśaḥ cālayitum icchati.
*Venkatesha wants to drive.*

महेशः चलनचित्रं पश्यति ।

maheśaḥ calanacitraṁ paśyati.
*Mahesha watches a movie.*

महेशः चलनचित्रं द्रष्टुम् इच्छति ।

maheśaḥ calanacitraṁ draṣṭum icchati.
*Mahesha wants to watch a movie.*

षण्मुखः गृहे वासं करोति ।

ṣaṇmukhaḥ gṛhe vāsaṁ karoti.
*Shanmukha resides at home.*

षण्मुखः गृहे वासं कर्तुम् इच्छति ।

ṣaṇmukhaḥ gṛhe vāsaṁ kartum icchati.
*Shanmukha wants to reside at home.*

वासुदेवः दिल्लिं गच्छति ।

vāsudevaḥ dilliṁ gacchati.
*Vasudeva goes to Delhi.*

वासुदेवः दिल्लिं गन्तुम् इच्छति ।

vāsudevaḥ dilliṁ gantum icchati.
*Vasudeva wants to go to Delhi.*

महिला आभरणं धरति ।

mahilā ābharaṇaṁ dharati.
*Lady wears an ornament.*

महिला आभरणं धरितुम् इच्छति ।

mahilā ābharaṇaṁ **dharitum** icchati.
*Lady wants to wear an ornament.* ***(Mistake!)***

धर्तुम् इच्छति ।

dhartum icchati.
*Wants to wear.* ***(Teacher corrects!)***

महिला आभरणं धर्तुम् इच्छति ।

mahilā ābharaṇaṁ dhartum icchati.
*Lady wants to wear an ornament.*

पुरुषः शक्तिं प्रदर्शयति ।

puruṣaḥ śaktiṁ pradarśayati.
*A man shows strength.*

पुरुषः शक्तिं प्रदर्शयितुम् इच्छति ।

puruṣaḥ śaktiṁ pradarśayitum icchati.
*A man wants to show strength.*

पण्डितः कथां वदति ।

paṇḍitaḥ kathāṁ vadati.
*A wise man tells a story.*

पण्डितः कथां वक्तुम् इच्छति ।

paṇḍitaḥ kathāṁ vaktum icchati.
*A wise man wants to tell a story.*

गायकः गीतं गायति ।

gāyakaḥ gītaṁ gāyati.
*The singer sings a song.*

गायकः गीतं गातुम् इच्छति ।

gāyakaḥ gītaṁ gātum icchati.
*The singer wants to sing a song.*

---

*HINDI: all these are* **ktumum-pratyāyāntāḥ** *(infinitives) – ending in* **-tum: gantum, paṭhitum, lekhitum** *etc.*

---

सुभाषितम् ।

**subhāṣitam.**
***Verse.***

इदानीम् वयम् एकं सुभाषितं शृण्मः ।

idānīm vayam ekaṁ subhāṣitaṁ śṛṇmaḥ.
*Now we [will] listen to one verse.*

मातृवत् परदारेषु परद्रव्येषु लोष्ट्रवत् ।

आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः ।

mātṛvat para-dāreṣu para-dravyeṣu loṣṭravat
ātmavat sarva-bhūteṣu yaḥ paśyati sa paṇḍitaḥ

mātṛvat – *like mother;* para-dāreṣu– *in other women;* para-dravyeṣu – *in others' riches;* loṣṭravat – *like dirt;* ātmavat – *like himself;* sarva-bhūteṣu– *all living entitites;* yaḥ – *who;* paśyati – *sees;* saḥ – *he;* paṇḍitaḥ– *wise.*

*The one who sees other women as his mother, others' riches as dirt, other living beings as himself, he is wise.*

श्रुतस्य सुभाषितस्य अर्थः एवम् अस्ति ।

śrutasya subhāṣitasya arthaḥ evam asti.
*Here is the meaning of the verse [we] heard.*

सर्वदा पण्डितः उदारदृष्ट्या पश्यति । पण्डितः इत्य् उक्ते सज्जनः ।

sarvadā paṇḍitaḥ udāra-dṛṣṭyā paśyati. paṇḍitaḥ ity ukte sajjanaḥ.
*A wise man always looks with broad vision. A wise man means saintly person.*

सज्जनः अन्यभगिनीः, अन्यमहिलाः कथं पश्यति ? अन्यभगिनीः सः मातरः इत्येव चिन्तयति । तया दृष्ट्या एव पश्यति ।

sajjanaḥ anya-bhaginīḥ, anya-mahilāḥ kathaṁ paśyati? anya-bhaginīḥ saḥ mātaraḥ ityeva cintayati. tayā dṛṣṭyā eva paśyati.

*How does a saintly person see other women, other ladies? He thinks other women are mothers. He only sees with that vision.*

एवमेव बाहूनां समीपे धनं भवति, सम्पद् भवति, सज्जनः कया दृष्ट्या पश्यति । सः तद् धनं परेषं धनं मृत्तिकां इव पश्यति । तद् धनं मृत्तिका समाना इति एव चिन्तयति ।

evam eva bāhūnāṁ samīpe dhanaṁ bhavati, sampad bhavati, sajjanaḥ kayā dṛṣṭyā paśyati? saḥ tad dhanaṁ, pareṣaṁ dhanaṁ mṛttikām iva paśyati. tad dhanaṁ mṛttikā samānā iti eva cintayati.
*In the same way if there is money, riches at his hands, with what vision does the saintly person see it? He sees that money, others' money like earth. He thinks that money is the same like earth.*

एवमेव प्राणिनः जीवन्ति प्रपञ्चे । प्राणिनां विषये सज्जनस्य व्यवहारः कथं भवति ? यथा स्वस्य विषये मृदुतया श्रेष्ठतया व्यवहारं करोति तथैव सर्वप्राणिभिः सः व्यवहारं करोति ।

evam eva prāṇinaḥ jīvanti prapañce. prāṇināṁ viṣaye sajjanasya vyavahāraḥ kathaṁ bhavati? yathā svasya viṣaye mṛdutayā, śreṣṭhatayā vyavahāraṁ karoti, tathaiva sarva-prāṇibhiḥ saḥ vyavahāraṁ karoti.
*In the same way living beings live in the world. How does the saintly person relate to the living beings? Just as he relates to himself with gentleness, with excellence in the same way he relates with all the living entities.*

एवं पण्डितस्य दृष्टिः सर्वदा विशाला भवति । तादृशः एव पण्डितः इति उच्यते ।

evaṁ paṇḍitasya dṛṣṭiḥ sarvadā viśālā bhavati. tādṛśaḥ eva paṇḍitaḥ iti ucyate.
*Thus wise man's vision is always broad. It is said that only such a man is truly wise.*

सुभाषितस्य अर्थः ज्ञातः वा ?

subhāṣitasya arthaḥ jñātaḥ vā?
*Have you understood the verse?*

आम् । ज्ञातः ।

ām. jñātaḥ.
Yes. We have understood.

---

## कथा

**kathā**
***Story***

अहम् इदानीम् एकं कथां वदामि ।

aham idānīm ekaṁ kathāṁ vadāmi.
*Now I [will] tell you one story.*

एकः ग्रामः । ग्रामे एकः सत्पुरुषः । सः बहु सज्जनः । सः जीवनार्थं धनस्य सङ्ग्रहं न कृतवान् । भिक्षातणवृत्त्या जीवनं करोति स्म ।

ekaḥ grāmaḥ. grāme ekaḥ satpuruṣaḥ. saḥ bahu sajjanaḥ. saḥ jīvanārthaṁ dhanasya saṅgrahaṁ na kṛtavān. bhikṣātaṇa-vṛttyā jīvanaṁ karoti sma.
*There was a village. In the village there was a holy man. He was a very saintly person. He didn't collect money for living. He was living by collecting alms.*

भिक्षातणं करोति, जीवनं करोति । धनसङ्ग्रहं न करोति । प्रतिदिनं तपः करोति । प्रातःकाले मध्याह्ने रात्रौ एवं तदा तदा तपः करोति ।

bhikṣātaṇaṁ karoti, jīvanaṁ karoti. dhana-saṅgrahaṁ na karoti. pratidinaṁ tapaḥ karoti. prātaḥ-kāle, madhyāhne, rātrau evaṁ tadā tadā tapaḥ karoti.
*He begs for alms, he lives. He doesn't accumulate money. Every day he does austerities. In the morning, in the afternoon, in the evening, in all those times of the day he does austerities.*

तपः करोति, मनसः संस्कारः भवति । तत् कारणतः तस्य मनः शुधं सत्त्विकं अस्ति ।

tapaḥ karoti, manasaḥ saṁskāraḥ bhavati. tat kāraṇataḥ tasya manaḥ śudhaṁ sattvikam asti.
*He does penance and it makes impression in the mind. For that reason his mind is pure and sattvic.*

एका शक्तिः आगता । तपसः प्रभावेन तस्य मनसः एका शक्तिः आगता ।

ekā śaktiḥ āgatā. tapasaḥ prabhāvena tasya manasaḥ ekā śaktiḥ āgatā.
*One power comes. By the impact of the austerity an ability came to his mind.*

का सा शक्तिः ? अन्यस्याः मनसि अथवा अन्यस्य मनसि यः भावः भवति तं भावं सः सज्जनः ज्ञातुं शक्नोति । सः सत्पुरुषः तपसः प्रभावेण एव तत् सर्वं ज्ञातुं शक्नोति स्म ।

kā sā śaktiḥ? anyasyāḥ manasi athavā anyasya manasi yaḥ bhāvaḥ bhavati, taṁ bhāvaṁ saḥ sajjanaḥ jñātuṁ śaknoti. saḥ sat-puruṣaḥ tapasaḥ prabhāveṇa eva tat sarvaṁ jñātuṁ śaknoti sma.
*What was that ability? Whatetever disposition is in the mind of other people, of other person, he was able to know that disposition. By the influence of the austerity, the holy man was able to know all that.*

एकदा सः अन्यं ग्रामं गच्छति । सः ग्रामः दूरे अस्ति । मार्गे आयसः भवति । समीपे एकं कुटीरं पश्यति ।

ekadā saḥ anyaṁ grāmaṁ gacchati. saḥ grāmaḥ dūre asti. mārge āyasaḥ bhavati. samīpe ekaṁ kuṭīraṁ paśyati.
*Once he goes to another village. That village is far away. He becomes weary. He sees a hut nearby.*

तत्र गच्छति स्वामिनं पृच्छति "कृपया किञ्चिद् जलं ददातु ।"

tatra gacchati svāminaṁ pṛcchati "kṛpayā kiñcid jalaṁ dadātu."
*He goes there and asks the householder: "Please give me a little water."*

यजमानः आगच्छति जलं ददाति । यदा किञ्चित् पिबति तस्य मनसि किम् अपि भवति । सः चिन्तयति "जलं पर्याप्तम् । गच्छामि" इति त्वरां करोति ।

yajamānaḥ āgacchati, jalaṁ dadāti. yadā kiñcit pibati, tasya manasi kim api bhavati. saḥ cintayati "jalaṁ paryāptam. gacchāmi" iti tvarāṁ karoti.
*The person who performs the sacrifice comes and gives the water. When he drinks a little, something happens in his mind. He thinks: "Enough water. I go," thus he hastes away.*

तदा गृहस्य स्वामी वदति "भोः, न गच्छतु । किञ्चित् क्षीरं ददामि । क्षीरं स्वीकरोतु ।"

tadā gṛhasya svāmī vadati "bhoḥ, na gacchatu. kiñcit kṣīraṁ dadāmi. kṣīraṁ svīkarotu."
*Then the owner of the house says: "Sir, don't go. I will give you some milk. Take the milk."*

परन्तु एषः सज्जनः वदति "नैव, अहं गच्छामि ।"

parantu eṣaḥ sajjanaḥ vadati "naiva, ahaṁ gacchāmi."
*But the saintly man says: "No, I am going."*

परन्तु गृहस्वामी बहु आग्रहं करोति ।

parantu gṛha-svāmī bahu āgrahaṁ karoti.
*But the lord of the house insists very much.*

अन्तः गच्छति क्षीरम् आनयति । बहु आग्रहकारणतः सः सज्जनः तिष्ठति, क्षीरं गृह्णाति ।

antaḥ gacchati kṣīram ānayati. bahu āgraha-kāraṇataḥ saḥ sajjanaḥ tiṣṭhati, kṣīraṁ gṛhṇati.
*He goes inside and brings the milk. Due to strong insistance he stays and takes the milk.*

सज्जनः स्वीकृतवान् आग्रहकारणतः, परन्तु हस्तेन किञ्चिद् एव क्षीरं पीतवान्।

sajjanaḥ svīkṛtavān āgraha-kāraṇataḥ, parantu hastena kiñcid eva kṣīraṁ pītavān.
*The saintly man took it because of the householder's insistance, but he only drank with his hand a little milk.*

तदा एव तस्य मनसि एकविधस्पन्दनम् अभवत्। सः गृहस्वामिनं पृष्टवान् "भवतः गृहे धेनुः अस्ति वा ?"

tadā eva tasya manasi eka-vidha-spandanam abhavat. saḥ gṛha-svāminaṁ pṛṣṭavān "bhavataḥ gṛhe dhenuḥ asti vā?"
*Then there was some sort of pulsation in his mind. He asked the householder: "Is there a cow at your home?"*

गृहस्वामी वदति "आम्, अस्ति।"

gṛha-svāmī vadati "ām, asti."
*The householder says: "Yes, there is."*

पुनः सत्पुरुषः पृच्छति "एकवरं द्रष्टुम् इच्छामि।"

punaḥ sat-puruṣaḥ pṛcchati "eka-varaṁ draṣṭum icchāmi."
*The saintly man asks again: "I want to take a look at it once."*

"अस्तु, आगच्छतु" इति सत्पुरुषं गृहस्वामी नयति।

"astu, āgacchatu" iti sat-puruṣaṁ gṛha-svāmī nayati.
*"All right, come," the householder leads the saintly man.*

सत्पुरुषः धेनुं पश्यति। धेनोः कण्ठे बन्धनम् अस्ति। बन्धनम् अपि पश्यति। धेनोः बहिः गमन मार्गम् अपि पश्यति।

satpuruṣaḥ dhenuṁ paśyati. dhenoḥ kaṇṭhe bandhanam asti. bandhanam api paśyati. dhenoḥ bahir gamana mārgam api paśyati.
*The saintly man looks at the cow. There is a rope around the cow's neck. He takes a look at the rope. Going outside from the cow he looks to the street as well.*

तदा गृहस्वामी पृच्छति "किमर्थं भवान् तथा पश्यति ?"

tadā gṛha-svāmī pṛcchati "kim arthaṁ bhavān tathā paśyati?"
*Then the householder asks: "Why do you look around that way?"*

तदा "किमपि नास्ति" इति सत्पुरुषः वदति।

tadā "kim api nāsti" iti sat-puruṣaḥ vadati.
*Then the holy mans says: "It's nothing."*

तदा पुनः एषः हस्वामी आग्रहं करोति "वदतु, वदतु !"

tadā punaḥ eṣaḥ gṛha-svāmī āgrahaṁ karoti: "vadatu, vadatu!"
*But then this householder persists again: "Say, say!"*

"अस्तु" इति सत्यं वदति।

"astu" iti satyaṁ vadati.
*"All right," thus he says the truth.*

"एषा धेनुः भवदीया धेनुः न। कुतश्चित् चोरिता धेनुः। सत्यं वा न वा ?"

"eṣā dhenuḥ bhavadīyā dhenuḥ na. kutaścit coritā dhenuḥ. satyaṁ vā na vā?"
*"This cow is not your cow. This cow was stolen from somewhwere. Is it true or not?"*

तदा गृहस्वामिनः मुखं म्लानं भवति। "सत्यम्। परन्तु भवान् कथं ज्ञातवान् ?" इति पृच्छति।

tadā gṛha-svāminaḥ mukhaṁ mlānaṁ bhavati. "satyam. parantu bhavān kathaṁ jñātavān?" iti pṛcchati.
*Then the mouth of the householder withered. "It is true. But how did you know?" he asked.*

तदा एषः वदति सत्पुरुषः भोः, गृहस्वामिन्! भवान् क्षीरं दत्तवान्। तदा मम मनसि विकारः समापनः। मम मनसि अपि 'अहं चोरयामि' इति भावः उत्पन्नः।

tadā eṣaḥ vadati satpuruṣaḥ "bhoḥ, gṛha-svāmin! bhavān kṣīraṁ dattavān. tadā mama manasi

vikāraḥ samāpanaḥ. mama manasi api 'ahaṁ corayāmi' iti bhāvaḥ utpannaḥ."
*Then this holy mans says: "Oh, householder! You gave me milk. Then in my mind a change took place. In my mind an emotion sprang up: 'I shall steal.'"*

"तदार्थम् अहं घोष्ठं गत्वा सर्वं दृष्टवान्।"

"tadārtham ahaṁ ghoṣṭhaṁ gatvā sarvaṁ dṛṣṭavān."
*"Therefore I saw everything after going to the shed."*

"परन्तु यदा 'चौर्यं करणीयम् एव' इति महती च अभवत्, अहं गन्तुं त्वरां कृतवान्।

"parantu yadā 'cauryaṁ karaṇīyam eva' iti mahatī ca abhavat, ahaṁ gantuṁ tvarāṁ kṛtavān."
*"But when the thought was there that 'theft should be done', I hurried to go away."*

"एवं आहारस्य प्रभावः मनसः उपरि भवति। चोरः यदि आहारं ददाति मनुष्यस्य अपि चौर्यबुद्धिः भवति।"

"evam āhārasya prabhāvaḥ manasaḥ upari bhavati. coraḥ yadi āhāraṁ dadāti manuṣyasya api caurya-buddhiḥ bhavati."
*"In this way food influences the mind. If a thief gives food to a person, that person's inteligence becomes fixed on stealing as well."*

"एवमेव एतस्मिन् सन्दर्भे अभवत्। अहं चिन्तितवान् एषा धेनुः चोरिता धेनुः, तदर्थं मम मनसि अपि 'चौर्यं करणीयम्' इति बुद्धिः उत्पन्न।"

"evam eva etasmin sandarbhe abhavat. ahaṁ cintitavān eṣā dhenuḥ coritā dhenuḥ, tadarthaṁ mama manasi api 'cauryaṁ karaṇīyam' iti buddhiḥ utpanna."
*It so happened in this context. I thought this cow is stolen, therefore in my mind also thinking sprang up that 'there shall be stealing'.*

"सत्यं वा न वा। एषा धेनुः चोरिता वा न वा।"

"satyaṁ vā na vā? eṣā dhenuḥ coritā vā na vā?"
*Is it truth or not? Is the cow stolen or not?*

तदा गृहस्वामी स्वात्मनः दोषं अङ्गीकरोति। "सत्यम्। इतः परं अहम् एतं मम गृहे न स्थापयामि। एतस्य यजमानाय प्रत्यर्पयामि" इति वदति प्रत्यर्पयति च।

tadā gṛha-svāmī svātmanaḥ doṣam aṅgīkaroti. "satyam. itaḥ param aham etaṁ mama gṛhe na sthāpayāmi. etasya yajamānāya pratyarpayāmi" iti vadati pratyarpayati ca.
*Then the householder accepts his own fault. "It's true. From now on I won't keep this at my home. I give it back to this man who performs sacrifices," he says and gives it back.*

कथायाः अर्थः ज्ञातः किल ?

kathāyāḥ arthaḥ jñātaḥ kila?
*You have understood the story, haven't you?*

आम्। ज्ञातः।

ām. jñātaḥ.
*Yes. We have understood.*

धन्यवादः। नमो नमः।

dhanyavādaḥ. namo namaḥ.
*Thank you. Salutations.*

नमो नमः।

namo namaḥ.
*Salutations.*

---

**Teacher:**

रामकृष्णः

rāmakṛṣṇaḥ

**Students:**

सोमनाथः एम्.जे. दिलीप सि.शेखर सूरज् एस्.

Somanāthaḥ M. J. Dilīpa C. Śekhara Sūraj S.

विपिन् बि.पि. अभिजित् बि.आर्. सुशान्त एम्.एस्.

Vipin B. P. Abhijit B. R. Suśānta M. S.

यतींद्र डि.  निखिल् सि.  अभिजित् एस्.

Yatīndra Ḍ.  Nikhil S.  Abhijit S.

अखिला गुरुमूर्ति  कीर्तिना भट् के.  लेखना डि.

Akhilā Gurumūrti  Kīrtinā Bhaṭ K.  Lekhanā Ḍ.

दिव्या आर्.  काव्या वि. पुजारी  वैष्णवी वेणु

Divyā R.  Kāvyā Vi. Pujārī  Vaiṣṇavī Veṇu

पूजा एल्. राव्  गौतमी एस्. राव्  सौम्या उपाद्याय

Pūjā L. Rāv  Gautamī S. Rāv  Saumyā Upādyāya